# पुष्करसंहिता

सम्पादक:

[illegible]

[illegible]

खण्ड १

२०४२ वि० सं०

(१९८५)

श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठग्रन्थप्रकाशनमालान्तर्गतम्
'सप्तदशपुष्पम्' –

# भृङ्गीशसंहिता

# BHRINGEESH-SAMHITA

[Topography of Ancient Kashmir]


सम्पादकः

**यशःपालखजूरिया**

व्याकरणविभागाध्यक्षः



**श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठम्, जम्मू**

राष्ट्रियसंस्कृतसंस्थानसञ्चालितम्

[मानवसंसाधनविकास[शिक्षा]मन्त्रालयेन संस्थापितम।]

प्रकाशक:—

डॉ० मुरलीधरपाण्डेय:, प्राचार्य:



मूल्यम् = १३२-८० रूप्यकानि

प्रथमं संस्करणम्, १९८५

(श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठस्य तत्त्वावधाने सम्पादितम्)


मुद्रक:—

एस. एन. मगोत्रा प्रिन्टर्ज

गली खिलोनेआं, जम्मू

# श्रीचक्रम्

***



बिन्दुत्रिकोणवसुकोण-दशार-युग्म-
मन्वस्र-नागदल-सङ्गत-षोडशारम् ।
वृत्तत्रयं च धरणी-सदन-त्रयञ्च
श्रीचक्रमेतदुदितं परदेवतायाः ॥

['ललितास्तवरत्नम्' ग्रन्थात्साभारं गृहीतम्]

## डॉ० मुरलीधरपाण्डेय:

प्राचार्य:

जम्मूस्थरणवीरकेन्द्रीयसंस्कृतविद्यापीठस्य

संस्कृतवाङ्मये कश्मीरमण्डलस्य महत्त्वमवदानञ्च सर्वविदितमस्ति । पुरातिप्रसिद्धं शारदापीठं कश्मीरमण्डलस्यैवाङ्गभूतमासीत् । अस्य कश्मीरमण्डलस्य भौगोलिकीमैतिहासिकी साहित्यिकी धार्मिकी पौराणिकी सम्पत्तिं परिचिन्वन्तोऽनेके ग्रन्था 'राजतरङ्गिणी' श्रीमज्जयरथविरचितचिन्तामणिः, नीलमतम्, वासुकिपुराणम् प्रभृतयो विद्वत्कण्ठालङ्कारभूताः सन्ति । एतेष्वेव 'भृङ्गीशसंहिता' ग्रन्थोऽपि विद्यते । यद्यपि पूर्वोक्ता राजतरङ्गिण्यादयोऽपि ग्रन्थाः कश्मीरस्य तादृशीं सम्पत्तिं वर्णयन्ति किन्तु भृङ्गीशसंहिता कस्मिंश्चिदंशे तानतिशेते । अस्यां संहितायां विशेषतः पुण्यप्रदानां धार्मिकस्थानानां तीर्थाणां देवानां देवीनां नदीनां जलस्रोतसां महत्त्वं वर्णितमस्ति । नीलमतपुराणेऽपि तीर्थादीनां वर्णनमस्ति किन्तु संक्षेपरूपेण, भृङ्गीशसंहितायाञ्च विस्तृतमस्ति । राजतरङ्गिण्यां तु विशेषतो राज्ञां चरितवर्णनमुपलभ्यते न विशेषतस्तीर्थानाम् । हरचरितचिन्तामणौ श्रीशङ्करस्य चरितानि विशेषतो वर्णितानि सहैव तीर्थान्यपि । किन्तु भृङ्गीशसंहितायां धार्मिकस्थानानां तत्रापि वितस्तानद्याः सविशेषं वर्णनम् । एतत्संहितासहाय्येन कश्मीर-

मण्डलस्य धार्मिकस्थानानां भौगोलिकमैतिहासिकं परिचयं च सम्यगवाप्तुं शक्यते । अयं संग्रहग्रन्थः पटलरूपेण विभक्तः, प्रायः प्रत्येकं पटलमेकैकतीर्थक्षेत्रादिमाहात्म्यवर्णनरूपम् । एकं तीर्थं देवं वाश्रित्य तदेकचरिताधारेणानेकानि पटलानि निर्मितानि ।

ग्रन्थस्य बाह्यसाक्ष्याधारेणान्तःसाक्ष्याधारेण वेदमधिगन्तुं न पार्यते यदिदं कृतिरेकस्यैव कस्यापि अथवा अनेकेषां रचयितॄणां विरचितमाहात्म्यानां संग्रहः । अस्य वस्तुतो नाम श्रीसंहिता यथा मध्ये मध्ये पटलान्तपुष्पिकासु निर्दिष्टम् । यत्र कुत्रापि भृङ्गीशसंहितेत्यपि निर्दिष्टम् । श्रीभृङ्गीशः ग्रन्थवर्णितानां राज्ञीमाहात्म्यभृतीनां माहात्म्यानां संग्राहकोऽथवा माहात्म्यानामयमेव एक रचयितेति न निर्णेतुं शक्यते ।

जम्मूस्थश्रीरघुनाथसंस्कृतानुसन्धानपुस्तकालये भृङ्गीशसंहितायाः हस्तलिखिता मातृका उपलभ्यन्ते । तत्र एकविंशतिः माहात्म्यानां संख्या वर्तते । स्टीनमहोदयः काश्मीरिकानां माहात्म्यानां संख्या एकपञ्चाशत् अलिखत् । किन्तु एकपञ्चाशत् संख्याकमाहात्म्यघटिता भृङ्गीशसंहिता कुत्रापि नोपलभ्यते । भृङ्गीशसंहितान्तर्गतं माहात्म्यं पृथक् पृथक् एकैकग्रन्थरूपेणापि प्राप्यते । यथा वितस्तामाहात्म्यम् केवलं पृथगेव पुस्तकाकारेण कश्मीरविश्वविद्यालयद्वारा प्रकाश्यमाना वर्तते । जम्मूविद्यापीठं स्व शैशवकाले एव १९७२ ईश्वीये अस्याः संहितायाः प्रकाशनार्थं निरणयत् । किन्तु केनापि कारणेनायं निर्णयस्तत्काले कार्यरूपतां नाप्नोत् । तदनन्तरम् १९८३ ईश्वीये वर्षे अस्याः प्रकाशनाय पुनर्विचारोऽजायत । विद्यापीठाधिकारिभिः एतत्सम्पादनकार्यनिर्वहणाय श्रीयशःपालखजूरियामहोदयं व्याकरणविभागाध्यक्षं निरचिनोत् । दिल्लीस्थराष्ट्रियसंस्कृतसंस्थानाधिकारिभिश्चैतदनुमोदितम् ।

श्रीयशःपालखजूरिया महोदयेन यथा कथञ्चित् प्राप्ताभिः सर्वाभिः मातृकाभिः यथाशक्तिपाठभेदादिकं संशोध्य संनियोज्य ह्यन्ते च परिशिष्टद्वयेन तत्रापि 'हर्षेश्वर' 'मार्तण्ड' ध्यानेश्वर पौराणिकगङ्गा नीलनागमाहात्म्यानि सन्निवेश्योक्तग्रन्थः सुसम्पादितः ।

जम्मूनगरे संस्कृतभाषानिबद्धग्रन्थानां मुद्रणार्थं क्षमो मुद्रणालयः प्रायो नास्त्येव । अतोऽनावश्यकरूपेणात्यधिको विलम्बो जातः । मन्ये प्रकाशितेनानेन ग्रन्थेन कश्मीरविषयकानुसन्धानपराणां विमर्शकानां कृते महानुपकारो भविष्यति । एतादृशानां ग्रन्थानां पठनपाठनाभावेन च बह्व्योऽशुद्धयः सम्भाव्यन्ते । आशासे क्षमाधना विपश्चितः शंस्यन्ति ।

अस्य ग्रन्थस्य सम्पादकः श्रीयशःपालखजूरियामहोदयः (व्याकरणविभागाध्यक्षः) विशेषरूपेण धन्यवादार्हः, येन हि स्वीये व्यस्तेऽपि कार्यकाले यथावश्यकं कार्यं प्रपूर्य सम्पादन-मुद्रणादिकार्यं समीचीनतया सुसम्पादितम् ।

विदुषां विधेयः

**मुरलीधरपाण्डेयः**

प्रधानाचार्यः

२०४२ वै० सं० आश्विनशुक्ले
द्वितीयायां बुधे
१६-१०-१९८५

# भृङ्गोशसंहिता

यश:पालखजूरिया

# प्रास्ताविकम्

परिचय:-

एषा भृङ्गीशसंहिता काश्मीरेषु प्रसिद्धाऽऽसीत् । संहितेयं कल्हणकृतराजतरङ्गिणी क्षेमेन्द्रकृतबृहत्कथावच्च विस्तृताऽऽसीत् । गच्छता कालेनेयं संहिता कालदुष्प्रभावाद्विलुप्ता सञ्जाता तदंशाः माहात्म्यरूपेणेदानीं काश्मीरेषु प्रचलितास्सन्ति । *'श्रीसंहितास्य' ग्रन्थरत्नस्य संज्ञापि आसीद्यथा—

१. इति श्रीसंहितायां वराहमूले केदारमाहात्म्यं नाम पटलः ।

२. इति श्रीसंहितायां भैरवविषयकेदारमाहात्म्यं नाम पटलः ।

इत्यादिकम् ।

सैवेदानीं भृङ्गीशसंहितेति नाम्ना ख्यातास्ति । अस्य ग्रन्थस्य आद्योपान्तपारायणेन न कुत्रापि लेखकस्य परिचयो लभ्यते, केन कदा वायं ग्रन्थ अकारीति । भृङ्गीशः गणः, भृङ्गीशो ऋषिः, भृङ्गीश आचार्य, इत्येतेषु कोऽस्य भृङ्गीशः, इति निर्णेतुं न शक्यते । **'कश्यपशाण्डिल्यभृङ्गीशादि-

---

*भृङ्गीशसंहिता पृ०=८, ३०, ४०, ४६, ५१, ५७, ७५, ८१, १०१, ११६, १३३, १३८, १४७, १६५, १७०, १८५, १९०, १९७, २०६, २११, २१६, २३७, २६४, ३२६, ३३१, ३३३ ३४०, ६४९ ।

**काश्मीरेतिहासः पृ० १—२

महर्षिगणाः, इत्यादिना भृङ्गीशस्य महर्षित्वं सिध्यति । 'हेलाराजभृङ्गीशनीलच्छबिल्लाकरसुव्रतक्षेमेन्द्रकल्हणजोनराजश्रीवरप्राज्यभट्टशुकप्रख्यैरैतिहासिकैरितिहासपुराणमाहात्म्यादिलेखनोत्तमोत्तमप्रदेशसंवर्णनादिना' इत्यत्र भृङ्गीशस्यैतिहासविद्रूपेण पुराणमाहात्म्यादिलेखकरूपेण वा परिचयो लभ्यते । मम मते महर्षिणा भृङ्गीशेन बीजरूपेणोप्ता पश्चाद् भृङ्गीशेनाचार्येण संवर्धितेयं संहिता ।

संहितायाम काश्मीरस्य तीर्थानामेव प्रधानतया वर्णनं क्रियते । कृतिरेषा ऐतिहासिकभौगोलिकादीनाञ्च विषयाणां विपुलस्रोतसं निर्दिशति । काश्मीरिकाणां तीर्थमाहात्म्याभिरुचिस्तदानीं मुखरा आसीदिति प्रतीयते । तीर्थानां यात्राप्रसंगस्तेषां पूजनं तत्रार्चाविधिः, पूजाकालः, महोत्सवाः, वनोपवनानि, ह्रदाः स्रोतांसि, विग्रहाः स्नानपूजादानध्यानश्राद्धहोमजपस्वाध्यायादयः इत्येतेषां विषयाणामुल्लेखोऽस्यां संहितायामतिविस्तृतेन रूपेण ग्रन्थकर्त्रा क्रियते । डॉ० *स्टाईनमहोदयानुसारं तीर्थानाम्माहात्म्यं द्वादशशताब्द्यां विशदरूपेणासीत्, राजतरङ्गिणीदर्शनेनाप्येवं प्रतीयते ।

माहात्म्यानि – अनेकेषु संस्कृतग्रन्थेषु काश्मीरस्य तीर्थमाहात्म्यानि वर्ण्यन्ते, पुराणोपपुराणेषु संहितासु चैषां तीर्थमाहात्म्यानां वर्णनं लभ्यते । माहात्म्यान्यधिकसंख्याकानि सन्ति । माहात्म्यवर्णनमपि एक साहित्यमेव भवति । एषु लौकिककथानां सप्रसंगवर्णन तीर्थमाहात्म्येन सह सम्बन्धदर्शनं च विधीयते । तीर्थयात्राभिस्तत्राध्यात्मिको लाभः लभ्यते तत्र तैश्च विशेषरीतिनामनेकस्थितिनाञ्च विधानं सम्पाद्यते । एकेन माहात्म्येनानेकतीर्थमाहात्म्यानां निर्देशो लभ्यते ।

काश्मीरिकमाहात्म्यानां सर्वप्रथमं मूल्याङ्कनं प्रो० बूल्लरमहोदयेन स्वीयेषु निबन्धेषु कृतमासीत् । तत्रेदं कार्यं काश्मीरस्य 'क्षेत्रपर्यावरणं' (Topography) विषयकं वर्तते । प्रो० बूल्लरः तादृशान्षोडशग्रन्थान्

---

*Ancient geography of Kashmir pag —31

निर्दिशति परं डॉ० स्टाईन महाभागेनैकपञ्चाशन्माहात्म्यानि स्वीयकाश्मीरयात्राप्रसंगे संगृहीतान्यासन् । तेषु कानिचिल्लघुभूतानि लौकिकानि कथोपकथनानि सन्ति, कानिचिद्वितस्तामाहात्म्यादीनि विस्तृतान्यपि सन्ति । *माहात्म्यानां लेखनकालो भिन्न एवास्ति, तेषां सूक्ष्मपरीक्षणेन ज्ञायते यत्तेषां लेखनादिकार्यं पूर्वग्रन्थानुसारमभवत् । तद्यथा हरमुकुटगङ्गा—अमरनाथगुहा—वितस्तामाहात्म्यादीनि सन्ति । केवलं वितस्तामाहात्म्यपठनेन तत्र समागतानां तीर्थानां वर्णनेन एतेषां कालनिर्णयोऽपि विधातुं शक्यते । एषु माहात्म्येषु लौकिकगाथाः वर्ण्यन्ते । भृङ्गीशसंहितायां काश्मीरिकमाहात्म्यानामेव संग्रहोऽस्ति । पुरा इमानि माहात्म्यानि पुरोहितानां गृहे सुरक्षितान्यासन् । पुरोहिताः यात्रिणामाग्रहवशात्पुण्याय श्रावयन्ति स्म । पाश्चात्ययात्रिभिरिमानि माहात्म्यानि संकलय्य परीक्षितानि । स्टाईनमहोदयानुसारं—

१ –प्रतिमाहात्म्यस्य लेखनकालः भिन्नोऽस्ति ।

२ –प्रचलितमाहात्म्यानां निर्माणकाल आधुनिकोऽस्ति ।

३ –पूर्वग्रन्थेभ्यः कानिचिन्माहात्म्यान्यवश्यं गृहीतानि ।

४– प्राचीनमाहात्म्येषु प्रसिद्धस्थानानि नोपलभ्यन्ते परमर्वाचीनेषु लभ्यन्ते ।

५ –भृंगीशसंहितायाम् नीलनागः 'विरनाग' नाम्ना ज्ञायते । परमन्यत्र स नील एवोच्यते, तस्माज्ज्ञायते यद्भृङ्गीशसंहितैव पूर्णतया समस्तगाथानां वर्णनं करोति ।

'विरनागः' एवेदानीं 'वैरीनाग' नाम्ना परिचीयते ।
'हरमुकुटस्य' कृतेऽद्य 'हारमुख' शब्दो व्यवह्रियते ।

एतेन भृङ्गीशसंहिताया आधुनिकसन्दर्भेषु काश्मीरस्य ऐतिहासिकाभौगोलिकस्थितिज्ञानार्थमुपयोगिता वर्तते ।

---

*Ancient geography of Kashmir Page=30—31 ।

नीलमतपुराणं वासुकिपुराणञ्चेति द्वयमपि एतस्या माहात्म्यमेवास्ति। काश्मीरिकमाहात्म्यानां भृङ्गीशसंहितायाः वा विषये डॉ० *स्टाईन यथा लिखति—

The collection posses a fairly representative set of Mahatmyas relating to the sacred springs of Kashmir. These chapters give usually in great detail, the legends attaching to the different Nagas and accurate directions as to the roots of pilgrimage. Most of the texts are described as forming part of the Bhringeesh Samhita. The Kashmir mahatmyas belong evidently must have been subjected to considerable modification in the course of the centuries during which they were in practicable use by the pilgrims and these guides, the teachers of the various schools they all posses great interest for the historical topography of Kashmir. A Camparison of the local names found in them with actual sites visited by the modern tourists throws occasionally a curious light on the migration which some of these sacred springs must have apparently under-gone in order to suit the pilgrims. The manuscript is very rare and valuable.

विशिष्टानां माहात्म्यानां संक्षिप्तः परिचयः—

---

*कैटलॉग–टेम्पल लाइब्रेरी।

*अमरेश्वर:—भगवतश्चन्द्रशेखरस्य रसलिङ्गं (तुषारलिङ्गम्) पुरामरेशपदेनेदानीञ्चामरनाथनाम्ना व्यपदिश्यते । काश्मीरात्प्राच्यां तल्लिङ्गं संतिष्ठते । श्रावणपूर्णिमायां दूराद्दूरतरादागत्य लोका: दर्शनानि कुर्वन्ति । रसलिङ्गस्य माहात्म्यं श्रुत्वा जन्तु: पापान्मुच्यते, यात्रामन्तरा दर्शनेन घोरं नरकमुपलभ्यते । यात्री पूर्वं षोडशक्षेत्रे तत: शिवपारे पद्मपुरे सिद्धक्षेत्रे वर्तिकासिद्धक्षेत्रके च स्नात्वा महानागस्य जलमुपस्पृश्य हरिद्रागणपतिं नत्वा पुन: बलिहारे महाक्षेत्रे स्नात्वा तत: हस्तिकर्णं वागाश्रमञ्चोपस्पृश्य नत्वा चक्रेशे देवकतीर्थे हरिश्चन्द्रे स्थलवारे मृत्तीर्थे च स्नात्वा गुहवाटं गच्छेत् । लम्बोदर्यां शुभे सूर्याश्रमेऽपि विधिवत्स्नात्वा दान दत्वा ब्रह्महत्यादिभिर्जन्तु: मुच्यते । करपादमूलके गणपं संस्नाप्य पूजयित्वा च बद्धोरसि गमनम्, तत: हयशीर्षाश्रमे शेषनागके च स्नात्वा गङ्गामवगाह्य सरलके ग्रामे खिल्यापणे स्नात्वा हरिञ्च प्रणम्य महाग्रामे नारायणं मामलके गणेशमुपाश्रयेत् । एवं प्रकारेण मामेश्वरं लिङ्गं सदृश्य तत्र वारिणि स्नात्वा भृगुपतौ नीलगङ्गाजले च स्नायात्, पञ्चतरङ्गिणीं पुण्यां नदीमवगाह्य गर्भागारस्य मध्यत: पर्वतमारुह्य ततोऽवरुह्यामरावत्यां संस्नाप्य भस्माङ्गं लेपयित्वा यात्री विभूतिसितश्च नृत्यन् दिगम्बर: पर्वतमारुहेत्, तत्र सनातनं स्वधालिङ्गं विधिवत्प्रणम्य नर: कोटिपातकोपपातकात्प्रमुच्यते । लिङ्गस्य दर्शनस्पर्शनपूजनवन्दना-दमरेश्वरस्य भक्त: सर्वकिल्विषै: प्रमुच्यते ।

अमरनाथयात्राप्रसङ्गे वितस्तातटे षड्स्नानानि सप्तदशस्थलानि च सन्ति एवं त्रयोविंशति: प्रकारेणामरनाथस्य यात्राकरणेन शिवसायुज्यं भवति । कृतयुगेऽमरेश्वरसन्निधौ हिमालये शेषनाग: स्वस्थानं चकार । तत्र तपोऽर्थं पूजनार्थञ्च त्रिदशा: सिद्धा: गन्धर्वा: समवेता: समभूवन । तत्र वातरूपधर: कश्चिद्बली दैत्येन्द्रस्तान्बाधते स्म, तद्वधाय देवै: परमेश्वरस्तोषित:, स्तुत्या प्रसन्न: देव: वातरूपं दुरासदं हतवान् । शेषनागं वातपानार्थञ्चाज्ञापयामास । शेषनागोऽपि क्षणाद्वायुरूपं पपौ एवं शेषनागे

---

*भृङ्गीशसंहिता पृ० ३८०–४५३

दर्शनस्पर्शनस्नानदानजपहोमादिभि: नर: पापैर्न लिप्यते । शेषनागे मठिका: क्रियन्ते, प्रस्तरमठिकासु वायुप्रकोपो न भवति तस्मात्तत्क्षेत्रं वायुवर्जनमपि कथ्यते । इदं मोक्षदं परमपावनमस्ति । कपोतानां दर्शनेन सर्वदोषनिवारणं भवति तत्र शरीरयौवनद्रव्यदारापुत्रादीनां मोह: नश्यते । तल्लिङ्गं सौम्यमायुष्यप्रदं कान्तिदं कीर्तिदं धनदं पुत्रद कन्याप्रद कलौ प्रशस्तम् । तत्र पीठदानेन मनुज: महत्पुण्यमाप्नोति स चेह सुखीभूत्वा ह्यन्ते शिवसायुज्यमाप्नोति ।

*वितस्ता—काश्मीरेषु एषा प्रधाना नदी वर्तते या काश्मीरोपत्यकाया: पूर्वदक्षिणसीम्नि प्रवहति, अस्योद्भव: विरनागस्रोतसी भवतीति सुनिश्चितम् । तत्र मीनपद्मासना देवी वितस्ता काश्मीरे प्रतिवसति । पापशीलानां वितस्तानुत्तमा गतिरस्ति । पुरा शिवाज्ञया पार्वती एव वितस्तारूपेण लोकान्पावयंस्तत्र तिष्ठति । वितस्तिकं करं कृत्वा शिव: शूलेन वितस्तिमात्रगर्तोऽकरोत्तत एव परमपावनी नदी निस्सृता । प्रकटीभूय सा शिवं प्रार्थयामास यदहं पातकिनां सङ्गान्मलिना स्याम् तस्मान्नाह यास्यामि तदानीं महेशेन मा नदी तत्करणार्थं विरमिता एतस्मान्नदीयं विरनागा कीर्त्यते ।

**वितस्ताया: तीर्थातिशायित्वं वर्तते । 'सर्वलक्ष्मीमहाहारपथाचाकालम्बोदरीभृङ्गीशीरामेश्वरीचक्रं शतरिंगीसौरीहाटकेश्वरमहापद्मसरश्चन्द्रक्षेत्रवराहक्षेत्रादीनां सङ्गमेनेयं परं हर्षमवाप । विशोका नदी अपि वितस्तायां संगमं लभते । अत्र ब्रह्मादयोऽपि स्नानं काङ्क्षन्ते एकाहस्नानेन महन्माहात्म्यमुपतिष्ठते ।

विरनागत: वितस्ता वैतस्तिमानेन प्रारभ्य कियद्दूरं गत्वेयमन्तर्धिमागता पुन: वर्तिके तीर्थे प्रकटीभूता जायते । वितस्ता वर्तिकासंगम:-

---

*भृङ्गीशसंहिता पृ० ४५४—६८९

**भृङ्गीशसंहिता पृ०—३७३

पृथिव्यां यानि तीर्थानि तानि काश्मीरमण्डले ।
काश्मीरे यानि तीर्थानि तानि वैतस्तिके जले ॥

सीतान्धके ग्रामे सीतानागसंगमः पुनः चक्रधारावामनद्रोणकादिभिश्च समेत्य वितस्ता अग्रे प्रसरति ।

वितस्तायास्तटेऽनेकानि तीर्थानि सन्ति । तत्र स्नानदानजपहोमस्वाध्यायकीर्तनादीभिरक्षय्यम्पुण्यं भवति ।

*राज्ञीप्रादुर्भावः—प्रादुर्भावशब्देनात्रावतारशब्दस्य सङ्केतः । पुरा पौलस्त्य ईश्वराराधनं कुर्वन्दुश्चरं तपश्चकार । श्यामां पञ्चदशाक्षरीं स लङ्केशानदिशि प्रत्यानयत् । सा तामसी त्रिपुरा कला सर्वैः राक्षसैस्स्वाभिष्टसिद्धये समुपासिता परं तद्गृहे सा उद्विग्ना सञ्जाता तस्मादेव कालान्तरे इयं देवी सतीदेशमागत्य संस्थिता । श्रीहनुमता नागैस्सहेयं समानीता तुलमूलनामकेऽऽधुनिकेग्रामे स्थिता क्षीरखण्डाज्यभोजना शान्ता सत्यरूपा सा देवी वर्तते । राज्ञीप्रसादाद्रामो रावणं जघान, विभीषणश्च राज्यं प्राप्तवान, सैवेदानीं सतीदेशे महाराज्ञीपदेन आख्यायते । मनुजोऽस्याः प्रसादात् सर्वकामान्प्राप्नोति न क्वचित्स इह लोके प्रकोपबद्धो भवति । तत्र यन्त्रपूजनमपि विधीयते ।

**केदारमाहात्म्यम्—एकदा वराहस्य पृथिवीमुद्गरतः कीचको नाम गणः हिरण्याक्षममर्दयत्तस्स तत्रैव लीनोऽभूत् तस्मादेव तत्स्थान कीचकाश्रमश्च श्रूयते । सप्ततीर्थान्यपि तत्रैव सन्ति । वराहशिरो ग्रामोऽत्रैव प्रथितः स्वच्छन्दभैरवोऽपि केदार एव संतिष्ठते । केदारकुण्डे स्नात्वाश्वमेधफलमाप्नुयान्नरः । स्त्रीशिरस दर्शनात् स्वच्छन्दपूजनाद्ध्रुवं लाभो भवति । यात्रा—प्रथमं श्राद्धपुरे स्नात्वा निगिलाश्रमं व्रजेद्धीमान् ततः सुरेज्यापुरगमनम्, अनन्तनागे स्नानम्, वराहगमनञ्चात्रैव स्वच्छन्दस्य पूजनम् ततो पर्वतारोहणम् एवं विधिवत्केदारं सम्पूजयेत् । केदारे यवपिष्टं समानीय पलपञ्चकमानं वृषं वज्रनेत्रं कृत्वा ताम्रपृष्टसुवर्णमुखपट्टलाङ्गूलकांस्य-

---

*भृङ्गीशसंहिता पृ० १—१९

**भृङ्गीशसंहिता पृ० २०—५७

रौप्यखुरघण्टोर्णपट्टगन्धपुष्पमणिधातुकुम्भे संस्थाप्य ब्राह्मणाय समर्पयेत् । आयुष्कामैः पुत्रकामैः कीर्तिकामैः धनार्थिभिः विद्याकामैर्मुक्तिकामैरत्रावश्यं यष्टिपूजनं सम्पाद्य स्नानेन केदारयात्राफलं लभ्यते ।

*पुष्करम्—जगत्सिसृक्षतः स्रष्टुः श्रमोऽभूत् श्रमाच्चाङ्गेभ्यः स्वेदोऽक्षरत्तदेव तत्र तोयरूपेण परिणतम् । भङ्गीलायां तत्तोयमेव पुष्करतीर्थेण ज्ञायते । पुष्करशब्दस्य संहितानुसारं निर्वचनम् ।

पुष्णाति च सुखं राति तस्मात्पुष्करमुच्यते ।
स्रष्टुरङ्गाच्च्युतं तस्मात्स्थितं पुष्करपत्रके ॥

सोमसूर्ययुते पुष्करस्नानं वाजपेयादिकं फल ददाति । कलावेतत्सर्वसिद्धिप्रदं प्रकीर्तितम् ।

**गोदावरी—पुरा गौतमर्षिः देवशिरोराष्ट्रे गोदरगिरौ सुमहद्दारुण तपश्चचार । तत्राष्ट्रे राजर्षयस्तदाश्रमे समागताः, गौतमोऽतिथियोग्यपूजां नाकरोत्तेन ते सर्वे क्रुद्धा एकां कृत्यां जनयामासुः । सा कृत्या गोरूपमादाय तत्र गौतमस्य सम्मुखं संवृत्ता ताञ्च स प्रददार तस्मात्तस्थानं गोदरं गौदरं गोदावरं वेति प्रत्याख्यापितम् । तत्र पर्वते एका जलधारा निस्सृत्य गौतमस्य गोहत्यापापं दूरञ्चकार यथा तत्र प्रपञ्चितम्—

गौर्वै विदारिता यत्रोत्थिता गङ्गाजलोक्षिता ।
सैव गोदावरी नाम गङ्गा परमपावनी ॥
अस्मिन्ग्रामे गोदराख्यः सर्वतः संप्रतिष्ठितः ।
स ग्रामः प्रथितोऽद्यापि गोदराख्यो महेश्वरि ॥

---

*भृङ्गीशसंहिता पृ०=५८—७४

**भृङ्गीशसंहिता पृ०=८२—१०९

यात्रा—यात्री सुरेश्वरीपुर उत्तमे स्नात्वा चन्द्रतीर्थे ततः श्रीप्रद्युम्नं व्रजेत् । एवमनन्तनागानन्तरं वाराहं ततश्च कोटितीर्थे नारायणे च स्नात्वा भवगङ्गां ब्रह्मगङ्गां रुद्रदेवीं सुरेश्वरीमवगाह्य यात्राफलमाप्नोति ।

*ज्येष्ठामाहात्म्यम्—क्षीरसागरमन्थनाच्चत्वारि रत्नानि कौस्तुभादीनि सुरासुरैः लब्धानि तानि च दृष्ट्वा दैत्याः लोलुपा अभूवन् । दैत्यास्तत्र लक्ष्मीं संगोपयामासुः । सैव देवी काश्मीरे गुप्ताकारेण तिष्ठति, ज्येष्ठा लक्ष्म्याः नाम अस्ति । तत्र श्रीयन्त्रपूजनेन लक्ष्मी स्थिरा भवति, वैशाखकृष्णपक्षस्य पञ्चम्यां पूजनं विधीयते ।

एवमन्यमाहात्म्यानामपि महत्त्वं वर्तते । अन्यानि माहात्म्यानि—

१. हरिद्रागणेशमाहात्म्यम्
२ शिवरात्रिमाहात्म्यम्
३. नववर्षोत्सवमाहात्म्यम्
४. शारिकामाहात्म्यम्
५. कपालमोचनमाहात्म्यम्
६. मार्तण्डमाहात्म्यम्
७. हरमुकुटगङ्गामाहात्म्यम्
८. स्वयम्भवाग्निमाहात्म्यम्
९. होलिकामाहात्म्यम् (इत्यादीनि)

परिशिष्ट च—

१. हर्षेश्वरमाहात्म्यम
२. ध्यानेश्वरमाहात्म्यम्
३. पौराणिकगङ्गामाहात्म्यम्
४ मार्तण्डमाहात्म्यम्
५. नीलनागमाहात्म्यम्

भृङ्गीशसंहिता काश्मीरस्य विपुलां शोधसामग्रीमुपस्थापति, तत्र प्राचीनैतिहासभूगोलराजनीतिसंस्कृतिलोकपरम्परासङ्गीतनाट्यादीनां विशदं वर्णनमस्ति । अद्याप्येयं संहितापूर्णास्ति, अस्या अधिको भागः

---

*भृङ्गीशसंहिता पृ०—१२०

नोपलभ्यते यथोच्यते वासुकिपुराणस्य भूमिकायां डॉ० अनन्तराम—*शास्त्रिवर्यैः—'परिणामतो वासुकिपुराणस्य मूलाधारो भुवनकोशवर्णनोद्योतम् भुवनकोशवर्णनोद्योतस्य च भृङ्गीशसंहितायां वर्तते, परं यत्ने कृतेऽपि न कुत्रापि लब्धम् न च भृङ्गीशसंहिताया नवतितमः पटलो वासुकिवर्णनं खण्डम्' इत्यादिनैतस्या अपूर्णता प्रतिभाति, एवञ्च वासुकिपुराणमपि भृङ्गीशसंहिताया भाग एवानुमीयते ।

नागानामस्यां बृहद्वर्णनं क्रियते, यक्षराक्षसगन्धर्वकिन्नरभूतपिशाचा—दीनां विशद वर्णनं सञ्जातम् ।

कालः—भृङ्गीशसंहितायाः कालनिर्धारणमतीव दुःशक्यमस्ति । माहात्म्येषु कानिचित्प्राचीनानि माहात्म्यानि कानिचिदर्वाचीनानि वा सन्ति । प्रत्येकस्य माहात्म्यस्य लेखनकालः भिन्नोऽस्ति तस्मादेतस्याः कालनिर्धारण कर्तुं न शक्यते । श्री स्टाईनरचितकैटलागपत्रे भृङ्गीशसंहितायां केदारमाहात्म्यस्य लिपिकालः १८०९ विक्रमाब्दः समुल्लिखितः परमन्यत्र तादृशः न कोऽपि निर्देशः लभ्यते । लिपिकालस्तु लेखनकालो भवितुं नार्हति । सम्भाव्यते यदियं संहिता द्वादशशतकात्प्राचीना भवितुं शक्यते । आधुनिकस्थानानां कृते ये शब्दा अद्यापि प्रयुज्यन्ते तद्दर्शनेन संहितेयं काश्मीरे यवनाक्रमणात्पूर्वतरा भवितुमर्हति ।

अस्यां विरनागः, कनकवाहिनी, तुलमूलावतारप्रभृतयोऽतीव नूतनाश्शब्दास्सन्ति । एतत्परिशीलनेन भृङ्गीशसंहितायाः कालोऽर्वाचीनो भवितुं शक्यते परं नैतत् ।

वस्तुतस्तु—भृङ्गीशसंहिताकालनिर्धारणार्थं मया बहुभिः स्थानीय-काश्मीरिकपण्डितैस्सह विमर्शदशा सम्भाषणं विहितम् परं नैकस्यापि मतं प्रामाणिकं तथ्यपूर्णञ्चासीत् । तत्र डॉ० बलजिन्नाथमहाभागानां मतं यदियं संहिता राज्ञोऽकबरस्य समकालीना वर्तते, यतोहि तदानीं धार्मिककृत्यानि

---

*वासुकिपुराण पृ०—१६

सम्पादनार्थं पूर्णं स्वातन्त्र्यमासीत् प्रतीयते यदियं संहिता तत्कालीनैव भवेत् । केषाञ्चिन्मतं यदस्याः कालः पञ्चमाब्दो वैक्रमोऽस्ति ।

मदीयं मतम् महदाश्चर्यमिदं यदस्यां संहितायां कस्यचिद्राजपरिवारस्योद्वा कस्यचिद्ग्रन्थविशेषस्योल्लेखो वा नास्ति । तत्र एकं वारद्वयं वा 'शिवशासनम्' पदं क्वचिच्च 'तन्त्रशासनम्' पदं प्रयुज्यते । केवलं सामान्यलोकानां जीवनदर्शनम्, तेषां भोजनादिकं पेयादिकं धार्मिकोत्सवानामेव वर्णनं दृश्यते । संहितायां बौद्धमतस्य मुस्लिममतस्य वा न क्वापि समुल्लेखोऽस्ति ।

ममात्र दृढो विश्वासो यदियं संहिता तीर्थमाहात्म्यग्रन्थेषु प्राचीना विस्तृता चास्ति । नीलमतमेतद्दृष्ट्यातीव क्षुद्रमस्ति तत्र माहात्म्यानि संक्षिप्तरूपेण वर्णितानि सन्ति, प्रतीयते यदिद भृङ्गीशसंहितायाः संक्षिप्तं रूपमस्ति । 'हरचरितचिन्तामणिः' ग्रन्थतोऽपि संहितेयमधिका विस्तृता वर्तते । किं बहुना – सर्वेषां तीर्थमाहात्म्यग्रन्थानामाधारभूतेयं वर्तते । माहात्म्यानां भिन्नलेखनकालवशादस्याः संग्रहकालः भिन्नैवास्ति । अतो हि नीलमतस्य पूर्वं पञ्चमशताब्द्यां भृङ्गीशसंहितायाः प्रारम्भकालः, द्वादशशताब्द्याः पूर्वमस्याः सङ्ग्रहकालो भवितुं शक्नोति । डॉ० स्टाईन मतानुसारमपि द्वादशशतकपूर्वमेव माहात्म्यादिलेखनं सञ्जातम्, तीर्थस्थानानि च प्रसिद्धान्यभूवन् । अतो हि भृङ्गीशसंहितायाः अधिकानि माहात्म्यानि द्वादशशतकात् पूर्वमेव लिखितान्यासन् । तस्मात्तत्त्वपरीक्षणेन भृङ्गीशसंहितायाः कालो प्रधानतया द्वादशशतकमेव स्वीकर्तुं शक्यते ।

भाषाशैली—भृङ्गीशसंहितायाः भाषाशैली क्लिष्टरचनाशैली नास्तीति सत्यम् । संहितायां सरसा ललिता मनोहरा च शैली आदृता वर्तते । भाषा मधुरा सरला दीर्घसमासविहीना लालित्यपूर्णा चास्ति ।

वस्तुतो या शैली पुराणेषु समाश्रिता सैव शैली भृङ्गीशसंहितायाः वर्तते । अव्ययानां प्रायशो बहुलता दृश्यते, पादपूर्त्यर्थं तेषामुपयोगश्च क्रियते । व्याकरणस्य बहवो दोषास्सन्ति क्वचिद्रचनाशिथिलतापि लभ्यते । मार्तण्डशब्दस्य स्थाने मार्ताण्डशब्दप्रयोगोऽस्ति । धातूनां वर्तमानकालस्य स्थाने भूतकालार्थस्य प्रयोगः । परस्मैपदधातूनां स्थानेऽऽत्मनेपदधातूनां प्रयोगः, आत्मने-

पदानां स्थाने परस्मैपदप्रयोगः बहुलतया क्रियते । क्वचिदुपसर्गयोगे धातूनां क्त्वास्थाने ल्यबादेशो न दृश्यते । पुंनपुंसकस्त्रीलिङ्गशब्दानामपि प्रयोगे भ्रम एवोत्पद्यते । सन्धिविषयकनियमा अप्यत्र न संघटन्ते ।

सर्वत्रानुष्टुपछन्दः प्रयुक्तम् क्वचित्त्रिष्टुपछन्दश्च दृश्यते । उपमादाने-पर्वतमेघतडितसूर्यचन्द्राकाशादीनां प्रयोगास्सन्ति । स्थानीयशब्दानां पौराणिकाः व्युत्पत्तयोऽपि लभ्यन्ते, इमाः व्युत्पत्तयः रोचकाः भवन्ति ताभ्यः तत्स्थानस्य ऐतिहासिकं भौगोलिकञ्च ज्ञानं वर्धते ।

भृङ्गीशसंहितायाः प्रारम्भो भैरवीभैरवसम्वादेनैव प्रवर्तते । भैरव्याः लोकहितप्रश्नानामुत्तरार्थं भैरवस्य यत्नोऽनेनैव प्रकारेणप्र तिप्रश्नस्य समाधानं क्रियते । अथात्र विचार्यते कश्चायं भैरवः । *भैरवस्तु—

**भीषास्माद्वातः पवते । भीषोदेति सूर्यः । भीषास्मादग्नि-श्चेन्द्रश्च । मृत्युर्धावति पञ्चमः । एवमन्यत्रापि—

***भयादस्याग्निस्तपति भयात्तपति सूर्यः ।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥

****महद्भयं वज्रमुद्यतम् ।

भैरवस्य भयादग्निसूर्येन्द्रवायुमृत्युदेवताः स्व स्व कर्मसु प्रवर्तन्ते । अयञ्च भीरुणामभयप्रदः, संसारभयक्रन्दनस्य कारणम्, भूतगणस्वामी, सच्चिदानन्दः, परासंवित्, पूर्णाहन्ता, चितिरूपश्च भवति । सैव वेदेषु रुद्रः, तन्त्रेषु भैरवो भवति । वेदतन्त्रादिषु भैरवस्य सौम्यं रौद्रञ्च रूपं वर्ण्यते यथा—

---

*कल्याण अङ्क—५, पृ०—११९—१२६

**तैत्तरीयसंहिता २—८—१

***कठोपनिषद् २—३—३

****तदेव

*नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय नमः शिवाय शिवतराय च' इति ।

**ऋग्वेदे –

कामस्तदग्रे समवर्तत मनसो देवः प्रथमं यदासीत् ।

एवञ्च शान्तः, शान्तजनप्रियः, प्रशान्तः, शान्तिदः, शङ्करः, विष्णुः, कामी, पदेन भैरवस्य बोधो भवति ।

'भै+र+व' अक्षरैर्भैरवशब्दः निष्पद्यते । भैरवः सर्वशक्ति-भरितः, सर्वशक्तिपदेनात्र तान्त्रिकशक्त्यो यथा 'इच्छा-ज्ञान-क्रिया-वामा-ज्येष्ठा-रौद्री' प्रभृतयः निपात्यन्ते । भिया सर्वान् रवयति तस्माद्भैरव उच्यते ।
***तन्त्रग्रन्थेषु यथा –

'भै'

भाख्या तु श्यामला चैकवक्त्रा भद्रासने स्थिता ।

उद्यद्रविनिभा धत्ते शरचापवराभयान् ॥

'र'

रेफाख्या रेचिका श्यामा सिंहस्था लोहितांशुका ।

पञ्चास्याष्टकरा धत्ते दक्षवामकरैस्तु सा ॥

खड्गखेटाङ्कुशपद्मपाशशूलवराभयान् ।

'व'

वाख्या परायणी देवी स्फटिकाभरणांशुका ।

स्फुटपद्मासना धत्ते पद्मद्वयवराभयान् ॥

एषु पद्येषु भैरवस्य मूर्तयो वर्णितास्सन्ति । सिन्दूरवर्णा-श्यामवर्णा-श्वेतवर्णा च एवं रजस्तमोसत्त्वगुणाः क्रमेण भवन्ति ।

---

*शुक्लयजुर्वेदसंहिता १६–४१

**ऋग्वेदसंहिता १९–५२ १

***तन्त्रालोकः १–१६–१००

*तन्त्रालोकटीकायाम्—सर्वं बिभर्ति धारयति पुष्णाति रचयति अन्तर्बहिर्वा करोति स भैरवः। एवं परशिवस्य स्त्री भैरवी कीर्तिता।

भृङ्गीशसंहितायां भैरवीभैरवसम्वादादतिरिक्तं 'देवाः ऊचुः' 'ऋषय ऊचुः' इत्यादिभिरपि सम्वादाः दृश्यन्ते।

काश्मीरप्रदेशो खलु भारतस्य राष्ट्रस्य शिरोभूषणमस्ति। महत्त्वापदेषु यथा-महाभारत-हरिवंशपुराणादिषु संस्कृतग्रन्थेषु च काश्मीर-देशस्य तीर्थता प्रशस्तरूपेण वर्ण्यते। काश्मीरदेश एव शारदादेशेन प्रत्याख्यायते। सतीसरोऽस्य प्राचीना संज्ञा वर्तते। चतुर्दशविद्यानां पीठं काश्मीरदेश इति **श्रीहर्षेण प्रतिपादितम्—

'काश्मीरैर्महिते चतुर्दशतयीं विद्यां विदद्भिः'।

***राजतरङ्गिण्याम्—

तिलांशोऽपि न यत्रास्ति पृथिव्यास्तीर्थैः बहिष्कृतः।

****नीलमते—

तत्र नागाः ह्रदाः पुण्यास्तत्र पुण्या शिलोच्चयाः।
तत्र नद्यास्तथा पुण्या पुण्यान्यपि सरांसि च।
देवालयाः सुपुण्याश्च तेषां चैव तथाश्रमाः॥
तन्मध्येन च निर्याता सीमन्तमिव कुर्वतो।
वितस्ता परमा पुण्या साक्षाद्धिमनगोद्भवा॥

---

*तन्त्रालोकटीका – ५ – १२५

**नैषधचरितम् – १६ – १३१

***श्लोक – १ – १३८

****श्लोक – ४३ – ४५

काश्मीरस्य दार्शनिकी संपत्प्रत्यभिज्ञादर्शनम्, त्रिकदर्शनञ्चेति । काश्मीरदेशस्य प्राचीनता *महाकाव्यादिषु दर्शनात्प्रतीयते यथा—

काश्मीराः सिन्धुसौवीराः गान्धाराः दर्शकास्तथा ।

एवञ्च—

**काश्मीरमण्डलं सर्वं शमीपीलुवनानि च ।**
**पुराणानि च सशैलानि विचिन्वन्तु वनौकसः ॥**

काश्मीरस्य पौराणिकी व्युत्पत्तिरेवं **नीलमते कथ्यते—

**कः प्रजापतिरुद्दिष्टः कश्यपश्च प्रजापतिः ।**
**तेनासौ निर्मितो देशः काश्मीराख्यो भविष्यति ॥**
**कं वारि हारिणा यस्माद् देशादस्मादपाकृतम् ।**
**काश्मीराख्यं ततः पश्य नाम लोके भविष्यति ॥**

परञ्च पाणिनिशब्दशास्त्रानुसारं कश्धातोर्मुडागमे औणादिकेन ***'कशेर्मुट्' सूत्रेण कृते ईरण् प्रत्यये सति कश्मीरशब्दो निष्पद्यते । कोशेषु—'काश्मीरः देशविशेषः प्रतिपाद्यते । कुत्रचिद् कश्मलमीरयति—इति काश्मीरः ।

एतद्देशस्य लोकगाथा यथा ****कल्हणेन प्रतिपादिता—

**पुरा सतीसरः कल्पारम्भात् प्रभृति भूरभूत् ।**
**कुक्षौ हिमाद्रेरर्णोभिः पूर्णा मन्वन्तराणि षट् ॥**

---

*(क) महाभारतम्—६-९-५३

(ख) रामायणम्—४-४३

**श्लोक—२९१—२९२

***उणादिसूत्रम्—४-३०

*****राजतरङ्गिणी १-२५-२८ एवं १-२९-४३

अथ वैवस्वतीयेऽस्मिन्प्राप्ते मन्वन्तरे सुरान् ।
द्रुहिणोपेन्द्ररुद्रादीनवतार्य प्रजासृजा ।।

कश्यपेन तदन्तःस्थं घातयित्वा जलोद्भवम् ।
निर्ममे तत्सरो भूमौ कश्मीर इति मण्डलम् ।।

उद्दण्डैस्तन्निःष्यन्ददण्डकुण्डातपत्रिणा ।
यत्सर्वनागाधीशेन नीलेन परिपाल्यते ।।

तत्रैव काश्मीरस्य महनीयता वर्ण्यते—

गुहोन्मुखी नागमुखापीतभूरिपया रुचिम् ।
गौरी यत्र वितस्ता त्वं यातांप्युज्झति नोचिताम् ।।

शङ्खपद्ममुखैर्नागैर्नानारत्नावभासिभिः ।
नगरं धनदस्येव निधिभिर्यन्निषेव्यते ।।

यत्तार्क्ष्यभीत्या प्राप्तानां नागानां गुप्तये ध्रुवम् ।
प्रसारितभुजं पृष्ठे शैलप्राकारलीलया ।।

भुक्तिमुक्तिफलप्राप्तिः काष्ठरूपमुमापतिम् ।
पापसूदनतीर्थान्तर्यत्र संस्पृशतां भवेत् ।।

सन्ध्यादेवी जलं यस्मिन्धत्ते निःसलिले गिरौ ।
दर्शनं पुण्यपापानामन्वयव्यतिरेकयोः ।।

स्वयम्भूर्यत्र हुतभुग्भुवो गर्भात्समुन्मिषन् ।
जुह्वतां प्रतिगृह्णाति ज्वालाभुजवनैर्हविः ।।

देवीभेडगिरेः शृङ्गे गङ्गोद्भेदशुचौ स्वयम् ।
सरोऽन्तर्दृश्यते यत्र हंसरूपा सरस्वती ।।

नन्दिक्षेत्रे हरावासप्रसादे द्युचरार्पिताः ।
अद्यापि यत्र व्यज्यन्ते पूजाचन्दनबिन्दवः ॥

आलोक्य शारदां देवों यत्र संप्राप्यते क्षणात् ।
तरङ्गिणी मधुमती वाणी च कविसेविता ॥

विजीयते पुण्यबलैर्यस्तु न शास्त्रिणाम् ।
परलोकात्ततो भीतिर्यस्मिन्निवसतां परम् ॥

सोष्मस्नानगृहाः शीते स्वस्थतीरास्पदारये ।
यादोविरहिता यत्र निम्नगा निरुपद्रवाः ॥

असन्तापहिता जानन् यत्र पित्रा विनिर्मिते ।
गौरवादिव तिग्मांशुर्धत्ते ग्रीष्मेऽप्यतीव्रताम् ॥

विद्यावेश्मानि तुङ्गानि कुङ्कुमं सहिमं पयः ।
द्राक्षेति यत्र सामान्यमस्ति त्रिदिवदुर्लभम् ॥

त्रिलोक्यां रत्नसूः श्लाघ्या तस्यां धनपतेर्हरित् ।
तत्र गौरीगुरुः शैलो यत्तस्मिन्नपि मण्डलम् ॥

एभिः पद्यैः काश्मीरस्य महनीयं सौन्दर्यमनुभूयते ।

*पुनश्चाचार्यहनुमत्प्रसादशास्त्री लिलेख –अत्र (काश्मीरे) प्रकृत्या

---

*काश्मीरेतिहासः—पृ० ४

सौन्दर्यमौदार्यञ्च, बुद्धिर्बलञ्च, अन्नं जलञ्च, वयो रूपं चेत्यादयः परस्परोपकारकाः मिथः सापेक्षाश्च । अत्र च परितो हिमस्यैव महिमा विततोऽस्ति, हिमस्यैव राज्यम्, हिमस्यैव पूजा, हिमस्यैव दर्शनम् हिमस्यैव प्रचारः, हिमादेव भीतिः, हिम एव च प्रीतिः । किं बहुना नीरमप्यत्र हिमकारकम्, नारायणोऽपि हिममूर्तिः, शिवोऽपि हिमलिङ्गात्मा । 'यथादेशस्तथा वेषः' इतीव मत्वा सर्वमेवात्र हिममयतायै सिततमतायै च स्पृहति । नगरमध्ये नदीप्रवाहः नोपद्रवमुत्पादयति । नौकाविहारश्च उत्सवशोभां दर्शयति । काश्मीरं देवलोकमिव प्रत्यायन्ति विद्वांसः । अत एवेदं भुवो नाकमाचक्षते ।

काश्मीरमण्डलस्य परिमाणमनिश्चितमस्ति येन ग्रन्थकारेण यावत्-परिमाणमनुभूतं तथैव तेन लिखितम् । कस्यचिदुक्तमत्र संगच्छते—

षष्ठिग्रामसहस्राणि षष्ठिग्रामशतानि च ।
षष्ठिग्रामस्त्रयो ग्रामा ह्येतत्काश्मीरमण्डलम् ॥

*'शारदामठमारभ्य कुङ्कुमाद्रितटान्तगः' तावत्काश्मीरदेशः । **काश्मीरप्रदेशे बहूनि प्राचीनानि मन्दिराणि वास्तूनि च द्रष्टुं योग्यानि सन्ति तेषु कानिचिद्विनष्टानि कानिचिदवशिष्टानि अद्यापि तानि काश्मीरस्य शिल्पनैपुण्यं प्रदर्शयन्ति । प्रदेशस्य सर्वतो दिशि पर्वताः विराजन्ते तेषामूर्ध्व-शिखराणि सर्वदा हिमाच्छादितानि दृश्यन्ते । नद्यास्तु अनेकास्तत्र विलसन्ति तासु वितस्ताया अतिशयत्वमवलोक्यते । बहवः नालाः प्रणालाः प्रवहन्ति । अनेके ह्रदाः दृश्यन्ते । उत्सानामपि बाहुल्यं वर्तते, वीरनागानन्तनागवामन-कुक्कुटनागादयोऽतीवकौतुहलोत्पादकाः वर्तन्ते ।

---

*काश्मीरेतिहासः पृ० १९—२४—२५—२७

**तदेव पृ० ६

काश्मीरदेशे नागपूजा प्रशस्ता, भृङ्गीशसंहितायामपि सर्वैः तीर्थैः सह नागानां घनिष्टसम्बधोऽवलोक्यते। काश्मीरस्य आबालवृद्धाः धार्मिका आसन्। गृहेषु मन्दिरेषु तीर्थेषु सर्वदा धार्मिककृत्यान्येव प्रचलन्ति स्म। शिवस्य महिमा, शिवस्य पूजनम्, शिवतीर्थाणां यात्रा लोकेषु गीयते। वैदिकाः देवताः—विष्णुः, गणेशः, ब्रह्मा, प्रजापतिः, प्रभृतयोऽपि यथाविधि पूज्यन्ते। उमापूजनमपि लोकेषु अधिकमस्ति। भृङ्गीशसंहितायां प्रत्येकस्मिन्माहात्म्ये काश्मीरदेशस्य तीर्थता, धार्मिकता, सामाजिकता, सांस्कृतिकता च पदे पदे दृश्यते। तद्देशस्य वाणिज्यानां भोज्यानां, पेयानां, वस्त्रोपवस्त्रादीनां सुगन्धिद्रव्यानां घृततैलानां ग्रन्थे वर्णनं क्रियते।

उत्सवाः काश्मीरप्रदेशे विशेषेण क्रियन्ते। तेषु सांवत्सरिकाः मासिकाः पाक्षिका एकद्वित्र्याहकरणीयाश्चोत्सवाः वर्ण्यन्ते। तद्दिने लोकेषु अदम्यसाहसोऽवलोकयितुं शक्यते।

*मातृकाः—ग्रन्थस्य मातृकाः श्रीरणवीरसंस्कृतशोधपुस्तकालये (Raghunath Temple library, Jammu) जम्बुनगरे समुपलभ्यन्ते। माहात्म्येषु केवलं मार्तण्डमाहात्म्यमपूर्णमस्ति। मातृकानां नवीना काश्मीरिकी लिपिरस्ति। केदारमाहात्म्यस्य लिपिकालः १८०९ विक्रमाब्दः केदारमाहात्म्यमातृकावसाने लिखितः। बृहत्कर्गलपत्रेषु लिखितास्ति संहितेयम्। प्रतिलिपिकाराणां लिप्यन्तरणे क्वचिद्दोषाः दृश्यन्ते। द्वित्वाक्षराणि सुपाठ्यानि न सन्ति। कृष्णा मषी प्रयुक्ता वर्तते।

---

*टाईन कैटलाग पृ०=२१०

३६८५ ख, ३८८२, ३६८०-३६५७ ख, ३६३८ ड, ३६६४-३८८३, ३६६७, ३६७१ त, ३६५८ ग, ३६५६ क, ३६८३ ल, ४०२०, ३६८८ ह, ३६७२ थ, ३६७० ण, ३६६३ ज, ४१९२-३६८४, ३५६६ ट।

**प्रकाशनयोजना**—विद्यापीठीयप्रकाशनयोजनान्तर्गतं १९७५-७६ तमे खिष्टाब्दे डॉ० अनन्तरामशास्त्रिभिः (मम गुरुवर्यैः) तदानीं प्राचार्यपदमलङ्कुर्वद्भिः 'भृङ्गीशसंहिता' प्रकाशनार्थमेका रूपरेखा निर्मिता तदर्थं मम नियोगश्च विहित आसीत् । मया मातृकाप्रतिलिपिकरणं प्रेसकापीनिर्माणञ्च विधिवत्सम्पादितम् । १९७७-७९ खिष्टाब्देषु श्रीमन्तः डॉ० मण्डनमिश्राः प्राचार्यपदमेलङ्कुर्वन्, 'भृङ्गीशसंहिता' प्रकाशनार्थं तैरपि भृशं स्तुत्यञ्च प्रयतितम् । १९७९ तः डॉ० मुरलीधरपाण्डेयमहाभागाः प्राचार्यपदमलङ्कुर्वन्ति, डॉ० पाण्डेयमाहाशयेनास्मन्कर्मणि महती रुचिः प्रकटिता तत्फलञ्च श्रीमतां पुरस्ताद्वर्तते । उपर्युक्तमहोदयानां सततप्रयासैरेव 'भृङ्गीशसंहितायाः' मुद्रणं प्रकाशनञ्च सञ्जातम् । एतद्विषयकं स्वीकृतिपत्राचारादिकं दायित्वमधिकारश्च विद्यापीठस्यैवास्ति ।

**उपयोगिता**—काश्मीरिकैतिहासिकभौगोलिकधार्मिकसांस्कृतिकं जीवनं दर्शनार्थं भृङ्गीशसंहिताया महती उपयोगिता वर्तते । संहितेयं काश्मीरविषयकं विपुलं परिचयं ददाति । सङ्गीतनृत्यनाटकादिषु रुचिनां कृषिकर्मवाणिज्यप्रभृतिनां कर्मणाञ्च परिचयोऽपि लभ्यते । राजनैतिकसामाजिकार्थिकञ्च जीवनं द्रष्टुमत्र शक्यते । ग्रन्थस्यान्यग्रन्थैस्सह तुलनया नूतनानि तथ्यान्यपि ज्ञातुं शक्यन्ते । प्राचीनकाश्मीरस्य क्षेत्रपरिचयः, तीर्थपरिचयः, ह्रदाः, स्रोतांसि, उपत्यकाः, नद्याः, पर्वताः, उत्साः फलपुष्पादिनाञ्च विशेषतया वर्णनेन तद्विषकमस्या संहिताया उपयोगिता महती वर्तते । काश्मीरविषयकविमर्शकादिष्वेतस्या महती आवश्यकता वर्तते ।

**आभारप्रदर्शनम्**—श्रीकुलदेवं (अम्बो बावा जी) नत्वा ततोऽतीव स्नेहशीलकर्मठसत्यमार्गनिष्ठदिवंगतपितृपादान् (श्रीनृसिंहदासाः खजूरिया) सादरं स्मृत्वा नुत्वा च स्वीयां मातरं गोदावरीदेवीमभिनन्दामि । यस्मिन्कस्मिन्नपि कर्मणि बहूनां सहृदयानां साहाय्यमपेक्षते तत्र सर्वप्रथमतः स्व पितृव्यश्रीछज्जूरामखजूरियामहोदयानामतीव कृतज्ञोऽस्मि येषां प्रयासेनाहं संस्कृताध्ययने प्रवृत्तोऽभवम् यस्येदं मधुरं सरसञ्च फलमस्ति ।

ग्रन्थस्य मुद्रणे प्रकाशने च येषां नामानि विस्मर्तुं न शक्यन्ते तेषु डॉ० मण्डनमिश्राः निदेशकाः राष्ट्रियसंस्कृतसंस्थानस्य प्रमुखाः वर्तन्ते, तेषां कृपयैव ग्रन्थोऽयं प्राकाश्यतां गतोऽतस्तेषां प्रति हृदयेन कृतज्ञतां ज्ञापयामि । मम गुरवः डॉ० अनन्तरामशास्त्रिणोऽपि मह्यं सर्वदा स्नेहं प्रकटयन्ति तैरेव प्रारब्धेयं योजना, अतोऽहं तेभ्यः स्वीयकृतज्ञतां प्रदर्शयामि । श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठस्य प्राचार्याः डॉ० मुरलीधरपाण्डेयाः धन्यवादार्हास्सन्ति । डॉ० राघवप्रसादचौधुरी प्रवाचकाः डॉ० प्रियचन्द्रशास्त्री प्रवाचका उभावपि मम ज्येष्ठभ्रातरौ मार्गदर्शकौ भवतः ग्रन्थप्रकाशने महद्योगदानं दत्तवन्तौ तेषां प्रति हृदयेन कृतज्ञतां ज्ञापयामि ।

धर्मार्थाधिकारिण एवं श्रीरणवीरसंस्कृतशोधपुस्तकालस्याधिकारिणः डॉ० बालकृष्णशास्त्रिण, डॉ० धनीरामशास्त्रिणश्च विशेषधन्यवादार्हा-स्सन्ति । एषां सौहार्दं सहयोगश्च न कदापि विस्मर्तुं शक्यते ।

मम प्रियशिष्यैः श्रीप्रभाकरखजूरिया-श्रीसुभाषचन्द्रशर्मा-श्रीविनोदख-जूरिया-पवनखजूरिया-सुमनशर्मा-प्रभृतिभिरस्मिन्कर्मणि मदीयं महत्सहाय्यं कृतं तदर्थं तेभ्य आत्मीयाशीर्वचांसि वितीर्य तेषामभ्युदयः कामयेऽहम् ।

विशिष्यात्र मम धर्मपत्नी सौभाग्यवती श्रीमती गीता देवी खजूरिया धन्यवादार्हा वर्तते, यया सर्वदाध्ययनलेखनादिषु मम सहाय्यम विहितम् एदर्थं सा पुनरपि धन्यवादार्हा भवतीति मन्ये । मया स्वीयाया 'आत्मजायास्तनुजाया' एवं प्रियात्मजस्य चिरञ्जिविनी 'मनुजस्य' दीर्घमायुष्यं-मङ्गलमयं जीवनञ्च कामयते ।

ग्रन्थमुद्रणे समागतविघ्नांस्तीर्त्वा स्वीयसीमितमुद्रणसाधनैरपि 'मगोत्रा प्रिन्टिङ्ग प्रैस' प्रचालकैः बृहत्कायग्रन्थोऽयं संमुद्रय जम्मूनगरस्य संस्कृतमुद्रणेतिहासे विशिष्टमेकं स्थानं निर्मितम्, ततस्तेऽपि बहुशः धन्यवादार्हाः भवन्ति । ग्रन्थमुद्रणेऽनेकाः त्रुटयस्स्युस्तत्र विद्वद्भिः क्षन्तव्यमिति—

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥

धन्यवादः

विनयावनतः

**यशःपालखजूरिया**

नव्यव्याकरणाचार्यः
भाषाविज्ञानाचार्यः
(गुडाखलाथियाँ साम्बा वासतव्यः)
व्याकरणविभागाध्यक्षः
श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठम्
शास्त्रीनगरम्, जम्मू

**विमोचनदिवसः**

२७, अक्तूबरमासः, १९८५

तृतीयोऽन्तर्विद्यापीठयुवसमारोहः
श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठम्,
जम्मू ।

———

# अथ विषयानुक्रमणिका

भूमिका १-१६

## १४. अमरनाथमाहात्म्यम् ३८०-४५३



## १५, वितस्तामाहात्म्यम् ४५४-६८९

# सङ्केत-सूची

——:०:——

* = टिप्पणनिर्देशः

क: = श्लोकस्य प्रथमो भागः

ख: = श्लोकस्य द्वितीयो भागः

ग: = श्लोकस्य तृतीयो भागः

घ: = श्लोकस्य चतुर्थो भागः

ब: = जम्बूस्था द्वितीया मातृका

मा = मातृका

——:०:——

# शुद्धिपत्रम्

—:०:—

| पृष्ठम् | श्लोक | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २ | १० | सिह | सिंह |
| ३ | १८ | हिसन | हिंसन |
| १६ | ५८ | गृह्णामि | गृह्नामि |
| १९ | ७५ | सव | सर्वं |
| २६ | ५६ | मुक्ताञ्च | मुक्ताश्च |
| २९ | २० | १० | २० |
| ३९ | ६३ | घटेपात्र | घटयात्रं |
| ५८ | ५ | शृङ्गात | शृङ्गात् |
| ६३ | ४६ | वलम्बने | विलम्बेन |
| ७७ | १७ | दुर्ख | दुःख |
| ७८ | २४ | धमपथो | धर्मपथो |
| ८० | ४२ | तत्मात् | तस्मात |
| ९० | ४५ | भीर्त | भीतः |
| ९२ | ६ | श्रुण् | श्रृण् |
| ११९ | १९ | पुन्ये | पुण्ये |

| पृष्ठम् | श्लोक | अशुद्धम | शुद्धम् |
|---|---|---|---|
| १२५ | ७५ | केचिन्नख: | केचिन्नखै: |
| १४५ | ५५ | किञ्त् | किञ्चित् |
| १४६ | ५७ | एतद्धघोर | एतद्घोर |
| २०८ | ७ | देव्य: | देव्या: |
| २५७ | ९२ | शतकल्यं | शतकल्पं |
| २६१ | — | मार्ताण्ड | मार्तण्ड (सर्वत्र पठनीम्) |
| २८१ | ९५ | पुञ्स्य | पुञ्जस्य |
| ३१८ | १४ | चाकाशङ्गेति | चाकाशगङ्गेति |
| ३१९ | २० | कैलासोवने | कैलासोपवने |
| ३२२ | ४० | मार्गै: | मार्गैः |
| ३७४ | १२ | यस्यायीनि | यस्यास्थीनि |
| ४०४ | १९ | यच्छ्रुत्वा | यच्छ्रुत्वा |
| ४०६ | १ | स्नाण्वाश्रम | स्थाण्वाश्रम |
| ४०८ | १६ | साघञ्च | सार्धञ्च |
| ४१६ | २५ | आप्मुनात् | आप्नुयात् |
| ४२३ | ४२ | विद्धि | विद्धिः |
| ४४० | ६५ | लाकोनां | लोकानां |
| ४४३ | ९० | वघनम् | वर्धनम् |
| ४४६ | १५ | पूणिमायां | पूर्णिमायां |
| ४५६ | १५ | वितस्वाया | वितस्तायाः |

| पृष्ठम् | श्लोक | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ४६३ | २ | विस्ताया | बितस्ताया |
| ४७३ | ४९ | कुर्दद्भिः | कुर्वद्भिः |
| ४७९ | ३६ | तोर्थ | तीर्थ |
| ४८५ | ३४ | खलिर्वात | खनिर्बलि |
| ४८७ | ६ | तपस्थं | तपःस्थ |
| ५१८ | ८ | कल | काल |
| ५२४ | ११ | भयसीरयन्ति | भयमीरयन्ति |
| ५४७ | ११ | कश्यये | कश्यपेन |
| ५६७ | १२४ | अपुजितः | अपूजितः |
| ५७४ | १४ | चैतन | चैतन्य |
| ५७९ | ३० | मीमां | सीमां |
| ५९५ | १६ | वहाञ्च | वहाश्च |
| ६३२ | २७ | प्रत्यश्चित्तानि | प्रायश्चित्तानि |
| ६३४ | ४३ | सन्धुना | सिन्धुना |
| ६३७ | ६२ | भवः | भवा |
| ७१५ | २ | अस्मामिः | अस्माभिः |
| ७३१ | १११ | पुष्यं | पुण्यं |
| ७५९ | १४० | तप्यतां | तृप्यतां |

——:०:——

# *भृङ्गीशसंहिता
# श्रीराज्ञीप्रादुर्भावः
## ॐ नमस्त्रिपुरसुन्दर्यै

श्री भैरव्युवाच

ॐ या मूर्तिस्त्रिपुरादेव्या द्वितीया तरुणाभिधा ।
उपस्थिता राक्षसेन रावणेन महात्मना ॥१॥

ईशानकोणे लङ्कायां नागेऽनन्ते प्रतिष्ठिता ।
तामसी बहिरादिष्टा सा का वै वद सत्तम ॥२॥

तामसी राजसी वापि सात्विकी वा महेश्वर ।
सैव श्रुता मया देव पुण्ये काश्मीरमण्डले ॥३॥

भुवनेशसमीपे तु विघ्ननाशार्थमास्थिता ।
कलौ सत्वात्मिका देवी वैष्णवी देवदुर्लभा ॥४॥

केन नीता कथं तत्र किं रूपा च प्रतिष्ठिता ।
वद सत्यं महादेव लोकानुग्रहकाम्यया ॥५॥

---

*मातृकायां श्रीसंहिता पाठोऽप्यस्ति ।

१ ग: प उपासिता—उपस्थिता

२ ज: प वेदसत्तम—वद सत्तम

श्री भैरव उवाच

श्रृणु सुन्दरि वक्ष्येऽहं तरुण्याश्चरितं महत् ।
येन श्रवणमात्रेण जनः सर्वज्ञतामियात् ॥६॥

पुरा पुलस्तितनयो रावणो नाम राक्षसः ।
सुतोऽभूत्तमसा पूर्णो मदमानसमन्वितः ॥७॥

दशायुतानि वर्षाणि चचार दुश्चरं तपः ।
निराहारो यतप्राणः पादैकाङ्गुष्ठसंस्थितिः ॥८॥

ईश्वराराधनं कुर्वंस्तन्मना विजितेन्द्रियः ।
एकदा चरतस्तस्य दुश्चरं तप ईश्वरि ॥९॥

लुब्धको मृगयूथं च सिंहवानरयूथकम् ।
शीघ्रगं चानुदुद्राव धनुष्पाणिर्महेश्वरि ॥१०॥

त्रस्तास्ते प्राणिनस्तत्र रावणाश्रममन्ततः ।
क्षोभयन्तः परं जग्मुर्न मृता लुब्धकेषुभिः ॥११॥

क्षुब्धं तमाश्रमं दृष्ट्वा रावणः सात्त्विकोऽपि सन् ।
जजाप जप्यं विमनः परमं तमश्चाश्रितः ॥१२॥

---

६ ख: ज चरित — श्चरितम्

१० क: प चर — मृग

क: प वाराह — वानर

१२ घ: प च नास्ति

देवदेवं महादेवं विरूपाक्षं त्रिलोचनम् ।
ध्यात्वा परमसंवित्तस्तमोरूपं ददर्श सः ॥१३॥

एतान्वै लुब्धकान्सर्वान् प्राणिनोऽपि च सर्वतः ।
एकेषुणा पातयेयमिति ध्यानास्पदो स्मरन् ॥१४॥

ततस्तं तामसं रूपं दर्शयामास सुन्दरि ।
दृष्ट्वा तत्तामसं रूपं स्तुत्वा नत्वा च भक्तितः ॥१५॥

वरं वृणीष्वेति वदंस्त्रैलोक्यं वृतवान् प्रभो ।
ततो देवेन चाज्ञप्तो भज शक्तिं च राक्षस ॥१६॥

तामसीं त्रिगुणातीतां देवीं श्यामात्मिकां पराम् ।
तरुणी मम या शक्तिर्महापञ्चदशी परा ॥१७॥

रजस्तमःस्वरूपा सा भज तामेव रावण ।
यतो मद्ध्याननिष्ठो वै प्राणिहिसनतत्परः ॥१८॥

---

१३ पः मातृकायामय श्लोकः १४ श्लोकादनन्तर पठितः।
गः प परमं—परम
गः प संविग्मः—संवित्तः
१४ गः प पातयेयः—पातयेयम्
१५ गः प तु—तत,
घः प नुत्वा—नत्वा
१६ कः प वृणीष्वेति—वृणीष्वीति
१८ गः प निष्ठा—निष्ठः

त्रैलोक्यं वृतवान्सद्यस्ततस्तामेव चाश्रय ।
आश्रिता सा महादेवी सर्वान्कामान्प्रदास्यति ॥१९॥

इत्युक्तो देवदेवेन चेश्वरेण महात्मना ।
जजाप तामसीं देवीं तरुणादित्यवर्चसम् ॥२०॥

वर्षायुतं महादेवी तद्दर्शनमुपागता ।
वरं वृणीष्व पुत्रेति स्कन्दस्यापि सुदुर्लभम् ॥२१॥

ददामि ते त्रिलोक्याश्च भुङ्क्ष्व राज्यमकण्टकम् ।
त्रियुगं भोगसहितस्ततोऽस्मत्पार्षदो भव ॥२२॥

अन्यदपि च ते पुत्र देवानामपि दुर्लभम् ।
ददामि खलु याचस्व यत्ते मनसि वाञ्छितम् ॥२३॥

इत्येवमुक्तो देवेश्या रावणो राक्षसोत्तमः ।
उवाच श्लक्ष्णं मधुरं भवानीं भयहारिणीम् ॥२४॥

यदि ते स्यान्महादेवि महान्मयि ह्यनुग्रहः ।
तदा त्वं मद्गृहे संस्था नित्यं सन्निहिता भव ॥२५॥

---

१९ कः प व्रतवान् — वृतवान्
२० घः प वर्चसाम् — वर्चसम्
२२ घः प पार्श्वदः — पार्षदः
२५ खः अनन्तरं प मातृकायां 'परितुष्टेन मनसा तत्र वासमन्वत' इत्ययं पाठोऽधिकः ।

इत्येवमुक्ता सा देवी राक्षसेन महात्मना ।
महासङ्कर्षणी ज्वाला ह्यनन्तोपरि संस्थिता ॥२६॥

पाशाङ्कुशधनुर्बाणैश्चतुर्भिरायुधैर्युता ।
त्रिनेत्रा तामसी शक्तिर्महासिंहोपरि स्थिता ॥२७॥

श्यामा च तरुणाकारा लङ्केशानदिशि स्थिता ।
राक्षसोपासिता भक्त्या महर्षिर्मधुमानुषैः ॥२८॥

तदा प्रभृति श्यामोक्ता सर्वैर्दैत्यगणैर्भुवि ।
सैव श्यामा भवेद्देवी राक्षसैस्समुपासिता ॥२९॥

तामसी सा तु तरुणी त्रिपुरायाः परा कला ।
यदा तदपराधैः सा चोद्विग्ना तद्गृहस्थिता ॥३०॥

तदायाता सतीदेशं रामराज्यप्रदाभवत् ।
महाराज्ञीति विख्याता भुवनेशमुपाश्रिता ॥३१॥

नीता हनुमता देवि नागानन्तोपरि स्थिता ।
षष्ट्युत्तरैर्नागशतैस्त्रिभिः सा परिवारिता ॥३२॥

---

२८ क: प नामातदाकारा — तरुणाकारा, ख: प भुवि—परि
२८ घ: प महिर्ष्यैः—मानुर्ष्यैः—महिषैः—मानुषैः
२९ ग: प एवं श्यामा परादेवी घ: समुपाश्रिता — समुपासिता
३० ग: घ: प 'अन्ते राक्षस कर्मणा परां घृणामभजत' इत्ययं पाठः ।
३१ ख: प प्रदायिनी — प्रदाभवत

आभुवनेशाच्च तुङ्गेशात्तथा लब्धवनादपि ।
भागेहादपि वै प्रोक्तं मण्डलं भुवि दुर्लभम् ॥३३॥

तूलवत्तुल्यतान्यत्र स्थानान्यन्यानि सुन्दरि ।
लघुभूतानि मूल्येन तस्मात्तु तूलमूल्यकम् ॥३४॥

अत्र स्थिताभूच्छान्ता सा क्षीरखण्डाज्यभोजना ।
सात्विका सत्यरूपा सा देवी पञ्चदशाक्षरी ॥३५॥

अस्या उपासनात्प्राप्ता मुनयः परमां गतिम् ।
श्रीरामो भजनादस्या लङ्कारावणमत्यघात् ॥३६॥

अस्याः प्रसादनाद्देवि ज्येष्ठो भ्राता विभीषणः ।
महाशान्तात्मना राज्यं लङ्कायाः प्राप्तवानलम् ॥३७॥

अस्यास्तु भजनात्सर्वे परां सिद्धिमुपागता ।
पुरा श्यामा भवेद्या तु लङ्केशभवने सदा ॥३८॥

सैवेदानीं सतीदेशे महाराज्ञीति विश्रुता ।
रामराज्यप्रदा सैव तरुणी या पराकला ॥३९॥

---

३३ खः प लाब्ध—लब्ध
 गः भोगोहादपि—भागेहादपि
 घः मण्डलम् —दुर्लभम्
३४ कः प तुल्यतां यत्र—तुल्यतान्यत्र
३६ कः प उपासनाप्राप्ताः — उपासनात्प्राप्ताः
३७ गः प नित्य शान्तात्मना राज्यं

प्रपद्य मनसा तां तु सद्यो मोक्षमवाप्नुयात् ।
पुत्रकामा महेशानि धनं चापि धनार्थिनः ॥४०॥

विद्यार्थिनो महाविद्यां कन्यां कन्यार्थिनः प्रिये ।
धनं धान्यं पशूंश्चापि गृहं क्षेत्रं निरन्तरम् ॥४१॥

प्रसादात्परमेशान्याः प्राप्नुवन्ति न संशयः ।
दिव्यं चैवान्तरिक्षं च भौमं घोरमुपद्रवम् ॥४२॥

महामारी भयं घोरं भयं दुर्भिक्षजं तथा ।
महाराजभयं चापि भजनान्नाशयेद्ध्रुवम् ॥४३॥

महासंकटमापन्नः प्रमुच्येत्संकटादपि ।
रोगात्प्रमुच्यते रोगी तरेदापन्न आपदः ॥४४॥

भवेच्चेह महाभोगी सोऽन्ते सायुज्यमाप्नुयात् ।
योऽस्याः मन्त्रं जपेत्पूर्णं साङ्गोपाङ्गं रहस्यकम् ॥४५॥

यन्त्रपूजां प्रकुर्वाणः शिव एवेति निश्चितम् ।
अथवा वाग्भवैर्मन्त्रैः पूजयेज्जगदम्बिकाम् ॥४६॥

गङ्गाप्रवाहवद्वाणी भवेत्तस्य न संशयः ।
इयं पञ्चदशी ख्याता तरुणी परमा कला ॥४७॥

---

४० कः प प्रपद्य मनसानां च

खः सद्यो मोक्ष प्रदायिनी

त्रिपुरायाः परादेव्या महाराज्ञीति विश्रुता ।
शान्ता स्वरूपा देवेशी महाशान्तैरुपासिता ॥४८॥

यदा रावणगेहेऽभून्महाश्यी तामसी कला ।
द्वाविंशत्यक्षरा घोरा तामसैः समुपासिता ॥४९॥

महाश्यामेति विख्याता घोरभक्ष्या सुरोत्तमा ।
सतीदेशमनुप्राप्ता नीता हनुमता स्वयम् ॥५०॥

अनन्तनागसहिता रामानुज्ञानुकारिणी ।
उपासिता ददात्येव सर्वान्कामान्यथेप्सितान् ॥५१॥

इत्येतत्कथितं देवि यत्पृष्टोऽहमिह त्वया ।
श्यामाभूद्रावणे गेहे सत्ये राज्ञीति विश्रुता ॥५२॥

अस्यास्तु श्रवणात्पुण्यं भवेद्यज्ञायुतं कलौ ।
एतत्पाठान्महादेवि सद्यो मुच्येत बन्धनात् ॥५३॥

इति श्री संहितायां लहरविषयोपतीर्थंजातसंपहराज्ञीप्रादुर्भावि
तूलमूलवर्णनं नाम प्रथमः पटलः ॥१॥

५१ गः १ ददत्येवं – ददात्येव

## अथ द्वितीयः पटलः

श्री भैरव्युवाच

देवदेव महादेव सर्वज्ञ परमेश्वर ।
कृपां कुरु महादेव विस्तरेण शृणोम्यहम् ॥१॥

का देवी त्रिपुरा प्रोक्ता कथं श्यामाभवत्स्वयम् ।
कथं रामेणार्चिताभूत्कथं प्राप्ता सतीपुरम् ॥२॥

एतत्सर्वं महादेव किंकरास्मि तव प्रिय ।३।

श्री भैरवः

शृणु देवि प्रवक्ष्यामि यत्पृष्टं गिरिजे त्वया ।
अस्याः श्रवणमात्रेण सर्वसिद्धिः प्रजायते ॥४॥

विधातृपुत्रतनयः पौलस्त्यो रावणोऽसुरः ।
महादेव कृतां लङ्कां दृष्ट्वा रुरोद सोऽसुरः ॥५॥

पुलस्त्यं च शिवः प्राह किमर्थं रोदिति शिशुः ।
तमुवाच मुनिः श्रीमान् लङ्कां प्रार्थयति प्रभो ॥६॥

---

२ घः प सतीसरम्—सतीपुरम्

४ घः प सर्वबुद्धिः—सर्वसिद्धिः

५ गः प लज्जां—लंकां

६ कः प पुलस्तिं—पुलस्त्य घः रुदति—रोदिति

प्रहस्य तं मुनिं प्राह देवदेवो वृषाकपिः ।
शृणु ब्रह्मन्प्रवक्ष्यामि त्वत्तनुजो ह्ययं शिशुः ॥७॥

भुवनानां दुःखदायी भविष्यति न संशयः ।
अस्मै दास्याम्यहं लङ्कां सुप्रियां राक्षसेश्वर ॥८॥

आदौ तपः प्रभावेन प्रसन्नः क्रियतां विधिः ।
तस्मात्प्राप्तवरो नित्यं लङ्काराज्यं करिष्यति ॥९॥

इत्येतद्वचनं श्रुत्वा रावणो लोककर्षणः ।
प्रणम्य चेश्वरं प्राह प्रणयानतकन्धरः ॥१०॥

देवदेव महादेव शरणागत वत्सल ।
को ब्रह्मा जगतां सृष्टा त्वद्ध्यानमुखरीकृतः ॥११॥

त्वं सर्वव्यापी विश्वात्मा देवदेव महेश्वर ।
प्रपन्नं पाहि मां भक्तं कृपया परमेश्वर ॥१२॥

यदुक्तं परमेशान मच्छ्रेयः प्राप्तिकारणम् ।
तपो महेश्वर विभो येन ब्रह्मा प्रसीदति ॥१३॥

तदाविन्ध्यं प्रति गतो रावणो बालकोऽपि सन् ।
तपश्चचार परमं दुष्करं देवदानवैः ॥१४॥

---

९ घ: प लंका—लंकां

१० घ: प प्रणम्य—प्रहस्य

१४ घ: प देवमानवैः—दैवदानवैः

वर्षाणामयुतं देवि ब्रह्मा प्रीतस्तुतं प्रति ।
ब्रह्मा ह्याविरभूत्तत्र प्रीतोऽस्मीति वरं ददौ ॥१५॥

भो भो पौलस्त्य सुभग किं याचे वद सत्वरम् ॥१६॥

इति श्रुत्वा वचो दिव्यं रावणो दनुजप्रियः ।
प्रोवाच तं महादेवि ब्रह्माणं प्रपितामहम् ॥१७॥

वरदोऽसि यदा देव लङ्कां देहि जगत्पते ।
मह्यं सुखाय वासाय यतोऽजेयो भवाम्यहम् ॥१८॥

इति श्रुत्वा वचस्तस्य रावणस्य महेश्वरि ।
लङ्का प्राप्ता त्वया शम्भोरजेयस्त्वं भविष्यसि ॥१९॥

महामायाहरेः सम्यक् सीता यावन्न जायते ।
तावद्देवैर्मनुष्यैश्च दैत्यैर्दानवपुङ्गवैः ॥२०॥

अजेयो ह्यसि पौलस्त्य चेति सत्यं वदामि ते ।
ततोऽसौ रावणो लङ्कां प्राप्य चेश्वरनिर्मिताम् ॥२१॥

देवानां दुःखदो भूत्वा दैत्यानां सुखदोऽभवत् ।
वर्षाणामयुतं प्राप्य शिवाराधन तत्परः ॥२२॥

---

१६ गः प इत्याश्रुत्य—इति श्रुत्वा

२० घः प मानव—दानव

२१ घः प मताम्—निर्मिताम्

मलये देवनिलये चकार तप उत्तमम् ।
न सन्तुष्टोऽभवद्देवि शंकरो लोकशंकरः ॥२३॥

नारदो भगवद्दूतो गत्वा रावणसन्निधौ ।
दृष्ट्वा रक्षोधिपं विप्रो ह्युवाच मुनिपुङ्गवः ॥२४॥

किं कृतं हि त्वया दैत्य ह्युत्तमाङ्गविकर्तनम् ।
निष्फलमभवत्सर्वं प्रसादरहिते शिवे ॥२५॥

नन्दी च तुम्बुरुश्चैव लास्यनृत्तपरावुभौ ।
न कैलासे न मेरौ न मन्दिरे नैव वर्तते ॥२६॥

यतो नादं शृणोत्येष तत्रैव वर्तते प्रभुः ।
न कायच्छेदने चैव न पूजापठनैरपि ॥२७॥

शिवः प्रसन्नतामेति यथा नादेन सुव्रत ।
इत्युक्त्वा प्रययौ विप्रो नारदो ब्रह्मसत्तमः ॥२८॥

छिन्नशीर्षो दशग्रीवो मस्तकैकयुतोऽग्रतः ।
चक्रे नादं महाघोरं भैरवं भैरवेश्वरि ॥२९॥

---

२३ घः प देव—लोक

२६ घः प मन्दरे—मन्दिरे

२७ घः प पठनादिभिः —पठनैरपि

अत्यन्तमधुरं सूक्ष्मं प्रबोधनकरं परम् ।
तेन नादेन भगवान्महादेवो महेश्वरः ॥३०॥

भैरवेन प्रबुद्धस्तु रावणं प्रददर्श ह ॥३१॥

अद्य रावण दौरात्म्य किं कृतं राक्षसाधिप ।
किं वृणे वद दास्यामि यदलभ्यं सुरासुरैः ॥३२॥

रावण उवाच

देव देहि परं नाथ भैरवस्य पदं शिवम् ।
येन नादेन सुप्तस्त्वं प्रबोधोऽसि महेश्वर ॥३३॥

ततो मे देहि सर्वज्ञ वरं त्रिभुवनेश्वर ।
यथा पूर्वमहं नाथ मस्तकैर्दशभिर्युतः ॥३४॥

तथा मां कुरु तादृशं त्वद्भक्तितत्परं शिव ।
सम्भवामि प्रीतिकारी दनुजानां महेश्वर ॥३५॥

श्री ईश्वरः

भैरवस्त्वं महाभाग रागानामधिपो भव ।
यथा पूर्वं दशग्रीवस्त्वं तथा ह्यधुना भव ॥३६॥

---

३० घः प महेश्वरि—महेश्वरः

३३ गः प स्वप्तस्त्वं - सुप्तस्त्वं

३४ घः प दशाभिः युतैः —दशभिर्युतः

३५ कः प तादृशं —तादशं

दैत्यानां प्रीतिमान्विप्र भव नित्यं महामते ।
इति प्राप्तवरो दैत्यो रावणो लोकरावण: ॥३७॥

मतिं चकार दैत्यानां स तदा सुखहेतवे ।
मुनीनां मानवानां च देवानां कदनं महत् ॥३८॥

चक्रे घोरतमोरूपमाश्रित्य बलदर्पित: ।
धर्मसंस्थापनार्थाय साधूनां रक्षणाय च ॥३९॥

राक्षसानां वधार्थाय भगवान्भूतभावन: ।
सञ्जातो द्वापरे पुत्रो राज्ञो दशरथस्य वै ॥४०॥

गृहे पूर्णकलारूप: कौसल्यानंदवर्धन: ।
श्रीरामो जगतां नाथ: सीता माया तथेश्वरि ॥४१॥

रावणस्य वधार्थाय भूभारहरणाय च ।
गतो वानरसंयुक्तो लङ्कां प्रति महामति: ॥४२॥

युद्धं चकार सुमहत्सप्तम्यां वानरैर्युत: ।
मेघनादादिकान्हत्वा रावणो भयविह्वल: ॥४३॥

---

३७ घ: प लोककर्षण: — लोकरावण:
४० ग: प जातो त्रेतायुगे — संजातो द्वापरे
४१ क: प गृहे — गृहं
४३ ग: प हतान् — हत्वा

मन्दोदरीं प्राह हतः कथं मृत्युं व्रजेदयम् ॥४४॥

मन्दोदर्युवाच

श्रृणु रावण वक्ष्येऽहं प्रीत्योक्तं नारदेन तु ।
रामो मनुष्यतां प्राप्तो भगवान्भूतभावनः ॥४५॥

श्यामः श्यामाम्बरो नित्यं श्यामापूजनतत्परः ।
लङ्कां सम्प्राप्य सीतां च राज्यं दत्वा बिभीषणे ॥४६॥

पुष्पकेन विमानेन गृहान्गच्छत्यसौ पुनः ।
तस्मात्सर्वप्रयत्नेन राज्यं देहि बिभीषणे ॥४७॥

सीतां रामाय त्वं देहि वयं यास्याम भवत्पम् ।
श्रीशम्भूं परमेशानं प्रणतार्तिहरं परम् ॥४८॥

तपसा तोषयिष्यामि शिवं परमकारणम् ।
स एव देवो भगवान्प्रसन्नः स्यात्सदाशिवः ॥४९॥

रामं गृहं नाथ गते लङ्कां प्राप्स्याम जीवनात् ।
इति श्रुत्वा वचस्तस्या मन्दोदर्या मुखाम्बुजात् ॥५०॥

निरादृत्य गतः स्थानं यत्र देवी निकुम्भिला ।
मन्दोदरी समं तत्र पूजां चक्रे स रावणः ॥५१॥

---

४४ कः प ततः – हतः
४९ कः प तोषयिष्यावः – तोषयिष्यामि

उवाच शनकैर्वाक्यं राजा मन्दोदरीं प्रति ।
हे मन्दोदरि! सुश्रोणि! रामश्चेद्भगवान्स्वयम् ॥५२॥

श्यामायाः पूजने सक्तस्तदा ह्यावाहयामि तम् ।
आगतश्चेन्मानुजश्च स हनूमांस्तथा परैः ॥५३॥

बलिं दास्याम्यहं देव्यै सहसा चानुगैः सह ।
ततश्चावाह्य श्रीरामं रावणो राक्षसाधिपः ॥५४॥

रामः प्रादुरभूत्तत्र पूजामण्डपमध्यतः ।
प्राह रामं महादैत्यो रावणो घोरदर्शनः ॥५५॥

सीतां त्यज व्रज गृहं यदि जिवीतुमिच्छसि ।
नान्यथा त्वं बलिविधावुपहारं तनोम्यहम् ॥५६॥

श्रीश्यामायाः पादुकायां प्राह राजीवलोचनः ।
भो भो दुष्ट दुराचार किं व्रजाम गृहं प्रति ॥५७॥

सीतां गृह्णामि श्रीश्यामां गृहीत्वा त्वां निपात्य च ।
लङ्कां ददामि ते भ्रात्रे भक्ताय सुहृदाय मे ॥५८॥

---

५२ कः प सुश्रेणि — सुश्रोणि

५४ गः प तत आवाह्य — ततश्चावाह्य

५५ घः प मध्यगः — मध्यतः

५८ गः प दास्यामि — ददामि

इति श्रुत्वा वच: क्रोधादष्टम्यामर्धरात्रिके ।
खड्गं निष्कृष्य श्रीरामं प्रतिदुद्राव च्छेदितुम् ।।५६।।

तस्मिन्नवसरे देवी श्रीश्यामा रावणं प्रति ।
प्रहस्य क्रोधताम्राक्षी मेघगम्भीरया गिरा ।।६०।।

उवाच जगतां धात्री धिक् त्वां हे राक्षसाधम ।
अहं व्रजामि सद्देशे हिमाचले वरे शुभे ।।६१।।

सतीसरसि काश्मीरे वैष्णवव्रतधारिणी ।
हनुमन्तं ततः प्राह श्रीरामो मनुजाकृतिः ।।६२।।

वीरेश वीरहनुमन्सानन्तां श्रीमहेश्वरीम् ।
गृहाण गच्छ भद्रं ते कश्मीरं प्रति शीघ्रग ।।६३।।

एवमस्त्विति संपृच्छ्य वीरेशो हनूमांस्ततः ।
पृष्ठे तच्चरणौ कृत्वा संप्राप्तश्चोत्तरापथम् ।।६४।।

श्रीरामो रणभूमिं स्वयं जगाम लक्ष्मणं प्रति ।
उवाच भ्रातरं वीरं श्वो हतोऽयं भविष्यति ।।६५।।

---

६१ ग: प मद्देशे—सद्देशे

६२ क: प सतीसरसी—सतीसरसि

६४ ख: प वीरीशो—वीरेशो—तथा—ततः

६५ ख: प स्वां—स्वयं

सीतां गृहीत्वा यास्यामोऽयोध्यां सर्वजनार्थिताम् ।
ततः प्रभाते सम्पन्ने रावणो भयविह्वलः ॥६६॥

रणभूमिं गतो रामं प्रोवाच वचनं शनैः ।
राम राम महामायस्त्यज मानं च जानकीम् ॥६७॥

गच्छ त्वं यत्र गत्वा वै जीवनं प्राप्स्यसि ध्रुवम् ।
नोचेद्गच्छसि त्वं राम युद्धं कुरु मया सह ॥६८॥

द्वन्द्वात्मिकां नान्यथैव यदि त्वं वीर उत्तमः ।
एवमस्त्विति रामो वै रावणं प्रोक्तवान्स्वयम् ॥६९॥

एहि युद्धं करोम्यत्र तिष्ठ त्वं समराङ्गणे ।
प्राप्ते नवम्यां मध्याह्ने रावणो भयकारतः ॥७०॥

प्राणान् मुमोच श्रीरामशस्त्रेणाभिहतोऽसुरः ।
दिव्यदुन्दुभयो नेदुः ननृतुश्चाप्सरसोगणाः ॥७१॥

अवाकिरन् पुष्पवर्षैः रामं त्रिदिवौकसः ।
जयेत्युक्तं तदा सर्वैर्वानरैः सर्वतो दिशम् ॥७२॥

तदा प्रभृति श्रीरामः पूर्णिमायां दिवानिशम् ।
यात्रां करोति विधिवत्ससीतां सानुजो हरिः ॥७३॥

---

६७ ग: प महामायी—महामायस

६९ क: प द्वन्द्वात्मिकं—द्वन्द्वात्मिकां

७१ घ: प गणः—गणाः

मन्दोदर्याथ चाष्टम्यां नवम्यां वा बिभीषणः ।
हनूमांस्तु सदैवात्र वर्तते द्वारपो बली ॥७४॥

पर्वस्वेतेषु सम्पूज्य जनैः सर्वार्थसिद्धये ।
इत्येतत्कथितं देवि राज्ञ्याः प्रादुर्भवं शिवे ॥७५॥

येन श्रवणमात्रेण जायन्ते सर्वसिद्धयः ॥७६॥

इति श्रीसंहितायां लहरविषयोपतीर्थजातसंग्रहे
श्रीराज्ञी-प्रादुर्भावो नाम पटलः ॥२॥

[ समाप्तश्चाय राज्ञीप्रादुर्भावः ]

---

७५ घः प राज्ञः प्रादुर्भाव—राज्ञ्याः प्रादुर्भवं

# भृङ्गीशसंहिता
## केदारमाहात्म्यम्

ॐ नमः शिवाय स्वच्छन्दरूपाय केदारनाथाय ।

ॐ श्री भैरव्युवाच

भगवन्सर्वधर्मज्ञ लोकानुग्रहकारक ।
केदारोत्पत्तिमाकर्ण्य कृतार्थास्मि न संशयः ॥१॥

अधुना श्रोतुमिच्छामि पुण्यं स्वच्छन्दभैरवम् ।
प्रादुर्भावं तस्य विभो वद सत्यं महेश्वर ॥२॥

श्री भैरवः

शृणु देवि प्रवक्ष्यामि पुण्यं स्वच्छन्दभैरवं ।
यच्छ्रुत्वा मुच्यते जन्तुर्जन्मकोटिभवैरघैः ॥३॥

पृथ्वीमुद्गरतस्तत्र वराहस्य महात्मनः ।
हिरण्याक्षं मर्दयतः कीचको नाम वै गणः ॥४॥

राक्षसां जगदीशानि वराहमनुपद्यत ।
दृष्ट्वा तु कीचकगणं हरिः परमकारणः ॥५॥

भूत्कारैरीरयामास राक्षसां गणमुत्तमः ।
कर्णाक्षिनासिकास्योत्थैः भूतकारैर्वरवर्णिनि ॥६॥

कीचको व्यगमन्नाशं पर्वतात्परित: प्रिये ।
यत्र वै राक्षसां दुष्ट: कीचको नाम वै गण: ॥७॥

लीनोऽभूत्पर्वतश्रेष्ठे स कीचाश्रम उच्यते ।
श्रोत्राक्षिनासिकास्येभ्य: भूत्कारा ये तु निस्सृता: ॥८॥

सप्ततीर्थाभवत्तत्र लोकानां हितकाम्यया ।
वराहस्य शिरो यत्र मेदिनीमुद्धरिष्यत: ॥९॥

कीचको निहितो यत्र भूत्कारैरंध्रसम्भवै: ।
स वराहशिरो नाम ग्राम: प्रथित उत्तम: ॥१०॥

वराहक्षोभं दृष्ट्वा तु शिव: प्रादुरभूत्किल ।
वराहे दर्शयन्वीर्यं कीचकान्मर्दयन्मुदा ॥११॥

दृष्ट्वा पञ्चमुखं देवं हरि: स्वच्छन्दभैरवं ।
प्राह गम्भीरया वाचा श्लक्ष्णया मधुराक्षरम् ॥१२॥

श्री वराह उवाच

तिष्ठास्मिन्मच्छिरोदेशे स्वच्छन्द मोचय जनान् ।
तीर्थविघ्नकरांश्चैव ग्रसन्मुद्गरतन्द्रित: ॥१३॥

सप्ततीर्थम्मच्छिरसि वस नित्यं महेश्वर ।
स्ववश: संस्मृतिभयं नित्यमीरयसे यत: ॥१४॥

तत: प्रोक्त: पुराविद्भिर्वीर: स्वच्छन्दभैरव: ।
श्रुत्वा तद्वचनं सौम्यं वराहस्य महात्मन: ॥१५॥

एवमस्त्विति तं देवस्तत्र सान्निध्यमादधे ।
तदा प्रभृति देवेशि सप्ततीर्थं प्रतिष्ठितः ॥१६॥

स्वच्छन्दभैरवश्चापि लोकानां मुक्तिदं कलौ ।
तस्मात्सर्वप्रयत्नेन शिरसि स्नानमाचरेत् ॥१७॥

सप्ततीर्थ्यं पूजयित्वा स्वच्छन्दं परभैरवम् ।
अदीक्षितो स्नातः स्यान्मुच्यते ब्रह्महत्यया ॥१८॥

वाराणस्यां कल्पवासात्प्रयागे मरणात्प्रिये ।
यां गतिं समवाप्नोति तां स्वच्छन्दस्य दर्शनात् ॥१९॥

कुरुक्षेत्रे प्रयागे च गङ्गासागरसङ्गमे ।
चन्द्रसूर्योपरागे च गवां कोटिमनुत्तमाम् ॥२०॥

विधिवद्वेदविदुषे दत्वा यत्फलमाप्नुयात् ।
तत्फलं सर्वमाप्नोति केदारस्नानमात्रतः ॥२१॥

केदारकुण्डे संस्नाप्य यात्रां कृत्वा विधानतः ।
दानं यथोक्तं दत्वा तु ह्यश्वमेधसहस्रजम् ॥२२॥

मुखेन पीत्वा पानं तु न पुनः स्तन्यपो भवेत् ।
आत्मारामाश्च मुनयो यतयः संशितव्रताः ॥२३॥

न तां गतिं प्रयान्ति स्म यां केदारपायिनः ।
स्नात्वा केदारकुण्डे तु कुम्भस्थे च बृहस्पतौ ॥२४॥

यां गतिं समवाप्नोति नरः पातकवान्कलौ ।
न तामवाप्नुयां देवि क्रतुयागशतैरपि ॥२५॥

केदारं तत्र गच्छामि स्नास्यामि तत्र वारिणि ।
दास्यामि तत्तटे तोयं पास्यामि मलहं कदा ॥२६॥

एवमीप्सितमाकुर्वन्याति सादाशिवं पदम् ।
बहुनात्र किमुक्तेन पुनरुक्तेन भामिनि ॥२७॥

कलौ मूढजनस्यापि स्वर्गः परमदुर्लभः ।
मुक्तिः सुदुर्लभा देवि सा चात्रैव प्रतिष्ठिता ॥२८॥

वराहक्षेत्रे देवेशि स्नात्वा केदारवारिणि ।
केदारतीर्थमासाद्य कुम्भसंस्थे बृहस्पतौ ॥२९॥

ये स्नास्यन्ति पिबन्ति च तीर्थयात्रा पुरस्सरम् ।
ते यास्यन्ति परं लोकं यत्र गत्वा न शोचते ॥३०॥

तदेव घोरे च कलौ चतुर्धा भागमेष्यति ।
एकत्रासनमेकत्र जानुकुक्षि तथैकतः ॥३१॥

शिर एकत्र नाथस्य केदारस्य भविष्यति ।
मूलादारभ्य क्रमशः शिरोऽन्तो यश्च पश्यति ॥३२॥

स याति शिवसायुज्यं यत्र नास्ति कृताकृतम् ।
अर्धं वा पादमेकं वा दृष्ट्वा नाथकलेवरम् ॥३३॥

हत्यादोषमवाप्नोति न तीर्थफलमवाप्नुयात् ।
तस्मात्सर्वप्रयत्नेन मूलादारभ्य शीर्षतः ॥३४॥

यात्रां कृत्वा व्रजेद्देवं व्रजेच्छिवमवाप्नुयाम् ।
केदारमुदकं पीत्वा कलौ रेतोदके शिवे ॥३५॥

दानं च विधिवद्दत्वा याति सादाशिवं पुरम् ।
न केदारसमं तीर्थं दिवि भुव्यन्तरिक्षगम् ॥३६॥

महामोक्षप्रदं देवि न भूतं न भविष्यति ।
पतितानामनाथानां दरिद्राणां महात्मनाम् ॥३७॥

महद्ग्रहग्रस्तानां च केदारमुदकं प्रिये ।
पथ्यं प्रोक्तं पुराविद्भिर्मन्त्रतन्त्रविशारदैः ॥३८॥

यस्य जन्तोर्महादेवि ज्वरो वै गदभाभिधः ।
न शान्तोऽप्यौषधगणैर्महामयभयप्रदः ॥३९॥

सोऽपि शान्तिं प्रयात्याशु रेतोदकनिपातनः ।
केदारदर्शनाच्चैव रेतोदकनिपातनः ॥४०॥

स्नानाद्दानाच्च देवेशि मुच्यते घोरपातकैः ।
केदारयात्रां यास्यामि कदा चिन्तयतोऽपि च ॥४१॥

गृहात्प्रचलितस्यापि यावन्तः पांसुबिन्दवः ।
पादस्य चाल्यमानस्य तावन्तोऽब्दाञ्छिवे वसेत् ॥४२॥

केदारपादे पिबतो जानूर्ध्वं त्यजत: प्रिये ।
उदरं चापि देवेशि शिरश्चैव प्रमादत: ॥४३॥

न यात्रा फलमाप्नोति यथा सर्वं भविष्यति ।
प्रपद्य नारीशिरसं देवमुग्रं कपर्दिनम् ॥४४॥

मनसा शान्तरूपेण स्वच्छन्दं परभैरवम् ।
पीत्वा रेतोदकं देवि शीघ्रं मुच्येत चाशुभात् ॥४५॥

मूलादारभ्य केशान्तं कलौ स्त्रीशिरसं श्रयेत् ।
पीत्वा रेतोदकं तत्र परां सिद्धिमवाप्नुयात् ॥४६॥

न रेतोदसमं तीर्थं न रेतोदसमा गति: ।
न रेतोदसमं पानं न रेतोदसमं हवि: ॥४७॥

न रेतोदसमं ज्ञानं न रेतोदसमो विधि: ।
न रेतोदसमो यागो न रेतोदसमं धनम् ॥४८॥

न रेतोदसमं सोमं न देव: स्त्रीशिर: पर: ।
घोरकलियुगे देवि महाकैवल्यद: पर: ॥४९॥

स्त्रीशिरो दर्शनाच्चैव रेतोदस्नानपानत: ।
मुच्यते संसृतेर्घोरान्महापातकिनोऽपि ॥५०॥

तस्मात्सर्वप्रयत्नेन कुम्भस्थे च बृहस्पतौ ।
केदारेश्वरमासाद्य स्नायाद्रेतोदवारिणि ॥५१॥

पीत्वा रेतोदकं तत्र शक्तिविष्णुहरादितः ।
मुच्यन्ते घोरहत्याभिर्मुक्तं यास्यन्ति ते ध्रुवम् ॥५२॥

मुक्ताश्च न पुनर्जन्म यान्ति स्वच्छन्दभैरवम् ।
नुत्वा स्त्रीशिरसं देवं पीत्वा रेतोदकं परम् ॥५३॥

त एव रुद्राः कथिता भुवि स्वच्छन्दचारिणः ।
घोरैर्घोरतरैः पापैर्ज्ञानाज्ञानकृतैः प्रिये ॥५४॥

प्रपद्य स्त्रीशिरे देवं स्नात्वा रेतोदवारिणि ।
पीत्वा रेतोदकं पुण्यं मुच्यते घोरकिल्विषैः ॥५५॥

मुक्ताश्च यान्ति परमं भैरवं भैरवार्चिते ।
बहुनात्र किमुक्तेन कलिकाले सुदुःखदे ॥५६॥

मुक्त्यर्थं पापिनामेतत्तीर्थं देवि प्रकाशितम् ।
कथितं मूलमाहात्म्यं भूयः किं श्रोतुमिच्छसि ॥५७॥

इति श्री संहितायां केदारमाहात्म्ये स्वच्छन्दमाहात्म्यं नाम
प्रथमः पटलः ॥१॥

## अथ द्वितीयः पटलः

श्री भैरवी

श्रावं श्रावं महादेव वराहविषये फलम् ।
केदारनाथस्य विभो कृतार्थास्मि न संशयः ॥१॥

अधुना श्रोतुमिच्छामि यात्रां दानमपीश्वर ।
मनुं रेतोदपाने च यष्टिमोक्षणमेव च ॥२॥

यच्छ्रुत्वा मुच्यते जन्तुर्जन्मकोटिभवैरघैः ॥३॥

श्री भैरवः

शृणु वक्ष्ये महादेवि यात्रामस्य महेश्वरि ।
दानं मनुमुदपाने यच्छ्रुत्वा मुच्यते भवात् ॥४॥

आदौ श्राद्धे पुरे स्नात्वा ततो निगिलमाश्रयेत् ।
ततो गच्छेत् चन्द्रोदे सुरेज्यापुर उत्तमे ॥५॥

तत्र स्नात्वा व्रजेद्देवि प्रहारासङ्गमुत्तमे ।
तत्र स्नात्वा व्रजेत्पूतमनन्तं नागमुत्तमम् ॥६॥

ततः स्नात्वा प्रव्रजेत् वराहं क्षेत्रमुत्तम् ।
सोमसूर्याग्निधामानि स्नात्वा गच्छेत् सुन्दरि ॥७॥

वराहशिरसं नाम ग्रामं सप्तोदके ततः ।
स्नात्वा स्वच्छन्दपूजां च कृत्वा कोटिं समाश्रयेत् ॥८॥

ततः पापहरे स्नायात्पर्वतारोहणं ततः ।
तत्र केदारनाथस्य पूजां कृत्वा विधानतः ॥९॥

स्नात्वा चुलकमादद्याच्छक्तिविष्णुहरादितः ।
श्राद्धं तत्र विधानेन पितॄणामुपतिष्ठति ॥१०॥

क्ष उकार यत्र भूषितमीश्वरि ।
बह्निमुकारेण युतं दशार्णं मनुमादिशेत् ॥११॥

"ॐ रों क्षों रों क्षों रों रों क्षों रों ओं"

॥ इति दशार्णो मन्त्रोद्धारः ॥

आदौ शक्त्यापि वा तोयं त्रिपिबेद्वारिणा शिवे ।
हरेण त्रिपिबेद्देवि पीत्वा मुच्येत चाशुभात् ॥१२॥

त्रयं पिबेच्च वामेन चुलकं सुरसुन्दरि ।
त्रयं मुखेन देवेशि त्रयं दक्षिणपाणिना ॥१३॥

इति प्रोक्तः पुराविद्भिर्विधिः पानफलप्रदः ।
दानमत्र प्रवक्ष्यामि यात्रासाफल्यहेतवे ॥१४॥

यवपिष्टं समानीय प्रमाणं पलपञ्चकम् ।
कृत्वा वृषं वज्रनेत्रं मुक्तानासं महेश्वरि ॥१५॥

ताम्रपृष्टं स्वर्णमुखं पट्टलाङ्गूलभूषितम् ।
कांस्येन्द्रियं रौप्य खुरं घण्टाभरणभूषितम् ॥१६॥

ऊर्णापट्टमयैर्वस्त्रैरलङ्कृतं सुविग्रहम् ।
पूजयित्वा गन्धधूपैः पुष्पैरर्घैस्तथेश्वरि ॥१७॥

कुम्भे धातुमये स्थाप्य तिलपात्रे विशेषतः ।
वासोभिर्विविधैर्युक्तं ब्राह्मणाय समर्पयेत् ॥१८॥

केदारनाथसान्निध्ये नन्दिनं सुरपूजितम् ।
अर्चितं परया भक्त्या मया द्विज वरोत्तम ॥१९॥

यात्रासाफल्यहेत्वर्थं गृहाण मदनुग्रहात् ।
इति मन्त्रेण दत्वा तु ग्रहीत्वा क इदं वदेत् ॥१०॥

उभयोः सफलं तीर्थं भविष्यति न संशयः ।
श्राद्धं कृत्वा प्रयत्नेन ब्राह्मणान्भोजयेच्छुभान् ॥२१॥

विसृज्य यष्टिमोक्षं तु कुर्यात्तीर्थे ह्यतन्द्रियः ।
यष्टौ ह्याधारभूतासि शिवशक्तिस्वरूपिणी ॥२२॥

हेतुभूतासि सर्वत्र पुण्यपापस्य साक्षिणी ।
सर्वेश्वरी यतस्त्वं च ब्रह्मणा निर्मिता पुरा ॥२३॥

सर्वाश्रया यतस्त्वं च ततस्तुभ्यं नमो नमः ।
शिवविष्णोः सन्निधाने मम यात्रां निवेदय ॥२४॥

इति यष्टिं विमुच्याथ ततः प्रापाद्यदृच्छया ।
इत्थं कृत्वा महायात्रां कोटियज्ञफलं लभेत् ॥२५॥

मन्त्रसिद्धिमवाप्नोति शीघ्रं देवि न संशयः ।
मुच्यते कोटिहत्याभिरिति सत्येन ते शपे ॥२६॥

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
केदारेश्वरमासाद्य मुच्यते घोरपातकैः ॥२७॥

इदं रहस्यं परमं नाख्येयं यस्य कस्यचित् ।
अप्रकाश्यमिदं तीर्थं गुह्यं गोप्यतमं कलौ ॥२८॥

इत्थं निशम्य देवेशात् केदारस्य महत्फलम् ।
मूले वराहके पुण्ये पुनः प्रष्टुं मनो ह्यभूत् ॥२९॥

इत्थं वराहक्षेत्रस्य महिमानमनुत्तमम् ।
शृणुयात्पठेद्वापि पाठयेद्वापि विधानतः ॥३०॥

वाचकं पूजयित्वा तु यात्रा फलमवाप्नुयात् ॥३१॥

इति श्रीसंहितायां वराहमूले केदारमाहात्म्यं
नाम द्वितीयो पटलः ॥२॥

## अथ तृतीय: पटल:

श्री भैरव्युवाच

श्रुतो भगवत्प्रसादेन केदारेश्वरसम्भव: ।
महिमा गहनो देव महापातकहा पर: ।।१।।

इदानीं श्रोतुमिच्छामि भैरवे विषये महत् ।
पुण्यं केदारनाथस्य कलिकल्मषनाशनम् ।।२।।

श्री भैरव:

पुरा अहंकारतो देवी बभ्रामतुररिन्दमौ ।।३।।

दृष्ट्वा ज्योतिर्मयं लिङ्गं ब्रह्मोपरि हरि त्वध: ।
हरिर्बभ्राम देवेशि दिव्यं वर्षसहस्रकम् ।।४।।

गहने तु गुहाज्वाले एव तस्य विशेषत: ।
गुहायारन्तरं प्राप्य भ्रमंस्तत्र विशेषत: ।।५।।

इच्छन्ति श्रममेशानि तत्रैव निषसदह ।।६।।

गुहाद्वारे निषस्तं तमुवाचानाहतापि वाक् ।
दृष्टं ते दर्शनं किञ्चिद्भ्रमन्तत्र हरे: पुन: ।।७।।

अत्र नारायणायां गुहायां किं निषीदसि ।
उत्तिष्ठात्र गिरौ रम्ये पश्य स्त्रीशिरसं परम् ।।८।।

यस्य दर्शनमात्रेण नश्येदज्ञानजं तम:
अशरीरं वच: श्रुत्वा विस्मयोत्फुल्ललोचन: ॥९॥

गुहातो निस्सृत: सोऽथ गिरिस्थं प्रभुमन्तत: ।
ददृशे त्रिजटं देवं स्त्रिया शिरसि शोभितम् ॥१०॥

देवं श्रीत्रिजटं त्रिलोचनयुतं नेत्राग्निकान्तिप्रभुम् ।
पञ्चास्यं शरबाहुयुग्ममलमाली विषाभूषणम् ॥११॥

खट्वाङ्गं त्रिशिखं कुठारडमरुपाशं कपालाङ्कुशौ ।
पद्मं चाक्षधनु: कमण्डलुधरं केदारनाथं भजे ॥१२॥

दृष्ट्वा देवं हरिरत्र दण्डवत्पतित: क्षितौ ।
वेदतन्त्रोद्भवै: सूक्तैस्तुष्टाव जगदम्बिके ॥१३॥

श्री हरिरुवाच

ॐ श्रुताद्यन्तं विरजस्कं विरूपं धामत्रयातीतम् ।
अत्पुल्वणं च अधश्चोर्ध्वमेकमेवाप्रमीयन्तम् ॥१४॥

तं त्वानन्तं प्रभुमीशनमेति यन्मायया ।
मोहितोऽयमधस्ताद्दिव्यधाम्नोऽस्यान्तमेव ॥१५॥

दिदृक्षु: भ्रमन्दिवं वर्षसहस्रमेक:
अप्यपारस्य पारमिच्छन्नुपैमि ।
रूपं तं वै भगवंस्तावदास्ताम्
त्वत्पादपद्मयोगिगम्यं दुरापम् ॥१६॥

न प्राप्तवान्नहमेवातिमूढो
भ्रमन्नेवं वर्षपूगानुपैमि ।
स त्वभिमान्यप्यहमेवातिमूढो
ह्यनन्तपारस्य भयोल्बणस्य घोरस्य ॥१७॥

धाम्नो भव सागरस्य भ्रमन्
समन्तात्पारमिच्छन्नुपैमि ।
रजोभिर्मान्यप्युपरिष्टात् परस्य
चण्डस्य धाम्नः पारमिच्छन्गतोऽभूत् ॥१८॥

दृष्टं पारमिति वदन्न सत्यं
यस्माद्दण्डं प्राप्तवांस्तमुपैमि ॥१९॥

स्थूलस्यास्य भवरूपस्य धाम्नः
वयं देवाश्चापि न पारमीयुः ।
तच्छान्तरूपं परमं तेज उग्रम्
भ्रान्तः श्रान्तः शरणं यामि सद्यः ॥२०॥

विमर्शशक्त्या यस्य जन्तुः
भवाच्चिन्तर्तुमिच्छन्भ्रान्तरूपः ।
परं वै स्वं प्रत्यभिज्ञाय भ्रमाय
नोदं परं शरण्यं शरणागतोऽस्मि ॥२१॥

यदज्ञानादिदमेवेति सर्वम्
नान्यत्किञ्चिज्ज्ञातवांस्मि ।
नित्यं यद्विमर्शादनिदमेवेत्य
स्वच्छः शान्तपरमं तमुपैमि ॥२२॥

याच्चित्या चेतयेद्विश्वं यत्प्रमित्या प्रमापयेत् ।
चितिप्रमितिनिर्मुक्तं रूपं परमुपैमि तत् ॥२३॥

यद्भासा भासते विश्वं यदभानान्निवर्तते ।
भानाभानविनिर्मुक्तं परं पदमुपैमि तत् ॥२४॥

भाते भाते न भात्येव ह्यभाते भाति वै पुनः ।
प्रत्यभिज्ञानतो यस्य तमुपैमि परं विभुम् ॥२५॥

प्रकाशेऽपि प्रतिच्छन्नोऽप्यप्रकाशे स्फुटो भवान् ।
चातुरी जयति स्फारा सूक्ष्मा माया तवेश्वर ॥२६॥

सर्वतो भयमापन्नं स्फुटमीरयते भवान् ।
अतो भैरवरूपोऽसि तं त्वां भूयो रणं श्रये ॥२७॥

श्री भैरवः

इत्थं श्रुत्वा स्तुतिं देवो हरेरद्भुतकर्मणः ।
दर्शयामास स्वतन्त्रभैरवः सुरपूजिते ॥२८॥

दृष्ट्वा हरिर्भैरवं च दण्डवत्पतितः क्षितौ ।
रूपं भैरवमुद्वीक्ष्य हरिः परमविस्मितः ॥२९॥

आदौ केदारनाथस्त्वमिदानीं भैरवः कथम् ।
इति चिन्ता परं देवो हरिं दृष्ट्वा जगाम तत् ॥३०॥

मा भैर्हरेऽस्मिन्विषये बहुरूपो भवं मुदा ।
क्षणे केदाररूपस्तु क्षणे भैरवरूपवान् ॥३१॥

बहुरूपाख्ययाहं वै प्रथितोऽस्मि जगत्त्रये ।
यस्मिन्हरेः रूपमिदं दृष्टवान्विषये मम ॥३२॥

भैरवो नाम वै देशः प्रख्यातो भुवनत्रये ।
हरेश्च ब्रह्मणश्चैव भीतिरुत्पादिता यतः ॥३३॥

संवेरिता यत्र माया ततो भैरवसंज्ञितः ।
इदं मम परं रूपं संसारभयनाशनम् ॥३४॥

भवान्यप्यस्य रूपस्य नित्यं दर्शनकांक्षिणी ।
सुदुर्दर्शमिदं रूपं दृष्टवान्नसि यन्मम ॥३५॥

प्रसन्नेन मया देव दर्शितं परमाद्भुतम् ।
लीनो भव इदानीं तु पर्वते सुरदुर्लभे ॥३६॥

लीनः केदारनाथस्तु पर्वतेऽन्यतमे शुभे ।
द्वापरान्ते भविष्यन्ति भूमिभारावतारिणः ॥३७॥

देवाश्च ऋषयश्चैव स्वकुलक्षयकारिणः ।
कालवाहस्वरूपेण तेषां दर्शनमेष्यति ॥३८॥

महिषस्य शुभौ जानू ह्यस्मिन्प्रादुर्भविष्यतः ।
दृष्ट्वा तु मुच्येत घोराद्वै स्वकुलक्षयपापतः ।।३९।।

इत्युक्त्वा भैरवो देवि लीनोऽभूत्पर्वते शुभे ।
तदा प्रभृति देवेशि भैरवे विषये परः ।।४०।।

भैरवो देवताभिश्च लीनोऽभूदत्र पर्वते ।
भैरवस्य महानागो हरेः श्रीवत्समालिहत् ।।४१।।

दृष्ट्वा लिहन्तं श्रीवत्सं हरिश्चक्रं समादिशेत् ।
चक्रं दृष्ट्वा तु नागेशो बभ्राम त्रिजगत्तदा ।।४२।।

भ्रान्तोऽप्यागान्हरे पादं ततो ह्यमृतमुद्वमत् ।
पीतं श्रीवत्सतो देवि तत्तीर्थमभवत्तदा ।।४३।।

यतः श्रीवत्सतः पीतममृतं विषरूपिणा ।
उद्वामितं च हरिणा चक्रेण सुरपूजिते ।।४४।।

तत्तीर्थमभवत्तत्र ख्यातं श्रीवत्सनामकम् ।
स्नात्वा श्रीवत्सके तीर्थे गिरिमारुह्य यत्नतः ।।४५।।

गुहां प्रविश्य गम्भीरां दृष्ट्वा पञ्चमुखं प्रभुम् ।
सहस्रशिरसं देवीं भैरवीमपि पूजयेत् ।।४६।।

सम्पूज्य विधिना देवि मुच्यते कोटिपातकैः ।
महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।।४७।।

सम्पूज्य गुहालीनं पश्येदघचयैः प्रिये ।
गिरिमारुहतः पादपांसवो ह्युद्गताः पुरा ॥४८॥

यावन्तस्तावद्धोरैश्च पातकैर्मुच्यते जनः ।
शुद्धानां गोप्रदानानां तावन्तः कोटयः प्रिये ॥४९॥

अश्वमेधादियज्ञानां कोटयः प्रभवन्ति हि ।
चन्द्रसूर्योपरागे च गङ्गासागरसङ्गमे ॥५०॥

गवां कोटिसहस्राणि दत्वा वेदविदे प्रिये ।
यत्फलं समवाप्नोति तत्फलं भैरवार्चनात् ॥५१॥

भैरवे बहुरूपं तु दृष्ट्वा केदारकेश्वरम् ।
स्नात्वा केदारके कुण्डे पीत्वा रेतोदकं पुनः ॥५२॥

यां गतिं समवाप्नोति न तां क्रतुशतैरपि ।
यतयो वीतरागश्च मुनयो यान्ति यां गतिम् ॥५३॥

तामवाप्नोति देवेशि कलौ केदारपायिनः ।
केदारमुदकं पीत्वा स्नात्वा रेतोदवारिणि ॥५४॥

मुच्यते घोरहत्याभिः शुद्धाय यान्ति भैरवम् ।
कलौ केदारके स्नात्वा कृत्वा भैरवपूजनम् ॥५५॥

पीत्वा रेतोदकं पुण्यं न पुनः स्तनपयो भवेत् ।
उपपातकयुक्तो वा युक्तो वा घोरपातकैः ॥५६॥

स्नात्वा श्रीवत्सके तीर्थे मुच्येद्दूरवदर्शनात् ।
वाजपेयसहस्राणि ज्योतिष्टोमशतानि च ॥५७॥

अश्वमेधसहस्राणि विविधानि कृतानि च ।
भैरवे विषये स्नात्वा पुण्ये केदारवारिणि ॥५८॥

प्राप्नोति मानवो देवि घटच्छन्ने बृहस्पतौ ।
पीत्वा रेतोदकं तत्र न पुनः स्तनपयो भवेत् ॥५९॥

ज्ञानाज्ञानकृतं पापं मनोवाक्कायसंचितम् ।
तत्क्षणन्नश्यते देवि भैरवस्य च दर्शनात् ॥६०॥

प्रायश्चित्तविहीनानां जनानां सुरपूजिते ।
घोरकलियुगे प्रोक्तं प्रायश्चित्तमिदं परम् ॥६१॥

बहुनात्र किमुक्तेन यात्रां कृत्वा महेश्वरि ।
भैरवे विषये पुण्ये स्नायात्केदारवारिणि ॥६२॥

स्नात्वा पुण्यमवाप्नोति ह्यश्वमेधादियागजम् ।
हित्वा क्रमं तु यो देवि मज्जेत्केदारवारिणि ॥६३॥

स यातिं नरकान्घोरान्वृथा तस्य तु तद्भवेत् ।
एकत्र स्नात्वान्यत्रैव ह्यनादरपरस्तु यः ॥६४॥

स इहैव महारोगी परे निरयमवाप्नुयात् ।
ब्रह्महत्यामवाप्नोति गोवधं चापि सुन्दरि ॥६५॥

तस्मात्सर्वप्रयत्नेन चतुःस्थानं व्रजेन्नरः ।
पूर्णफलमवाप्नोति सत्यं सत्यं वरानने ॥६६॥

यात्रामस्य प्रवक्ष्यामि शृणु सुन्दरि तत्त्वतः ।
प्रथमं मूलशूले तु स्वर्णपारे ततो व्रजेत् ॥६७॥

ततो भैरबनद्यां तु ततः श्रीवत्सकं प्रिये ।
गिरिमारुह्य च ततः समभ्यर्च्य तु भैरवम् ॥६८॥

ततः केदारके कुण्डे स्नात्वा पीत्वा च वारि तत् ।
ततः सङ्गममासाद्य श्राद्धं कृत्वा विधानतः ॥६९॥

दत्वा दानं च विधिवत्कालवाहनमूर्तिकम् ।
यवपिष्टमयं देवि महिषं च समाचरेत् ॥७०॥

मुखं स्वर्णमयं कृत्वा कर्णौ ताम्रमयौ प्रिये ।
पृष्टं कालाय समयमुदरं कांस्यमेव च ॥७१॥

नेत्रे गारुत्मते देवि पुच्छं मुक्तामयं तथा ।
गलं रुद्रमयं चैव कृष्णकं बलभूषितम् ॥७२॥

घटे पात्रं तिलैः पूर्णं स्थाप्यं तत्र वरानने ।
महिषं तत्र संस्थाप्य पूजयित्वा विधानतः ॥७३॥

गन्धैरक्षतमाल्यैश्च पुष्पैर्धूपैश्च दीपकैः ।
वस्त्रैरूर्णामयैर्देवि दक्षिणाभिश्च प्रापणैः ॥७४॥

विधिना वेदविदुषे मुदा मन्त्रेण चार्पयेत् ।
भैरवो विप्ररूपस्त्वं वेदवेदाङ्गपारग: ॥७५॥

केदारयात्रासाफल्यहेतोस्त्वं द्विजसत्तम: ।
इदं मे महिषं पुण्यं गृहाण मदनुग्रहात् ॥७६॥

इति मन्त्रेण देवेशि ब्राह्मणाय समर्पयेत् ।
प्रतिगृह्य तु तद्दानं गृहीत्वा क इदं पठेत् ॥७७॥

यात्राया: फलमुद्दिवतमुभयोस्तु भविष्यति ।
तत: कुर्यान्महादेवि यष्टिमोक्षणमन्तत: ॥७८॥

एवं कृत्वा महायात्रां ततो यायाद्यदृच्छया ।
इत्थं कृत्वा महायात्रां केदारस्य विशेषत: ॥७९॥

सर्वपापविनिर्मुक्तो याति सादाशिवं पदम् ।
इति ते सर्वमाख्यातं यत्पृष्टोऽहमिह त्वया ॥८०॥

भैरवे विषये पुण्ये केदारस्य फलं महत् ।
इदानीं देवदेवेशि किं भूय: श्रोतुमिच्छसि ॥८१॥

इत्येष पटलो गुह्यो महाभैरवभाषितम् ।
श्रुतश्च पठितो ध्यातो महापातकहा कलौ ॥८२॥

इति श्रीसंहितायां भैरवविषयकेदारमाहात्म्य
नाम तृतीय: पटल: ॥३॥

## अथ चतुर्थः पटलः

श्री भैरवी

श्रुतं भगवत्प्रसादेन भैरवे विषये महत् ।
माहात्म्यमरेशान पुण्यं केदारसम्भवम् ॥१॥

कृतार्थास्मि कृतार्थास्मि कृतार्थास्मि न संशयः ।
अधुना श्रोतुमिच्छामि मन्दोदरफलं महत् ॥२॥

महिषस्योदरं यत्र दृष्टं तैश्च महात्मभिः ।
यच्छ्रुत्वा मुच्यते जन्तुर्घोरैः पातकसञ्चयैः ॥३॥

श्री भैरवः

शृणु सुन्दरि वक्ष्येऽहं मन्दोदरफलं महत् ।
यच्छ्रुत्वा मुच्यते जन्तुः कलिकल्मषसञ्चयैः ॥४॥

जानू दृष्टौ तु धर्मेण केदारस्य तु भैरवे ।
नोदरं न शिरो देवि दृष्टं तेन महात्मना ॥५॥

ततः सत्तप आस्थाय दुश्चरं मुनिभिः प्रिये ।
गच्छ गच्छेति वचनमवदद्वागिहानता ॥६॥

श्रुत्वा तु तद्वचः सौम्यं कुत्र गच्छाम्यहम् ।
पुनः इति संशयितो धर्मो मनसाचिन्तयत्प्रिये ॥७॥

इति चिन्तयतस्तस्य पुनश्चाह शरीरिणी ।
वागुल्लोलाख्यविषये व्रज सत्वरमादृतः ॥८॥

तत्रैव दर्शनं पुण्यं मन्दाकिन्या अवाप्स्यसि ।
इति श्रुत्वा शरीरिण्या वाचो वचनमुत्तमम् ॥९॥

जगामोल्लोलविषयं यात्रास्नानपुरस्सरम् ।
त्रिदिनं तु निराहारस्तत्रैवास सुरार्चिते ॥१०॥

ततः प्रसन्नो भगवान्मन्दमुदरमावहत् ।
दृष्ट्वा मन्दोदरं तत्र स्तुत्वा नुत्वा च भक्तितः ॥११॥

जयेति भुवनेशान दण्डवत्पतितः क्षितौ ।
तत उत्थाय चैनं तु सान्त्वयित्वा च सूक्तिभिः ॥१२॥

मन्दां चोदरकोशात्तु गङ्गां निस्सृतवान्प्रभुः ।
सा नदी सुरपूज्या तु नाम्ना मन्दाकिनी ह्यभूत् ॥१३॥

यस्मादुदरकोशात्तु मन्दं निस्सारितं प्रिये ।
स देशः प्रथितोऽद्यापि नाम्ना मन्दोरकःशिवे ॥१४॥

यत्र मन्दाकिनी पुण्या देवानामपि दुर्लभा ।
सैव शीता भवत्यत्र तस्माच्छीतेति संज्ञिता ॥१५॥

श्रान्तानां वाहिनी सैव स्वश्रान्ता साभवत्ततः ।
त्रिलोचना च मुनिभिर्दृष्टा त्रिलोचनाभिधा ॥१६॥

तत्रैव तु शिलायां तु चैशान्यां दिशि निस्सृता ।
त्रिलोचनस्य शिरसा निस्सृता याभवत्प्रिये ॥१७॥

तद्वै केदारकं नाम कुण्डं प्रथितमुत्तमम् ।
तस्मान्मन्दोरके ग्रामे स्नातव्यमविशंकया ॥१८॥

दातव्यं च विशेषेण फलं प्राप्नोति यागजम् ।
महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ॥१९॥

स्नात्वा मन्दोरके तीर्थे मुच्यते पापसञ्चयैः ।
पुण्यं वर्धयते देवि ह्यग्निष्टोमादियागजम् ॥२०॥

कामी कामानवाप्नोति स्नात्वा मन्दोरके नरः ।
पुरन्दरः प्रदृष्टं तु यत्र केदारस्वामिना ॥२१॥

स एव प्रथितो ग्रामः पुण्यो मन्दोरकाभिधः ।
भ्रूणहा गोवधो वापि स्त्रीघातोऽपि महेश्वरि ॥२२॥

पुण्ये मन्दोरके स्नात्वा मुच्यते घोरपातकैः ।
मातृगामी पितृहा वा भ्रातृजायाग एव वा ॥२३॥

पितृष्वसृमातृष्वसृस्नुषादुहितृगोऽपि वा ।
स्नात्वा मन्दोरके तीर्थे पीत्वा केदारकं पयः ॥२४॥

मुच्यते जगदीशानि घोरपातकसञ्चयैः ।
घोरे कलियुगे देवि प्रायः पातकवान्भवेत् ॥२५॥

कुम्भस्थैव चाङ्गिरसे जीवे स्नानान्मुच्येदघैः ।
कुष्ठी क्षयी पापरोगी दीर्घरोगी च यो नरः ॥२६॥

मन्दोरे जीववारे च स्नात्वा पापैः प्रमुच्यते ॥२७॥

यथा जीर्णं काञ्चने तु सर्पो मुच्येदनार्तरः ।
तथा मन्दोरके जन्तुः स्नात्वा मुच्येदघैः प्रिये ॥२८॥

आयुष्कामैः कीर्तिकामैः पुत्रकामैर्धनार्थिभिः ।
विद्याकामैर्मुक्तिकामैः स्नातव्यमविशङ्कया ॥२९॥

पुण्ये मन्दोरके ग्रामे सर्वाभिलषितं लभेत ।
इदं पुंसवनं क्षेत्रमिदमायुष्यप्रवर्धनम् ॥३०॥

इदं कीर्तिप्रदं क्षेत्रं पुत्रदं धनदं तथा ।
ज्ञानदं मुक्तिदं चापि क्षेत्रमेतदुदीरितम् ॥३१॥

बहुनात्र किमुक्तेन भूयो भूयो वरानने ।
स्नात्वा केदारके कुण्डे पीत्वा तद्वारिनिर्मलम् ॥३२॥

मुक्तिमवाप्नुयुर्देवि कुम्भस्थे जीव उत्तमे ।
शतजन्मान्वितैः पापैर्मुच्यन्ते घोरकर्मभिः ॥३३॥

इति ते सर्वमाख्यातं पुण्यं मन्दोरजं प्रिये ।
यच्छ्रुत्वा मुच्यते जन्तुः पापैर्घोरतरैः शिवे ॥३४॥

श्री भैरवी

यात्रां वद महेशान पुण्यमन्दोरके शुभे ।
दानं धर्मं च मे देव कृपया जगदीश्वर ॥३५॥

श्री भैरवः

यात्रामस्य प्रवक्ष्यामि दानं च वरवर्णिनि ।
यत्कृत्वा सफलं तीर्थं भविष्यति न संशयः ॥३६॥

आदाववन्तिविषये सिद्धक्षेत्रे महेश्वरि ।
ततो भुवि तीर्थयुगे स्नातव्यमविशङ्कया ॥३७॥

ततो गिरौ महेशानि तीर्थयुग्मे व्रजेन्नरः ।
ततो नवदले गङ्गायां स्नात्वा गङ्गजले शुभे ॥३८॥

ततो मन्दोरके ग्रामे यात्रामेवं विधाय च ।
स्नात्वा मन्दाकिनीतीर्थे पीत्वा केदारजं पयः ॥३९॥

पापपुण्यविनिर्मुक्तो याति सादाशिवं पदम् ।
दानमत्र प्रवक्ष्यामि मन्दाकिन्यां शुभप्रदम् ॥४०॥

येन दानेन मनुजस्तीर्थसाफल्यमाप्नुयात् ॥४१॥

सौवर्णीं प्रतिमां कृत्वा यवपिष्टमयीमपि ।
स्वर्णमीनां रत्ननेत्रां मुक्ताहारविभूषिताम् ॥४२॥

धातुकुम्भे तिलपात्रे संस्थाप्य विधिवन्नरः ।
संपूज्य पुष्पैर्गन्धैश्चाप्यक्षतैर्माल्यहारकैः ॥४३॥

वासोभिर्विविधैश्चैव पुष्पैरूर्णामयैः प्रिये ।
शिवविष्णुस्वरूपस्त्वं ब्रह्म ब्रह्मस्वरूपकः ॥४४॥

मद्यात्रा सफलार्थं च सौवर्णीं प्रतिमामिमाम् ।
वासोऽलङ्कारयुक्तां त्वं गृहाण मदनुग्रहात् ॥४५॥

इति मन्त्रेण देवेशि गृह्णीयात्प्रतिमां शुभाम् ।
ददामीति वदन्वाक्यं गृहीत्वा क इदं पठेत् ॥४६॥

उभयोः सफलं तीर्थं भविष्यति न संशयः ।
यष्टिमोक्षं ततः कुर्याद्यात्रासाफल्यमाप्नुयात् ॥४७॥

इति ते सर्वमाख्यातं यत्पृष्टोऽयमिह त्वया ।
इदानीं देवदेवेशि किं भूयः श्रोतुमिच्छसि ॥४८॥

इति श्रीसंहितायां मन्दोदरग्रामवर्णनं
नाम चतुर्थः पटलः ॥४॥

## अथ पञ्चमः पटलः

श्री भैरवी

स्मारं स्मारं महादेव शुभं मन्दोरग्रामके ।
पुण्यां मन्दाकिनीं चापि पुण्यं केदारतीर्थकम् ॥१॥

अद्भुतं परमं मन्ये त्वत्प्रसादान्महेश्वर ।
इदानीं श्रोतुमिच्छामि ग्रामे देवालये शुभे ॥२॥

केदारतीर्थस्य फलं जगतां हितकाम्यया ॥३॥

श्री भैरवः

शृणु देवि प्रवक्ष्यामि भृङ्गिणो विषये महत् ।
पुण्ये देवालये ग्रामे पुण्यं केदारतीर्थजम् ॥४॥

सप्तर्षयो यत्र पुरा श्रुत्वा केदारकेश्वरे ।
पाण्डवैः दर्शनं प्राप्तं घोरे कलियुगे शिवे ॥५॥

अतप्यं तप उग्रं वै दिव्यं द्वादशवर्षकम् ।
मनः संयम्य मनसि तद्ध्यानाभिरताः प्रिये ॥६॥

ददृशुस्ते परं तत्र केदारेश्वरनामकम् ॥७॥

ॐ देवं श्रीत्रिजटं त्रिलोचनयुतं त्रेताग्निकान्ति प्रभुम्
पञ्चास्यं शरयुग्मबाहुममलमाशीर्विषाविभूषणम् ।
खट्वाङ्गं त्रिशिखं कुठारडमरुपाशं कपालाङ्कुशम्
पद्मं चाक्षधनुः कमण्डलुधरं केदारनाथं नुमः ॥॥८॥

इत्थं दृष्ट्वा तु तं देवं केदारेश्वरनामकम् ।
सप्तर्षयः स्वकेऽरण्ये पतिता दण्डवत्क्षितौ ॥९॥
उत्थाय पुनरेवात्र देवदेवं गिरा स्तुवन् ॥१०॥

श्री सप्तर्षय ऊचुः

ॐ नमो नमस्ते परमार्तिहारिणे
हराय विश्वम्भरं रूपधारिणे ।
सर्पाभिभूषाय वरेश्वराय ते
वामाङ्गवामाधृतविश्वरूपिणे ॥११॥

विभूतिभूषाय विभूतिधारिणे
कपालिने भूतिसिताय शाम्भवे ।
शमाय शान्ताय श्रमार्तिहारिणे
शमीनिवासाय च ते नमो नमः ॥१२॥

श्रमार्तिने श्रमहराय शाम्भवे
शक्तिस्वरूपाय च ते नमो नमः ।
शमीभवायापि स्वयम्भवे स्तवे
शुभङ्करायापि शुभार्थिनामपि ॥१३॥

शिवाय शान्ताय शरीरधारिणे
गिरामधीशाय च ते नमो नमः ॥१४॥

यतः सर्वमिदं भाति यत्र चैव विलीयते ।
य इदं सर्वमेतद्यत्तस्मैकस्मै च ते नमः ॥१५॥

भैरवः

इत्थं स्तुत्वा तु मुनयः केदारेश्वरमन्ततः ।
प्रणम्य दण्डवद्भूमौ पेतुश्चैव पुनः पुनः ॥१६॥

तत उत्थाय भगवान्मुनीन्वै भावितात्मना ।
मेघगम्भीरया वाचा प्रोवाच जगदम्बिके ॥१७॥

वरं वृणध्वं मुनयो यद्यूयमनुमन्यथ ।
तद्वो दास्यामि मुनयो देवानामपि दुर्लभम् ॥१८॥

इति श्रुत्वा वचो दिव्यमीश्वरस्य मुनीश्वराः ।
ऊचुः प्राञ्जलयः सर्वे कोऽन्यस्त्वद्दर्शनाद्वरः ॥१९॥

तथापि ब्रूहि देवेश पाण्डूनां विमुखार्थतः ।
त्वद्दर्शनतो देव सर्वे विमनसो वयम् ॥२०॥

इदानीं त्वत्प्रियार्थं तु दर्शये रूपमुत्तमम् ।
केदारनाथस्य प्रियं देवानामपि दुर्लभम् ॥२१॥

इत्थं रूपो भवेयं वै त्वद्वने पुण्य उत्तमे ।
स्थास्यामि देवरूपोऽहं त्वदनुग्रहकाम्यया ॥२२॥

इति प्रोक्तः पुनर्देवः शम्भुः सप्तमुनीन्प्रिये ।
तस्थौ केदारनाथस्तु देवदेवः स्वयं प्रभुः ॥२३॥

देवालये महाग्रामे सप्तर्षिवन उत्तमे ।
यस्माद्देवो महापुण्ये केदारेश्वरनामकः ॥२४॥

अतिष्ठदत्र वै देवि तस्माद्देवालयः स्मृतः ।
तस्माद्देवालये पुण्ये भृङ्ग्यां स्नात्वा व्रजेत्पुनः ॥२५॥

धाराममृतरूपस्य गङ्गामाकाशगां पुनः ।
ततः केदारमादद्यात्पीत्वा तत्तोयमुत्तमम् ॥२६॥

अपुनर्भवतामेति न पुनस्स्तन्यपो भवेत् ।
देवालये हरं दृष्ट्वा केदारं जगदम्बिके ॥२७॥

न पुनरेति भवनमार्त्यमन्त्यसुदुर्लभम् ।
देवालये च यः स्नाति यो ददाति महेश्वरि ॥२८॥

जपेच्चाधीयते यश्च स याति परमं पदम् ।
देवालयं गमिष्यामि यास्यामि चिन्तयंश्च यः ॥२९॥

स याति परमं पुण्यमश्वमेधयागजम् ।
तस्मात्सर्वप्रयत्नेन केदारं क्षेत्रमाश्रयेत् ॥३०॥

सर्वपापविनिर्मुक्तो मुक्तो भवति मानव: ।
इत्युक्त्वा भैरवो देवान्वरं दत्वा यथार्हत: ॥३१॥

प्रहस्य स्वनवत्तत्र चिरमन्तर्धिमागत:
तदा प्रभृति देवेशि केदारक्षेत्रमुत्तमम् ॥३२।

प्रथितं भुवने पुण्ये भुक्तिमुक्तिफलप्रदम् ।
इति ते सर्वमाख्यातं यत्पृष्टोऽहमिह त्वया ॥३३॥

इदानीं देवदेवेशि किं भूय: श्रोतुमिच्छसि ॥३४॥

इति श्रीसंहितायां केदारमाहात्म्यं वराहक्षेत्रं
नाम पंचम: पटल: ॥५॥
ॐ समाप्तञ्चेदं केदारमाहात्म्यम् ।

## अथ षष्ठः पटलः

ॐ श्री भैरवी

स्मारं स्मारं महादेव वराहक्षेत्र उत्तमे ।
केदारनाथमाहात्म्यं कृतार्थास्मि न संशयः ॥१॥

इदानीं सुमहत्प्रश्नः प्रतनः सूचितो मम ।
कलौ चतुर्धा तीर्थं तु भविष्यति कुतस्तु तत् ॥२॥

छिन्दि मे संशयं देव ह्यनुग्रहास्मि चेत्प्रभो ।
कुत्र कुत्र चतुर्धंतद्भविष्यति महेश्वर ॥३॥

तत्र तत्रापि माहात्म्यं वद लोकहितेप्सया ॥४॥

श्री भैरवः

शृणु सुन्दरि वक्ष्यामि प्रश्नमेतत्सुगुह्यकम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्जन्मकोटिभवैरघैः ॥५॥

भूमिर्भूरिभराक्रान्ता भविष्यति कलौ युगे ।
मदाज्ञया मुनी पूर्वौ नरनारायणावुभौ ॥६॥

भूमिभारावतारार्थमत्रैवावतरिष्यतः ।
नरः गुरुकुले देवि यदा नारायणो भवेत् ॥७॥

देवाश्च सर्वे देवेश्यवतरिष्यन्ति चांशकैः ।
अपनीय भुवो भारं कृत्वा सर्वे कुलक्षयम् ॥८॥

तीर्थयात्रा प्रसङ्गेनागमिष्यन्त्यत्र यत्नतः ।
दृष्ट्वा तु तानहं सर्वा``न्विमुखोऽभवम् ॥९॥

मौखर्दं वायुपुत्रोऽपि मुहुर्मद्दर्शनमकरोत् ।
कालसूचनया तेषां मया दर्शितमुत्तमम् ॥१०॥

कालवाहनरूपेणाप्यधोभागेन सुन्दरि ।
तद्रूपेणाचलं भद्रे भीमो भीमपराक्रमी ॥११॥

अनुधाविष्यति च मामुग्रं महिषरूपिणम् ।
अनुधाव्य ततो देवि पुच्छमुद्ग्राहमिष्यति ॥१२॥

मौखर्येण तु भीमस्य करिष्ये मुखगोपनम् ।
निर्भत्स्य भीमं धर्मात्मा ज्येष्ठः पाण्डुसुतः प्रिये ॥१३॥

स्तुत्वा वेदोचितैः सूक्तैः स्वं चतुर्धा ह्यदर्शयम् ।
वरदानेन संच्छन्द्य युधिष्ठिरमहं शिवे ॥१४॥

तेनापि हि वृतो मह्यं दर्शनं देह्यनुग्रहात् ।
मयोक्तः स तदा धर्मो वाहनेनैव सुव्रत ॥१५॥

घोरपन्थानमारुह्य मत्सालोक्यमवाप्स्यसि ।
इदं मे माहिषं रूपं पश्य ते पापहं प्रिये ॥१६॥

मलावृताः सततं सर्वे न मां द्रष्टुमिहार्हथ ।
एतदेव स्वरूपं मे कलौ द्रक्ष्यन्ति वै जनाः ॥१७॥

एकत्रासनमेकत्र जानुं कुक्षि तथैकतः ।
एकत्र शिरसं मे यद्दृष्ट्वा घोरात्प्रमोक्ष्यथ ॥१८॥

श्रुत्वा तु सर्वं मे वाक्यं दृष्ट्वा मां तु विभक्तकम् ।
कालमुल्लङ्घ्य ते याता मत्सायुज्यमनन्तकम् ॥१९॥

तस्मात्सर्वप्रयत्नेन कुम्भस्थे च बृहस्पतौ ।
नरो तं तीर्थमासाद्य मत्सायुज्यमवाप्नुयात् ॥२०॥

श्री भैरव्युवाच

वद सत्यं महादेव कुम्भस्थे किं बृहस्पतौ ।
फलमुक्तं महादेव गुरुवारेऽपि किं प्रभो ॥२१॥

श्री भैरवः

शृणु वक्ष्ये महादेवि कुम्भस्थे बृहस्पतौ ।
फलं केदारके पुण्ये हेतुमच्च विशेषतः ॥२२॥

बृहस्पतिर्नरं दृष्ट्वा शक्रस्य सदने प्रिये ।
जहास माहिषं रूपं दृष्टं केदारके त्वया ॥२३॥

पापात्मा यत एवासि ततो मद्दर्शनाद्व्रज ।
नागन्तव्यं मत्समीपं दूरं तिष्ठ प्रयत्नतः ॥२४॥

इतीन्द्रस्य समक्षं तु श्रुत्वा घोरं वचो गुरुः ।
इन्द्रोऽपि रूषयामास पृथगासनमादिशत् ।।२५।।

एतस्मिन्नन्तरे शक्रोऽप्यहिल्यां समधर्षयत् ।
अभिमाना हि दष्टेन दुष्टेनाप्यन्तरात्मना ।।२६।।

धर्षितं स्वकलत्रं च गौतमर्षिः प्रतापवान् ।
शप्त्वा भगशतं शक्रं शप्तं वै गौतमर्षिणा ।।२७।।

प्रोवाच शक्रभावित्वात्केदारार्थमवतर ।
भूमौ स्त्रीशिरसं दृष्ट्वा मुच्यसे घोरपातकैः ।।२८।।

श्रुत्वा गुरोः सार्थकं तु वचः सौम्यं महेश्वरि ।
शक्रं प्रवदतां श्रेष्ठः प्रत्युवाच बृहस्पतिम् ।।२९।।

त्वत्सहायोऽवतरिष्येऽहं भूमौ केदारके द्विज ।
स्नात्वा दृष्ट्वा च विधिना मुच्येयं घोरसंकटात् ।।३०।।

इन्द्रस्य वचनं श्रुत्वा गुरुश्चोक्त्वा तथास्त्विति ।
समुत्थाय ततस्तौ तु भूमिमवतरिष्यतः ।।३१।।

गुरुमागतमालक्ष्य दोषदुष्टमहं तदा ।
अदर्शनं गतोऽप्यासंस्तयोः प्रत्यक्षमीश्वरि ।।३२।।

स्तुतोऽप्यासंस्ततो देवि शक्रेण सुमहात्मना ।
प्रसादितोऽप्यवदन्तं वज्रिणं दीनचेतसम् ।।३३।।

अपराधाद्गुरोरेतां शक्र प्राप्तस्त्वमापदम् ।
तस्मादागत्य संच्छन्ने गुरौ पश्यतु मां भवान् ॥३४॥

श्रुत्वैतत्तु विभोर्वाक्यं गुरुं प्राह स वज्रभृत् ।
गच्छ जीव प्रतिच्छन्नो घटराशिमतन्द्रितः ॥३५॥

घटच्छन्ने त्वयि विभोः नाथं पश्याम्यसंशयम् ।
दर्शनान्मम नाथस्य प्रतियास्यन्ति चापदः ॥३६॥

श्रुत्वा शक्रस्य तद्वाक्यं गुरुर्लीनो घटे तदा ।
प्रतिच्छन्ने गुरौ वर्षं...स्यास्यं वज्रिणः पुरः ॥३७॥

मां दृष्ट्वा शक्र ईशानि नाथं केदारकेश्वरम् ।
मुक्त्वा तु पातकाद्घोरादारुरोह स्वकं पदम् ॥३८॥

तदा जीवोऽपि मां तत्राप्यस्तुवत्परया मुदा ।
प्रसन्नोऽप्यभवं जीवे वरदोऽस्मीति तं वृणु ॥३९॥

श्रुत्वैतन्मे वचो देवि जगाद स बृहस्पतिः ।
प्रसादसमुखो मेऽसि यदि त्वं पापकारिणः ॥४०॥

वरं चेद्दातुकामोऽसि मम वारे महेश्वर ॥४१॥

कुम्भच्छन्ने मयि विभोः दर्शनं दातुमर्हसि ।
इदमेव वरं देव दातुमर्हति वै भवान् ॥४२॥

श्रुत्वा गुरोर्वाक्यमिदमुवाच भगवांस्तदा ।
इत: प्रभृति लोकेऽस्मिन्घटच्छन्ने त्वयि द्विज ॥४३॥

त्वद्वारे दर्शनं पश्येज्जन: सर्वोऽप्यसंशयम् ।
मत्साहृप्यं च सायुज्यमेतत्फलमवाप्नुयात् ॥४४॥

दृष्ट्वा बृहस्पतिरपि प्रसादसमुखं हरम् ।
नुत्वा स्तुत्वा च विधिवत् हरोऽन्तर्ध्यानमागत: ॥४५॥

तदा प्रभृति देवेशि कुम्भच्छन्ने बृहस्पतौ ।
गुरुवारे तु मां दृष्ट्वा केदारकेश्वरमन्तत: ॥४६॥

मुच्यते कोटिहत्याभिरिति सत्येन ते शपे ॥४७॥

इति ते कथितं देवि वृत्तं केदारसम्भवम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्जन्मकोटिभवैरघै: ॥४८॥

इत्येष पटलो गुह्यो महापातकहा कलौ ।
श्रुत: संपठितो ध्यातो महापापहर: स्मृत: ॥४९॥

इति श्री श्रीसंहितायां श्रीभैरवीभैरवसम्वादे केदारमाहात्म्ये
चतुर्विंघतीर्थकुम्भस्यजीवयात्राहेतुवर्णनं नामपटल: ॥ॐ॥

[ समाप्तश्चेतत्केदारमाहात्म्यं भविष्योत्तरे
संवत् १८०९ पौ[ष]शुदि पूर्णिमायां
समाप्तीकृतम् ]

# भृङ्गीशसंहिता
# पुष्करमाहात्म्यम्

## ॐ श्री विघ्नौघहर्त्रे नमः

श्री देव्युवाच

वद मे कृपया देव पुष्करं तीर्थमुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुः महापातककोटिभिः ॥१॥

श्री भैरवः

शृणु देवि प्रवक्ष्यामि पुष्करतीर्थमुत्तमम् ।
यस्य श्रवणमात्रेण वाजपेयं लभेन्नरः ॥२॥

जगत्सिसृक्षतः स्रष्टुः सूर्यं चैव महेश्वरि ।
पद्मासनस्य पत्राणि प्रफुल्लानि तदाम्बिके ॥३॥

सिसृक्षतः पुनस्तस्य श्रमः समभवत्किल ।
श्रमात्स्वेदसमुत्पन्नो ह्यङ्गात्स्वेदो क्षरत्प्रभोः ॥४॥

पद्मासनस्य शृङ्गाद्यत्तस्य तोयमभूत्प्रिये ।
विकासात्तज्जलं देवि पतितं तत्र पर्वते ॥५॥

भङ्गीलायां च विषये तत्तीर्थमभवत्पुरा ।
पुष्करं नाम वै प्रोक्तं प्रथितं च जगत्त्रये ॥६॥

बहुधा प्रसृतं तोयं पुण्ये पद्मदलेषु तत् ।
तदेव पुष्करं नाम तीर्थं समभवत्किल ॥७॥

पुष्णाति च सुखं राति तस्मात्पुष्करमुच्यते ।
स्रष्टुरङ्गाच्च्युतं यस्मात्स्थितं पुष्करपत्रके ॥८॥

तस्मात्प्रोक्तं पुराविद्भिः पुष्करं नाम नामतः ।
पुष्णाति च जलं राति मोक्षलक्ष्मीमपीश्वरि ॥९॥

तस्मात्पुष्करमित्युक्तं वेदतन्त्रविचिन्तकैः ।
पुण्यं पणति तोयेन राति मोक्षमथाम्बिके ॥१०॥

तस्मात्प्रोक्तं पुष्करकं तीर्थं शास्त्रविशारदैः ।
पुष्करे दुष्करं दानं पुष्करे दुष्करं तपः ॥११॥

पुष्करे दुष्करं स्नानं जपश्चैव सुदुष्करः ।
महापातकयुक्तो या युक्तो वा ह्युपपातकैः ॥१२॥

पुष्करे स्नानमात्रेण मुच्यते सर्वकिल्विषात् ॥१३॥

श्री भैरवी

वद पुष्करमाहात्म्यं विस्तरेण महेश्वर ।
यात्रामपि महादेव पुष्करस्य कदा क्व च ॥१४॥

यच्छ्रुत्वा मुच्यते जन्तुः कोटिजन्मभवैरघैः ॥१५॥

श्री भैरवः

श्रृणु देवि प्रवक्ष्यामि महिमानमनुत्तमम् ।
विस्तरेण महादेवि फलं क्षेत्रसमुद्भवम् ॥१६॥

श्रमस्वेदं समुद्भूतं ब्रह्मणो व्यक्तजन्मनः ।
पुण्यं श्रीपद्मनाभेन सङ्गतं परमात्मना ॥१७॥

पुण्यदं पापहं कलौ सर्वकिल्बिषनाशनम् ।
त्रिमलघ्नं महादेवि त्रितापघ्नमपीश्वरि ॥१८॥

त्रिविघ्नघ्नमपि प्रोक्तं त्रिपुष्करमुदाहृतम् ।
शुभे भाद्रपदे मासि ह्यमायां पितृभे तथा ॥१९॥

सोमसूर्ययुते वापि स्नात्वा पुष्करतीर्थके ।
पुण्यमाप्नोति मनुजो वाजपेयादियज्ञजम् ॥२०॥

दैनन्दिनं कृतात्पापान्मुच्यते नात्र संशयः ।
अन्यत्र तु कृतं पापं पुष्करेषु प्रणश्यति ॥२१॥

पुष्करेषु कृतं पापं वद कुत्र प्रणश्यति ।
कुरुक्षेत्रे प्रयागे च गङ्गासागरसङ्गमे ॥२२॥

गवां कोटिसहस्रस्य सम्यग्दत्तस्य यत्फलम् ।
तत्फलं समवाप्नोति पुष्करे स्नानमात्रतः ॥२३॥

गरुत्मानपि चात्रैव तपः सिद्धिमवाप्नुयात् ॥२४॥

श्री भैरवी

कथं च गरुडो देव तपः सिद्धिमतः प्रभो ।
वद मे कृपया शम्भो लोकानुग्रहकाम्यया ॥२५॥

श्री भैरवः

शृणु देवि प्रवक्ष्यामि महिमानमनुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्जन्मजन्मान्तरभवैरघैः ॥२६॥

विष्णुरत्र महादेवि दुश्चरं चाचरत्तपः ।
दिव्यं वर्षसहस्रं तु पुण्ये पुष्करसंज्ञके ॥२७॥

गरुडश्च पुरा दिव्यं वर्षाणामयुतं तपः ।
अतपद्दुश्चरं तत्र पुष्करे लोकपावने ॥२८॥

निराहारो यतात्मा स नियतो विजितेन्द्रियः ।
अङ्गुष्ठाग्रेण तिष्ठन्स जपध्यानपरायणः ॥२९॥

निराहारेण कतिचित्फलाहारेण सुन्दरि ।
वाताहारेण कतिचिद्हायनास्तेन लंघिताः ॥३०॥

तस्यैव तपसा तप्तं त्रैलोक्यमभवत्प्रिये ।
दृष्ट्वा सुतप्तं त्रैलोक्यं देवाः शक्रपुरस्सराः ॥३१॥

कैलासवासिनं देवं शङ्किताः शरणं ययुः ।
प्राप्य कैलासमीशानि वामदेवं पिनाकिनम् ॥३२॥

तुष्टवुः परया भक्त्या शङ्करं लोकपावनम् ॥३३॥

देवा ऊचुः

शशाङ्कशेखरं देवं प्रभुमव्यक्तरूपिणम् ।
अनादिनिधनं शम्भुं भजे त्रैलोक्यसुन्दरम् ॥३४॥

रुद्रं शिवं पशुपतिं भद्रावासं पुरार्तिहम् ।
देवमुग्रतमं घोरं शर्वं शम्भुं महेश्वरम् ॥३५॥

प्रपद्येम महेशानं भक्तानामभयप्रदम् ।
भूतावासं भूतपतिं भूतात्मानं च भूतिदम् ॥३६॥

भूतावेशहरं त्र्यक्षं त्र्यम्बकं त्रिपुरार्दकम् ।
त्रिवरं त्रिगुणातीतं त्र्यक्षरं त्रिविधात्मकम् ॥३७॥

त्रिज्योतिः त्रिपुरावासं त्रिनेत्रं शरणार्थिनः ।
रक्षकं लोकनाथञ्च बालकं नीललोहितम् ॥३८॥

सद्यो जातञ्च परमं श्रयेम शरणं प्रभुम् ।
सर्वाध्यक्षं च सर्वेशं सर्वात्मानं परात्मकम् ॥३९॥

विभुं प्रभुं ह्यनेकेशमनेकेशं महेश्वरम् ।
एकमनेकं बहुधा स्थितं शिवमुपास्महे ॥४०॥

अनेकार्तिहरं देवमुमासेवितविग्रहम् ।
स्थूलं सूक्ष्मं महादेवं सूक्ष्मात्सूक्ष्ममनामयम् ॥४१॥

सदसत्पदमव्यक्तं पशुपाशनिकृन्तनम् ।
प्रपद्येम महेशानं गरुत्मत्तपसो भयात् ॥४२॥

श्री भैरवः

एवं स्तवाभियुक्तानां देवानां तत्र पार्वति ।
शङ्करः परमेशानस्तत्र दर्शनमीयिवान् ॥४३॥

त्रिशूलखट्वाङ्गधरो नरमालाविभूषणः ।
नीलकण्ठः कपर्दी च विभूतिसितविग्रहः ॥४४॥

गङ्गाधरः पार्वतीशो वाचा गम्भीरया तदा ।
देवानाह महादेवि श्लक्ष्णया मधुरा वचा ॥४५॥

श्री महादेवः

किमर्थमागताः देवाः ब्रूतागमनकारणम् ।
कृतमेव हि जानीध्वमविलम्बेन पुत्रकाः ॥४६॥

श्रुत्वा तस्य वचः सम्यग्देवाः शम्भोर्महात्मनः ।
ऊचुः प्राञ्जलयः सर्वे विनयानतकन्धराः ॥४७॥

देवा ऊचुः

तप्ताञ्जानीहि भगवन्गरुन्मत्तपसा च नः ।
भवत्पादाम्बुजं प्राप्ताञ्शरणं शरणार्थिनः ॥४८॥

त्राहि त्राहि महादेव रक्ष रक्ष महेश्वर ।
श्रुत्वैतत्करुणं वाक्यं देवानाममरेश्वरः ॥४९॥

प्रोवाच तान्महादेवः करुणामृतसागरः ।
व्रजध्वं त्रिदिवं देवा अभयं वो ददाम्यहम् ॥५०॥

गरुडं छन्दयिष्यामि वरैः परमदुर्लभैः ।
इत्युक्त्वा भगवान्देवांस्तत्रैवान्तरधीयत ॥५१॥

देवाश्च स्वं स्वं भवनं गताश्चैव यथागतम् ।
तत्रैव पुष्करे तीर्थे तपो तद्दुश्चरं तपः ॥५२॥

गरुडस्य पुरः शम्भुस्तदा प्रादुरभूत्किल ।
दृष्ट्वा तु गरुडो देवं प्रणनाम मुहुर्मुहुः ॥५३॥

भगवत्स्पर्शमात्रेण स व्रजदोऽभवत्क्षणात् ।
शत्रूनामपि धृष्टोऽसौ वीरेशश्च बभूव ह ॥५४॥

उवाच च महात्मानं स्पृशन्हस्तेन पक्षिणम् ।
वरं वृणु महावीर प्रसन्नोऽस्मि तवानघ ॥५५॥

यथेष्टं तत्प्रदास्यामि देवानामपि दुर्लभम् ।
इयं मदङ्गसम्भूता गङ्गा त्रिभुवनेश्वरी ॥५६॥

त्वदाश्रमपदं रम्यं मार्गयिष्यति चानघ ।
मत्प्रासादात्परं ज्ञानं तव पुत्र भविष्यति ॥५७॥

अव्याहतगतिस्त्वं हि सर्वत्र प्रचरिष्यसि ।
देवा दैत्यगणाः सिद्धाः यक्षरक्षसरीसृपाः ॥५८॥

नागाः कूर्माश्च कूष्माण्डा भूताः प्रेतगणास्तथा ।
दनोः पुत्राः मनुष्याश्च योगिन्याश्च महाबलाः ॥५९॥

डाकिन्याः शाकिनीकृत्याः पोतनाजम्बुकादयः ।
रोगास्त्वं तपसायुक्तं न दर्शयितुमीश्वराः ॥६०॥

दिव्यदेहो वज्रदेहः स्वर्णदेहस्तथैव च ।
पक्षिराजश्च वै पुत्र भविता मदनुग्रहात् ॥६१॥

विष्णोश्च वाहनत्वेऽपि त्वं च योक्ष्यामि मानद ।
अपरं च वरं पुत्र दास्यामि सुरदुर्लभम् ॥६२॥

इदमाश्रमं मुख्यं ते यः श्रयिष्यति मानवः ।
नारी वा पुरुषो वापि सोऽचिरात्सिद्धिमाप्नुयात् ॥६३॥

पुण्ये भाद्रपदे मासे गरुडाश्रम उत्तमे ।
अमायां स्नानमात्रेण मुच्यते ब्रह्महत्यया ॥६४॥

ये श्रयन्ति हि पुण्यं ते आश्रमे पतगेश्वर ।
सर्वपापविनिर्मुक्ता यान्ति ब्रह्मसनातनम् ॥६५॥

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
संस्नाप्य गारुडे तीर्थे सर्वपापैः प्रमुच्यते ॥६६॥

हरद्वारे कुशावर्ते बिल्विके नीलपर्वते ।
यत्फलं लभते मर्त्यस्तदत्रापि न संशयः ॥६७॥

पुष्करे च हि संस्नाप्य यः स्नाति गरुडाश्रमे ।
फलमाप्नोति मनुजो ह्यश्वमेधादियागजम् ॥६८॥

इत्थमेवाश्रमे तत्र भविष्यति न संशयः ।
इदानीं खगभोगश्च वामदेवाश्रमं मम ॥६९॥

तत्र नारायणो देवस्तव दर्शनमेष्यति ।
एवमुक्त्वा खगश्रेष्ठं शर्वोऽप्यन्तर्धिमागतः ॥७०॥

खगोऽपि च तदोत्थाय वासुदेवाश्रमं ययौ ।
तत्र नारायणतीर्थे स्नात्वा पतगराट्तदा ॥७१॥

नारायणं ददर्शाग्रे प्रणनाम च तं मुदा ।
नारायणोऽपि तं देवि परिष्वज्य मुहुर्मुहुः ॥७२॥

दत्वाभयं खगश्रेष्ठे वाहनत्वेन योजितम् ।
ददर्श च मुदा तत्र स्नेहविकलया दृशा ॥७३॥

यतः स्वादाश्रमाद्देवि स्वमुड्डीय यतः खगः ।
ततः स ग्रामप्रथितस्त्रैलोक्यां च खगाभिधः ॥७४।

खगग्रामे विष्णुक्षेत्रे स्नात्वा मुच्येदसंशयम् ।
महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ॥७५॥

खगग्रामे विष्णुक्षेत्रे स्नात्वा मुच्येत सङ्कटात् ।
सर्वसिद्धिमवाप्नोति खगे दानं समाचरन् ॥७६॥

अर्चनं वन्दनं वापि श्राद्धं होममथापि वा ।
जपं स्वाध्यायमथवा यः कुर्यादथ निश्चितम् ॥७७॥

अनन्तफलमाप्नोति खगे सकृतमाचरन् ।
बहुनात्र किमुक्तेन भूयो भूयो वरानने ॥७८॥

यात्रां कृत्वा पुष्करेषु यः स्नाति मनुजो भुवि ।
पुण्ये भाद्रपदेऽमायां स याति परमं पदम् ॥७९॥

किं तस्य दानैः किं तीर्थैः कलिपापापनोदनैः ।
यात्रां कृत्वा तु यो मर्त्यः स्नाति वै पुष्करे जले ॥८०॥

स एव भुवि देवेशि विष्णुरुद्रोऽथवा पुनः ।
ब्रह्मा वा जगदीशानि सत्यं सत्यं वरानने ॥८१॥

पुष्करे स्नातमायातं ये हि स्पृशन्ति चेश्वरि ।
ते च पापान्यपीशानि विलयं प्राप्नुवन्ति हि ॥८२॥

पुष्करं दुष्करं लोके विशेषात्पापिभिरिह ।
विघ्निता विघ्नसङ्घातैस्तस्माद्यत्नेन संश्रयेत ॥८३॥

न पुष्करसमं तीर्थं दिवि भूम्यन्तरिक्षगम् ।
पुण्यदं पापहरणं सिद्धिवृद्धिप्रदं कलौ ॥८४॥

इदं पुंसवनं क्षेत्रमिदमायुष्यवर्धनम् ।
कामदं कामिनां ह्येतन्मोक्षदं मोक्षिणामपि ॥८५॥

धनमायुष्प्रदमेतद्विद्या प्राज्ञाप्रदं कलौ ।
पशुदं पशुकामानां ब्रह्मविद्याप्रदायकम् ॥८६॥

सर्वसिद्धिकरं क्षेत्रं पुष्करं दुष्करं कलौ ।
क्षेत्राणामुत्तमं क्षेत्रं न भूतं न भविष्यति ॥८७॥

इत्येष पटलो गुह्यो महापातकहा कलौ ।
श्रोतव्यः पठितव्यश्च तीर्थयात्राफलप्रदः ॥८८॥

इति श्री श्रीसंहितायां (भैरवी)सम्वादे भृङ्गीलविषयोपजाततीर्थसंग्रहे
पुष्करतीर्थवर्णने खगग्राममहिमा नाम पटलः ॥१॥

## अथ द्वितीयः पटलः

श्री भैरवी

वद सत्यं महादेव तीर्थयात्रा तु पुष्करे ।
यां कृत्वा तीर्थसाफल्यं भविष्यति न संशयः ॥१॥

यात्रामकृत्वा यस्तीर्थं समाश्रयति मानवः ।
स याति नरकान्घोरान्स्नानं तस्य वृथं भवेत् ॥२॥

यात्राहीनस्य तीर्थं तु वन्ध्यासुरतवद्भवेत् ।
तस्मात्सर्वप्रयत्नेन तीर्थं यात्रान्वितं श्रयेत् ॥३॥

स च तीर्थफलमश्नाति सत्यं सत्यं महेश्वर ।
कृपया परया देव लोकानुग्रहकाम्यया ॥४॥

श्री भैरवः

शृणु वक्ष्ये महादेवि तीर्थयात्रा तु पुष्करे ।
यां विधाय नरः सम्यक्सर्वतीर्थफलं लभेत ॥५॥

रोषग्रामसमारभ्य खगयावन्महेश्वरि ।
कृत्वा यात्रां तु यो मर्त्यः सर्वपापैः प्रमुच्यते ॥६॥

वीरभद्रः श्रयेद्रोषे शूलगङ्गामुपस्पृशेत् ।
ततो गच्छेन्महेशानि पुण्यमर्काश्रमं नरः ॥७॥

तदोपस्पृश्य मतिमान्कुरोः क्षेत्रे स्वपुण्यदे ॥८॥

श्री भैरवी

पुण्यमर्काश्रमं ब्रूहि लोकानुग्रहकाम्यया ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥९॥

श्री भैरव्युवाच

स्कन्दः पुरा तपस्तेपे दुश्चरं जगदम्बिके ।
सेनापतिः कृतो यत्र शक्रेण सुमहात्मना ॥१०॥

चिन्तयामास बहुधा कथमेतद्दुरासदम् ।
असुरानीकमेकोऽहं तरिष्यामि सुदुर्लभः ॥११॥

चिन्ताकुलितचित्तस्य देवो दर्शनमाययौ ।
दृष्ट्वा तं चिन्तयाविष्टमुवाच परमेश्वरः ॥१२॥

तारां देवीमुपागच्छ कर्मणा मनसा गिरा ।
तत्प्रासादात्परं पुत्र दैत्यानीकं तरिष्यसि ॥१३॥

इत्युक्त्वा तं ततः स्कन्दं शिवोऽन्तर्धानमीयिवान् ।
इति तस्य कुमारस्य ताराणं जपतस्फुटम् ॥१४॥

तपसा स महादेवि दिव्यं वर्षशतं तदा ।
आश्रमस्थस्य स्कन्दस्य जपमानस्य वै मनुम् ॥१५॥

तारादेव्यास्तत्र देवीदर्शनमागता तदा ।
तत्र तस्य महादेवि समाधिस्थस्य सुन्दरि ॥१६॥

पीनोरा अहिश्रृङ्गश्च दानवौ मददुर्मदौ ।
विघ्नं चक्रतुरविग्रौ स्कन्दस्य सुरपुजिते ॥१७॥

दृष्ट्वा विघ्नकरौ तत्र राक्षसौ मददर्पितौ ।
शिवा परमकारुण्या मर्के भूत्वा महेश्वरि ॥१८॥

जघान पुरा यत्नेन दैत्यौ परमदुर्मदौ ।
पीनोरा नाम दैत्यश्च यत्र घाटितवान्प्रभुः ॥१९॥

स एव प्रथितो ग्रामः पीनोरा नाम नामतः ।
अहिश्रृङ्गश्च दैत्येशो यत्र वा पतितः क्षितौ ॥२०॥

स ग्रामः प्रथितोऽद्यापि ह्यहिश्रृङ्गाभिधः परः ।
यत्र च मर्कटो भूत्वा पुरा दैत्यवधाय सः ॥२१॥

स प्रख्यातः क्षितौ तत्र ग्रामो मर्कटकाभिधः ।
प्रादुर्भूता यत्र तारा कुमारस्याग्रतः प्रिये ॥२२॥

स ग्रामः प्रथितोऽद्यापि ताराश्रमसमाख्यया ।
सनत्कुमारः सनकः सनन्दनस्सनातनः ॥२३॥

ब्रह्मणो मानसा पुत्रा ऊर्ध्वरेतस एव ते ।
दिव्यं वर्षसहस्रं तु तपश्चेरुः सुदारुणम् ॥२४॥

तेषां नारायणो देवो दर्शनं समुपेयिवान् ।
तत्र दत्वा वरं तेषां तत्रैवान्तर्धिमागतः ॥२५॥

स्नात्वा चात्र महादेवि मुच्यते घोरपातकैः ।
यत्र तप्तं चिरं तैस्तु कुमारैर्बहुधा तपः ॥२६॥

ततः स प्रथितो ग्रामः कुमाराश्रमसंज्ञिया ।
खमुड्डीय गतो यत्र विष्णुदर्शनलालसः ॥२७॥

गरुत्मांस्तत्र गदितो ग्रामराजः खगाभिधः ।
कुरुणा सुचिरं तप्तं दुश्चरं परमं तपः ॥२८॥

ततः प्रवर्तितं क्षेत्रं कुरुनाम्नैव सुन्दरि ।
कुरुक्षेत्रे कृतं स्नानं दानमर्चनमेव च ॥२९॥

श्राद्धं वन्दनं होमं च ह्यक्षयं फलमाप्नुयात् ।
मर्काश्रमे कृतं यच्च तदनन्त्याय कल्पते ॥३०॥

ब्राह्मणः क्षत्रियो वापि शूद्रो वा म्लेच्छ एव च ।
मर्काश्रमे पुण्यकृद्यः स याति परमां गतिम् ॥३१॥

स्कन्दाश्रमे च यः कश्चिद्द्विविधं कुरुते तपः ।
तदक्षयं भवेद्देवि सर्वसिद्धिर्भवेद्ध्रुवम् ॥३२॥

विशेषतः कुमारं तु षष्ठ्यामत्र प्रपूजयेत् ।
स शीघ्रं सिद्धिमाप्नोति सत्यमेव न संशयः ॥३३॥

पीनोरसि महेशानि य: स्नानं कुरुते नर: ।
स मुक्त: सर्वपापेभ्यो विष्णुलोकं महीयते ॥३४॥

ताराश्रमे च संस्नाप्य गङ्गायामपि चेश्वरि ।
स्नात्वा मुक्तिमवाप्नोति नरो निश्चलमानस: ॥३५॥

अहिश्रृङ्गे नर: स्नात्वा श्राद्धं कृत्वा विधानत: ।
स्नानमपि महेशानि मुच्यते ब्रह्महत्यया ॥३६॥

यद्यदत्र कृतं कर्म मितं वा बहु वा प्रिये ।
तत्तदक्षयतां याति सत्यं सत्यं वरानने ॥३७॥

सनत्कुमाराश्रमे तु स्नानं दानं तपोऽथवा ।
जपो होमोऽथवा देवि तदनन्त्याय कल्पते ॥३८॥

खगाश्रमे तु य: कश्चिद्विष्णुक्षेत्रे महेश्वरि ।
स्नानं चैवार्चनं श्राद्धं तदनन्तफलं लभेत ॥३९॥

तस्मात्सर्वप्रयत्नेन यात्रां कृत्वा महेश्वरि ।
स्नायात्पुष्करतीर्थेषु सर्वपापै: प्रमुच्यते ॥४०॥

आदौ रोषे वीरभद्रं पूजयित्वा व्रजेत्तत: ।
जलं संस्पृश्य गङ्गायास्ततो मर्काश्रमं वज्रेत् ॥४१॥

पीनोरसि नर: स्नात्वा ताराश्रममतो व्रजेत् ।
ततो वज्रेन्महेशानि कुमाराश्रममन्तत: ॥४२॥

कुमाराश्रममुल्लङ्घ्य त्वहिश्रृङ्गं ततो व्रजेत् ।
अहिश्रृङ्गात्खगे देवि विष्णोः क्षेत्रं समाश्रयेत् ॥४३॥

खगात्पुष्करमासाद्य स्नात्वा दत्वा च सुन्दरि ।
सम्पूर्णं फलमाप्नोति सत्यमेव न संशयः ॥४४॥

इति श्री श्रीसंहितायां भङ्गीलविषयोपजाततीर्थसंग्रहे श्रीपुष्करमाहात्म्यं
नाम द्वितीयः पटलः ॥२॥

# भृङ्गीशसंहिता
# स्वयम्भवग्निमाहात्म्यम्

## ॐनमः शिवाय परमशिवायोम्

श्री भैरव्युवाच

ॐ श्रुत्वा श्रुत्वा महादेव भद्रकाल्या वनं महत् ।
निर्वृत्तास्मि महाम्भोधेः कृतार्थास्मि न संशयः ॥१॥

अधुना श्रोतुमिच्छामि स्वयम्भवग्निमनुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥२॥

वद सत्यं महादेव ममानुग्रहकाम्यया ॥३॥

श्री भैरव उवाच

शृणु देवि प्रवक्ष्यामि हरेज्यापुर उत्तमे ।
वह्निस्वायम्भवं नाम कोटिहत्याघनाशनम् ॥४॥

सर्वैः समेत्य देवैस्तु हरस्येज्या कृता पुरा ।
सुरासुरैर्ऋषिगणैः गान्धर्वोरगराक्षसैः ॥५॥

निराहारैः क्षीणदेहैः सहस्रपरिवत्सरान् ।
दृष्टश्चैव हरस्तेषां पुरो दर्शनमाययौ ॥६॥

दृष्ट्वा तत्र महादेवं दण्डवत्पतिता क्षितौ ।
ततः प्राञ्जलयः सर्वे वाग्भिरर्थ्याभिरस्तुवन् ॥७॥

देवा ऊचुः

ॐ नमः शिवाय रुद्राय शर्वाय भवरूपिणे ।
शान्ताय शान्तरूपाय घोरघोराय चक्षुषे ॥८॥

अघोराय सुघोराय घोरघोराय ते नमः ।
त्रिपुरघ्नाय देवाय त्रिपुरेशाय ते नमः ॥९॥

शमाय शान्तरूपाय दान्ताय दमरूपिणे ।
मीढुष्टमाय देवाय मुञ्जमेखलिने नमः ॥१०॥

अर्चनीयाय देवाय ह्यर्चाफलविधायिने ।
कालकालाय देवाय ह्यन्तकाय ह्यनन्तिने ॥११॥

नमो हिरण्यरूपाय ज्योतिषांपतये नमः ।
नमः कालाग्निरुद्राय महासंघर्षणाय ते ॥१२॥

महेश्वराय देवाय महावरप्रदाय ते ।
दण्डिने मुण्डिने तुभ्यं जटिने ब्रह्मचारिणे ॥१३॥

हिरण्याक्षाय देवाय हिरण्यकवचाय ते ।
मायिने मोहिने तुभ्यं महामोहविनाशिने ॥१४॥

सर्वाय सर्वरूपाय नमः सर्वेश्वराय ते ।
त्र्यम्बकाय त्रिनेत्राय भूयो भूयो नमो नमः ॥१५॥

इति स्तुत्वा महादेवं प्रणतार्तिहरं परम् ।
तस्थुः प्राञ्जलयः सर्वे प्रणेमुश्च पुनः पुनः ॥१६॥

स्तुवं श्रुत्वा तथा तेषां देवानां वरवर्णिनि ।
प्राह गम्भीरया वाचा तद्दुखं शमयन्निव ॥१७॥

श्री महादेवः

इज्याकृता किमर्थं नो वदध्वं देवसत्तमाः ।
तं वृणीध्वं वरं देवा यद्यपि स्यात्सुदुर्लभम् ॥१८॥

देवा ऊचुः

अस्मिन्सतीसरे देशे पोषिताश्च महात्मभिः ।
महर्षिभिः कश्यपाद्यैः यागान्कृत्वा विधानतः ॥१९॥

अधुना बाधितास्ते तु यागविघ्नकरैरिह ।
असंपादितयागास्ते विशीर्णं जगदीश्वरः ॥२०॥

यागहीनेऽत्र देशेऽस्मिन्प्रक्षीणा प्रचमहे ।
इत्थं श्रुत्वा वचस्तेषां प्रणतार्तिहरो हरः ॥२१॥

प्रत्युवाच च तान्सर्वान्मेघगम्भीरया गिरा ॥२२॥

श्री महादेवः

विघ्नानहं शमयिष्ये शृणुध्वं देवसत्तमाः ।
पातालसंस्थो भगवान्महाकालाग्निरूपधृक् ॥२३॥

यदा यदा धर्मपथो नश्येत्कश्मीरमण्डले ।
तदा ह्यहं नेत्रज्वालामुत्पाद्य शमये स्वयम् ॥२४॥

तस्माद्व्रजत भद्रं वः स्वं स्वमालयमागताः ।
इति श्रुत्वा वचो देवा हरस्याक्लिष्टकर्मणः ॥२५॥

यथागतं [तथा] देवाः स्वं स्वमालयमागताः ।
तदा प्रभृति देवेशि नष्टे धर्मपथे सदा ॥२६॥

कालाग्निरुद्रो भगवान् ज्वालामुत्पाद्य तां स्वयम् ।
शमयेद्विघ्नसंघाश्च पापसंघाश्च नित्यशः ॥२७॥

देवैर्येज्या कृता यत्र हरस्य वरवर्णिनि ।
एतद्देवि वनं प्रोक्तं हरेज्यापुरसंज्ञितम् ॥२८॥

यस्माच्छमयते विघ्ना पापसंघाश्च नित्यशः ।
महाकालाग्निरुद्रो वै पातालस्थः सदाशिवः ॥२९॥

उत्पाद्य ज्वालां नेत्रोत्थां स्वयमेव ततः प्रभुः ।
तस्मात्प्रोक्तः पुराविद्भिः स्वयं वह्निभुनामकः ॥३०॥

स्वायम्भुवोऽग्नौ हुत्वा च कृत्वा श्राद्धं वरानने ।
अश्वमेधादिकोटीभिः फलमाप्नोति मानवः ॥३१॥

ग्रहपीडासु चोग्रासु वह्निस्वायम्भुवं श्रयेत् ।
महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ॥३२॥

दृष्ट्वा स्वायम्भवं वह्निं मुच्यते सर्वकिल्विषैः ।
दारिद्र्यदुःखयुक्तो वा बद्धो वा पापपञ्जरैः ॥३३॥

हुत्वा स्वायम्भवे ह्यग्नौ मुच्यते सर्वसङ्कटैः ।
पक्वान्नं तत्र देवेशि श्राद्धे कृत्वा विधानतः ॥३४॥

पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ।
कल्यं सायं वसेद्यस्तु श्राद्धं कुर्वन् महेश्वरि ॥३५॥

यत्फलं समवाप्नोति तद्वह्नौ च स्वयम्भवे ।
एकाहेनैव देवेशि श्राद्धं कोटिगुणं भवेत् ॥३६॥

महामायां भद्रकालीं नत्वा भक्तिसमन्वितः ।
नरो वा यदि वा नारी पुण्यमाप्नोति पुष्कलम् ॥३७॥

इदं सौभाग्यदं तीर्थमिदं पापप्रणाशनम् ।
पितृमुक्तिप्रदं ह्येतन्महापातकनाशनम् ॥३८॥

आयुरारोग्यदं चेदं कन्यादं शुभदं नृणाम् ।
इदं पुंसवनं देवि ह्यापन्नार्तिहरं परम् ॥३९॥

कालाग्निरुद्रसम्भूतं स्वयम्भुवं हि संज्ञितम् ।
दर्शनाद्धरते पापं श्राद्धादपि महेश्वरि ॥४०॥

पुण्डरीकप्रदं तीर्थं ह्यश्वमेधप्रदं तत् ।
नारी वा पुरुषो वापि दृष्ट्वा तीर्थसमन्वितम् ॥४१॥

पुण्यमाप्नोति परमं राजसूयाश्वमेधजम् ।
यावत्तत्र च सक्तूनि श्राद्धार्थं च पक्वानि वै ॥४२॥

तावत्कल्पसहस्रेषु पितरस्तुष्टिमाप्नुयुः ।
तस्मात्सर्वप्रयत्नेन यात्रां कृत्वा विशेषतः ॥४३॥

हुनेत्स्वायम्भवे ह्यग्नौ पक्वान्नं विधिवन्नरः ।
मुच्यते पातकैर्घोरैः कोटिजन्मार्जितैरपि ॥४४॥

हुतशेषं स्वयं तत्र भुङ्क्ते भक्ति[स]मन्वितः ।
सर्वपापविनिर्मुक्तो यान्ति ब्रह्मसनातनम् ॥४५॥

तस्माद्यदा यदा देवि कश्मीरे किल्विषं भवेत् ।
कालाग्निरुद्रो भगवान् शमयेत्स्वयमग्निना ॥४६॥

इति ते कथितं देवि तीर्थं स्वायम्भवे परे ।
महापापहरं पुण्यं हरेज्यापुरमुत्तमम् ॥४७॥

इत्येष पटलो गुह्यो महापुण्यफलप्रदः ।
यस्मै कस्मै न दातव्यो नाख्येयश्चापि सुन्दरि ॥४८॥

अशिष्याय शठायापि क्रूराय वेदनिन्दके ।
दत्वा ख्यात्वा च निरयान्याति नात्र विचारणा ॥४९॥

तस्मात्सर्वप्रयत्नेन गोपनीयमिदं महत् ।
तीर्थं स्वायम्भवं नाम महापातकहृं कलौ ॥५०॥

आदौ च परह्नो नाम्नि शुभे वैतस्तके जले ।
ततो भद्राह्के ग्रामे स्नात्वा वैतस्तके जले ॥५१॥

ततो यायाद्भद्रकालीं तद्गङ्गामवगाह्य वै ।
ततो हरेज्यापुरे स्नात्वा स्वायम्भुवं व्रजेत् ॥५२॥

महाकालाग्निरुद्रेशे महाभयविनाशने ।
स्नानदानेन मे देव यात्रा साफल्यमाचरेत् ॥५३॥

इति श्री श्रीसंहितायां स्वयम्भवग्निमाहात्म्यं
नाम प्रथमः पटलः ॥१॥

# भृङ्गीशसंहिता
# गोदावरीमाहात्म्यम्
## *ॐ नमस्त्रिपुरसुन्दर्यै

श्री भैरव्युवाच

ॐ चन्द्रकोटेश्च माहात्म्यं श्रुत्वा प्रीतास्मि सुन्दर ।
अधुना श्रोतुमिच्छामि गिरिं गोदरमादितः ॥१॥

गोदावरी महापुण्या गौतमी च महेश्वर ।
यत्तु प्रतिष्ठिता देव वद त्वं मदनुग्रहात् ॥२॥

*श्री भैरवी

शृणु देवि प्रवक्ष्यामि पुण्यं गोदरकं गिरिम् ।
यच्छ्रुत्वा मनुजो देवि मुच्येदघसहस्रकैः ॥३॥

पुरा देवशिरो राष्ट्रे गौतमो मुनिसत्तमः ।
तपश्चचार सुमहद्दारुणं दुश्चरं प्रिये ॥४॥

---

*ब: ॐ स्वस्ति प्रजाभ्या: ॐ नम श्रीमहात्रिपुरसुन्दर्यै नमः
———ॐ नमस्त्रिपुरसुन्दर्यै

*ब: भैरवी—श्री भैरव्युवाच

२ ख: व महेश्वरी—महेश्वर घ: यत्र—यत्तु

निराहारो निरीहश्च जितक्रोधो जितेन्द्रियः ।
जितश्रमो जितालस्यो मौनी निश्चल एव सः ॥५॥

एवं संतप्यमानस्य विधिवद्दुश्चरं तपः ।
जितेन्द्रियस्य चेशानि जिताहारस्य वा पुनः ॥६॥

गौतमस्य महादेवि शरदामयुतं गतम् ।
एकदा तप्यमानस्य दारुणं दुश्चरं तपः ॥७॥

ब्रह्मर्षीणां समाजोऽभूत्तत्राश्रमपदे तदा ।
देवर्षयोऽपि तत्रासन्सिद्धा राजर्षयस्तथा ॥८॥

तस्थुस्तस्याश्रमपदे स्थाणुभूतस्य सम्मुखे ।
चिरं ते मुनयस्तत्र स्थितास्तस्याश्रमे तदा ॥९॥

स्थाणुभूतस्य पुरतो गौतमस्य वरानने ।
कोपाविष्टाश्च मुनयोऽप्यभवन्गौतमं प्रति ॥१०॥

कृत्यां संजनयामासुर्गोरूपां वरवर्णिनि ।
दुर्दान्तस्थाणुभूतस्य दुरीहस्यापि चाश्रमे ॥११॥

---

५ कः ब निरीतश्च—निरीहश्च

६ घः ब जितातारहस्य—जिताहारस्य

९ गः ब मनयः—मुनयः

१० घः ब तवन्—भवन्

११ घः ब पुरीतस्यापि—दुरीहस्यापि

वयमभ्यागता यस्माद्दृष्ट्या विमलयापि च ।
संभाविता न चानेन दुर्मदेन दुरात्मना ॥१२॥

अत एनमियं कृत्या गोरूपा प्रहरिष्यति ।
यस्य गेहं स्वयं चापि कुतश्चिदातपेत्किल ॥१३॥

अभ्यागतस्तमाहन्ति दृशापि विमनीकृतः ।
तस्मात्सर्वप्रयत्नेन कुतश्चिदागतातिथिम् ॥१४॥

पूजयेत दृशा चापि तृणैः शीतलवारिभिः ।
फलैर्मूलैस्तथा शाकैः शालीक्षुयवसैन्धवैः ॥१५॥

पूजितः पूजयेच्चापि निर्दहेच्चावमानतः ।
इति कृत्वा मतिं देवि गोकृत्या तमुदारयत् ॥१६॥

दन्तैः शृङ्गैर्महादेवि प्रोन्मील्य नयने तदा ।
विष्टरेण तदा गात्रं गां कृत्या प्रददार ह ॥१७॥

---

१३ कः व मेनमिय—एनमियं गः गीतं—गेहं घः आपतेत्—आतपेत्
१४ खः व यशापि—दृशापि
१५ घ व शालीक्षयवसंभवैः—शालीक्षुयवसैन्धवैः
१६ खः व निर्दतेच्चावमानितः—निर्दहेच्चावमानतः
घः गोगुह्यातमादारयत्—गोकृत्या तमुदारयत्
१७ खः व नयते—नयने घः प्रददानत—प्रददारह

गौतमः परमः क्रुद्धो ब्रह्मास्त्रेण महामुनिः ।
प्रहृतं गौतमेनापि गौर्मृता प्रापतद्भुवि ॥१८॥

गां दृष्ट्वा तु मृता तत्र ब्रह्मसिद्धर्षयस्ततः ।
धिग्धिक् कुर्वन्ति एवाशु समुत्तस्थुर्महेश्वरि ॥१९॥

दृष्ट्वा समुत्थितां तां तत्र गौतमर्षिर्महातपः ।
ऋषीन्विज्ञापयामास क्षन्तव्यं मे महर्षयः ॥२०॥

श्रुत्वा मुनेर्वचः सम्यङ्मुनयश्चोर्ध्वरेतसः ।
ऊचुस्तं गौतमं देवि क्षमया किं भवेत्तव ॥२१॥

येन त्वया गोवधश्च कृतोऽस्माकं हि पश्यताम् ।
उपपातकी वै तस्मात्त्वं भविष्यसि न संशयः ॥२२॥

उपपातकिभिः साकं न सम्भाषणमीरितम् ।
न स्पर्शनं नासनं नाप्येकभोजनमेव च ॥२३॥

वर्जनीयं तु यत्नेन यतस्तत्सदृशो भवेत् ।
इति प्रोक्तो यतो धर्मशास्त्रेषु मुनिभिः पुरा ॥२४॥

---

१८ खः ब मतामुनि —महामुनिः

१९ गः ब कुर्वन्त—कुर्वन्ति

तस्मात् त्वत्सहवासोऽपि नार्हो दूरे वसामहे ।
इत्युक्त्वा प्रययुर्दूरं मुनयः परमेश्वरा: ॥२५॥

गौतमोऽपि मुनीन्सर्वाननुयातो महेश्वरि ।
उवाच परमो देवि प्रायश्चित्तार्थमेव च ॥२६॥

भगवन्तो मम पुनः प्रायश्चित्तविधिं परम् ।
आज्ञापयध्वं कृपया मोचयध्वं च पातकात् ॥२७॥

इत्युक्तवन्तं देवेशि गौतमं मुनयस्तदा ।
प्रोचुः परमया तत्र कृपया शोधनं मुनेः ॥२८॥

गोमूत्रपाचितं यावदत्र त्रिदिवसं तथा ।
एकाहमपि वा भोज्यं गायत्र्यष्टसहस्रकम् ॥२९॥

जपनीयं चोपवासो रात्रिमेकं हरेः स्मृतिः ।
जागरश्च तथा कार्यः कूष्माण्डीहवनं ततः ॥३०॥

पीत्वा पुण्यं पञ्चगव्यं शक्त्या ब्राह्मणभोजनम् ।
दत्त्वा गाञ्च विधानेन गोवधान्मुच्यते नरः ॥३१॥

---

२६ ग: व उवाच च पुरो देवि उवाच परमो देवि

२९ क: व गोमूत्रे पाचितं—गोमूत्रपाचितं

एतद्धि वज्रकृच्छ्राख्यं व्रतमुक्तं महर्षिभिः ।
प्रायश्चित्तविधिं श्रुत्वा परमर्षिसमीरितम् ॥३२॥

प्रारेभे गौतमः कर्तुं व्रतं मुनिसमक्षतः ।
कुर्वाणस्य व्रतं तत्र प्रायश्चित्तं समक्षतः ॥३३॥

तेजः प्रादुरभूत्तेषां मुनीनां भावितात्मनाम् ।
निश्चलस्य मुनेस्तत्र गौतमस्य महात्मनः ॥३४॥

गङ्गाप्रादुरभूच्चापि प्रत्यक्षं तस्य चाश्रमे ।
गङ्गाप्रवाहस्तत्रैव गोकरङ्कस्य पृष्टतः ॥३५॥

प्रससाराश्रमपदे मुनीनां तत्र पश्यताम् ।
स्पृष्टमात्रा तु गङ्गाम्भः प्रवाहेन च गौश्च सा ॥३६॥

उदतिष्ठत्प्राद्रवच्च गौगङ्गाम्भः समुक्षिता ।
गौरागता महेशानि बहुरूपे च भैरवम् ॥३७॥

गौशरीरस्य मध्यात्तज्जलं तत्रापतद्यतः ।
ततस्तत्तीर्थाभवद्गङ्गेति प्रथितं भुवि ततः ॥३८॥

---

३४ गः व निश्चालस्य—निश्चलस्य
३६ घः व गौश्च साम्—गौश्च सा
३७ घः व भैरवे—भैरवम्

सा प्राद्रवद्देवि वाराहं गिरिमुत्तमम् ।
पुच्छमुत्क्षेपयाञ्चक्रे गङ्गाजलसमुक्षितम् ॥३९॥

ततस्तत्तीर्थजं वारि वाराहे शिखरे परम् ।
गौतमीति च विख्यातं महापातकहं कलौ ॥४०॥

यस्मिन्गिरौ महादेवि गौतमेन महात्मना ।
कृत्या गौर्दारिता प्रोक्तो गोदरः स गिरिर्महान् ॥४१॥

यस्मिन्ग्रामे गोदराख्यः पर्वतः संप्रतिष्ठितः ।
स ग्रामः प्रथितोऽद्यापि गोदराख्यो महेश्वरि ॥४२॥

गौर्वै विदारिता यत्रोत्थिता गङ्गाजलोक्षिता ।
सैव गोदावरी नाम गङ्गापरमपावनी ॥४३॥

गोदावरी तथा गङ्गा गौमती त्रिविधा यतः ।
गोदरे बहुरूपे च वाराहे तत्प्रतिष्ठिता ॥४४॥

गोदावरीं सिंहगते जीवे गङ्गाञ्च गौतमीम् ।
श्रयन्पापविनिर्मुक्तो याति ब्रह्मसनातनम् ॥४५॥

*श्री भैरवी

वद सत्यं महादेव जीवे सिंहमुपासिते ।
निषिद्धा किं तीर्थयात्रा विहिता गौतमी कथम् ॥४६॥

---

४५ क: व गोदावरी—गोदावरीम्

*ब: भैरवी—श्री भैरवी

श्री भैरवः

शृणु देवि प्रवक्ष्यामि प्रश्नस्योत्तरमुत्तमम् ।
गुह्यं परं रहस्यञ्च वदामि सुरदुर्लभम् ॥४७॥

पुरा बृहस्पतिर्देवि सिंहराशिमुपागतः ।
विप्रत्वाद्भयमाजह्ले भीता देवाश्च तद्भयात् ॥४८॥

तीर्थानि चैव भीतानि भीते चाङ्गिरसे मुनौ ।
सिंहाज्जगदपीशानि भीतमेवञ्च निश्चयम् ॥४९॥

देवता मुनयश्चैव सिद्धगन्धर्वकिन्नराः ।
सरिता सागरश्चैव भीताश्चाप्सरसां गणाः ॥५०॥

एकत्र मिलिताश्चासन् सयक्षोरगराक्षसाः ।
न यात्रां नोत्सवञ्चापि न यज्ञं पूतिभाविताः ॥५१॥

मुनावाङ्गिरसे जीवे सिंहाद्भीते ततः सुराः ।
भीता उत्सवहीनाश्च यज्ञयात्राविवर्जिताः ॥५२॥

देवा बभूवुर्देवेशि मध्यान्तं फाल्गुनीं श्रिते ।
जीवे पुनर्बभूवुस्ते देवाः परमहर्षिताः ॥५३॥

---

४७ खः ब सिंहमुपाश्रिते—सिंहमुपासिते
५० घः ब निश्चलम्—भीताश्च
५१ घः ब प्रतिभाविसः—पूतिभाविताः
५३ घः ब पुरमहर्षिताः—परमहर्षिताः

चक्रुर्महोत्सवं यात्रां यज्ञं परमया मुदा ।
अत एव च दैवज्ञ वेदचक्षुषि वै पुरा ॥५४॥

यज्ञो निषिद्धो यात्रा च महोत्सवविधिस्तथा ।
भीति प्रसेहयेत्कालं तत्कालं तु विवर्जयेत् ॥५५॥

अत एव मध्यान्तं तु यज्ञयात्राविवर्जनम् ।
मुनावाङ्गिरसे देवि सिंहराशिमुपागते ॥५६॥

यतस्तु मुनयः तत्र गौतमस्य निवेशनम् ।
यज्ञयात्राविरहिता आसेदुः परमार्चितम् ॥५७॥

तस्माज्जीवे सिंहसंस्थे श्रयेद्गोदावरीं नदीम् ।
तीर्थयात्रामध्यान्तं च हित्वा यज्ञोत्सवांस्तथा ॥५८॥

गौतमीञ्चैव गङ्गाञ्च तथा गोदावरीं श्रयेत् ।
सिंहजीवे मध्यान्तं ये यज्ञयात्रां महोत्सवम् ॥५९॥

यदि कुर्युः भीतंयुक्तास्तद्भवेयुर्न संशयः ।
वर्जनीयास्ततो यज्ञास्तीर्थान्तरगतिस्तथा ॥६०॥

---

५४ घः व दैवज्ञंवेदचक्षुषि—दैवज्ञ वेदचक्षुषि
५५ खः व विधिस्तवा—विधिस्तथा
६० खः व तद्भवेयन्न—तद्भवेयुर्न

महोत्सवाश्च सिंहस्थे मध्यान्तं तु बृहस्पतौ ।
पूर्वफल्गुन्याश्रिते तु मुनावाङ्गिरसे यतः ॥६१॥

चक्रुर्महोत्सवं यात्रां यज्ञदेवाः प्रहर्षिताः ।
तीर्थान्तरेषु यात्राञ्च तस्माद्यज्ञोत्सवादिकम् ॥६२॥

कुर्वीत फाल्गुनी ऋक्षमाश्रिते तु बृहस्पतौ ।
सिंहजीवे मध्यान्तं तु यायाद्गोदावरीं नदीम् ॥६३॥

इति ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि ।

इति श्री भृङ्ग [ङ्गी] शसंहितायां देवशिरो विषयोपजाततीर्थ-
संग्रहे गोदावरीमाहात्म्यं नाम पटल[:] प्रथमः ॥१॥

---

६२ खः व यज्ञ देवाः – यज्ञदेवाः

## अथ द्वितीयः पटलः

*श्री भैरवी

श्रुत्वा गोदरमाहात्म्यं प्रीतास्मि जगदीश्वर ।
अधुना श्रोतुमिच्छामि गोमती का वद प्रभो ॥१॥

गौमती गोमती या च गङ्गा गोदावरीति च ।
त्रिविधा जाह्नवी तत्राप्यानीता गौतमेन या ॥२॥

आसामान्यतमा पुण्या मिलिता वा महेश्वर ।
सिंहसंस्थे गुरौ सम्यक् फलदातुं विशेषतः ॥३॥

यैः स्नाता त्रिविधागङ्गा तेषां का गतीश्वर ।
यात्रां विनापि यैर्देव स्नाता गोदावरी नदी ॥४॥

आसामान्यतमा वापि तेषां पुण्यफलं वद ॥५॥

*श्री भैरवः

श्रुणु देवि प्रवक्ष्यामि गोदावर्याः फलं महत् ।
विधिना येन सुस्नाता फलदा स्यान्महेश्वरि ॥६॥

---

*ख: भैरवी—श्री भैरवी
१ घः गङ्गा—गोमती
४ कः गतीश्वरि—गतीश्वर
*ख: भैरवः—श्री भैरवः

आदौ गत्वा महेशानि सुरेज्यापुर उत्तमे ।
स्नात्वा च चन्द्रतीर्थे वै ततः श्रीप्रहरं श्रयेत् ॥७॥

तत्र स्नात्वा सङ्गमे तु ह्यनन्तनागमाश्रयेत् ।
तत्र स्नात्वा पुनः प्रायाद्वाराहं क्षेत्रमुत्तमम् ॥८॥

कोटतीर्थे तत्र स्थित्वा पुण्ये पापप्रणाशने ।
क्षेत्रे स्नात्वा ततो यायात्पुण्यं नारायणस्थलम् ॥९॥

तत्र स्नात्वा व्रजेद्देवि सोमसूर्याग्निधामसु ।
तत्र स्नात्वारुहेद्देवि शिखरं गौतमीं प्रति ॥१०॥

तत्र स्नात्वा तर्पयित्वा श्राद्धं कृत्वा विधानतः ।
ततो वराहस्य शिरोग्रामं गत्वा महेश्वरि ॥११॥

भवगङ्गां ब्रह्मगङ्गां रुद्रदेवीं सुरेश्वरीम् ।
अवगाह्य विधानेन हयमेधमवाप्नुयात् ॥१२॥

स्नात्वा च पूजयेत्तत्र शिवं पञ्चमुखं तथा ।
ज्योतिष्टोमं वाजपेयं पुण्डरीकमवाप्नुयात् ॥१३॥

यद्यत्कृतं महेशानि बृहदण्वपि पातकम् ।
अस्मिन्जन्मनि वान्यस्मिन्वाङ्मनःकायसञ्चितम् ॥१४॥

---

११ ग: ब ततो वराह स सिरो—ततो वराहस्य शिरोग्रामं

तत्सर्वं नश्यते पापमिति सत्यं वरानने ।
ततो यायाच्छूलमूलं शूले स्नात्वा पुनर्व्रजेत् ॥१५॥

स्वर्णपाशे ततः स्नात्वा श्रीवत्सभैरवे श्रयेत् ।
श्रीवत्सक्षेत्रे स्नात्वा तु ततो नाजानिकं श्रयेत् ॥१६॥

ततो वै गोमतीयात्रां कृत्वा सङ्गममाश्रयेत् ।
श्राद्धं कृत्वा विधानेन ततः पर्वतमाश्रयेत् ॥१७॥

देवं तमर्चयित्वा च पुण्यमाप्नोति यागजम् ॥१८॥

एवं यः कुरुते देवि भैरवक्षेत्रसम्भवाम् ।
गोमतीतीर्थयात्रां वै ब्रह्मलोके महीयते ॥१९॥

---

१५ ब: प्रथमपङ्क्तेरनन्तरं 'इति श्री पुच्छदेशे तीर्थ यात्रा, पाठोऽधिकः ।
१५ घः मूले—शूले
१६ कः ब सुर्णपाशे—स्वर्णपाशे खः भैरवी श्रयेत्—भैरवे श्रयेत्
घः राजानिकं—नाजानिक
बः १६ श्लोकादनन्तरं—

कुलवागीश्वरीं गङ्गां काशीं प्रायादतंद्रितः ॥
तत्र स्नात्वा व्रजेद्देवि नाजातं तीर्थमुत्तमम् ।
ततस्समुद्रगङ्गां तु हरगङ्गां ततो व्रजेत् ॥
तीर्थं कठकनाम तु स्नात्वा गोदावरीं व्रजेत् ।

१८ गः ब तु—च
बः १९-श्लोकादनन्तरं 'इति श्रीमध्यदेशे भैरवविषये गौतमी-तीर्थयात्रा' पाठोऽधिकः ।

ततो व्रजेन्महेशानि हरनागं महेश्वरि ।
तत्र स्नात्वा व्रजेद्देवि पुण्यमाक्षारणं महत् ॥२०॥

ततः शाद्वलकं तीर्थं फुल्लाहं तत्र चाश्रयेत् ।
जलोदे पुष्करे क्षेत्रे पूर्वगङ्गां समाश्रयेत् ॥२१॥

स्नात्वा गणोरे गङ्गायां शङ्खपालं समाश्रयेत् ।
जलोदे पूर्वगङ्गायां स्नात्वा प्राणेशमाश्रयेत् ॥२२॥

प्राणेशादाश्रमं तस्य गौतमस्य महात्मनः ।
गोदारं गिरिमारुह्य शुद्धबुद्धौ समाश्रयेत् ॥२३॥

चन्द्रगेहे ततः स्नात्वा गिरिमारुह्य वै पुनः ।
मरीचेराश्रमं पुण्यं ततो यात्रां विधाय च ॥२४॥

गणोरे शङ्खपाले च स्नात्वा तु व्रजेत् ततः ।
भानुमूले च चन्द्रगेहे स्नानं कार्यं विधानतः ॥२५॥

---

२० घ: ब फुल्याहं तत्र चाश्रयेत्—फुल्लाहं तत्र चाश्रयेत्
२१ घ: ब समर्चयेत्—समाश्रयेत्
२१ च: ब शाद्वलके तीर्थे—शाद्वलकं तीर्थं
२३ ग: ब गीदरं—गोदारं
२४ घ: ब ह—च
२५ क: ब घणोरे—गणोरे

आव्रजेच्च ततो देवि पुण्यं वै मातृकंगणम् ।
तत्र स्नात्वा व्रजेद्देवि गङ्गां गोदावरीं पुनः ॥२६॥

गायत्रीं चैव सावित्रीं दृष्ट्वा मुच्येत किल्बिषैः ॥२७॥

इत्थं कृत्वा तु यो यात्रां गोदावर्या महेश्वरि ।
सर्वपापविनिर्मुक्तो याति ब्रह्मसनातनम् ॥२८॥

गोदावर्यास्तटे श्राद्धं यः करोति नरोत्तमः ।
सवतौ सवतौ लभेद्देवि शतगोदानिकं फलम् ॥२९॥

त्रिविधा गौतमेनात्र ह्यानीता परमा नदी ।
गायत्र्यपि च सावित्री तेन तत्राप्युपासिता ॥३०॥

प्रायश्चित्तं गोवधस्य कृतमत्र महात्मना ।
गौरुत्थिता महादेवि गङ्गाजलपरिप्लुता ॥३१॥

वाराहे धेनुपुच्छं तु भैरवे मध्यमेव च ।
गोदरे च शिरो ज्ञेयं तीर्थस्य वरवर्णिनि ॥३२॥

पादात्प्रभृति शीर्षान्तं कृत्वा यात्रां महेश्वरि ।
मुच्येदघसहस्रैस्तु कोटिजन्मभवैः प्रिये ॥३३॥

---

२६ खः व गनम्—गणम्

२८ कः व वै—तु

२९ गः व सवतौ संगो लभेद्देवि—सवतौ सवतौ लभेद्देवि

३३ घः व प्रियेः—प्रिये

इत्थं यात्रामकृत्वा यो गच्छेद्गोदावरीं नदीम् ।
वृथा यात्रा भवेत्तस्य वन्ध्यायाः सुरतं यथा ॥३४॥

आसामन्यतमां गत्वा न स्नानफलमाप्नुयात् ।
न तीर्थस्य न यात्राया इति सत्यं वरानने ॥३५॥

तस्मात्सर्वप्रयत्नेन यात्रां कृत्वा विधानतः ।
स्नायाद्गोदावरीं गङ्गां सर्वपापैः प्रमुच्यते ॥३६॥

अच्छिद्रार्थं तु तीर्थस्य गां दद्यात्सुपयस्विनीं ।
अथवा काञ्चनमयीं यवपिष्टमयीमपि ॥३७॥

यवपिष्टपलाभ्यां तु गां कृत्वा तु वरानने ।
सवत्सां च समभ्यर्च्य वस्त्रेण परिधाप्य च ॥३८॥

प्राणं दत्वा पूजयेच्च गन्धपुष्पानुलेपनैः ॥३९॥

यानि कानि च पापानि ब्रह्महत्यादिकानि च ।
शीघ्रं मे नाशय वरे गोदावरि नमोऽस्तु ते ॥४०॥

---

३५ खः ब स्नानफलदानतः—स्नानफलमाप्नुयात्
३७ घः ब यवपिष्टामयीमपि—यवपिष्टमयीमपि
४० गः मा शीघ्रं मे नाशयं वेरे—शीघ्रं मे नाशय वरे

संसारज्वरतप्तोऽहं गोदावर्याः सरित्तटे ।
गामिमां पूजयिष्यामि तीर्थसाफल्यहेतवे ॥४१॥

यत्र कुत्रापि यात्रायां जातं विस्मरणं मम ।
खण्डञ्चाखण्डमेवास्तु कामधेनो नमोऽस्तु ते ॥४२॥

गोदावर्या महानद्यास्तटे पुण्यप्रदे शुभे ।
यात्रासाफल्यहेत्वर्थं गां दास्यामि महेश्वर ॥४३॥

शिवविष्णुस्वरूपस्त्वमाचार्यवर शोभनाम् ।
गामिमां काञ्चनयुतां शीघ्रमङ्गीकुरुष्व मे ॥४४॥

गामिमां दातुमिच्छामि तीर्थसाफल्यकारिणीम् ।
तारणायात्मनः श्रेष्ठ इह लोके परत्र च ॥४५॥

इति मन्त्रेण देवेशि गां दद्यात् ब्राह्मणाय वै ।
पुण्यमाप्नोत्यविकलं भूमिदानस्य सुन्दरि ॥४६॥

नारी वा पुरुषो वापि यात्रां कृत्वा विधानतः ।
यागजं पुण्यमाप्नोति गोदावर्यवगाहनात् ॥४७॥

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
स्नातो गोदावरीतीरे मुक्तः स्यात्सर्वकिल्बिषैः ॥४८॥

---

४८ खः मा युक्तो वा—ह्युक्तो वा

कुरुक्षेत्राच्छतगुणं गङ्गायाश्च सहस्रकम् ।
वाराणस्या दशगुणं गौतमीस्नानमीरितम् ॥४९॥

अदीक्षितस्य दीक्षायाः कारणं परमं स्मृतम् ।
मन्त्रसिद्धिप्रदं शीघ्रं कलिकल्मषनाशनम् ॥५०॥

प्राप्तं कलियुगं दृष्ट्वा घोरञ्चैव मनः स्वकम् ।
चञ्चलं सर्वतो ज्ञात्वा धनं दारांस्तथा सुतान् ॥५१॥

कुटुम्बं गृहमेवापि शीघ्रं गोदावरीं श्रयेत् ॥५२॥

घोरे कलियुगे देवि सर्वे वै पापबुद्धयः ।
परदारपरप्राणाः परनिन्दात्मसंस्तुवः ॥५३॥

परापकारिणो देवि परद्रव्यापहारिणः ।
तेषामुद्धरणार्थाय नदी गोदावरी स्मृता ॥५४॥

---

४९ कः मा कुरुक्षेत्राच्छगुणं—कुरुक्षेत्राच्छतगुण

५० ख: कलावस्मिन्महाघोरे नृणां चञ्चलचेतसाम्' पाठोऽधिकः ।

५० गः व मन्त्रसिद्धिप्रचं—मन्त्रसिद्धिप्रद
घः कल्पकल्मषनाशनम्—कलिकल्मषनाशनम्

५३ घः व संस्तवाः—संस्तुवः

५४ गः व तेषामुद्धरणायैव—तेषामुद्धरणार्थाय

यः स्नाति विधिना देवि गोदावर्यां नरः प्रिये ।
स याति ब्रह्मणो लोकं यत्र गत्वा न शोचते ॥५५॥

गोर्दारिता यत्र देवि गौतमेन महात्मना ।
वृता गङ्गा यतस्तेन गोदावर्यभिधा स्मृता ॥५६॥

गां दत्वा च वृता देवैर्यस्मात्सा च महेश्वरि ।
तस्माद्गोदावरीत्यस्या नाम ख्यातं भुवस्तले ॥५७॥

गौर्यत्र प्राणप्रस्वापाज्जीविता गङ्गया प्रिये ।
प्राणशालेति नामस्य ग्रामस्य तत आगतम् ॥५८॥

मरीचिना चिरं यत्र तप्तञ्च सुमहत्तपः ।
ऋषीभिर्वोप्सया प्रोक्तः स ग्रामश्चिरमाभिधः ॥५९॥

सोमश्चाप्यर्यमा चैव मिलितौ यत्र सुन्दरि ।
ततः प्रोक्तः पुराविद्भिर्ग्रामः सोमरसंज्ञकः ॥६०॥

मरीचिराश्रमे पुण्ये स्नाति यो विधिवन्नरः ।
ब्रह्मणः सदनं याति यत्र गत्वा न शोचते ॥६१॥

---

५८ घः ब तामास्य यांमसय—ग्रामस्य तत आगतम्

५९ खः ब समहत्तपः—सुमहत्तपः

६० कः ब सोमश्चापि यंमा चैव—सोमश्चाप्यर्यमा चैव

इति ते सर्वमाख्यातं यत्पृष्टोऽहमिह त्वया ।
गोदावर्याः प्रभावोऽयं सर्वपापहरः कलौ ॥६२॥

इत्येष पटलो गुह्यो महापातकहा कलौ ।
श्रुतश्च पठितश्चापि कोटिजन्माघनाशनः ॥६३॥

इति श्री श्रीसंहितायां देवशिरोपविषयतीर्थजातसंग्रहे गोदावरीमाहात्म्यं [नाम] द्वितीयः पटलः ॥२॥

---

ब. मातृकावसाने—

'ॐ नमो नाराणायोम्' लिखितम्

## अथ भृङ्गीशसंहितायां

## गोदावरीमाहात्म्यम्

## ॐ नमो गोदावर्यै

श्री भैरव्युवाच

पुनः कथय माहात्म्यं गोदावर्याः फलं तथा ।
न तृप्तास्मि महादेव त्वद्वचः श्रवणामृतात् ॥१॥

मन्ये हे परमेशान यमलोकोऽतिदुस्तरः ।
कथं तरेदमुं लोकं मनुजः पापकर्मकृत् ॥२॥

विशेषाच्चायुगेऽमुष्मिन्कलौ घोरे सविस्तरे ।
अतो वद महादेव यतो मुच्येन्नरः स्वयम् ॥३॥

श्री भैरवः

शृणु सुन्दरि वक्ष्येऽहमुपायं कलिमोचने ।
येन विज्ञानमात्रेण मत्सान्निध्यमवाप्नुयात् ॥४॥

तस्मान्विचारवान्देवि धर्ममेव समाश्रयेत् ॥५॥

अस्मिन्वै भारते वर्षे प्राप्याप्यमरदुर्लभम् ।
मानुष्यं ब्राह्मणत्वञ्च धर्ममेव समाश्रयेत् ॥६॥

भार्याः पुत्राश्च मित्राणि बान्धवः सुहृदस्तथा ।
धनं गृहञ्च पशवो दुष्कृतेनार्जितेन च ॥७॥

स्वकर्मपाशबन्धस्य जन्तोः पञ्चपदीमपि ।
न पूरयन्ति देवेशि तस्माद्धर्मं समाश्रयेत् ॥८॥

एक एव हि जातोऽयमेकः प्रस्थितवान्पथि ।
ततो द्वितीयमीहेत सत्कर्मपुरुषार्थकृत् ॥९॥

दानं तपश्च योगश्च स्वाध्यायाभ्यसनं तथा ।
स्मरणं वासुदेवस्य तथा च शिवयोरपि ॥१०॥

यद्यशक्तोऽप्यसौ जन्तुः परलोकेऽतिविस्तरे ।
श्रयेद्गोदावरीं पूर्णां यत्नेन महता अपि ॥११॥

अत्र ते कथयिष्यामि चेतिहासं पुरातनम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्घोरैरघसहस्रकैः ॥१२॥

पिङ्गलो नाम दुष्टात्मा पुरा पञ्चनदे द्विजः ।
अवदाते कुले जातो विश्रुते वेदवादिनाम् ॥१३॥

---

१३ कः मा अवधाते—अवदाते

कुलोचितानि शास्त्राणि तथा वेदान्विसृज्य सः ।
तौर्यत्रिके मतिं चक्रे वादयन्मुरजादिकम् ॥१४॥

कृतश्रमस्तत्र तत्र गीते नृत्ते च वादने ।
परां प्रसिद्धिमासाद्य न स्व सद्म विवेश सः ॥१५॥

परदारानुपाहृत्य बुभुजे ताननन्यधीः ।
तस्यासीद्दारुणा नाम्नी भार्या हीनकुलोद्भवा ॥१६॥

भ्रमन्त्यन्वहमिच्छन्ती कामुकान्सा विहारिणी ।
वाचाला बहुलोमा च निष्पुत्रात्यन्ततस्करी ॥१७॥

सर्वासां कुलटानाञ्च सम्भूता सा शिरोमणिः ।
द्वारि स्थिता सदा साथ पुरुषान्वीक्षते शठा ॥१८॥

वैश्यवृत्तिं समासाद्य धनमर्जितवान्बहुः ।
पितॄन्न तर्पयामास पूजयामास नो सुरान् ॥१९॥

पार्थिवान्पूजयाञ्चक्रे धनार्जनपरायणा ।
कामान्धा दारुणा जाता निशा सौधविहारिणी ॥२०॥

अपश्यन्ती विटान्रात्रौ निर्भिद्य भवनान्तरात् ।
ययौ संकेतकवनं निर्गत्य नगराद्बहिः ॥२१॥

---

१९ खः मा धनमर्जितवन्बहुः—धनमर्जितवान्बहुः

तत्र प्रियतमं कञ्चित्काममोहितमानसा ।
अन्वेषयन्ती नाद्राक्षत्तं जारं दारुणा तदा ॥२२॥

आशङ्कमाना कान्तस्य मन्दालापान्पदे पदे ।
सरोवराणि रम्याणि पर्यटन्ती मुहुर्मुहुः ॥२३॥

आलिङ्गन्ती वनं वेणुं जीवितेश्वरशङ्कया ।
तदाननभ्रमाद्भूयः चुम्बन्ती विकदम्बुजम् ॥२४॥

विललाप वने तस्मिन्मूर्च्छन्ती विविधोक्तिभिः ।
हा कान्त हा गुणाक्रान्त हा चेतोऽन्यस्य नायक ॥२५॥

हा मनोहर ! सौभाग्यभाग्यलावण्यशेवधे ।
यदि कोपेन कुत्रापि गुप्तवेशो भविष्यसि ॥२६॥

प्रसादयामि कान्त त्वां दत्वा प्राणेशजीवितम् ।
इत्युच्चैः सर्वतो दिक्षु विलपन्त्या वियोगतः ॥२७॥

तस्याः श्रुत्वा वचः कोऽपि सुप्तो व्याघ्रः प्रबुद्धवान् ।
कुर्वन्घुरघुरारावं पश्यन्प्रतिदिशं रुषा ॥२८॥

दंष्ट्रानिर्मग्नलाङ्गूलः प्लुतमुत्थाय वेगवान् ।
गतो व्याघ्रः समुत्प्लुत्य यत्रास्ते साभिसारिका ॥२९॥

अथ शार्दूलमायान्तमालोक्य जारशङ्कया ।
निर्जगाम पुरः स्थातुं प्रियशङ्कितमानसा ॥३०॥

व्याघ्रोऽपि पातयामास ततो नखशिलीमुखैः ।
तस्मिन्क्षणे द्विजः सोऽपि गतो यमपुरीं तदा ॥३१॥

विषाचिकाप्रभावेन प्राप्तवान् दारुणां गतिम् ॥३२॥

तौ दम्पती गतौ तत्र धर्मराजस्य सन्निधौ ।
तयोः कर्म विमृश्याथ किङ्करानादिदेश सः ॥३३॥

तां घोरां यातनाञ्चैव सहतां ह्यधुना वटाः ।
प्रति पदे महापीडां वर्षाणामयुतं तथा ॥३४॥

किञ्चित्कालेन चायातौ ब्रह्मराक्षसयोनिताम् ।
तौ दम्पती च सञ्जातौ घोराख्यां क्षुधान्वितौ ॥३५॥

निश्वसन्तौ च दुखार्तौ पूर्वपापमनुस्मरन् ।
चिन्तयन्तावितस्तत्र क्षुत्तृष्णाकुलपीडितौ ॥३६॥

दृष्ट्वा समागतारुढा वृद्धेन तेन राक्षसा ।
तेजस्विनी सुहेमामा सुश्रोणि दीर्घलोचना ॥३७॥

चन्द्रानना सुकेशी च पीनोन्नतपयोधरा ।
दृष्ट्वा तां रूपसम्पन्नामुवाच राक्षसस्तदा ॥३८॥

राक्षस उवाच

का त्वं कमलपत्राक्षि कुतश्चागमनं तव ।
आर्द्रं ते वदनं कस्मादार्द्रा ते कवरी कुतः ॥३९॥

कुत्र वा गम्यते भीरुकुतस्ते चैश्वरी गतिः ।
केन पुण्येन वा भद्रे तव तेजोमयं वपु: ॥४०॥

त्वद्वस्त्रबिन्दुपातेन मम मूर्ध्नि सुलोचने ।
क्षणेन ह्यगमच्छान्ति क्रूरं मे मानसं सदा ॥४१॥

नीरस्य महिमा कोऽयमेतदाचष्टुमर्हसि ॥४२॥

अप्सरा उवाच

चन्द्रावती ह्यम्भोरक्षः वैकुण्ठस्थानवासिनी ।
गोदावर्यांश्च स्नानेन प्राप्तञ्च सुकृतं मया ॥४३॥

गन्तव्यं तु मया रक्षो वैकुण्ठभवनं शुभम् ।
यत्रास्ते कमलाकान्तः शङ्खचक्रगदाधरः ॥४४॥

जाताहं येन पुण्येन तत्सर्वं कथयामि ते ॥४५॥

हिमालये च सञ्जाता कन्यका भृगुवंशजा ।
सप्तदशे च वर्षे वै सम्पन्ना विधवा तदा ॥४६॥

गोदावर्यांश्च द्वात्रिंशत् स्नानस्य सुकृतं मम ।
तावृवसंख्याश्च गौर्दत्ता मया शुद्धेन चेतसा ॥४७॥

भगवत्तुष्टिप्रीत्यर्थमन्यत्तु सुकृतं तथा ।
तेन पुण्यप्रभावेन सञ्जाता ह्यप्सरा शुभा ॥४८॥

साहं नृत्तञ्च गीतञ्च कुर्वती विष्णुसन्निधौ ।
बह्वधा ह्यप्सरसस्तत्र गन्धर्वा बहवस्तथा ॥४९॥

हा हा हू हू च गन्धर्वा नारदप्रमुखास्तथा ।
तौर्यत्रिकं च कुर्वन्ति भगवद्विष्णुसन्निधौ ॥५०॥

बह्वधा ह्यप्सरसस्तत्र गायन्ति च पृथक् पृथक् ।
तासां मध्ये च मां प्रीत्या प्रेक्षते पुरुषोत्तम: ॥५१॥

गीते नृत्ते च वाद्ये च संमित: कमलापति: ।
यदा सिंहस्थिते जीवे तदा सोत्कण्ठमानसा ॥५२॥

नो वदामि च संख्यां वै तस्य धर्मस्य राक्षस ।
करिष्ये निष्कृतिं रक्ष इदानीं खलु मा शुच: ॥५३॥

प्रतिज्ञां सुदृढां कृत्वा यतिष्ये तव मुक्तये ।
एकस्याश्चैव यात्राया: फलं प्राप्नुहि मा शुच: ॥५४॥

श्री भैरव:

एतस्मिन्नन्तरे तत्र विमानञ्चागतं शुभम् ।
तौ दम्पती च सञ्जातौ दिव्यरूपौ मनोहरौ ॥५५॥

दिव्यवस्त्रपरिताङ्गौ दिव्यगन्धानुलेपनौ ।
उपविष्टौ ह्यासने च शुभे चानन्ददायके ॥५६॥

ननृतु: ह्यप्सरास्तत्र गन्धर्वा ललितं जगु: ॥५७॥

तौ दम्पती गतौ तत्र यत्यानान्नच्यवन्ति वै ।
चन्द्रावती गता तत्र यत्यानं बोगिदुर्लभम् ।।५८।।

एतत्ते कथितं देवि यत्पृष्टोऽहं त्वयानघे ।
गोदावर्याश्च माहात्म्यं तव स्नेहात्प्रकाशितम् ।।५९।।

य: श्रृणोति कथां पुण्यां भक्त्या परमया युत: ।
पापसंघान्विमुच्याथ याति विष्णो: परं पदम् ।।६०।।

एतां पुण्यां रहस्याञ्च य: श्रृणोति नर: शुचि: ।
भावयुक्तो नर: धीमान्यात्राया: फलमश्नुते ।।६१।।

इति श्रीभृङ्गीशसंहितायां श्री भैरवीभैरवसम्वादे
देवशिरोपतीर्थजातसंग्रहे गोदावरीमाहात्म्यं
सम्पूर्णं नाम द्वितीय: पटल: ।।२।।

# भृङ्गीशसंहिता
# हरिद्रागणेशमाहात्म्यम्

**ॐ श्रीगणेशाय नमः**

श्री भैरव्युवाच

श्रुत्वा घोरेशकायस्य महिमानमनुत्तमम् ।
कृतार्थास्मि न संदेहः क्रीतास्मि जगदीश्वर ॥१॥

इदानीं श्रोतुमिच्छामि हरिद्राख्यं गणेश्वरम् ।
हरिद्रापारके ग्रामे विख्यातं परमेश्वर ॥२॥

पूजनाद्यत्फलं प्रोक्तं दर्शनाद्यत्फलं लभेत ।
स्नानाद्दानाज्जपाद्होमात्तन्मे वद सुविस्तरम् ॥३॥

श्री भैरवः

शृणु देवि प्रवक्ष्यामि हरिद्राख्यं गणेश्वरम् ।
हरिद्रापारके ग्रामे दर्शनाद्यत्फलं लभेत ॥४॥

---

१ कः मा घोरेशकामस्य — घोरेशकायस्य,
खः महिमान्नममुत्तम — महिमानमनुत्तमम्,
२ गः मा हरिद्रपारके — हरिद्रापारके
३ कः मा प्रोक्तो — प्रोक्तं

स्थलवारे पुरा शम्भुर्देवानां हितकाम्यया ।
विहारमकरोत्तत्र पार्वत्या सह सुन्दरि ।।५।।

विजयेशे मृता ये च ते मुक्ता नात्र संशय: ।
विजयापारके ये च मृता रुद्रपिशाचका: ।।६।।

त एव भगवंतं तु स्तुतिभिर्नुतिभिश्चिरम् ।
प्रसाद्य परया भक्त्या स तानमृतपानकै: ।।७।।

अमृतत्वं ददौ तेषाममरेशस्तत: स्मृत: ।
श्रुत्वाप्यमृतपानन्तु मृतानां विजयापरे ।।८।।

शक्राद्या: परमा क्रुद्धा वटं चक्रु: शिवादध: ।
स्थल एव महेशानि स्थलवाटस्तत: स्मृत: ।।९।।

श्रुत्वा तेषामावरणं देवानां भगवान् भव: ।
परिवृत्य महाकोपात्तदांतर्धानमीयिवान् ।।१०।।

अमृतभाण्डमुत्सृज्य तत्रैव वरवर्णिनि ।
ऐडा भूत्वा देवगणा: कान्दिशीका हतौजस: ।।११।।

अन्वेषणपराभूवन्सर्वत: सुरपूजिते ।
यदा न ज्ञायते तस्य गतिर्देवैर्महेशितु: ।।१२।।

समेत्य सर्वे तत्रैव ब्रह्माणं शरणं ययु: ।
दृष्ट्वा देवगणान्ब्रह्मा प्रहस्येदमुवाच ह ।।१३।।

वदध्वं भो देवगणा इहागमनकारणम् ।
अविलंबात्करोम्येव सर्वेषामपि दुर्लभम् ॥१४॥

श्रुत्वैतद्ब्रह्मणो वाक्यं देवा धृतिसमन्विता: ॥१५॥

देवा ऊचु:

अपराध: कृतोऽस्माभिरत्रागमनकरणात् ।
कुद्धैर्वाट: कृत: सर्वै: स्थल एव न संशय: ॥१६॥

अस्मदागस्तदा ज्ञात्वा भगवान्भक्तकामद: ।
अंतर्धानमगात्सद्य: पश्यतामेव मानद ॥१७॥

न जानीमोऽधुना तस्य गतिं शम्भोर्महात्मन: ।
तदर्थमेव भगवन्भवन्तं शरणं श्रिता: ॥१८॥

श्रुत्वैतद्वचनं तेषां देवानां वै प्रजापति: ।
उवाच देव देवस्याप्यनन्तस्यापि कारणम् ॥१९॥

वाटेन चैकदेशस्य पूर्णस्य सर्वव्यापिन: ।
गच्छध्वमधुना देवा: पार्श्वे दक्षिणसंज्ञके ॥२०॥

श्रीशैले ह्यमरावत्यास्तटे गुहास्थमीश्वरम् ।
रसलिङ्गस्वरूपेण स्थितं पश्यध्वमादरात् ॥२१॥

श्रीभैरव:

श्रुत्वा देवा: प्रभोर्वाक्यमुत्थाय ब्रह्मलोकत: ।
समेत्यात्र ययुस्तत्र पार्श्वं दक्षिणराष्ट्रके ॥२२॥

शंभुना गणपं तत्र कृत्वा त्रिविधविग्रहम् ।
सर्वविघ्ननिषिद्धारं त्रिकक्ष्यासु न्यवेशयत् ॥२३॥

देवास्तु प्रथमां कक्ष्यां प्राप्य तत्र गणेश्वरम् ।
निषेधकारणं तत्र नागणन्नवहेलया ॥२४॥

कोपादुदचलद्देवो गणेश: शस्त्रमाददत् ।
दृष्ट्वोद्यतं गणपतिं शस्त्रपाणिं सुरारिहा ॥२५॥

वज्रमुद्यम्य तं देवो भर्त्सयामास पार्वति ॥२६॥

वज्रोद्यमान्महादेवि महागणपति: प्रभु: ।
क्रुद्ध: परशुनोड्डारं पर्वतं समुदीर्णवान् ॥२७॥

तदा परशुज्वालाभिर्दग्ध इत्युच्यते बुधै: ।
दग्धोड्डारं परित्यज्य देवा: पारेऽत्र तस्थिरे ॥२८॥

तत: कोपाद्धरिद्रांगो बभूव गणप: प्रिये ।
शक्रो वज्रप्रहारेण पर्वतं समुदीर्णवान् ॥२९॥

तत्रोपलागिरेस्तस्मात्समुत्तस्थुर्यदृच्छया ।
सर्वं समभवत्पूर्णं वनं तदुपलैः प्रिये ॥३०॥

ततः प्रभृति देवेशि प्रथितो भुवनत्रये ।
ग्राम उपलवनाख्योऽत्र सर्वविघ्नापहारकः ॥३१॥

यतः कोपेन गणपो हरिद्रत्वमुपागतः ।
ततः प्रोक्तः पुराविद्भिर्हरिद्राख्यो गणेश्वरः ॥३२॥

हरिं वै द्रावयंस्तत्र महापरशुज्वालया ततः ।
स प्रथितो लोकेऽद्यापि हरिद्राख्यो गणेश्वरः ॥३३॥

उल्लोलविषये पुण्ये नाग उल्लोल नामनि ।
देवाः पूजापरा आसन्दैत्याश्च वरवर्णिनि ॥३४॥

ज्येष्ठाषाढभवैः पुष्पैः शंभोर्भगवतः प्रिये ॥३५॥

उल्लोलादुद्भूवा या वै नदी परमपावनी ।
ज्येष्ठाषाढेति नामास्याः कथितं तु पुरातनैः ॥३६॥

ज्येष्ठाषाढातटे पुण्ये स्थितं हरिद्रगणेश्वरम् ।
दृष्ट्वा तु मुच्यते जन्तुर्महापातककोटिभिः ॥३७॥

हरिद्रं गणपं दृष्ट्वा विघ्नसंघैर्न बाध्यते ॥३८॥

संकटं प्राप्य मनुजो महागणपतिं यजेत् ।
मुच्येच्च संकटाद्धोरादिति सत्येन ते शपे ॥३९॥

दर्शनात्पापशमनो जपात्संकटनाशनः ।
सर्वकामप्रदो होमान्महापातकनाशनः ॥४०॥

ज्येष्ठाषाढां नदीं स्नात्वा पूजयित्वा विनायकम् ।
होमं कृत्वा विधानेन चानन्त्यं फलमाप्नुयात् ॥४१॥

अजं बलिं मेषमपि बलिदाने प्रकल्पयेत् ।
न स्त्रियं न च हीनाङ्गं न षण्ढं बलिमर्पयेत् ॥४२॥

तत्रैव बलिदानेन मुच्येदापन्न आपदः ।
संकटाद्विघ्नसंघाच्च मुच्येदेव न संशयः ॥४३॥

स्तुत्वा हुत्वा च नुत्वा च जपत्वा ध्यात्वा विनायकम् ।
मुच्येच्च वारुणात्पाशादिति सत्यं वदामि ते ॥४४॥

पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम् ।
कन्यार्थी लभते कन्यां रूपशीलगुणान्विताम् ॥४५॥

दारार्थी लभते दारां मनोवृत्तानुसारिणीम् ।
विद्याकामस्तु श्रीविद्यां प्राप्नुयान्नात्र संशयः ॥४६॥

इदं पुंसवनं नाम इदमायुष्प्रवर्धनम् ।
इदं पुण्यं महाक्षेत्रं कलिकल्मषनाशनम् ॥४७॥

तस्मात्सर्वप्रयत्नेन सदेदं क्षेत्रमाश्रयेत् ॥४८॥
इति ते कथितं देवि महाफलप्रदं कलौ ।

हरिद्राख्यो गणपतिः किमन्यच्छ्रोतुमिच्छसि ॥४९॥

इति श्री श्रीसंहितायामुल्लूरविषयोपजाततीर्थ-
संग्रहे श्रीहरिद्रागणेशमाहात्म्यं नाम
पटलः द्वितीयः ॥२॥

---

४९ गः मा हरिद्राक्षो—हरिद्राख्यो

# भृङ्गीशसंहिता
# ज्येष्ठामाहात्म्यम्

## ॐ श्री गणेशाय नमः

## ॐ नमः श्रीज्येष्ठाभगवत्यै

ॐ श्रीभैरव्युवाच

स्मारं स्मारं महादेव राज्ञीप्रादुर्भवं महत् ।
आश्चर्यभूतं सर्वस्य जगतः परमेश्वर ॥१॥

कृतार्थास्मि कृतार्थास्मि चोद्धृतास्मि भवाम्बुधेः ॥२॥

अधुना श्रोतुमिच्छामि लक्ष्मीप्रादुर्भवं महत् ।
यच्छ्रुत्वा मुच्यते जन्तुर्ब्रह्महत्यादिपातकैः ॥३॥

श्रीभैरव उवाच

शृणु सुश्रोणि वक्ष्येऽहं श्रीप्रादुर्भवमुत्तमम् ।
यस्य श्रवणमात्रेण वाजपेयफलं लभेत ॥४॥

सुरासुरैः पुरा देवि मथितः क्षीरसागरः ।
मन्दारं मन्थनं कृत्वा कूर्मस्योपरि सुन्दरि ॥५॥

---

१ खः ब राज्ञः प्राज्ञप्रादुर्भवं महत् —राज्ञीप्रादुर्भवं महत्

रज्जुं तु वासुकिं कृत्वा पुच्छे ह्यासन्सुरा प्रिये ।
वासुकेस्तु मुखे तस्थुरसुराः सुरपूजिते ॥६॥

ममन्थुरुदधिं देवि ह्यमृतार्थे सुरासुराः ।
बलेन मथ्यमानाच्च समुद्राज्जज्ञिरे दश ॥७॥

चत्वारि चापि रत्नानि कौस्तुभादीनि सुन्दरि ।
त्रयोदशापि देवैश्च प्रतिगृहीतानि सुन्दरि ॥८॥

चतुर्दशं कालकूटं प्रतिगृहीतं न केनचित् ।
शक्रेन ह्यमृतं चाश्व ऐरावततनूनपि ॥९॥

गृहीतं विष्णुना चापि कौस्तुभं श्रीरपीश्वरि ।
भक्षितं कालकूटं च रुद्रेण सुमहात्मना ॥१०॥

विषं भुक्त्वा महादेवोऽप्यगाद्वै हिमपर्वतम् ।
रत्नानि तु गृहीतानि दृष्ट्वा ते दैत्यपुङ्गवाः ॥११॥

कालकूटस्य गन्धेन प्रमत्ताः बभ्रमुः प्रिये ।
दृष्ट्वा श्रियं कामयाना ग्रहीतुमुपचक्रमुः ॥१२॥

---

६ कः ब रज्ज्वम्—रज्जुं

९ खः ब प्रतिगृहीतं केनचित्—प्रतिगृहीतं न केनचित्
घः चाश्व—चाश्व

गृहीत्वा तु श्रियं दैत्या ययुराकाशवर्त्मना ,
तेऽपि प्राप्ताः महादेवि हिमाचलमनुत्तमम् ।।१३।।

ताननुदुद्रुवुर्देवाः विष्णुना सह सुन्दरि ।
दृष्ट्वानुयातांस्तान्देवान्दैत्या परमदर्पिताः ।।१४।।

लक्ष्मीसंगोपने चक्रुर्मतिर्सुरवरार्चिते ।
पर्वतस्य गुहायां तां श्रियं गुप्ताकृतिं व्यधुः ।।१५।।

गुप्ताकृतिर्यत्र दैत्यैः कृता जलधिनन्दिनी ।
स देशः प्रथितोऽद्यापि गोप्याकार इतीश्वरि ।।१६।।

गोप्याकारे हुतं दत्तमर्चनं विधिना कृतम् ।
जपं स्वाध्यायमथवा यात्यक्षय्यं महेश्वरि ।।१७।।

दग्धास्ते विषगन्धेन दैत्याः संगोप्य च श्रियम् ।
दृष्ट्वा दलसरः पुण्यमियुषुः स्नातुमुद्यताः ।।१८।।

सस्नुस्तत्र महादेवि पुले दलसरोवरे ।
शेवलान्पंकिलान्दैत्याश्चाकार्षुर्जलमध्यतः ।।१९।।

मूर्तिशिवस्य तत्राशु दैत्या जलघटैर्बलिम् ।
ददुर्भवत्या महेशानि पुपूजुर्भजने रताः ।।२०।।

ननृतुश्चैव ते दैत्याः पपुर्जलमनुत्तमम् ।
पुनर्ददुर्बलिं दैत्या घर्घरीभिः परं शिवम् ॥२१॥

यत्र तैः दैत्यसंघैस्तु घर्घरीभिर्बलिः कृतः ।
ततः प्रोक्तः पुराविद्भिर्घर्घरीबलिसंज्ञितः ॥२२॥

स्नात्वा च घर्घरीतीर्थे पुण्यं कृत्वा विधानतः ।
अक्षय्यं फलमाप्नोति वाजपेयादियज्ञजम् ॥२३॥

स्नाप्यमानान्दैत्यगणान्दृष्ट्वा विष्णुः सहामरः ।
शिवं परमया वाचा तुष्टाव जगदीश्वरम् ॥२४॥

*विष्णवादय ऊचुः

ॐ शिवं प्रभुं शवमनन्तवीर्यं
त्र्यम्बकं विश्वरूपं महेशम् ।
विश्वोद्भवं विश्वमाद्यं त्रिरूपं
त्रिलोकेशं देवदेवं प्रपद्ये ॥२५॥

---

२ घः मा चर्चरीभिः—घर्घरीभिः

२२ खः मा चर्चरीभिः—घर्घरीभिः, घः चर्चरी—घर्घरी

*मा विष्णुवादय—विष्णवादय

२५ खः मा त्रियंबकं—त्र्यम्बकम्

त्रिधामेशं त्र्यक्षरं वै त्रिनेत्रं
व्यावासं तं व्यवरं त्र्यक्षमीशम् ।
त्रिप्रावारं त्रिदिवेशं विरूपं
भूतावासं तं प्रपद्ये महेशम् ॥२६॥

मीढुष्टमं शिपिविष्टं कपर्दिनं
शान्तं शिवममरेशं महेशम् ।
भवरुद्रमादिदेवं सनातनं
भद्रावासं शरणं तं प्रपद्ये ॥२७॥

सर्वावासं सर्वपं पार्वतीशं
विश्वेश्वरं विश्वनाथं पराग्र्यम् ।
वृषभध्वजं वृषभाक्षं वृषाढ्यं
वृषाग्र्यं वै शरणमहं प्रपद्ये ॥२८॥

अनुत्तरं ज्योतिषां ज्योतिरेकं
ब्रह्मातीतं निर्गुणं निर्विकारम् ।
निरन्तरं निर्भरं निर्विषादं
शिवाद्वयं रूपमेतत्प्रपद्ये ॥२९॥

---

२८ खः मा विश्वेश्वरे—विश्वेश्वरं

गुहावासं परमं ज्योतिरन्तर्
योगाध्यक्षं योगिभिर्ध्यानगम्यम् ।
योगावासं योगदं योगरूपम्
आत्मारामं तं प्रपद्ये महेश्वरम् ॥३०॥

विश्वातीतं कारणातीतमीशं
लोकातीतं ज्ञानगम्यं महद्यत् ।
तद्वै तत्त्वं सर्वमीशस्वरूपं
बुद्ध्यातीतं विश्वरूपं नतोऽस्मि ॥३१॥

श्री भैरवः

इति स्तुत्वा महादेवि भैरवं विष्णुरव्ययः ।
प्रहस्य दर्शने तस्थौ विष्णोरमिततेजसः ॥३२॥

दृष्ट्वा तं देवदेवेशं भैरवं विष्णुरव्ययः ।
प्रणम्य दण्डवद्भूमौ भूयो भूयो वरानने ॥३३॥

दृष्ट्वा तु पतितं देवि पादयोः पतितं विभुम् ।
प्रोवाच विष्णुमीशानश्चोत्थाप्य श्लक्ष्णया गिरा ॥३४॥

---

३० खः मा ध्यागम्यं—ध्यानगम्यं

३१ गः मा सवमीश—सर्वमीश

श्री भगवान्

पुरैव ज्ञातो देवाद्य दैत्याया नय उत्तमः ।
दुष्टैर्दैत्यैर्महालक्ष्मीः स्थापिता गुप्तरूपिणी ॥३५॥

संतप्ता विषगन्धेन मोहिताश्चेशमायया ।
सस्नुश्च घर्घरीभिश्च बलिं ददुर्महामुदा ॥३६॥

मोहितान्स्वयमेवैतान्मोहयामि न संशयः ।
उत्पाद्य ज्येष्ठां भगिनीं श्रियो दैत्यविनाशिनीम् ॥३७॥

यया सम्मोहिता मत्या मोहमेष्यन्ति सत्वरम् ।
इत्युक्त्वान्तर्दधे देवस्तत्र विष्णोः प्रपश्यतः ॥३८॥

ज्येष्ठामुत्पादयाञ्चक्रे विरूपां दैत्यमोहिनीम् ।
पीताम्बरधरां गौरीं पद्महस्तां कपालिनीम् ॥३९॥

दंष्ट्राकरालवदनां पिंगाक्षीं घोररूपिणीम् ।
उपत्यकास्थितां देवीं महादैत्यगणार्दिनीम् ॥४०॥

दृष्ट्वा ज्येष्ठां महादैत्याः समुत्तस्थुरुदायुधाः ।
ममैवैषा ममैवैषा ममैवैषेति वादिनः ॥४१॥

घर्घरीः स्फोटयाञ्चक्रुर्मोहिता देवमायया ।
तत्रैव पूजितः शम्भुः घर्घरीभिः सुरार्चिते ॥४२॥

घर्घरीबलिरित्युक्तो देशः परमपावनः ।
घर्घरीबलौ कृतं स्नानं दानं होममथापि वा ॥४३॥

अर्चनं वा महेशानि ह्यनन्तं फलमाप्नुयात् ।
ज्येष्ठायाः सम्मुखं देवि दुद्रुवुर्दैत्यसत्तमाः ॥४४॥

केचिच्च जगृहुः पादौ बाहू केचिच्च सुन्दरि ।
केचित्कपोलौ देव्यास्तु ज्येष्ठाया दैत्यदानवाः ॥४५॥

आलिलिङ्गुश्च पुरतः केचित्तां पृष्ठतः शिवे ।
अधित्यकायां लक्ष्मीश्च दृष्ट्वा दैत्यगणैः प्रिये ॥४६॥

समीपे देवदेवस्य महाविष्णोः स्थिता सती ।
जहासातिक्रमं दृष्ट्वा दैत्यानां ज्येष्ठया सह ॥४७॥

ज्ञात्वा व्यतिक्रमं तत्र ज्येष्ठा देवी भृशार्दिता ।
तिरोहिता स्वयं देवी दैत्यानामपि पश्यताम् ॥४८॥

प्रादुर्बभूव तत्रैव भैरवोऽपि पुरः प्रभोः ।
ननाम भैरवं दृष्ट्वा महालक्ष्मीः शुचिस्मिता ॥४९॥

दैत्याः प्रदुद्रुवुर्देवि त्रासिता देवमायया ।
इतस्ततो दैत्यगणा वात्या इव परस्परम् ॥५०॥

घ्नन्तो रटन्तो विकृतं जगृहुः-दृषदं पराम् ।
वदन्तोऽन्योऽन्यमीशानि हस्तितुल्यां शिलामिमाम् ॥५१॥

उत्थापयाम: सततं पेषयाम: सुरान्परान् ।
इत्युक्त्वा दैत्यसंघास्ते शिलां जगृहुरोजसा ॥५२॥

दुद्रुवुश्च शिलाहस्ता ज्येष्ठान्वेषणतत्परा: ।
गृहीत्वा तु शिलां दैत्या: पर्वतोपरि न्यक्षिपन् ॥५३॥

यस्माद्गृहीता दैत्येशैर्हस्तितुल्या शिला परा ।
ततो हस्तिशिलान्याख्यो देशो वै प्रथितो भुवि ॥५४॥

दैत्यैरुरीकृता यत्र ज्येष्ठा दैत्यार्दिनी परा ।
स देश: प्रथितो देवि ज्येष्ठारो ग्राम उत्तम: ॥५५॥

ज्येष्ठारे च कृतं दानं स्नानमर्चनमीश्वरि ।
जपहोमावपीशानि ह्यनन्तं फलमाप्नुयात् ॥५६॥

कृतं हस्तिशिलायां तु सुकृतं जगदम्बिके ।
अनन्तं तद्भवेद्देवि फलमाभूतसंस्तुवम् ॥५७॥

दृष्ट्वा तु दैत्या देवेशं शिवं विष्णुं श्रिया सह ।
गृहीत्वा हस्तिदृषदं दुद्रुवुर्मुखत: प्रिये ॥५८॥

---

५४ ग: मा सिलेम्याख्यो —शिलान्याख्यो
५७ क: मा हस्तिलायां – हस्तिशिलायां

दृष्ट्वा गृहीत्वा वृषदं प्रयातान्दैत्यपुङ्गवान् ।
भैरवः परमं क्रोधमाजह्रे सुरपूजिते ॥५९॥

जज्वाल च महादेवि भैरवः परवीरहा ।
जटामुत्पाद्य हस्तेन ततो जातो महागणः ॥६०॥

ज्वलत्केशस्त्रिनेत्रस्तु भुजगाभरणो विभुः ।
मुण्डमालाम्बरधरः कर्त्रीं च डमरुं दधत् ॥६१॥

शूलवीणां महादेवि वाद्यांश्च महाभुजैः ।
भीषणश्च करालश्च ज्वलत्त्रिनयनो विभुः ॥६२॥

ननाम दण्डवद्देवि शिवं विष्णुं श्रियं तथा ॥६३॥

दृष्ट्वा वीरं शिवो देवि प्रसन्नश्चावदद्गणम् ।
वीर वीर महावीर दैत्यान्परमदारुणान् ॥६४॥

गृहीत्वा हस्तिवृषदमायातान्दैत्यपुङ्गवान् ।
भञ्ज भञ्ज निनादेन मर्द मर्द च तत्क्षणात् ॥६५॥

दैत्याञ्जित्वा मत्समीप इहैवाप्सु च भैरव ।
लक्ष्मीं दास्यामि वीरेश विष्णवे प्रभविष्णवे ॥६६॥

ज्येष्ठां स्वयं ग्रहीष्यामि श्रियो वै भगिनीं पराम् ।
ज्येष्ठेशनाम्ना यास्यामि प्रख्यातिं भुवनत्रये ॥६७॥

दृषद्भिः शैलशिखरैः पर्वतैरपि सुन्दरि ।
मुष्टिभिः पाण्णिघातैश्च युयुधुर्वीरमञ्जसा ॥७५॥

दन्तैः केचिन्नखैः केचित्केचिच्च लगुडैः शिवे ।
लोष्ठैः क्षेपणकैः केचित्केचित्परशुभिस्तथा ॥७६॥

युयुधुर्वीरवेतालं पट्टिशैः करवेल्लकैः ।
दैत्यैरुपहतो वीरो मुमोह सुरपूजिते ॥७७॥

दृष्ट्वा मुह्यन्तमीशानो वेतालं विष्णुना सह ।
विनद्य सहसा तालैर्वीरे चैतन्यमाहवत् ॥७८॥

चेतनां प्राप्य वीरेशः करतालैः शिवस्य ह ।
विष्णोश्च सर्वदेवानां दैत्यान्प्रति समुद्यतः ॥७९॥

ग्रसन्नायुधसंघांस्तान्दैत्यानां परमाहवे ।
उवाच च पुनः शम्भुर्वीरवेतालमादरात् ॥८०॥

वेतनं प्राप्यते यस्मात्करतालैश्च भैरव ।
ख्यातिमेष्यसि तस्मात्त्वं वीरवेतालसंज्ञितः ॥८१॥

वेतसीतरवो यस्मात्तालाच्चापि विशेषतः ।
स्थानं दत्तं मया वीर तस्माद्वेतालसंज्ञितः ॥८२॥

---

७७ खः मा पट्टिसैः—पट्टिशैः

जयस्व दैत्यसंघांस्त्वं पुनरेहि ममान्तिके ॥८३॥

श्री भैरव उवाच

इत्युक्त्वा वीरवेतालं तूष्णीमास महेश्वरि ।
आदृतोऽपीह वीरेशो युयुधे दैत्यदानवान् ॥८४॥

चकर्त कांश्चित्कर्त्र्या वै मोहितान्निनादेन च ।
पाशेन बद्धान्कांश्चिद्वै खड्गेन निरकृन्तत ॥८५॥

कांश्चिदारोपितान् शूले वीरेशः संचकर्त ह ।
क्षणेन क्षपिता दैत्या वेतालेन महात्मना ॥८६॥

शेषाः पलायनपरा राक्षसा जगदम्बिके ।
पलायनपरान्दृष्ट्वा राक्षसान्मदगर्वितान् ॥८७॥

चकर्त दैत्यान्वीरेशः खड्गैः परशुपट्टिशैः ।
चक्रैश्च भिण्दिपालैश्च तोमरैर्मुसलैस्तथा ॥८८॥

खादन्मांसं पिबन्रक्तं दैत्यानां परवीरहा ।
ननाद सुमहन्नादांस्त्रासयन्भुवनत्रयम् ॥८९॥

---

८४ घ: मा दैत्यदैनवान्—दैत्यदानवान्

८५ ख: मा निनदेत—निनादेन [निनदेनापि साधु:]

८७ क: मा पलायनपला—पलायनपरा

८८ ख: मा पट्टिसैः—पट्टिशैः [उभावपि]

दृष्ट्वा वीरेशमुद्यन्तं ज्वलन्तं रणमूर्धनि ।
निनदन्तं महानादान्कालांतकयमोपमम् ॥६०॥

त्रस्ताहता विशिष्टास्तं वीरं शरणमन्वियुः ।
दूरे स्थितांस्तदा दैत्याञ्ज्ञात्वा तान्शरणार्थिनः ॥६१॥

कृपया वचनं वीरमुवाच परमेश्वरः ॥६२॥

श्री भगवानुवाच

वीर वीर महावीर मावधीः शरणार्थिनः ।
जिताश्च प्रणतायैवैते हताश्च न संशयः ॥६३॥

इति श्रुत्वापि वीरेशो जघ्ने दैत्यगणाञ्छिवे ।
ते लग्नाः पादमूलेषु वेतालस्य महात्मनः ॥६४॥

तथापि पार्ष्णिभिश्चैव प्रजह्ने वीरसत्तमः ।
निघ्नंतं वीरमीशानो दृष्ट्वापि शरणागतान् ॥६५॥

उवाच खरवद्यस्मान्न शृणोषि वचो मम ।
तस्मात्त्वं खरकर्णो वै भविष्यसि न संशयः ॥६६॥

प्रहारं कुरुषे यस्मात्पार्ष्णिभिः पशुवद्गण ।
तस्मान्महिषपादस्त्वं भविष्यसि न संशयः ॥६७॥

ग्रीवां चालयसे यस्त्वं वाक्यश्रवणसूचकाम् ।
ग्रीवीवत्तस्मादद्यैव उष्ट्रग्रीवः स्फुटं भव ॥६८॥

मत्सम्मुखं त्वं कुरुषे मेषवन्मुखचालनम् ।
यस्मात्ते हुडवक्त्रं भविष्यसि मुखं स्फुटम् ॥९९॥

उलूकवद्दिवसेऽपि दृष्टिं न क्षिपसे यतः ।
ममाभिमुखमंधस्तदुलूकाक्षो भविष्यसि ॥१००॥

क्रुद्धस्य शम्भोर्वचनं श्रुत्वा वेताल आदरात् ।
हसन्दैत्यगणैः सार्धमाययौ शिवसन्निधौ ॥१०१॥

अव्यात्कृष्णच्छविः प्रांशुरुष्ट्रग्रीवो हुडाननः ।
महिषाङ्घ्रिरुलूकाक्षो वेतालः खरकर्णकः ॥१०२॥

नमस्कृत्य शिवं विष्णुं श्रियं देवांश्च सुन्दरि ।
प्रीत्या परमयाविष्टः पतितो दण्डवत्क्षितौ ॥१०३॥

उत्थाप्य तं महादेवो वेतालं निजगाद ह ।
शृणु वीर प्रवक्ष्यामि गणेशादवरो ह्यसि ॥१०४॥

मम पुत्रत्वमापन्नो गणानामीश्वरो भवान् ।
प्रहरन्विघ्नसंघांस्त्वां सिद्धिं दास्यन्सतामपि ॥१०५॥

धनं धान्यं तथा विद्यां पशूंश्चापि वरान्ददत् ।
शापानुग्रहकृद्देवो मत्प्रसादाद्भविष्यसि ॥१०६॥

एते हतावशिष्टा ये दैत्या घोरमदान्विताः ।
ते चापि तव सेवार्थमत्र तिष्ठन्तु सर्वदा ॥१०७॥

एतेषां पूजनाच्चापि विघ्ना नश्यन्त्यनेकधा ।
ज्येष्ठायाश्च श्रियो देव्या दैत्यानामपि भैरव ॥१०८॥

पूजनाद्विधिवद्वीर निर्विघ्नाः सिद्धिमाप्नुयुः ।
भोज्ये प्रदास्यन्ति ज्येष्ठादैत्येभ्य एव च ॥१०९॥

तुभ्यं चापि महावीर सिद्धिं प्राप्स्यन्त्यनुत्तमाम् ।
विशेषतो मत्स्यपूरैर्भर्जितैस्तैल उत्तमे ॥११०॥

नागरावक्तैः सलवणैरपूपैरपि सुन्दरि ।
प्रापणं ये प्रदास्यन्ति तुभ्यं दैत्यभ्य एव च ॥१११॥

ज्येष्ठायै चापि ते यान्ति सिद्धिं प्रत्यूहवर्जिताः ।
इत्युक्त्वा वरदस्तूष्णीमासीद्वै सुन्दरि ॥११२॥

वीरं दृष्ट्वा महालक्ष्मीरुवाच प्रहसन्गिरा ।
वीर वीर महावीर वेताल खरकर्णक ॥११३॥

हरिद्राक्तं मे तैलाक्तं तुभ्यं दैत्यभ्य एव च ।
ज्येष्ठायै चापि दास्यन्ति भोजनं वैष्णवप्रियम् ॥११४॥

इत्युक्त्वा श्रीरपीशानि विररामाम्बिका तदा ।
शम्भुना विष्णवे दत्ता महालक्ष्मीर्महीयसी ॥११५॥

---

१०९ गः मा भोजये – भोज्ये

११४ गः मा दास्यतं – दास्यन्ति

स्वयं गृहीता ज्येष्ठा वै स्थापितासन्नभूमिषु ।
पुण्ये ज्येष्ठारके ग्रामे ज्येष्ठेशः प्रथितस्तदा ॥११६॥

इति ते सर्व आख्यातो लक्ष्मीप्रादुर्भवो महान् ।
यस्य श्रवणमात्रेण वाजपेयफलं लभेत ॥११७॥

इत्येष पटलो गुह्यो महापातकहा कलौ ।
श्रुत्वा पठित्वा प्राप्नोति निर्विघ्नां सिद्धिमुत्तमाम् ॥११८॥

इति श्री श्रीसंहितायां फालकविषयोपजाततीर्थसंग्रहे
ज्येष्ठामहालक्ष्मीप्रादुर्भावो नाम
प्रथमः पटलः ॥१॥

---

११६ गः मा ज्येष्ठोरके – ज्येष्ठारके

# अथ द्वितीयः पटलः

श्री भैरवी

श्रुत्वा प्रादुर्भवं लक्ष्म्यास्त्वन्मुखात्परमाद्भुतम् ।
कृतार्थास्मि कृतार्थास्मि नास्ति मेऽत्र विचारणा ॥१॥

इदानीं श्रोतुमिच्छामि श्रीपूजाफलमुत्तमम् ।
कस्यां तिथौ पूजनीया विधिना केन वै प्रभो ॥२॥

ऋतौ मासेऽपि देवेश ज्येष्ठाया भैरवस्य च ।
येन विज्ञातमात्रेण नरो मुह्येन्न कुत्रचित् ॥३॥

पूजनेन च किं पुण्यं प्रापणेन च किं फलम् ।
वद विस्तरतो देव लोकानुग्रहकाम्यया ॥४॥

श्री भैरवः

श्रृणु देवि प्रवक्ष्यामि श्रीदिनं परमाद्भुतम् ।
यस्य श्रवणमात्रेण लक्ष्मीस्तत्र स्थिरा भवेत् ॥५॥

वैशाखकृष्णपक्षस्य पञ्चम्यां जगदीश्वरः ।
विष्णवे दत्तवांल्लक्ष्मीमर्चयेत्तद्दिने नरः ॥६॥

---

३ घः मा मुह्येत—मुह्येन्न

प्रातरुत्थाय देवेशि स्नानं कृत्वा विधानतः ।
नित्यार्चां नित्यहोमञ्च नित्यजप्यञ्च यत्नतः ॥७॥

विधाय विधिना देवि ततो लक्ष्मीं समर्चयेत् ।
मूर्ति कृत्वा श्रियो देव्या ज्येष्ठाया अपि मृण्मयीम् ॥८॥

प्राणं दत्वा पूजनीया पुष्पधूपार्घचन्दनैः ।
दीपैश्च वन्दनैश्चैव दिव्याभरणभूषणैः ॥९॥

फलैर्मूलैर्दक्षिणाभिर्विप्रान्सम्पूज्य यत्नतः ।
ज्येष्ठायाः प्रापणं दद्यान्मत्स्यापूपान्महेश्वरि ॥१०॥

श्रियो देव्याः पीतमन्नं स्नेहाक्तं यत्नतः प्रिये ।
क्षेत्रेशान्पूजयेत्तत्र योगिनीभ्यो बलिं क्षिपेत् ॥११॥

पुत्रभृत्यजनैः सार्धं पश्चाद्भुञ्जीत वाग्यतः ॥१२॥

एवं यः कुरुते देवि लक्ष्म्युत्सवमनुत्तमम् ।
विघ्नास्तस्य च नश्यन्ति सर्वसिद्धिर्भविष्यति ॥१३॥

---

१२ खः मा वान्यतः—वाग्यतः

१३ गः मा विघ्नास्तस्य न पश्यन्ति—विघ्नास्तस्य च नश्यन्ति

यो न कुर्यान्महादेवि महालक्ष्म्युत्सवं नरः ।
ज्येष्ठा देवी तस्य गेहेऽस्थिरा भवति सर्वदा ॥१४॥

तस्माद्वैशाखपञ्चम्यां कुर्यादुत्सवमादरात् ।
कुर्वन्सिद्धिमवाप्नोति धनधान्यादिसंपदः ॥१५॥

विपन्नोऽपि महादेवि श्रिय उत्सवमाचरेत् ।
धनं पुत्रं पशूंश्चापि ह्युदारान्प्राप्नुयान्नरः ॥१६॥

आपन्नोऽपि जयेल्लक्ष्मीं पञ्चम्यां प्रापन्नैः शुभैः ।
न दुर्गतिमवाप्नोति न द्रारिद्र्यं न चापदम् ॥१७॥

पुत्रार्थी प्राप्नुयात्पुत्रं धनार्थी तु धनं लभेत ।
आपन्न आपदो मुच्येद्विपन्नो दुखितः प्रिये ॥१८॥

अन्धो दृष्टिमवाप्नोति मूको वाग्मी भविष्यति ।
बधिरः श्रुतिमाप्नोति कन्या विन्दति सत्पतिम् ॥१९॥

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
पापाद्विमुच्यते देवि पञ्चम्यामर्चयञ्शिवान् ॥२०॥

अर्चयेच्छ्रियमीशानि प्रीतान्नापूपमत्स्यकैः ।
ज्येष्ठादेवीमपि तथा लक्ष्मीस्तस्य स्थिरा गृहे ॥२१॥

---

१४ खः मा तरः - नरः

न विघ्ना नापदस्तत्र व्याधयो नाधयोऽपि न ।
भूताः प्रेताः पिशाचाश्च डाकिन्यश्च महाबलाः ॥२२॥

बाधन्ते न ग्रहास्तं वै लक्ष्मीपूजां करोति यः ।
वर्षे वर्षे महादेवि श्रिय उत्सवमादरात् ॥२३॥

ब्रह्मराक्षसवेताला: दूरस्था ज्येष्ठया सह ।
विघ्नास्तस्य प्रणश्यन्ति सत्यमेव न संशयः ॥२४॥

न करोति च यो मोहाच्छ्रिय उत्सवमीश्वरि ।
तस्य तिष्ठति गेहे वै ज्येष्ठाभूतगणैः सह ॥२५॥

विघ्नैः प्रेतैः पिशाचैश्च सत्यमेव न संशयः ।
तस्मात्सर्वप्रयत्नेन पञ्चम्युत्सवमत्यजन् ॥२६॥

अर्चयेच्च श्रियं देवीं पुष्पधूपार्घचन्दनैः ।
वन्दनैर्नन्दनैश्चापि गीतैर्वाद्यैश्च नर्तनैः ॥२७॥

हास्यैर्लास्यैः सद्विलासैः प्राप्नोति विविधां श्रियम् ॥२८॥

---

२१ खः मा नादयोऽपि—नाधयोऽपि

२३ गः मा वर्षं वर्षं—वर्षे वर्षे

२४ खः मा मोहान् श्रिय—मोहाच्छ्रिय

२७ गः मा सविलासैः—सद्विलासैः

इति ते कथितो देवि श्रियः पूज्योत्सवो मया ।
श्रुत्वा पठित्वा मुच्येत ज्येष्ठा भूतादिभीतितः ॥२९॥

पञ्चम्यां शम्भुना दत्ता दैत्यान्संमुह्य श्रीः स्वयम् ।
विष्णवे विधिना देवि तस्माच्छ्री पञ्चमी स्मृता ॥३०॥

एतत्ते कथितं देवि श्रियो वन्दनमर्चनम् ।
ज्येष्ठाभूतापशमनं किं भूयः श्रोतुमिच्छसि ॥३१॥

*इति श्री श्रीसंहितायां कालकविषयोपजाततीर्थसंग्रहे
श्रीपूजाफलं नाम द्वितीयः पटलः ॥२॥

---

३० क. मा पञ्चमी यां— पञ्चम्यां

*मातृकायामयं पाठो नास्ति

# भृङ्गीशसंहिता

## [ अथ वेतालस्थानमहिमा ]

श्री भैरवी

वद सत्यं महादेव वीरोपासनमुत्तमम् ।
यच्छ्रुत्वा सिद्धिमाप्नोति स्थानं प्राप्नोति शाश्वतम् ॥१॥

श्री भैरवः

शृणु वक्ष्ये महादेवि वेतालबलिमुत्तमम् ।
अर्चनञ्चापि देवेशि यज्ज्ञात्वा मुच्यते भयात् ॥२॥

वैशाखकृष्णपक्षस्य षष्ठ्यां वेतालमर्चयेत् ।
बलिं दत्वात्र देवेशि सर्वसिद्धिमवाप्नुयात् ॥३॥

नक्ताशी स्याच्चतुर्थ्याञ्च पञ्चम्यां व्रतमेव च ।
षष्ठ्यां होममर्चनञ्च बलिं दत्वा च पारणम् ॥४॥

एवं कृत्वा व्रतं देवि वेतालस्य महात्मनः ।
सिद्धिं प्राप्नोति विपुलां कामानिष्ठांल्लभेच्च सः ॥५॥

पुत्रार्थी लभते पुत्रं कामार्थी काममाप्नुयात् ।
वित्तकामो लभेद्वित्तं स्त्रीकामः स्त्रियमुत्तमाम् ॥६॥

---

३ खः मा षण्टां—षष्ठ्यां

राज्यकामो लभेद्राज्यं कन्या विन्दति सत्पतिम् ।
गर्भिणी सूयते पुत्रं वरञ्च गुणवत्तरम् ॥७॥

बंध्यापि जनयेत्पुत्रं वीरेशस्य प्रसादतः ।
स्रवन्ती पातसंयुक्ता सुखमेव प्रसूयते ॥८॥

काकवंध्या च या नारी मृतवत्सापि या भवेत् ।
वीरेशपूजनाद्देवि जीववत्सा न संशयः ॥९॥

मन्त्रानुनयकृद्देवि जपन्सिद्धिमवाप्नुयात् ॥१०॥

विषमस्थो महादेवि वीरं शरणमन्वियात् ।
विषमान्मुच्यते सद्यश्चेति सत्येन ते शपे ॥११॥

सङ्कटस्थोऽपि वा देवि निगडैर्बद्ध एव वा ।
स्मरणान्मुच्यते सद्यो वीरेशस्य न संशयः ॥१२॥

राज्ञा क्रुद्धेन वाज्ञप्तो वधार्थं जगदम्बिके ॥१३॥

वेतालमर्चयन्रात्रौ वेदतन्त्रानुसारतः ।
बलिं दत्वा तु विधिवन्मुच्यते न विचारणा ॥१४॥

कलावस्मिन्महाघोरे सर्वे प्रत्यूहिनो नराः ।
प्रत्यूहने कुतः सिद्धिः सिद्धिहीने कुतः सुखम् ॥१५॥

---

७ गः मा गुर्विणी – गर्भिणी

कलौ विघ्नविनाशार्थं भैरवेण महात्मना ।
प्रकाशिता वीरमूर्तिर्लोकानुग्रहकाम्यया ॥१६॥

अन्य देवस्य यो भक्तः कालेन फलमाप्नुयात् ।
वेतालभक्तो देवेशि सद्यः फलमवाप्नुयात् ॥१७॥

अन्य भक्तोऽपि देवेशि वेतालमर्चनमत्यजेत् ।
त्यक्ते प्राप्नोति विपुलान्विघ्नसंघान्पदे पदे ॥१८॥

वीरमर्चेद्यथाशक्त्या साधको विधिवत्प्रिये ।
पुष्पैरर्घैस्तथा धूपैर्दीपैः कर्पूरवर्त्तिकैः ॥१९॥

अक्षतैः सर्वगन्धाढ्यैः कुङ्कुमागुरुचन्दनैः ।
स्तुतिभिर्नुतिभिर्वापि ह्युपवासैरपीश्वरि ॥२०॥

घृताक्षोटयवैश्चापि तिलबिल्वैः सशर्करैः ।
समिद्भिः फलमूलैर्वा मन्त्रैर्वैदिकतान्त्रिकैः ॥२१॥

जुहुयाद्वीरषष्ठ्यां यः स सिद्धिं प्राप्नुयात् क्षणात् ॥२२॥

देशस्योपद्रवे घोरे दुर्भिक्षे शत्रुविग्रहे ।
धर्मस्योपद्रवे चापि राज्ञश्चोपद्रवे तथा ॥२३॥

---

१८ खः मा वेतालमर्चनं त्यजेत्—वेतालमर्चनमत्यजेत्
गः मा त्यजेत्प्राप्नोति—त्यक्ते प्राप्नोति

पूजयित्वा महेशानि वीरवेतालमादरात् ।
तत्क्षणाच्च नरो मुच्येत्सङ्कटैर्विघ्नराशिभिः ॥२४॥

दुस्स्वप्ने च दुरिष्टे च दुर्निमित्ते महेश्वरि ।
दिव्यान्तरिक्षपातालसम्भवोपद्रवे तथा ॥२५॥

अर्चन्महावीरयतिं सद्यो मुच्येत भीतितः ॥२६॥

महारोगपरिग्रस्तो दीर्घरोगगतोऽपि वा ।
महापातकवांश्चापि वीरमर्चन्विमुच्यते ॥२७॥

शक्तौ वापि महादेवि जपेद्वेतालसन्निधौ ।
पूजयेत्स्वेष्टदेवञ्च रुद्यः सिद्धिमवाप्नुयात् ॥२८॥

न तथा स्वार्चनात्प्रीतिं प्राप्नोति परभैरवः ।
वीरार्चनाद्यथा प्रीतो भवेत्सुरवरार्चिते ॥२९॥

अजाविकैर्बलिगणैरर्चयेद्वीरमुत्तमम् ।
बलिं दत्वा तु विधिवत्प्राप्यते सिद्धिमुत्तमाम् ॥३०॥

अर्घैः कुसुमसिन्दूरैरर्चयेद्बलिमुत्तमाम् ।
प्रापणं दापयेद्देवि बलिमजर्मावि तथा ॥३१॥

---

३० घः मा सिद्धिमुत्तमम्—सिद्धिमुत्तमाम्
मातृकायां 'बलिं दत्वा तु विधि' पाठोऽयमधिकः ।

न स्त्रीषण्डो बलिर्देयो दत्वा विघ्नमवाप्नुयात् ।
सिद्धिमाप्नोति मनुजः सद्यो धूननतो बलेः ॥३२॥

मन्त्रयेत्पशुं मन्त्रेण वेदतन्त्रोद्भवेन च ।
साधकोऽर्चनमादद्यात्सुप्रसन्नेन चेतसा ॥३३॥

बलिं संकल्प्य मनसा यो वर्षान्तं न दास्यति ।
तस्य विघ्नकराः देवाः पशुपुत्रा हरन्ति ते ॥३४॥

तस्मात्संकल्पितं दद्याद्देवेभ्यो बलिमुत्तमम् ॥३५॥

शीघ्रमेव न दद्याद्वै विघ्नैरन्तरितो यदि ।
बलिदानादवाप्नोति सिद्धिमिष्टाञ्च सत्वरम् ॥३६॥

तस्मात्सर्वप्रयत्नेन तु विलम्बं न कारयेत् ।
संकल्पितविलम्बाद्धि प्राप्यते विघ्नसञ्चयः ॥३७॥

जयं सिद्धिञ्च वृद्धिञ्च शीघ्रं पूर्वमुखो बलिः ।
धूनेद्यदि स्व देहं तु तदा सर्वं विनिर्दिशेत् ॥३८॥

ऐशान्यां मन्त्रसिद्धिः स्यादाग्नेय्यां विजयस्तथा ।
धूननाच्च बलेर्याम्यां मृत्युमन्तकमादिशेत् ॥३९॥

---

३६ कः मा न दाद्वै — न दाद्वै

३७ खः मा न विलम्बं न कारयेत् —तु विलम्बं न कारयेत्

नैऋत्यां तु समं ज्ञेयं वायव्यां विघ्ननाशनम् ।
वारुण्यां धनवृद्धिः स्यादुत्तरस्यां ध्रुवो जयः ॥४०॥

एवं लक्षणमालक्ष्य पशुच्छेदं समारभेत ।
रक्तञ्च क्षेत्रपालेभ्यः सव्यहस्तयुतं शिरः ॥४१॥

विप्राय कल्पयेद्देवि यकृत्खण्डं तु चक्रके ।
हृत्पद्मं योगिनीभ्यश्च दत्वा प्रीतिमवाप्नुयात् ॥४२॥

बलि दत्वा तु देवेशि यो विधि न समाचरेत् ।
पशुहत्यामवाप्नोति चेति सत्येन ते शपे ॥४३॥

शिरः संकल्प्य विधिवदाचार्याय समर्पयेत् ॥४४॥

अदत्वा विघ्नसंघाश्च प्राप्नुयाच्च पदे पदे ।
पशुहत्यामपीशानि सिद्धिहानिं च सुन्दरि ॥४५॥

स्वार्थे पशुवधो हिंसा यज्ञे पशुवधोऽवधः ।
इत्थं पशुवधः प्रोक्तो वेदतन्त्रानुशासने ॥४६॥

ह्यस्मादेव समुच्छिद्य यस्य तद्योगिनी हरेत् ।
तस्य सर्वत्र सिद्धिः स्याज्जयश्चैव न संशयः ॥४७॥

---

४० कः मा नैनृत्यां—नैऋत्यां

४१ खः मा समारमेत्—समारभेत

४६ गः मा पशुवदः—पशुवधः

४७ कः मा ह्रस्मादेव—ह्यस्मादेव

वायसा अपि देवेशि शीघ्रं यद्बलिमाहरन् ।
तस्यापि साधकस्याशु जय एव न संशयः ॥४८॥

असंतर्प्य तु क्षेत्रेशान्योगिनीभ्यो य आददेत् ।
बलिं स हानिमाप्नोति साधकः शुभलक्षणे ॥४९॥

तस्मात्सर्वप्रयत्नेन षष्ठ्यां वेतालमर्चयेत् ।
प्राप्नोति वृद्धि सिद्धिञ्च गतिमन्तेऽप्यनुत्तमाम् ॥५०॥

न वेतालसमं स्थानं दिवि भूम्यन्तरिक्षगम् ।
सर्वसिद्धिकरं देवि न भूतं न भविष्यति ॥५१॥

तदा प्रभृति देवेशि भैरवेण महात्मना ।
स्वात्मनः पुरतो दत्तं स्थानं पुण्ये सरोवरे ॥५२॥

वेतालो देवदेवेशि क्रोशार्धं व्याप्य संस्थितः ।
योग्यालङ्करणाद्देवि त्वाज्येष्ठारं समन्ततः ॥५३॥

वेतालस्य महापुण्यं स्थानं प्रोक्तं पुरातनैः ॥५४॥

यत्किञ्चित्क्रियते कर्म शुभं वाप्यशुभं तथा ।
अस्मिन्घोरे महास्थाने ह्यक्षयं लभते फलम् ॥५५॥

पुरश्चरणमात्रेव यः कुर्यात्साधकोत्तमः ।
शीघ्रं स सिद्धिमाप्नोति देवस्तं वश्यमेष्यति ॥५६॥

एतत्पुण्यतमं स्थानमेतद्धघोरतरं तथा ।
एतत्सिद्धिकरं स्थानमेतद्वृद्धिकरं प्रिये ॥५७॥

एतद्धानिकरञ्चापि प्रमादादपि तिष्ठति ।
कलौ सद्यस्तु फलदं भुक्तिमुक्तिकरं परम् ॥५८॥

भूतप्रेतपिशाचादिडाकिनीयक्षनाशनम् ।
शुचीनां प्रीति जननमशुचीनां तु दुखदम् ॥५९॥

इदं वर्चस्करं स्थानमिदं श्रेयो विवर्धनम् ।
इदमायुष्करञ्चापि सर्वारिष्टनिवारणम् ॥६०॥

सर्वदुष्टप्रशमनं सर्वापद्विनिवर्तनम् ।
सर्वारिष्टेषु वेतालस्थानं देवि समन्ततः ॥६१॥

पूजयेयुर्महावीरं मुच्यन्ते विघ्नराशिभिः ।
बहुनात्र किमुक्तेन नरः पातकवान्कलौ ॥६२॥

पापैर्विघ्नानवाप्नोति तस्माद्वेतालमाश्रयेत् ।
पञ्चम्यां मधुकृष्णस्य श्रियोऽर्चनमिहोच्यते ॥६३॥

षष्ठ्यां वीरेशपूजा च कथिता ते वरानने ।
ज्येष्ठकृष्णस्य पञ्चाम्यां ज्येष्ठेशार्चा मयोदिता ॥६४॥

तत्रापि प्रापणं देयं मत्स्यापूपैर्महेश्वरि ॥६५॥

इति वेतालक्षेत्रस्य महिमा गहना परा ।
श्रुतो महापापहरस्तव स्नेहात्प्रकाशितः ॥६६॥

इत्येष पटलो गुह्यो महापापापहारकः ।
श्रुतः संपठितो वापि सर्वविघ्नापनोदनः ॥६७॥

*इति श्री श्रीसंहितायां फालकविषयोपजाततीर्थसंग्रहे
श्री वेतालस्थानमहिमा नाम पटलः ॥३॥

---

*मातृकायां पटलक्रमो नास्ति

## भृङ्गीशसंहिता—गुप्तगङ्गामाहात्म्यम्

### [ अथ ईशविहारणीमाहात्म्यम् ]

श्री भैरवी

पुनर्वद महादेव फलके तीर्थसंग्रहम् ।
श्रावं श्रावमपीशान न तृप्यामि महेश्वर ॥१॥

ग्राम ईशविहाराख्ये सन्ति तीर्थान्यनेकशः ।
विस्तरमुद्भवञ्चैव फलं मे हितकाम्यया ॥२॥

श्री भैरवः

शृणु वक्ष्ये महादेवि ग्राम ईशविहारिणि ।
उत्पत्तिञ्च फलञ्चैव तीर्थानाममरेश्वरि ॥३॥

पुरा विहरमाणस्य भैरवस्य कदाचन ।
उन्मत्तरसमत्तस्य रक्षः प्रादुरभूत्किल ॥४॥

स चकार वशे सर्वं त्रैलोक्यं सचराचरम् ।
विप्रचित्तिकुलोद्भूतः प्रमत्तो नाम दानवः ॥५॥

दिक्पालानवाहयामास विमानमिति विश्रुते ।
एकत्रोपरिभागेन भैरवस्य महात्मनः ॥६॥

दिक्पालानवाह्य सोऽथाप्यायातो दानवाधमः ।
श्रमादितादेव वराभयार्दिताः पिपासिताः ॥७॥

श्वसनपराबुभुक्षिताः विलोक्य तं परमभवम् ।
विचेतनाः स गद्गदं परगिरा स्तुवन्मुदा ॥८॥

देवा ऊचुः

ॐ ननाम रौद्रां तनुमीश्वरस्य
घोरां यदन्याञ्च तथाप्यघोराम् ।
घोराघोरां शतमाशान्तरूपां
शिवेश्वराख्याञ्च सदाशिवाञ्च ॥९॥

भुजाकाशां रौद्रमन्युमिष्वस्त्रां
शिवाख्यां तां परमां विश्वरूपाम् ।
हिंसाशून्यां परमां परेश
यया जीवज्जगदायाति चित्तम् ॥१०॥

तां सर्वरूपां परमामघोरां
घोराघोरां तनुमाख्या हि देव ।
यां ते तनुं शरणमुपेत्य सर्वे
विमोक्षामदारुणान्मृत्युपाशात् ॥११॥

---

७ कः मा दिक्पालान्वाह्या — दिक्पालान्वाह्य

८ घः मा परगिरर्यैदण्यन्मुदा — परगिरा स्तुवन्मुदा

निर्विण्णाये दीक्षितां भैरवाख्यां
तनुं श्रिता: शरणं ते महेश ।
उग्रां भीमां शतमां दारुणां तां
ते मोचिता भवता मृत्युपाशात् ॥१२॥

ये दीक्षितां समयां संश्रिताश्च
गुहाश्रया धर्मपरा महात्मन् ।
ते मोचिता भवता पाशसंघात्
ये धावमाना अनुयान्ति धर्मम् ॥१३॥

ॐ नमस्तस्मै भगवते गिरिशाय कपर्दिने ।
यस्येयं स्थूलरूपाख्या तनुर्वै सचराचरा ॥१४॥

ॐ नमस्तस्मै भगवते भीमाय घोररूपिणे ।
यं विदित्वा न जानन्ति प्राज्ञा: सर्वार्थदर्शिन: ॥१५॥

ॐ नमस्तस्मै भगवते शितिकण्ठाय शूलिने ।
यस्य सर्वतनु: शान्ता: शमिनो यां प्रयान्ति वै ॥१६॥

ॐ नमस्तस्मै भगवते घोररूपाय शम्भवे ।
यद्दर्शनाद्घोरदैत्या: प्रचलन्ति दिशो दश ॥१७॥

---

१४ ख: मा गिरेशाय— गिरिशाय [गिरीशायापि]

ॐ नमस्तस्मै भगवते अघोराय महात्मने ।
यत्तनुं यान्ति निर्विण्णाः सामया अपि यान्ति यत् ॥१८॥

ॐ नमस्तस्मै भगवते घोराघोराय शूलिने ।
यत्तनुमनुधावन्ति सर्वतो भयदीक्षिताः ॥१९॥

ॐ नमस्तस्मै भगवते पराय पररूपिणे ।
यत्पराख्यां तनुं यान्ति धावन्तः परमार्थिनः ॥२०॥

ॐ नमस्तस्मै भगवते त्वष्टभैरवरूपिणे ।
बिभ्यन्तो यं प्रयान्त्येव ज्वलनार्कसमप्रभाः ॥२१॥

ॐ नमो भगवते तुभ्यं प्रणवादिस्वरूपिणे ।
गायत्र्युपासका यान्ति यं परार्थस्वरूपिणम् ॥२२॥

ॐ नमो भगवते तुभ्यं प्राणवायुस्वरूपिणे ।
योगिनो यं प्रयान्त्येव यतयः संश्रितव्रताः ॥२३॥

ॐ नमो भगवते तुभ्यं भूताकाशस्वरूपिणे ।
भूतेज्या यान्ति यं देवं नमामस्वयं प्रभुम् ॥२४॥

ॐ नमो भगवते तुभ्यं स्थाणवे स्थितिरूपिणे ।
स्थितप्राज्ञाः प्रयान्त्येव यं देवं निरवग्रहाः ॥२५॥

---

२४ घ: मा प्रभं—प्रभु

नमो दीर्घाय ह्रस्वाय ह्रस्वदीर्घाय ते नमः ।
स्वरव्यञ्जनरूपाय मातृकाक्षररूपिणे ॥२६॥

आदिक्षांताय देवाय सूक्ष्माय सूक्ष्मरूपिणे ।
शब्दब्रह्मप्रकाशाय प्रकाशाय च ते नमः ॥२७॥

वेदागमस्वरूपाय वेदागमविभेदिने ।
वेदागमबहिस्थाय वेदागमविधायिने ॥२८॥

यदेतत्सुमहास्थूलं यदेतत्सूक्ष्ममुत्तमम् ।
तत्सर्वं ते महद्रूपं प्रणमामि महेश्वर ॥२९॥

भीमं यद्भैरवं रूपं स्थाणु च चलमेव च ।
उग्रं कपर्दं यद्रूपं तन्ननाम महेश्वर ॥३०॥

यद्बहिरन्तञ्चैव बृहत्सूक्ष्ममनुत्तमम् ।
स्तुमः किं किञ्च निन्दामो वैभवं परमेशितुः ॥३१॥

क्षुत्पिपासार्दिता देवाः प्रमत्तदानवार्दिताः ।
भैरवं समनुप्राप्ता भूयो भूयो नतास्महे ॥३२॥

श्री भैरवः

इत्थं स्तुत्वा भैरवाख्यां तनुमत्र महेश्वरि ।
भैरवो व्याकुलीभूतो दृष्ट्वा दैत्यार्दितान्सुरान् ॥३३॥

---

२८ घ: मा वेधागमविधायिने— वेदागमविधायिने

कपर्दः शिथिली भूतो भैरवस्य महात्मनः ।
शतधा प्रास्रवद्वारि गङ्गायाः सुरपूजिते ॥३४॥

तत्स्रोतोऽप्यसुराद्रिक्तः पर्वते भैरवे शिवे ।
तदेव शतधाराख्यं तीर्थं ख्यातं महेशितुः ॥३५॥

देवान्प्रोवाच भगवान्मा भैष्ट सुरवन्दिताः ।
निहन्मि दानवं मत्तं त्रिशूलेनेति निश्चितम् ॥३६॥

इति चोक्त्वा सुरान्देवः प्रगृह्य शूलमुत्तमम् ।
शतधारोद्भवा गङ्गा नीता सुरवरेण वै ॥३७॥

पातालाच्च ततः क्रुद्धः शूलं भूमौ निखातवान् ।
असुरस्यास्य निर्घाताच्छतधारोद्भवा नदी ॥३८॥

शूलप्रहारादुद्भूता पातालादमरेश्वरि ।
पातालान्निस्सृतं तोयं शतधारोद्भवं यतः ॥३९॥

गां गतञ्च ततः ख्याता गङ्गापातालसम्भवा ।
देवान्प्रोवाच च पुनर्भगवान्भूतभावनः ॥४०॥

तिष्ठध्वमत्र देवेशा मम देशे विहारके ।
प्रमत्तश्चात्र नष्टो वै मम शूलप्रहारतः ॥४१॥

---

३५ कः मा सुरो त्रिक्तः—सुराद्रिक्तः
३७ कः मा प्रोक्त्वा—चोक्त्वा

मा भैष्टेह चिरं हृष्टास्तिष्ठाधम कुतो भयाः ।
संसाराख्यं भयञ्चात्र नाशयामि न संशयः ॥४२॥

ऐश्वर्यं मम पश्यध्वं मृतिरप्यमृतीयते ।
मद्‌भयाच्च मृतिर्नास्ति जरा नास्त्यत्र विश्रुतम् ॥४३॥

जरामृत्युविहीनाच्च भीता संसारतश्च ये ।
ते ईशालयमासाद्य यान्ति सादाशिवं पदम् ॥४४॥

स्तुतिं भगवत्कृताम् ... ... ... ... ... ... ॥४५॥

इति श्री भृङ्गे [ङ्गी[ शसंहितायां गो [गु] प्तगंगामाहात्म्यं
समाप्तं [नाम] द्वितीयः पटलः ॥२॥

---

४३ ग. मा मृतिर्नास्ति—मृतिर्नास्ति

# भृङ्गीशसंहिता
# शिवरात्रिमाहात्म्यम्

ॐ श्रीगणेशाय नमः

ॐ श्रीशिवरात्र्यै नमः

ॐ श्रीभैरवी

सम्भवं कालरात्रेश्च श्रुत्वा माहात्म्यमच्युत ।
कृतार्थास्मि न सन्देहो मुक्तास्मि भवसागरात् ॥१॥

इदानीं श्रोतुमिच्छामि शिवरात्रेश्च निर्णयम् ।
कथं सा शिवरात्र्याख्या ह्यभवज्जगदीश्वर ॥२॥

सम्भवं शिवरात्रेश्च वद शीघ्रं महेश्वर ॥३॥

श्रीभैरव उवाच

शृणु देवि प्रवक्ष्यामि शिवरात्रेश्च सम्भवम् ।
यच्छ्रुत्वा मुच्यते जन्तुः जन्मान्तरभवैरघैः ॥४॥

पुरा ब्रह्महरी देवि दृप्ता वास्तां मदात्तदा ।
सर्गादेकः पालनाच्च परो वै दर्पमाप्तवान् ॥५॥

---

१ खः मा महात्मयप्युत—माहात्म्यमप्युत

दृष्ट्वा तु दृप्तौ देवेशौ महेशः कृपयान्वितः ।
स्वांशयोरनुकम्पार्थं प्रादुर्भूतः शुचि स्मिते ।।६।।

फाल्गुनकृष्णस्य कामायाः प्रदोषे वरवर्णिनि ।
महती भैरवी ज्वाला तत्र प्रादुर्बभूव ह ।।७।।

ज्वालाप्रादुर्भवे देवि न दिशो विदिशं तथा ।
प्रकाशिताः समभवन्क्षोभिताः देवमायया ।।८।।

तत्र देवाश्च सिद्धाश्च गन्धर्वाः किन्नरोरगाः ।
विद्याधराश्चारणाश्च यक्षभूतपिशाचकाः ।।९।।

ब्रह्मराक्षसवेतालाः कूष्माण्डा भैरवाः खगाः ।
तरवो दृषदश्चापि मुनिदेवर्षिपार्षदाः ।।१०।।

निस्तेजसः समभवज्ज्वाला या जगदम्बिके ।
अकाण्डप्रलयं किन्नु करोति भगवान्भवः ।।११।।

इति सर्वे च संत्रस्ता निमीलितदृशोऽभवन् ।
ज्वालारूपं भैरवं तु दृष्ट्वा ब्रह्महरी तदा ।।१२।।

---

७ कः मा फाल्गुकृष्णस्य — फाल्गुनकृष्णस्य

खः प्रवोशे — प्रदोषे

हरं परमया वाचा परं तुष्टुवतुस्तदा ।
स्वस्ति स्वस्तीति शब्देन जगदाशासने रतौ ॥१३॥

मायया हृतविज्ञानौ र्वातितुं ह्यन्तिमिच्छतः ।
ब्रह्मोर्ध्वमारुहेद्देवि हरिश्च तदधः पुनः ॥१४॥

हरिणा न पदे दृष्टे ब्रह्मणा नैव तच्छिरः ।
अनन्तस्यान्तमिच्छन्तौ नान्तं प्राप्नुवतः प्रिये ॥१५॥

प्रत्याख्यातौ ततस्तौ तु ब्रह्मविष्णू महेश्वरि ।
श्रान्तौ तच्चरणे लीनौ श्लक्ष्णया च गिरा स्तुवतुः ॥१६॥

श्रीब्रह्मविष्णू ऊचतुः

ॐ घोरां तनुमघोराख्यां घोरां घोरतरां तथा ।
ज्वालां परमभीरूपां शरणं तां श्रयावहे ॥१७॥

भैरवस्य महाशक्तिं ज्वालाख्यां परमां शिवाम् ।
वन्दावहे अघोरस्य विमर्शोन्मीलिनीं तनुम् ॥१८॥

भयं दधानां भैरवाख्यां तनुम्
तां तमोऽन्धानां संसृतौ मज्जयन्तीम् ।
संसृज्याख्यां भीतिमितीरयन्तीम्
अघोराख्यां तां तनुं प्राप्नुयावः ॥१९॥

---

१६ घः गिरंस्दतु - गिरा स्तुवुः

ज्वालारूपं परमं भैरवं तत्
विमर्शोन्मीलनमेकं पराख्यम् ।
महदाद्यभैरवं तद्व्रजावो
यद्भानात्तु भातमेतज्जगत्स्यात ॥२०॥

तं भैरवं घोरमनन्तरूपम्
अघोरमेकं परमर्शतोत्थम् ।
घोरञ्च शर्वं शरणं प्राप्नुयावो
येनान्ध्यमोहौ हृदयं त्यजतः ॥२१॥

भीष्मघोरं भैरवं तमघोरं
महाभयमीरयन्तं परं नौ
चिद्रूपं तं चिद्विमर्शेन भातम्
ज्योतिरेतद्घोररूपं श्रयावः ॥२२॥

परं भैरवं चित्स्वरूपञ्च चित्यं
चिता संविदा ज्ञानदं कामदञ्च ।
व्रजावोऽनन्तं शरण्यं श्रितानां
अनादिमनन्तं विभुं भाव्यमीशम् ॥२३॥

---

२३ गः मा—रणंतं—अनन्तं

अपारावारमीशानं भैरवं भीषणाकृतिम् ।
विमर्शोन्मीलनाभातं भूयो भूयो नुमो नुमः ॥२४॥

श्रीभैरवः

इति स्तुत्वा महादेवं ब्रह्मविष्णू महेश्वरि ।
प्रणतौ दण्डवद्भूमौ पतितौ भैरवाग्रतः ॥२५॥

तयोरप्यनुकम्पार्थं दर्शनीयतमोऽभवत् ।
स्वच्छन्दभैरवो देवि सहस्रभुजपाणिकः ॥२६॥

सहस्रायुधधारी च सहस्रनयनोऽपि च ।
दिव्याम्बरधरो देवि दिव्यस्रगनुलेपनः ॥२७॥

दिव्यसूर्यसहस्राभः प्रादुर्भूतस्तयोः पुरा ।
हसन्नुवाच तौ तत्र ब्रह्मविष्णू महेश्वरि ॥२८॥

श्रीभैरवः

अविमर्शेन वां चित्तं दूषितं चाभवत् पुरा ।
मद्ध्यानात्तदिदं भातं विमर्शोन्मीलनादपि ॥२९॥

दर्पो यतो वामभवदविमर्शेन चेतसा ।
ततो मया प्रसन्नेन दर्शितं भैरवं वपुः ॥३०॥

यद्भानाद्हृदयेऽप्यन्तभीतमेव भवेद्ध्रुवम् ।
तदेव भैरवं रूपं दृष्ट्वा मे गतविस्मयः ॥३१॥

युवाभ्यां सर्वथा नैव कार्या दर्पान्धधीः पुनः ।
विमर्शोन्मीलने चैव बद्धकर्णो भविष्यतः ॥३२॥

भवत्कृतेन स्तोत्रेण प्रसन्नोऽभवमुत्तमौ ।
वरं वृणीतं भद्रं वां दास्यामि च सुदुर्लभम् ॥३३॥

इति श्रुत्वा वचस्तस्य भैरवस्य महात्मनः ।
ब्रह्मविष्णू जगदतुर्भैरवं परमार्तिहम् ॥३४॥

भवत्प्रसादात्परमः को वरः परमेश्वर ।
तथापि याञ्चा परमा देवेश परभैरव ॥३५॥

ब्रह्मा प्रोवाच पुत्र त्वं हरिस्त्वेतदयाचत ।
भवेत्सेवापरो नित्यं यथास्याहं तथा कुरु ॥३६॥

मदीयार्धाङ्गभूतोऽसौ ततो विष्णुस्त्वदात्मना ।
यो हि नारायणः सा त्वं शक्तिः शक्तिमतो मम ॥३७॥

ततः प्रभृति विख्यातं रूपद्वयमिदं मम ।
अर्धनारीश्वरमर्धं हारिहरं वपुः ॥३८॥

अतो दत्तासि नित्यत्वं स्वभवतेषु हरेर्गतिम् ।
इति श्रुत्वा ततो वाक्यं तावुवाच परः शिवः ॥३९॥

ब्रह्मन्द्वितीयं ह्येतत्ते वचनं नैव चक्षसे ।
अतो दृष्टो मयेत्येतत्पुत्रत्ववचनं पुनः ॥४०॥

---

३२ घः मा बद्धकर्णं—बद्धकर्णौ

तस्मात्तु मुद्रया तेऽद्य स्वधितेः शिर उत्तमम् ।
च्छेत्स्यामि नात्र सन्देहश्चेति सत्यं वदामि ते ॥४१॥

इत्युक्त्वा भैरवः कोपादुज्जहार शिरस्ततः ।
स्वधितेर्मुद्रया देवि तत्कपालव्रतं करे ॥४२॥

किं चैतन्मे कपालात्मजगद्देवि करे स्थिते ।
तदा प्रभृति देवेशि ब्रह्माभूच्चतुराननः ॥४३॥

ज्वालाया ये कणाः स्वर्भूर्दिगंते च प्रसारिताः ।
त एव भैरवगणा जगद्ग्रासपराभवन् ॥४४॥

जगद्ग्रासपरान्दृष्ट्वा गणान्देवि महेश्वरः ।
स्वयमेव हितान्देवान्सान्त्वयामास भैरवः ॥४५॥

शृणुध्वं भो देवगणा मा भक्षध्वं जगद्बलात् ।
जगत्यस्मिन्भवन्तो वै क्षेत्रपाला भविष्यथ ॥४६॥

वर्षे वर्षे बलिं चापि दास्यन्ति तत्र वासिनः ।
मत्पूजामपि वर्षान्ते करिष्यन्ति न संशयः ॥४७॥

वर्षे वर्षे तु यो देवि भैरवोत्सव उत्तमे ।
येऽर्चनं नैव कुर्वन्ति भवतां मम चैव हि ॥४८॥

---

४१ गः मा सन्दोहश्चेति—सन्देहश्चेति

४३ घः मा ब्रह्मभूच्चतुराननः—ब्रह्माभूच्चतुराननः

४८ गः मा योऽर्चनं—येऽर्चनं

. . . . . . . . . . . . . . . . . . . . . . . . . . । 
जीवन्त: पशवस्ते वै मृता निरयमाप्नुयु: ॥४९॥

कामायाश्च प्रदोषे ये भैरवार्चां न कुर्वते ।
क्षेत्रेशपूजनं चापि ते भवेयुर्हि राक्षसा: ॥५०॥

पुत्रदारविहीनाश्च विघ्नसंकटिनस्तु ते ।
ये भवन्ति महाप्राज्ञे विमुखा भैरवार्चने ॥५१॥

भैरवोत्सवपूजायां ये नरा जगदम्बिके ।
. . . . . . . . . . . . . . . . . . . . . . . . . . ॥५२॥

पुत्रिणो धनिनश्चैव परिवारयुता अपि ।
धनधान्यसमृद्धाश्च भविष्यन्ति न संशय: ॥५३॥

सर्वपापविनिर्मुक्ता: पशुपुत्रसमन्विता: ।
शोकरोगविनिर्मुक्ता: क्षेत्रेशाचरता: प्रिये ॥५४॥

ये न कुर्वन्ति वै मोहाद्वर्षान्ते भैरवोत्सवम् ।
इहैव दु:खिता भूत्वा मृता निरयमाप्नुयु: ॥५५॥

---

५० ग. मा प्रदेषे—प्रदोषे

५४ ग: मा दुखित्वा—दु:खिता

५५ ग: मा मसि—मासे

तस्मात् सर्वप्रयत्नेन ममार्चा भवतामपि ।
कुर्वन्ति फाल्गुने मासे चेति सत्यं वदामि वः ॥५६॥

निवर्तध्वं क्षेत्रपाला जगतां भक्षणोद्यमात् ।
नानाविधैरत्नपात्रैः रसैश्च विविधैरपि ॥५७॥

पक्वान्नैरपि चेशानि पञ्चधापादितैः प्रिये ।
घृतपक्वैर्मत्स्यैर्मांसैश्च मोदकैरजाविकैः ॥५८॥

यक्षगणैः विहितैर्ब्रह्मवादिभिः ... ... ... ... ।
मरीचैराद्रकैश्चापि हिङ्गुजीरकपायकैः ॥५९॥

हरिद्रानागरैश्चापि लवङ्गैलाभिरेव च ॥६०॥

दारुद्रूणैर्गुडक्षौद्रविकारैरपि सुन्दरि ।
अर्घैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यकैरपि ॥६१॥

अर्चनैर्वन्दनैश्चापि नन्दनैरपि चन्दनैः ।
यक्षकर्दमकैश्चापि भूषणैरायुधैरपि ॥६२॥

वस्त्रैश्च विविधैश्चापि तथा यज्ञोपवीतकैः ।
पूजनीयो महेशानि क्षेत्रेशसहितः प्रभुः ॥६३॥

---

६१ गः मा यक्षकर्दमकैर्नापि —यक्षकर्दमकैश्चापि

एवं प्रभुं समभ्यर्च्य समृद्धिं परमां लभेत ।
इह भोगान्भवे भुक्त्वा ह्यन्ते भैरवतां व्रजेत् ॥६४॥

प्रदोषे ह्यर्धरात्रौ वा पूजनीयः प्रयत्नतः ।
अघोराख्या तनुर्देवि तथा घोरतरा अपि ॥६५॥

रक्षोभूतपिशाचाश्च घोराख्या तनुरीश्वरी ।
पूजनीया प्रयत्नेन चेत्याद्या परमेश्वरी ॥६६॥

इति दत्वा वरं तेषां क्षेत्रेशानां च भैरवः ।
विरराम ततः साक्षाद्भैरवः सुरपूजिते ॥६७॥

ततः प्रभृति चेशानि कामायां भैरवोत्सवः ।
प्रादुर्बभूव जगति दुर्लभः पापकर्मिणाम् ॥६८॥

सैव शान्ता शिवाख्या च रात्रिः प्रोक्ता पुरातनैः ।
प्रसन्नोऽहं शिवां रात्रिं भद्रे पारमशीमहि ॥६९॥

... ... ... ... ... ... ... ... ... ... ... ... ... ।
इति वेदेऽपि च प्रोक्ता शिवाख्या रात्रिरुत्तमा ॥७०॥

---

६५ कः मा ह्यर्धरात्रे—ह्यर्धरात्रौ
गः अघोराख्य—अघोराख्या
६६ घः मा पारमेश्वरी—परमेश्वरी
६९ खः मा प्रोक्त्वा—प्रोक्ता

तस्मात्सर्वप्रयत्नेन शिवरात्रिहरार्चनम् ।
कुर्याच्च विधिना देवि सर्वपापैः प्रमुच्यते ॥७१॥

इति ते कथितं देवि यत्पृष्टोऽहमिह त्वया ।
कामाव्रतविधानञ्च तत्सर्वं कथितं मया ॥७२॥

इति श्री श्रीसंहितायां भविष्योत्तरे श्री शिवत्रयोदशी
माहात्म्यं नाम प्रथमः पटलः ॥१॥

---

७१ ख: मा शिवरात्रिमहार्चनं—शिवरात्रिहरार्चनं

७२ ख: मा तया—त्वया

## अथ द्वितीयः पटलः

ॐ श्रीभैरव्युवाच

ॐ भैरवार्चा तु कामायाः प्रदोषे जगदीश्वर ।
नक्तव्रते प्रशस्ता तु त्वयोक्ता परमेश्वर ॥१॥

पुनश्च शिवराव्याख्या का भवेच्च महेश्वर ।
घोराघोरा घोरतरा शिवाख्या च भवेत्किल ॥२॥

शान्ता मूढा शिवा चापि सैव रात्रिर्भवेत् किमु ।
इत्यस्मिन्मोहिता देव संदिग्धा चाभवं मुहुः ॥३॥

कामार्चायां प्रसादं तु गृह्णीयुरुत वा नराः ।
शिवरात्रिव्रते देव धारणा पारणापि वा ॥४॥

दोलायितं मनो मेऽघसंशयाकुलितं प्रभो ।
कृपया जगदीशान च्छिन्धि संशयमन्ततः ॥५॥

श्रीभैरवः

शृणु गुह्यं परं देवि लोकानुग्रहकाम्यया ।
वक्ष्यामि जगदीशानि यतः प्राणसमा ह्यसि ॥६॥

---

१ गः मा प्रशस्ता —प्रशस्ता

कामाप्रदोषाया: ज्वाला भैरवस्य महात्मन: ।
प्रादुर्भूता तत: सा च त्रिविधसंप्रकीर्तिता ॥७॥

तावदघोरा प्रथमं सूक्ष्माभूद्धूरवीतनुः ।
विवृद्धा तु भवेद्घोरा क्रमाद्घोरतराभवत् ॥८॥

वामाश्च दक्षिणाश्चैव महाचाराश्च सुन्दरि ।
अर्चयेयुर्हरं भक्त्या रात्रौ तस्यां विभूतये ॥९॥

महाप्रसादं ये नैव मोहाद्गृह्णन्ति मानवा: ।
वर्षान्ते दु:खिता भूत्वा मृता निरयमाप्नुयु: ॥१०॥

तस्मात्सर्वप्रयत्नेन भक्षेत्प्रापणमुत्तमम् ।
सर्वपापविनिर्मुक्तो याति भैरवमव्ययम् ॥११॥

अघोराख्यां तनुं देवि पूजयेयुश्च दक्षिणा: ।
वामा घोरां घोरतरां महाचारा निशीथके ॥१२॥

. . . . . . . . . . . . . . . . . . . . . . ।
पूजयेयुर्महादेवि सर्वयज्ञफलप्रदाम् ॥१३॥

---

१३ कः मा महदेवि — महादेवि

खः सर्वयश — सर्वयज्ञ

सैव रात्रिविधाज्वाला शान्ता मूढा शिवापि च ।
अभूद्भूतं निशीथान्तं व्रते सैव प्रकीर्तिता ॥१४॥

कामाप्रदोषादारभ्य यावद्भूतनिशीथकम् ।
तावत्सा शिवरात्र्याख्या प्रोक्ता वै शिवशासने ॥१५॥

. . . . . . . . . . . . . . . . . . . . ।
नक्तव्रते कामतिथिर्भूतान्तूपवसेन्नरः ॥१६॥

यतो वै भैरवी ज्वाला शान्ताभूत्सुरसुन्दरि ।
अतः शान्तश्चोपवसेच्छान्तमूढा शिवासु च ॥१७॥

दक्षिणाश्चैव शान्ताश्च शान्तायाश्चैव निर्जलाः ।
सर्वपापविनिर्मुक्ता यान्ति वै परभैरवम् ॥१८॥

वामाश्चैव महाचाराः शिवायामुपवासकाः ।
ते भवेयुर्महादेवि महाभैरवरूपिणः ॥१९॥

अतः प्रदोषे कामाया नक्तव्रतधरा अपि ।
दक्षिणाचारसंयुक्ता भवेयुर्वरवर्णिनि ॥२०॥

अघोराख्यां तनुं ये वै पूजयन्ति नरोत्तमाः ।
ते सिद्धाः सिद्धिदाश्चैव परभैरवरूपिणः ॥२१॥

---

१५ कः मा कामप्रदोषादारभ्य—कामाप्रदोषादारभ्य
२० घः मा वरवरणिनि—वरवर्णिनि

तथा घोरतरां ये वै तनुमर्चन्ति सुन्दरि ।
ते भवन्ति महेशानि भैरवाख्या जगत्त्रये ॥२२॥

अघोरा तु प्रदोषे स्याद्घोरा तदुपरि स्मृता ।
निशीथे तु घोरतरा प्रोक्ता व्रतफलप्रदा ॥२३॥

इति कामव्रतस्योक्तो निर्णयस्ते मयाम्बिके ।
इदानीं शृणु देवेशि भूतव्रतविनिर्णयम् ॥२४॥

भूतप्रदोषे शान्ता स्यान्मूढा तदुपरि स्मृता ।
शिवा निशीथे सा प्रोक्ता भुक्तिमुक्तिफलप्रदा ॥२५॥

दक्षिणाचारयुक्ताश्च शान्ता व्रतपराभवन् ।
सर्वपापविनिर्मुक्ताः प्रयाता भैरवं नराः ॥२६॥

वामा महाचारयुताः शिवायामुपवासकाः ।
त एव भैरवाः प्रोक्ता जगत्यां जगदम्बिके ॥२७॥

तस्मात्सर्वप्रयत्नेन प्रदोषेऽथ निशीथके ।
नक्तं व्रतं चोपवासं कुर्वन्सिद्धिमवाप्नुयात् ॥२८॥

यो यत्र पूजको देवि स तत्रैव प्रपूजयेत् ।
व्रतं कुर्वञ्च यो यत्र स तत्रैव समाचरेत् ॥२९॥

अन्यथा पूजयञ्चापि व्रतं कुर्वञ्च सुन्दरि ।
दारिद्र्यशोकसंयुक्तो ज्ञातिसम्बन्धवर्जितः ॥३०॥

पशुपुत्रविहीनश्च सोऽन्ते नरकमाप्नुयात् ।
कलावस्मिन्महाघोरे व्रतं भूते समाचरेत् ॥३१॥

इहैव सुखितो भूत्वा धनधान्यसमृद्धिमान् ।
मृतश्च याति देवेशि भैरवं परमव्ययम् ॥३२॥

विपरीतं नैव कुर्याद्व्रतं नक्तमथापि वा ।
आपन्नो विघ्नितो भूत्वा सोऽन्ते निरयमृच्छति ॥३३॥

ये न कुर्वन्ति वै मोहात्फाल्गुने भैरवोत्सवम् ।
ते भवन्ति महाप्राज्ञे जन्मजन्मनि दुःखिताः ॥३४॥

मोहाद्वा यदि वा लोभाद्वै दुष्याद्धठतो यदि ।
नक्तोऽपि धारणे चापि विपरीतं समाचरेत् ॥३५॥

पशुपुत्रविहीनश्च धनधान्यविवर्जितः ।
शोकदुःखयुतश्चैव भूत्वा सोऽन्ते पतेदधः ॥३६॥

तस्मात्सर्वप्रयत्नेन न पूर्वां पदवीं त्यजेत् ।
जानंस्त्यजेद्यः पदवीमापन्नः स पतेदधः ॥३७॥

इति श्री श्रीसंहितायां भविष्योत्तरे श्रीशिवरात्रिमहात्म्यं
सम्पूर्णं द्वितीयः पटलः ॥२॥

---

३१ गः मा कलावास्मिन्—कलावस्मिन्

३४ घः मा जन्मे जन्मे—जन्मजन्मनि

# भृङ्गीशसंहिता
## नववर्षोत्सवः
### ॐ श्री गणेशाय नमः

श्रीभैरवी

श्रुत्वा तु होलिकां देव विधिना त्वन्मुखाम्बुजात् ।
कृतार्थास्मि न सन्देहस्तारितास्मि भवार्णवात् ॥१॥

इदानीं श्रोतुमिच्छामि नववर्षोत्सवं महत् ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥२॥

विधिं वै नववर्षस्य चोत्सवं च विशेषतः ।
वद मे विस्तराच्छम्भो लोकानुग्रहकाम्यया ॥३॥

श्रीभैरवः

शृणु देवि परं गुह्यं वक्ष्यामि त्वदनुग्रहात् ।
नववर्षोत्सवविधिं मङ्गलं सरहस्यकम् ॥४॥

पुरा व्यक्तात्समभवत्सहस्रचलमुत्तमम् ।
चैत्रकृष्णस्य प्रतिपद्दिने ब्रह्माजनत्किल ॥५॥

तामसात्तालिकांतस्तु तिरोऽभूत्सुरपूजिते ।
प्रकाशरूपं चैत्रस्य प्रतिपदरुणोदये ॥६॥

प्रारभत्सृष्टिविस्तारं यथा पूर्वं महेश्वरि ।
सृष्टिमारभ्य गिरिजे तदा हर्षमवाप सः ॥७॥

. . . . . . . . . . . . . . . . . . . . . . . . . ।
ततस्तद्दिवसे कार्यं जनैः सर्वैर्महोत्सवम् ॥८॥

श्रीभैरवी

महोत्सवविधिं देव श्रोतुमिच्छामि वार्षिकम् ।
यच्छ्रुत्वा मानवो देवि सुखं प्राप्नोति वार्षिकम् ॥९॥

... ... ... ... ... ... ... ... ... ... ... ... ।
अतो वद महेशान लोकानुग्रहकाम्यया ॥१०॥

श्रीभैरवः

वक्ष्यामि गुह्यं परमं नववर्षोत्सवं प्रिये ।
येन विज्ञानमात्रेण सर्वज्ञत्वं लभेन्नरः ॥११॥

अमायां प्रातरुत्थाय प्रातः कृत्यं विधाय च ।
तीर्थं गत्वा च स्नात्वा च वाचा कल्पं समाचरेत् ॥१२॥

एकोऽस्मीति बहुस्यां वै श्रुतं प्रोक्तं ततोऽपि च ।
स्व चेतस्योमिति तदोच्चारणात्प्रापितोऽपतत् ॥१३॥

---

१२ घः मा—वचा—वाचा

१३ खः मा—च

वाचा रूपः स एवासीत्सैवाभूज्जटा भुवि ।
ततो भूतानि परतस्तस्यास्तु प्रकटीभवन् ॥१४॥

अनूद्यते भास्करे वै वाचा कल्पो विशिष्यते ।
वाचा कल्पं विधायैवं ह्यौषधं कल्पमावहेत् ॥१५॥

तद्दिने मणिमन्त्राद्याज्ज्वलन्त्यग्नि तदाम्बिके ।
विधाय नित्यं तद्दिनं शक्तनानि परीक्षयेत ॥१६॥

पुष्पदन्तेनोदयेनोत्थं कथाप्रश्नांस्तथारभेत ।
विमृश्य तत्कथाप्रश्नं तत्प्रतीकारमारभेत ॥१७॥

प्रतिकृत्य तु तत्प्रश्नं सुखवर्षो भवेत्प्रिये ।
तथा मङ्गलसम्भारानीय कांस्यपात्रके ॥१८॥

मिश्रीकृत्य परीक्षयेत प्रातरुत्थाय तन्मुखम् ।
ब्रह्मणो जगदारम्भे कारणं वस्तुसञ्चयम् ॥१९॥

पृथिव्यापस्तथा तेजो वायुराकाश एव च ।
पञ्चभूतानि चैतानि जरानिर्माणकारणम् ॥२०॥

---

१४ खः मा एवासीत् — एवासीत्
१५ खः मा वचा — वाचा
१६ खः मा वदविके — तदाम्बिके
१९ कः मा परीक्षेत्र — परीक्षयेत

धान्यगन्धपुष्पफलैर्देवमूर्तिर्सुवर्णकैः ।
रसैर्दधिफलैर्युक्तं भूतरूपमनेकधा ॥२१॥

. . . . . . . . . . . . . . . . . . . . . . . . . ।
एतैरिन्द्रियसम्भूतिस्तस्मात्पात्रं परीक्षयेत ॥२२॥

पक्षिणः सुप्तचित्तस्य वायसस्यापि सुन्दरि ।
सीताशापविदग्धस्य शब्दं दुःखदमीरितम् ॥२३॥

अभुक्त्वा नैव तच्छब्दं शृणुयाच्च क्वचिन्नरः ।
श्रुत्वा प्रमादतो देवि वर्षोविघ्नकरो भवेत् ॥२४॥

तस्माद्वै साग्निकश्चादौ दधियुक्तं फलं ततः ।
प्राश्य प्रातः कृत्यमपि ततः कुर्यादसंशयम् ॥२५॥

तस्मिन्कालेऽथवा प्राश्येत्पुत्रमित्रजनैर्युतः ।
भुक्त्वा पीत्वा प्रभाते तु वस्त्वासङ्गमवस्त्रकम् ॥२६॥

फलं गृहीत्वा गन्तव्यं बन्धुवर्गगृहं प्रति ।
तत्रापि प्राश्य किञ्चित्तु नागच्छेत् निराशनः ॥२७॥

बंधुगेहान्निरशतः प्रत्यागच्छेद्यदा प्रिये ।
तदा वर्षं भवेत्सोऽपि क्षुत्पिपासार्दितो जनः ॥२८॥

---

२५ गः मा कृत्यिमपि—कृत्यमपि

२७ कः मा बधुगेहात्—बंधुगेहात्

तस्मात्प्रयत्नेन प्रिये बन्धुगेहं व्रजेन्नरः ।
प्रत्याव्रजेत्ततस्मात्तु गेहान्निरशनः प्रिये ॥२९॥

. . . . . . . . . . . . . . . . . . . . . . . . . ।
रोगी भीतः कालयुतो भवेत्तद्वै महेश्वरि ॥३०॥

श्रीभैरवी

कस्य पूजां तद्दिने वै कृत्वा सुखमवाप्नुयात् ।
किं किं कार्यं महेशान कृत्वा सुखमवाप्नुयात् ॥३१॥

श्रीभैरवः

शृणु देवि प्रवक्ष्यामि नववर्षे महोत्सवम् ।
चतुर्मुखः प्रादुरासीत्तथा पञ्चमुखः प्रिये ॥३२॥

हृत आकाश ईशेन चतुर्भूतमुखोऽभवत् ।
अत एव भैरवोऽपि पञ्चधामुख ईरितः ॥३३॥

स्वं संच्छाद्य च स्वच्छन्दस्तस्य पूजां प्रकारयेत् ।
तमभ्यर्च्य विधानेन च स्नानैर्गन्धलेपनैः ॥३४॥

पत्रैः पुष्पैः फलैर्वापि वस्त्रैर्नानाविधैस्तथा ।
उपचारैरनेकैश्च तथा ब्राह्मणवाचनैः ॥३५॥

---

३४ गः मा विधानेन न — विधानेन च

३५ कः मा फलैवापि — फलैर्वापि

घः मा व्रह्मणवाचनैः — ब्राह्मणवाचनैः

लक्ष्मीपुत्रार्चनैश्चापि प्रापणैर्दधिशर्करैः ।
ब्राह्मणान्पूजयेच्छक्त्या दक्षिणाभूषणैरपि ॥३६॥

तिथिपत्राण्यथादाय पञ्चपात्रे पुरः प्रिये ।
सम्पूज्य सूर्यं गणपं गणान्ब्रह्माणमीश्वरीम् ॥३७॥

वाग्देवतां समर्चयेत तथा गन्धानुलेपनैः ।
उपचारैश्चार्चयित्वा ज्योतिष्टोममवाप्नुयात् ॥३८॥

पूजयित्वा तथा जाम्बीरभक्ष्यभोज्यानुलेपनैः ।
नर्तनंगायनैर्वापि हास्यलास्यादिक्रीडनैः ॥३९॥

मित्रैर्बन्धुगणैः सार्धं मिथो मिष्टान्नभोजनैः ।
गुर्वर्चनैर्वन्दनैश्च नन्दनैश्चन्दनैस्तथा ॥४०॥

ग्रामपालार्चनैः पुष्पैर्देशपालार्चनैरपि ।
विनोदैरन्यैः पुष्यैश्च दानैश्च विविधैरपि ॥४१॥

---

३८ गः मा उपचारं चार्चयित्वा — उपचारैश्चार्चयित्वा

३९ कः मा जामीभंक्ष्य — जाम्बीरभक्ष्य

४० गः मा गुर्वचनैः — गुर्वर्चनैः

४१ कः मा ग्रामपालाचनैः — ग्रामपालार्चनैः

कुलदेवार्चनैश्चापि कुलवृद्धानुतर्पणैः ।
मिलित्वा तिथिपत्रस्य शृणुयात्फलमुत्तमम् ॥४२॥

एवं महोत्सवं कृत्वा कारयित्वापि सुन्दरि ।
नववर्षस्य मनुजोऽतिरात्रफलमाप्नुयात् ॥४३॥

श्रीभैरवी

भूतसृष्टिं विसृज्यादौ ततः किमसृजद्विभुः ।
वद सत्यं महादेव लोकानुग्रहकाम्यया ॥४४॥

श्रीभैरवः

भूतसृष्टिं विधायापि स्वेच्छया चासृजन्मुनीन् ।
अत्रिं मरीचिमङ्गिरसं पुलस्त्यं पुलहं क्रतुम् ॥४५॥

वसिष्ठं चेति सप्तर्षीन्मानसान्मुनिसत्तमान् ।
. . . . . . . . . . . . . . . . . . . . . . . . . ॥४६॥

ते दृष्ट्वा तत्र ब्रह्माणं चतुर्मुखमदूरतः ।
प्रणम्य मनसा भक्त्या गिरया परया स्तुवन् ॥४७॥

सप्तर्षय ऊचुः

ॐ रक्तं पिशङ्गं नतवभ्रुश्मश्रुं
चतुर्मुखं चारुचतुर्भुजञ्च ।

---

४६ कः मा वेति—चेति
४७ घः मा परर्यदष्यत्—परया स्तुवन्

कमण्डलुं जपवटीं दधानं
सत्पुस्तकं चाभयदं प्रपन्नाः ॥४८॥

रक्तं रूपं रजसा यद्दधासि
सक्तं जन्तूनां सर्जने नित्ययुक्तम् ।
तपोयुक्तं सूचयन्नेवमेकं
कार्ये सक्तं निश्चितं त्वां प्रपन्नाः ॥४९॥

अधोऽपि रक्तं जनसर्जने त्वं
केशे पिशङ्गमनन्तबभ्रुश्मश्रुम् ।
ऊर्ध्वाधोऽपि सर्जने सक्तचित्तम्
इति सूचयञ्शरणं त्वां प्रपन्नाः ॥५०॥

यस्माद्भूतैः सर्जने सर्वतो मे
प्रत्यक्षभूतं कारणं सर्वतोऽपि ।
चतुष्टं यत्तेजसो मे मुखं तत्
सूचयंस्त्वां शरणं वै प्रपन्नाः ॥५१॥

तेजोरूपैस्तुर्यमुखैर्यदेतत्
तदेकं तत्पञ्चहीनं च तेजः ।
सर्वैः पूज्यं सूचयन्वै यतस्त्वं
त्वामेवातः शरणं वै प्रपन्नाः ॥५२॥

महेशो वँ पञ्चमं यश्च कर्त-
शिरः शून्यं गुह्यं रूपं विधाय ।
तत एवमुत्पतिष्यन्ति सर्वे
सूचयंस्त्वामित्थमेव प्रपन्ना: ॥५३॥

एका विद्या प्रोद्यता शब्दरूपा
भिन्नप्रयोगा सा चतुर्धा विभक्ता ।
कर्मज्ञानोपासना मन्त्रकाण्डैः
चतुर्मुखैः सूचयंस्त्वां प्रपन्ना: ॥५४॥

भुजैश्चतुर्भिर्धर्मकामार्थ-
मोक्षाश्चतुर्वर्णांश्चतुराश्रमांश्च ।
उत्पत्स्यामि कर्मसंघाश्च तेषां
सूचयंस्त्वां शरणं वै प्रपन्ना: ॥५५॥

रसादिकं मन्त्ररहस्यमेव वाचां
सिद्धिं द्विविधं तत्फलञ्च ।
मत्त एवेति सूचयंस्त्वां शरण्यं
भूयो भूयो दण्डवत्सुप्रसन्ना: ॥५६॥

---

५३ ग: मा एव सुत्पतिष्यन्ति—एवमुत्पतिष्यन्ति

श्रीभैरवः

इत्थं स्तुत्वा महादेवि मुनयस्तं प्रजापतिम् ।
प्रणम्योत्थाय प्रोत्थाय तूष्णीमेवावतस्थिरे ॥५७॥

तानुवाच ततो ब्रह्मा स्तोत्रेणानेन स्तोषितः ।
प्रसन्नो वरदश्चास्मि वृणीध्वं वरमुत्तमम् ॥५८॥

ततस्ते मुनयः सर्वे भक्तिनम्रात्ममूर्तयः ।
. . . . . . . . . . . . . . . . , . . . . . . . ॥५९॥

किं वरेण महेशान भवद्दर्शनतः प्रभोः ।
त्वमेवाज्ञां कुरुष्वाद्य तवानुग्रहकारिणः ॥६०॥

श्रुत्वा वचस्तु तेषां वै मुनीनां भावितात्मनाम् ।
आज्ञां चक्रे सृष्टिकर्ता प्रजाः सृजध्वमचिरम् ॥६१॥

इत्याज्ञप्तास्तदा देवि मुनयस्ते महौजसः ।
ससृजुर्विविधास्तत्र प्रजाः परमदर्शनाः ॥६२॥

श्रीभैरवी

कृष्णाद्याश्चैव शुक्लाद्या द्विधा भिन्नाः कथञ्च ताः ।
वर्षोत्सवं तत्र कुर्युः कृष्णे शुक्लेऽथवा पुनः ॥६३॥

सम्भारपात्रं सृष्टेश्च कस्मिन्नहनि सुन्दर ।
दृष्ट्वा प्रमुदिताः कुत्र भावयुक्ता भवन्त्युत ॥६४॥

. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ।
वर्षोत्सवस्य करणात्फलं मे वद विस्तरात् ॥६५॥

श्रीभैरवः

शृणु वक्ष्यामि देवेशि प्रश्नमेनं सुदुर्लभम् ।
यच्छ्रुत्वा न पुनर्मोहमेवं यास्यसि सुन्दरि ॥६६॥

द्वैधी भूत्वा प्रजास्तत्र कृष्णशुक्लादिभेदतः ।
कृष्णाद्या मध्यदेशीयाः समुद्रान्तं समाश्रिताः ॥६७॥

. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ।
ब्रह्मप्रादुर्भवदिने सक्तास्ताः सुरपूजिते ॥६८॥

यस्मिन्नहनि स ब्रह्मा प्रादुर्भूतो जगत्यपि ।
तद्दिने एव कुर्युस्ता मोहोत्सवमतन्द्रिताः ॥६९॥

सुखं सम्भारहीनास्ता अत एव महेश्वरि ।
शुक्लेऽरुणे प्रतिपदि स्रष्टुमारभतः प्रभुः ॥७०॥

मुनीन्सूचयन्तत्र पात्रसम्भारदर्शनात् ।
. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ॥७१॥

इत्थं कारणसम्भारैः सृजध्वं मुनिसत्तमाः ।
भूतैरेव भवेत्सृष्टिः सर्वेन्द्रियसमन्विताः ॥७२॥

याम्यनैर्ऋतोद्भवानां वायसानां रुतान्नराः ।
तमोरूपा भविष्यन्ति रुतं तेषां विवर्जयेत् ॥७३॥

---

६८ कः मा कुयुस्ता—कुर्यस्ताः

प्रशस्तफलबीजस्य दधिमिश्रस्य भक्षणात् ।
जेता सर्वत्र शुद्धस्तु प्रजातं तावदीश्वरि ॥७४॥

तस्मात्सर्वप्रयत्नेन दधिभोक्तुं यतेत्सदा ।
फलञ्च गुटिकायुक्तं परमारोग्यमवाप्नुयात् ॥७५॥

. . . . . . . . . . . . . . . . . . . . ।
शुद्धत्वं सन्ततेश्चापि सुभावस्यापि सुन्दरि ॥७६॥

वह्नेर्बृहत्वं च विशुद्धभावं
बलस्य वृद्धि सह ओजसोश्च ।
धृतेश्च वृद्धेश्च शरीरपुष्टिः
आरोग्यमायुः परमं प्रभावम् ॥७७॥

मनोवचः स्वास्थ्यमपीशभक्ति
कृषेश्च वृद्धि धनधान्यवृद्धिम् ।
नववर्षोत्सव एवञ्च जन्तुः
समाप्नुयाद्दधिबीजभक्षणात् ॥७८॥

सम्भारपात्रे दधिबीजभक्षणम्
उद्दिष्टमेतद्ब्रह्मणात्र पुरा यत् ।

---

७८ ध: मा समाप्तयात् — समायप्नुयात्
बीजस्य भक्षणात् — बीजभक्षणात्

प्रजासर्गे नियतो यश्च जन्तुः
स वै फलमक्षयमश्नुते च ।।७९।।

अन्यैः सम्भारैः सूचयन्भूतसंघान्
इन्द्रियार्थान्सर्वमेवेश्वरीत्थम् ।
उपदिशन्सृष्टिकर्ता च
सर्वान्सम्भारपात्रेण प्रजाः सृजेध्वम् ।।८०।।

अत एव शुक्लदिने महोत्सवं
कुर्युः शुक्लाद्या एवमेवेशपूज्यं ।
यस्मात्स्रष्टुं प्रारभद्विश्वकर्ता
तस्मात्तद्दिनं सर्वलोकेषु शस्तम् ।।८१।।

वर्षोत्सवं विधिवद्यश्च कुर्यात्
स प्राप्नोति भोगसंघाननेकान् ।
निराकृत्यो रोगचयानजस्त्रं
समाप्नुयाद्योगमन्त्यमेहेशि ।।८२।।

घोरैर्युक्तः पातकैः नित्यदुःखी
पापैर्वियुक्तस्त्रिदिवादिगामी ।
तत्र भुक्त्वा भोगचयमनेकं
पुनः स च प्राप्नुयाज्ज्ञानिसङ्गम् ।।८३।।

ज्ञात्वा सूक्ष्मं निर्गुणं ब्रह्म तत्र
न चाप्नुयात् पुरावृत्तिमेव ॥८४॥

इत्थं वर्षोत्सवं कुर्याद्यः कश्चिन्मानवो भुवि ।
स चिरायुः सुखी पुत्री भवत्येव न संशयः ॥८५॥

तद्दिनात्तु समारभ्य गृह्णीयात्तिथिपत्रिकम् ।
तिथिं वारञ्च नक्षत्रं योगं करणपञ्चकम् ॥८६॥

दिने दिने पठेन्मर्त्यो गङ्गास्नानमवाप्नुयात् ।
नवर्षदिने यस्तु शृणुयात्पठेत्तु यः ॥८७॥

इदं विमर्शं परमं सृष्टेर्वं चादिकारणम् ।
गोकोटिशतयुक्तस्य हयकोटेश्च सुन्दरि ॥८८॥

कुरुक्षेत्रे चोपरागे सम्पद्दतस्य यत्फलम् ।
तत्फलं समाप्नोति श्रुत्वा वर्षदिने त्विदम् ॥८९॥

अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
यत्फलं लभते मर्त्यस्तदस्य पठनात्फलम् ॥९०॥

पुत्रानवाप्नुयात्पुत्री कामी कामानवाप्नुयात् ।
आपन्न आपदो मुक्तः बद्धो मुच्येत बन्धनात् ॥९१॥

---

९१ क: मा पुत्रायवाप्पुत्री—पुत्रानवाप्नुयात्पुत्री
ग: मु—मुक्तः—मुक्तः

सङ्कटात्सङ्कटी मुच्येद्विषादादपि दुःखितः ।
रुग्णो रोगात्प्रमुच्येत वन्ध्या पुत्रमवाप्नुयात् ॥६०॥

ब्रह्मस्तुतिमिमां श्रुत्वा पुण्यां पापापनोदिनीम् ।
श्रुत्वा पठित्वा मुच्येत जन्मान्तरभवैरघैः ॥६१॥

कलिकाले महाघोरे दुष्श्रुतं वज्रलेपनम् ।
श्रुत्वा वर्षोत्सवं पुण्यं तत्क्षणात्तद्विनश्यति ॥६२॥

श्रुत्वा वर्षदिने पुण्ये वर्षोत्सवमतन्द्रितः ।
वर्षान्तं प्राप्नुयाल्लाभं कृषिवृद्धिसमन्ततः ॥६३॥

अलक्ष्मी कालकर्णी च दूरे तिष्ठति तत्पुरः ।
सुखं भोगचयञ्चापि प्राप्नुयाद्भुवि दुर्लभम् ॥६४॥

इति ते कथितं देवि नववर्षमहोत्सवः ।
श्रुतश्च पठितो ध्यातः सर्वपापापनोदनः ॥६५॥

नववर्षदिने यस्तु श्रृणुयाददिदमुत्तमम् ।
सर्वपापविनिर्मुक्तो याति विष्णोः परं पदम् ॥६६॥

. . . . . . . . . . . . . . . . . . . . . ।
किं श्रोतुमिच्छा देवेशि हृदये वर्ततेऽधुना ॥६७॥

इति श्री श्रीसंहितायां नववर्षोत्सववर्णनं
माहात्म्यं नाम प्रथमः पटलः ॥१॥

# भृङ्गीशसंहिता
# शारिकामाहात्म्यम्

## ॐ श्रीगणेशाय नमः

## श्रीशारिकाभगवत्यै

ॐ श्रीभैरवी

श्रावं श्रावं महादेव स्यारास्थानमनुत्तमम् ।
ध्यानं पूजाविधानं च कृतार्थास्मि न संशयः ॥१॥

अधुना श्रोतुमिच्छामि शारिकागिरिमुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्जन्मकोटिभवैरघैः ॥२॥

श्रीभैरवः

शृणु देवि प्रवक्ष्यामि शारिकागिरिमुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥३॥

प्रद्युम्नाख्यं महापीठं शृणु वक्ष्यामि पार्वति ।
सर्वविघ्नापहं सद्यः कलौ सिद्धिप्रदायकम् ॥४॥

---

२ घः मा कोटिरभैरघैः—कोटिभवैरघैः

आदिकल्पे पुरा देवि बको नाम स दानवः ।
सर्वबाधांश्च त्रींल्लोकान्विशेषात्काश्यपं पुरम् ॥५॥

ततो वै ब्रह्मणा सर्वे मारीचं कश्यपं परम् ।
पुरस्कृत्य गता देवि मन्दरं चारुकन्दरम् ॥६॥

दृष्ट्वा तत्र भवं शर्वं सर्वज्ञं लोकभावनम् ।
प्रणम्य दण्डवद्भुमौ तुष्टुवुः परमं शिवम् ॥७॥

*देवा ऊचुः

ॐ नमो भवाय देवाय रथाय शिवरात्मने ।
नमो रुद्राय भूताय पशूनां पतये नमः ॥८॥

नमो हिरण्यबाहवे हिरण्यकवचाय ते ।
हिरण्याय सेनान्ये देवानां पतये नमः ॥९॥

गिरिशाय गिरीशाय शिपिविष्टाय ते नमः ।
नमः शिवाय रुद्राय रुद्राणां पतये नमः ॥१०॥

ॐ नमः शम्भवे तुभ्यं लोकाभयकराय च ।
नमोऽस्तु भूतपतये गणानां पतये नमः ॥११॥

---

*देव ऊचु—देवा ऊचुः

८ ख: मा रथाय—रथाय

अन्धकारे नमस्तुभ्यं कामारे ते नमो नमः ।
मृत्युञ्जय नमस्तुभ्यं नमस्ते त्रिपुरारये ॥१२॥

नमः कालाय रुद्राय महाकालाय ते नमः ।
नमः पञ्चमुखायापि चैकानेकसुखाय च ॥१३॥

मीढुष्टमाय देवाय भवेशाय नमो नमः ।
रुद्रेशाय नमस्तुभ्यं गणेशाय नमो नमः ॥१४॥

सुरेशाय नमस्तुभ्यमीशानाय नमो नमः ।
नमो विद्याधरेशाय चित्रसेनाय ते नमः ॥१५॥

योगक्षेमविधात्रे च भूतानामार्तिनाशने ।
सर्वेश्वराय शर्वाय शम्भवे परमात्मने ॥१६॥

सर्वात्मने नमस्तुभ्यं भक्त्यलभ्य नमोऽस्तुते ।
नमामः शिरसा देवं हन्यमाना बकेन वै ॥१७॥

---

१४ कः मा मीढुष्टोमाय—मीढुष्टमाय

१५ गः मा विद्याधीशाय—विद्याधरेशाय

१६ कः मा यागक्षेमविधात्रे —योगक्षेमविधात्रे

श्रीभैरव:

इति स्तुत्वा महादेवि भैरवं जगदीश्वरम् ।
पोष*... ... ... वात्र विनयेन सुरेश्वरा: ।।१८।।

श्रुत्वा तेषां वच: सौम्यं प्रोवाच जगदीश्वर: ।
शृणुध्वं वो देवगणा वचो मे मुनिभि: सह ।।१९।।

तलातलं स दैत्येशो यदि गच्छति भो सुरा: ।
स नश्येच्च स्वयं तत्र चेति सत्यं वदामि व: ।।२०।।

आशास्य तान्महादेवि महायोगेश्वरीं शिवाम् ।
अवातारश्च भूलोकं बकदैत्यविनाशिनीम् ।।२१।।

शारिकारूपमासाद्य सुमेरुशिखरेण हि ।
रन्ध्रं पूरय कल्याणि यत्पृष्टं स्वयमारुह ।।२२।।

. . . . . . . . . . . . . . . . . . , . . . . . . ।
त्वत्तेजसा समाक्रान्तं प्रकर्षं द्योतते तत: ।।२३।।

---

*त्रुटितोऽत्र पाठ:

१८ घ: मा विनयेन —विनयेन

१९ क: मा सौम्यं —सौम्यं

२० ग: मा नश्येश्च —नश्येच्च

तत: प्रभृति देवेशि प्रद्युम्नशिखराभिधम् ।
सर्वदा सिद्धिदं लोके प्रख्यातिञ्च गमिष्यति ।।२४।।

इति श्रुत्वा प्रभोर्वाक्यं गिरिजा गिरिशं तथा ।
पीठानामुत्तमं पीठं शारिकाख्यो गिरिर्हर ।।२५।।

सर्वाभि: शक्तिभिरपि समाक्रान्तं भवद्विधम् ।
तथेति भगवान्प्राह देवीं तां प्राणवल्लभाम् ।।२६।।

गच्छेति त्वरया देवि प्रोवाच जगदम्बिकाम् ।
तदा प्रभृति देवेशि त्वरिता नाम साभवत् ।।२७।।

इति [श्री] श्रीसंहितायां शारिकागिरिपरिच्छेदे
प्रथम: पटल: ।।१।।

---

२४ ख: मा प्रद्युम्नशिखरोभिधम्—प्रद्युम्नशिखराभिधम्
२५ क: मा प्रभुवाक्य—प्रभोर्वाक्यं

## अथ द्वितीयः पटलः

श्रीभैरवः

ततस्तु सा महादेवी रूपं कृत्वा महीतले ।
शारिकायास्तु तच्चञ्चु गृहीत्वा शृङ्गमुत्तमम् ॥१॥

तेन शृङ्गेन सा देवी भूमिरन्ध्रमपूरयत् ।
रुद्धं तु गिरिणा द्वारं दृष्ट्वा दैत्यो बलेन हि ॥२॥

समुद्धधारशिरसा बाहुभ्याञ्च वरानने ।
उद्धृते शिखरे दृष्ट्वा द्वारमुद्घाटितं तथा ॥३॥

देवी क्रुद्धा जगन्माता शारिका स्वविभूतिभिः ।
समन्तः शिखरे तस्यै सर्वदेवगणैः सह ॥४॥

गिरिमस्तंभयत्तत्र द्वारं दैत्यपतेस्तदा ।
यस्माद्वै शारिकायास्तु रूपं कृत्वा महेश्वरि ॥५॥

गिरिमस्तंभयद्देवी द्वारं दैत्यपतेर्यदा ।
तदा प्रभृति देवेशि गतो वै शारिकागिरिः ॥६॥

---

१ खः मा महेतले— महीतले

५ कः मा भवत्तत्र — भयत्तत्र

शारैश्चिक्रीड यस्माद्वै गिरावत्र महेश्वरि ।
तस्मात्प्रोक्तः पुराविद्भिः शारिकाख्यो गिरिर्महान् ॥७॥

शारीभूतैर्देवगणैर्देवीभ्यश्च ततो महान् ।
तदा प्रभृति प्रख्यातो गतो वै शारिकागिरिः ॥८॥

आपादमस्तकं यावत्सर्वदेवमयं यतः ।
पीडनात्पादघातेन तस्मात्पीठमुदाहृतम् ॥९॥

देवीनामुद्धृतं यस्मात्प्रकृष्टं तेज उत्तमम् ।
ततः प्रोक्तं पुराविद्भिः पीठं प्रद्युम्नसंज्ञकम् ॥१०॥

प्रकर्षेण द्युतिं याति नरोऽत्र विधिवद्व्रतः ।
तस्मात्प्रोक्तं तु तन्त्रज्ञैः पीठं प्रद्युम्नसंज्ञकम् ॥११॥

प्रकर्षेण तु दिव्यं वै ज्ञानमत्र लभेन्नरः ।
तस्मात्प्रद्युम्नकं नाम प्रथितं पीठमुत्तमम् ॥१२॥

प्रयाति द्युम्नं सौरं वै नरो ह्यत्रार्चने रतः ।
ततः प्रोक्तं महेशानि प्रद्युम्नं शिखरं महत् ॥१३॥

---

७ गः मा पुरविद्भिः —पुराविद्भिः

९ कः मा अपायमस्तकं—आपादमस्तकं

१० खः मा तेजमुन्नमम् —तेज उत्तमम्

१२ कः मा प्रकृष्टेण—प्रकर्षेण

शिलारूपाभवत्तत्र गिरिमानमुपेयुषी ।
अस्तंभयद्गिरौ देवि द्वारं दैत्यपतेर्यदा ॥१४॥

तदा प्रभृति देवेशि गतो दैत्यस्तलातले ।
तत्र नाशं गतो दैत्यः स्वयं दैत्यगणैर्युतः ॥१५॥

शारिका ह्यत्र देवेशि तस्थौ च स्वविभूतिभिः ।
आमा कामा च चार्वाङ्गी तथा च टङ्कधारिणी ॥१६॥

तारा च पार्वती चैव यक्षिणी शारिकाष्टमी ।
पश्चिमे यक्षिणी पूज्या प्राच्यां पूज्या ह्यमात्र वै ॥१७॥

कामा च ह्युत्तरे पूजनीया देवि प्रयत्नतः ।
दक्षिणे चैव चार्वाङ्गी ह्याग्नेयां टङ्कधारिणी ॥१८॥

तारा च नैऋते पूज्या वायव्यां पार्वती तथा ।
ऐशान्यां शारिका पूज्या सर्वसिद्धिप्रदायिनी ॥१९॥

त्वरिता भुवनेशी च त्रिलोकेशी त्र्यम्बिका ।
एकान्तवासिनी देवी शीतला च सुशीलका ॥२०॥

---

१४ गः मा गिरे—गिरौ

१६ गः मा चर्वाङ्गी—चार्वाङ्गी

१९ कः मा नैनृते—नैऋते

बालग्रहविनाशापि महात्रिपुरसुन्दरी ।
पूजनीया प्रयत्नेन गिरौ प्राग्देवताः प्रिये ॥२१॥

महापद्मा महालक्ष्मी महामाया महेश्वरी ।
श्रीमती त्रिपुरा बाला देवी पञ्चदशाक्षरी ॥२२॥

उग्रतारा च तारा च काली दक्षिणकालिका ।
मातङ्गी सुमुखी चैव पूजनीया प्रयत्नतः ॥२३॥

विनायकी शंखिनी च महापद्मावती तथा ।
महामुण्डा च रौद्री च गिरेर्दक्षिणतो यजेत् ॥२४॥

भैरवी च त्रिकूटा च महाभैरवपूजिता ।
महाभयहरा सौम्या नैऋत्यां दिशि पूजयेत् ॥२५॥

महारौद्री महामाया महामृत्युविनाशिनी ।
तत्र देवी पूजनीया नैऋत्यां दिशि वै सदा ॥२६॥

यक्षिणी चित्रणी चैव चित्रमाया तथाम्बिका ।
पूजनीया प्रयत्नेन वारुण्यां दिशि वै सदा ॥२७॥

---

२४ ग: मा स्त्री—रौद्री

२७ ख: मा चित्तमाया—चित्रमाया

वात्पाली मेघमाला च सुवृष्टिश्चात्र संस्थिता ।
पूजनीया महेशानि सत्यं सत्यं वरानने ॥२८॥

महाराज्ञी भगवती धनदेन समर्चिता ।
पूजाफलप्रदा प्रोक्ता शारिकायां न संशयः ॥२९॥

महेज्या च महादेवी शूरैः प्रेज्यात्र सर्वदा ।
ज्वालामुखी तथात्रैव ह्युमा पूज्या ह्यम्बिका ॥३०॥

तरुणा तरुणा ह्यत्र महाकाली महेश्वरी ।
पूजनीया प्रयत्नेन सर्वसिद्धिप्रदायिनी ॥३१॥

तारोग्रतारा देवेशि भक्तैरर्च्या महागिरौ ।
अनेकदेव्यो रुद्राश्च आदित्याश्च महेश्वरि ॥३२॥

सुरा देवर्षयः सिद्धा गन्धर्वाप्सरसो गणाः ।
पूजया फलदा प्रोक्ता अत्र नित्यं व्यवस्थिताः ॥३३॥

न तत्कक्ष्यं महादेवि न मृतिकाशला मता ।
यत्र देवमयं प्रोक्तमस्मिन्पुण्ये महागिरौ ॥३४॥

---

२८ खः मा सवृष्टिश्च—सुवृष्टिश्च

कलौ सर्वात्तिहरणं मम सान्निध्यकारणम् ।
सर्वापराधशमनं परं भक्तिविवर्धनम् ॥३५॥

देवीपीठमिदं प्रोक्तं श्रीविद्यायन्त्रमुत्तमम् ।
दारिद्र्यदुःखशमनं कलौ सर्वत्र सिद्धिदम् ॥३६॥

विद्याकामैः सिद्धिकामैर्धनकामैर्विशेषतः ।
मुक्तिकामैर्वृद्धिकामैः पूजनीयमनुत्तमम् ॥३७॥

विद्यार्थी लभते विद्यां धनकामोऽर्थमुत्तमम् ।
तपः कामो महादेवि तपः सिद्धिमवाप्नुयात् ॥३८॥

तेजस्कामः परं तेजः पशुकामः पशूंल्लभेत ।
विनीतो विनयं देवि मुच्येदापन्न आपदः ॥३९॥

ब्रह्मवर्चस्कामस्तु ब्रह्मवर्चसमाप्नुयात् ।
पुण्यकामः परं पुण्यं श्रीकामः श्रियमाप्नुयात् ॥४०॥

कीर्तिकामः परां कीर्ति यशस्वी यश उत्तमम् ।
रोगाद्विमुच्यते रोगी बन्धो मुच्येत बंधनात् ॥४१॥

---

३७ गः मा भुक्तिकामैः—मुक्तिकामैः
४० खः मा ब्रह्मवर्चसमाश्रयात् – ब्रह्मवर्चसमाप्नुयात्
४१ खः मा यशमुत्तमम् – यशं उत्तमम्
गः मा रोगादिमुच्यते – रोगाद्विमुच्यते

सर्वान्कामानवाप्नोति पूजयित्वा महेश्वरीम् ।
प्रद्यु्म्नशिखरे पुण्ये शीघ्रपुण्यप्रदे कलौ ॥४२॥

. . . . . . . . . . . . . . . . . . . . . . . . . ।
पूजयित्वा महादेवीं सर्वसिद्धिमवाप्नुयात् ॥४३॥

इति [श्री] श्रीसंहितायां शारिकापरिच्छेदे श्रीशारिका-
प्रादुर्भावो नाम द्वितीयः पटलः ॥२॥

---

४२ गः मा प्रदुम्नशिखरे —प्रद्यु्म्नशिखरे
घः मा शेघ्रपुण्यप्रदे—शीघ्रपुण्यप्रद

# अथ तृतीयः पटलः

श्रीभैरवी

कस्मिन्काले महादेव पूजनीयं विशेषतः ।
श्रीशीघ्रसिद्धिदं पीठं कलौ प्रद्युम्नसंज्ञकम् ॥१॥

कदा कदा कुत्र कुत्र का का पूज्या च देवता ।
अत्र पीठे महारम्ये शारिकाख्ये गिरौ शिवे ॥२॥

. . . . . . . . . . . . . . . . . . . . ।
वद सत्यं महादेव लोकानुग्रहकाम्यया ॥३॥

श्रीभैरवः

शृणु सत्यं वरारोहे प्रद्युम्नं शिखरं महत् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥४॥

कार्यारम्भस्य सिद्ध्यर्थं द्यूतविजयकांक्षिभिः ।
शारिका नाम सा देवी पूजनीयोत्तरे सदा ॥५॥

यस्याः पूर्वे सदा पूज्या दीर्घरोगिभिरनुग्रहम् ।
सुपथ्या नाम सा देवी महारोगविनाशिनी ॥६॥

---

१ घः मा कले—कलौ
६ गः मा सुपथा—सुपथ्या

कूष्माण्डवेतालयुतैर्डाकिनी भूतसङ्कुलैः ।
हाकिनीशाकिनीभिश्च ग्रस्तबालाननेकश: ॥७॥

शीतला सर्पिणी दूलदूर्जिता ग्रहसङ्कुलैः ।
पूज्यात्रैव महादेवि शीतला नाम नामतः ॥८॥

मैथुनीभूतच्छायाभिः सूतिकाग्रहभूतकैः ।
ग्रस्तैः पूज्यात्र वै देवि शीतला देवता परा ॥९॥

महादारिद्र्यदु:खौघपरिभूतैः प्रयत्नतः ।
दुर्भिक्षसंस्तुवैश्चापि पूजनीया महेश्वरी ॥१०॥

देव्याः पश्चिमभागे वै यक्षिणी धनदार्चिता ।
तत्रैव पूज्या देवेशि महामारीसमुद्भवा ॥११॥

घोरे प्रतिभये रौद्री देवी नाम विशेषतः ।
महाभये समुत्पन्ने घोरे वै शत्रुविग्रहे ॥१२॥

सङ्कटे च महारौद्रीं भैरवीं तत्र पूजयेत् ।
पूजनीया प्रयत्नेन भैरवी भैरवार्चिता ॥१३॥

---

७ ग: मा हाकनी—हाकिनी

८ क: मा सपिणी—सर्पिणी

९ क: मा मिथुनी—मैथुनी

सेनानीभिश्च शूरैश्च दुर्गरक्षभिरन्तरैः ।
संग्रामिकैर्महाशूरैः शंखिनी नाम विश्रुता ॥१४॥

पीठस्य दक्षिणे भागे पूजनीया महेश्वरी ।
तारा समर्चनीयात्र संसारार्णवतारिणी ॥१५॥

देशोपद्रवसम्भूते महाराजभये तथा ।
उग्रतारात्र देवेशी पूजनीया सुरेश्वरी ॥१६॥

देशस्योत्सादने चैव तथा च शत्रुसङ्कटे ।
उच्चाटने स्तम्भने च पूजनीया प्रयत्नतः ॥१७॥

तत्रैव दक्षिणा नाम कालिका लोकविश्रुता ।
महाव्याघ्रभये घोरे घोरशत्रुसमागमे ॥१८॥

शर्वरी पूजनीयात्र विषसर्पसमाकुले ।
ज्वालामुखी महादेवी वह्निमारुतसङ्कुले ॥१९॥

पूजनीया प्रयत्नेन सर्वसिद्धिकरी परा ।
पूज्या राजभये घोरे महाराज्ञीति विश्रुता ॥२०॥

---

१६ घः मा सुरीश्वरी—सुरेश्वरी

१७ खः मा शत्रसङ्कटे—शत्रुसङ्कटे

१८ खः मा कलिका—कालिका

१९ घः मा वह्निमारुत—वह्निमारुत

निगडैर्मुक्तिकामैस्तु बन्दीमत्र समर्चयेत् ।
राज्यकामो राज्यलक्ष्मीं राजनीतिर्महेश्वरि ॥२१॥

शुद्धकामोऽत्र देवेशि गङ्गां मन्दाकिनीं श्रयेत् ।
वस्त्रकाम: सुवस्त्राञ्च बुद्धिकाम: सुबुद्धिकाम् ॥२२॥

यानकामोऽत्र चेशानि पूजयेन्नरवाहनाम् ।
योगकामो महादेवि श्यामां षट्चक्रभेदिनीम् ॥२३॥

सर्वोद्भूतभये देवि सुमुखीमत्र पूजयेत् ।
चण्डालश्वपदोद्भूतपुक्कसे च तथा भये ॥२४॥

पूजनीयात्र देवेशि मातङ्गी नाम चेश्वरी ।
पशूनां मरणे घोरे रौद्री शक्तिरनुत्तमा ॥२५॥

कालरात्रिर्महादेवी पूजनीयात्र विश्रुता ।
विघ्नै: परिवृतो देवि शक्तिं वैनायकीं श्रयेत् ॥२६॥

श्मशाने भैरवोद्रिक्तो यजेत् श्मशानवासिनीम् ।
एकान्तवासिनीं चात्र ग्रहदोषे समर्चयेत् ॥२७॥

त्रिविधे वाद्भुतेऽत्रैव यजेत् भुवनेश्वरीम् ।
गायत्रीञ्चैव सावित्रीं सरस्वतीं तथैव च ॥२८॥

---

२२ ग: मा स्वनस्त्राञ्च—सुवस्त्राञ्च

२६ घ: मा विनायकीं—वैनायकीं

२७ घ: मा गहदोषे—ग्रहदोषे

ब्रह्मवर्चस्कामस्तु पूजयेत् महेश्वरीम् ।
परब्रह्मात्मिकां देवीं बालां त्रिपुरसुन्दरीम् ॥२९॥

भजेदत्र महेशानि भुक्तिमुक्तिप्रदायिनीम् ।
देवीं पञ्चदशीं चात्र महात्रिपुरसुन्दरीम् ॥३०॥

सर्वपापहरां देवीं सर्वसिद्धिकरीं पराम् ।
सर्वार्तिहारिणीं देवीं सर्वलोकविनाशिनीम् ॥३१॥

महापापहरां देवीं घोरपातकनाशिनीम् ।
सर्वदुष्टहरां देवीं घोररोगविनाशिनीम् ॥३२॥

दुःस्वप्नशमनीं तत्र पूजयेत्सर्वसिद्धिदाम् ।
उपासकैर्वर्षमेकं स्थित्वात्र जगदम्बिके ॥३३॥

मिताशनः पूजयित्वा महादेवीं महेश्वरीम् ।
मंत्रसिद्धिमवाप्नोति चेति सत्यं वदामि ते ॥३४॥

माहेश्वरीं महामायां योगमायां महेश्वरीम् ।
तरुणां तरुणाञ्चात्र तथा नीलसरस्वतीम् ॥३५॥

---

२९ गः मा परब्रह्मात्मकां—परब्रह्मात्मिकां

३१ गः मा सर्वातिहारिणी —सर्वार्तिहारिणीं

३२ घः मा गोररोगविनाशिनी—घोररोगविनाशिनीं

३४ गः मा मित्रसिद्धमवाप्नोति —मन्त्रसिद्धिमवाप्नोति

कामां कामेश्वरीं देवीं च्छिन्नमस्तां वरप्रदाम् ।
जम्बुकां जम्बुकेशीञ्च ... ... प्रपूज्य वै ॥३६॥

मुच्यते सर्वपापेभ्यो घोरेभ्योऽपि महेश्वरि ।
कपटान्मुच्यते जन्तु* - - - रेभ्योऽपि पार्वति ॥३७॥

बुद्धिस्वास्थ्यं मनः स्वास्थ्यं स्वास्थ्यमिन्द्रियकं तथा ।
भविष्यति न सन्देहः पूजकस्यापि पार्वति ॥३८॥

ललितां मूढधी* - - - - पूजयेत्सुरसुन्दरि ।
कुलवागीश्वरीञ्चात्र पूजयेत् कुलकांक्षया ॥३९॥

शारदामत्र देवेशि पूजयेदत्र सिद्धये ।
मन्त्री श्रीं पूजयेदत्र मन्त्रसिद्धयर्थमात्मनः ॥४०॥

वेदकांक्षी पूजयेत् वेदवेदाङ्गधारिणीम् ।
कोशदां कोशकांक्षीञ्च पूजयेज्जगदम्बिकाम् ॥४१॥

सर्वसिद्धिकरीञ्चात्र सर्वसिद्धयर्थमात्मनः ।
तथा भ्रमरदष्टासौ भ्रामरीञ्चात्र पूजयेत् ॥४२॥

भक्त्यर्थं देवदेवस्य पूजयेद्भक्तवत्सलाम् ।
पूजयेदत्र देवेशि सर्वकामार्थसिद्धये ॥४३॥

---

*त्रुटितोऽत्र पाठः

आत्मनश्च परस्यापि सर्वमङ्गलमङ्गलाम् ।
किं पुनर्बहुनोक्तेन गिरौ रम्येत सुन्दरि ॥४४॥

सर्वदेवमयं सर्वशक्तिरूपं महेश्वरि ।
पीठे प्रद्युम्नके सर्वा देवता वै प्रपूजयेत् ॥४५॥

सर्वकामानवाप्नोति सर्वदुष्टान्निवारयेत् ।
महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ॥४६॥

दृष्ट्वा स्मृत्वा महापीठमर्चयित्वा प्रमुच्यते ।
अपमृत्योरपीशानि मुच्यते नात्र संशयः ॥४७॥

महाभयहरं पीठं प्रद्युम्नाख्यं कलौ स्मृतम् ।
सर्वसिद्धिकरञ्चैव सर्वसंपत्प्रवर्तकम् ॥४८॥

दुर्गोत्सवे महादेवि पूजयेत् महाम्बिकाम् ।
अत्र पुण्ये गिरौ रम्ये सिद्धिं प्राप्य तु मुच्यते ॥४९॥

भौमे शनैश्चरे चात्र पूजयेज्जगदम्बिकाम् ।
सर्वसिद्धिमवाप्नोति मुच्यते व्याधिसङ्कटात् ॥५०॥

---

४४ घः मा रम्येति—रम्येत

४८ खः मा कलस्मृतो—कलौ स्मृतम्

५० गः मा स च सिद्धिमवाप्नोति—सर्वसिद्धिमवाप्नोति

स्तुत्वा जप्त्वार्चयित्वा तु देवीमत्र प्रमुच्यते ।
पातकैः सङ्कटैश्चापि सत्यं सत्यं वरानने ॥५१॥

प्रापणञ्चात्र यः क्षीरं सर्पिखण्डयुतं प्रिये ।
. . . . . . . . . . . . . . . . . . . . . . . . ॥५२॥

शर्करं वा फलं वापि मूलं वा सुरसुन्दरि ।
प्रापणं दीयते यस्तु तस्य सिद्धिर्भवेद्ध्रुवम् ॥५३॥

क्षीरेण स्नापयेद्यन्त्रं देवीभक्तिसमन्वितः ।
सर्वसिद्धिर्भवेत्तस्य भवभक्तिश्च जायते ॥५४॥

कुङ्कुमागुरुकर्पूरचन्दनैर्मृगनाभिभिः ।
सिन्दूरागुरुसिह्लैश्च तथा तैलसुगन्धिभिः ॥५५॥

लेपयेद्योऽत्र देवेशीं स याति परमां गतिम् ।
सर्वसिद्धिर्भवेत्तस्य सर्वञ्च कथितं मया ॥५६॥

मत्स्यैर्मांसैरपूपैश्च वटुकैर्बभरैस्तथा ।
शतच्छिद्रैश्च ताम्बूलैः पुष्पैर्नानाविधैरपि ॥५७॥

---

५५ गः मा सिन्दुरगुरुसिलैश्च — सिन्दूरागुरुसिह्लैश्च
५७ खः मा वटुकैर्भबभरैस् — वटुकैर्बभरैस्
— गः मा शतच्छिप्रैश्च — शतच्छिद्रैश्च

मुक्ताभिर्मणिभिश्चैवा छत्रैर्यो पूजयेच्छिवाम् ।
स याति दिव्यलोकं तु यत्र गत्वा न शोचते ॥५८॥

सर्वविद्याप्रदं देवि पीठं प्रोक्तं महात्मना ।
सर्वशान्तिकरं पीठं सर्वसिद्धिकरं परम् ॥५९॥

यः शृणोति महेशानि पीठं माहात्म्यमुत्तमम् ।
सर्वसिद्धिमवाप्नोति सर्वारिष्टं निवारयेत् ॥६०॥

इतीमं पटलं गुह्यं शारिकागिरिसंश्रयैः ।
श्रुत्वा पठित्वा मुच्येत घोरैः पातकसञ्चयैः ॥६१॥

इति श्रीसंहितायां श्रीशारिकापरिच्छेदे प्रद्युम्नपीठपूजामहिमा
वर्णनं नाम तृतीयः पटलः ॥३॥

---

५८ खः मा क्षत्रैर्या—छत्रैर्यो
५९ खः मा प्रोषं—प्रोक्तं
६१ कः मा इतिनं—इतीमं

## अथ चतुर्थः पटलः

श्रीभैरवी

वद सत्यं महादेव देवीनामत्र निर्णयम् ।
शिला कतिविधाः कथं प्रत्यभिज्ञायते भवेत् ॥१॥

श्रीभैरवः

श्रीशारिका ह्येकशिला ह्युमा वै द्विशिला मता ।
टङ्कधारिण्येकशिला तारा चैव चतुःशिला ॥२॥

पार्वती द्विशिला देवि ह्यत्र नित्यं प्रतिष्ठिता ।
धर्मण्येकशिला देवि त्वरिता द्विशिला मता ॥३॥

भुवनेश्यत्र वै प्राच्यां सर्वैः प्रोक्ता शिलोच्चया ।
त्रिलोकेश्यत्र त्रिशिला ह्यम्बिका चापि तादृशी ॥४॥

एकान्तवासिनी देवी सर्वशक्तिसमन्विता ।
शिलोच्चया बुधैः प्रोक्ता सर्वसिद्धिप्रदायिनी ॥५॥

शीतला च सुशीला च बालग्रहविनाशिनी ।
एकत्र संस्थिता ह्यत्र लिङ्गाकारा मता बुधैः ॥६॥

---

१ घः मा कस्य—कथं

२ गः मा टङ्कधारिणीकशिला—टङ्कधारिण्येकशिला

सर्वसिद्धिप्रदादेव्यः पूजनीयाः प्रयत्नतः ।
कुलवागीश्वरीं ह्यत्र द्विशिलां पूजयेन्नरः ॥७॥

त्रिशिलां शारदां चात्र पूजयेत्सर्वसिद्धिदाम् ।
मन्त्रेश्येकशिलारूपां पूजयेन्मन्त्रसिद्धये ॥८॥

त्रिशिलां वेदवेदाङ्गधारिणीमत्र पूजयेत् ।
चतुःशिलां कोशदां तु कोशकांक्षी यजेच्चिरम् ॥९॥

द्विशिलां मन्त्रदेवेशीं सर्वसिद्धिकरीं यजेत् ।
भ्रामरीमत्र देवेशि पीठे प्रद्युम्नसंज्ञके ॥१०॥

शिलैकरूपा पूज्यात्र भ्रमान्मुच्येत तत्क्षणात् ।
द्विशिलां पूजयेच्चात्र भक्तो वै भक्तवत्सलाम् ॥११॥

महापद्मामेकशिलां महालक्ष्मीञ्च तादृशीम् ।
महामायां त्रिशिलां तु महेशीञ्च चतुःशिलाम् ॥१२॥

श्रीमती चैकरूपा तु त्रिपुरा त्रिशिला मता ।
त्रिशृङ्गा तु त्रिकूटोक्ता बालापि त्रिशिला मता ॥१३॥

---

७ गः मा कुलवागेश्वरी—कुलवागीश्वरी

८ खः मा पूजयेसर्वसिद्धिदां—पूजयेत्सर्वसिद्धिदाम्

११ घः मा भतवत्सलाम्—भक्तवत्सलाम्

१२ कः मा महापद्मम्—महापद्माम्

१३ गः मा त्रिशुङ्गा—त्रिशृङ्गा

पञ्चशिला तु तरुणी देवी पञ्चदशाक्षरी ।
उग्रतारा महादेवि प्रोक्ता ह्यत्र शिलोच्चया ॥१४॥

तारा चैकशिला ह्यत्र बुद्धिसिद्धिप्रदायिनी ।
लिङ्गाकारा महाकाली तथा ह्येकशिला मता ॥१५॥

द्विशिला दक्षिणा काली प्रोक्ता साधकसम्मता ।
मातङ्गी त्रिशिला ह्यत्र सुमुखी चापि तादृशी ॥१६॥

विनायकी द्विशिला तु शङ्खिनी च चतुःशिला ।
महापद्मावती ह्यत्र प्रोक्ता पञ्चशिला बुधैः ॥१७॥

महारुण्डा चैकशिला रौद्री चैव चतुःशिला ।
भैरवी भैरवाकारा तथा चैकशिला मता ॥१८॥

द्विशिला तु बुधैः प्रोक्ता महाभैरवपूजिता ।
महाभयहरा ह्यत्र त्रिशिला देवि सम्मता ॥१९॥

सौम्या चैकशिला देवि महारौद्रापि तादृशी ।
महामारी चैकशिला नैर्ऋत्यां पूजयेत्सदा ॥२०॥

---

१६ घः मा स्यमुखी—सुमुखी
२० गः मा महामरी—महामारी
घः मा नैनृत्यां—नैर्ऋत्यां

द्विशिला देवदेवेशी महामृत्युविनाशिनी ।
पूजयित्वा प्रयत्नेन महामृत्युभयं हरेत् ॥२१॥

चित्रिण्यत्रानेकशिला चित्रमायापि तादृशी ।
अम्बिका चाप्येकशिला ह्यत्र पीठे प्रशस्यते ॥२२॥

वात्पाली वर्तुलाकारा शिलारूपा न संशयः ।
सुवृष्टिश्चात्र द्विशिला महाराज्ञ्यपि तादृशी ॥२३॥

महेज्या च महादेवि प्रोक्ता ह्येका शिला बुधैः ।
महालक्ष्मीमेकशिलां पूजयेत प्रयत्नतः ॥२४॥

महामायां ह्यत्र नित्यं पूजयेत च संस्थिताम् ।
योगमाया ह्यत्र देवी द्विशिला प्रोच्यते बुधैः ॥२५॥

त्रिशिलात्र सदा पूज्या महामाहेश्वरी बुधैः ।
ज्वालामुख्यापि देवेशी तथा चैकशिला मता ॥२६॥

---

२३ कः मा वर्तलकारा—वर्तुलाकारा

२४ कः मा महेज्याश्च—महेज्या च

२५ खः मा मुच्चयेन—पूजयेत

२६ खः मा महामहीश्वरी—महामाहेश्वरी

आशा पूरा चात्र देवी पूजनीया प्रयत्नतः ।
शिला ह्येका तु सा प्रोक्ता भवदुर्गप्रतारिणी ॥२७॥

आदित्यरुद्रा देवौघाः प्रत्येकं मुनयस्तथा ।
शिलैकरूपा ह्यत्रैव पूजनीयाः प्रयत्नतः ॥२८॥

देवाः सिद्धर्षयश्चैव गन्धर्वा यक्षराक्षसाः ।
शिलैकरूपाः पूज्याः परत्रनित्यं प्रतिष्ठिताः ॥२९॥

मृदश्च दृषदश्चापि कक्ष्यस्यापि न संशयः ।
कुर्वन्नुपासनामत्र सर्वसिद्धिमवाप्नुयात् ॥३०॥

इत्येष पटलो गुह्यस्तवस्नेहात्प्रकाशितः ।
श्रुत्वा पठित्वा मुच्येत महापातकसञ्चयैः ॥३१॥

इति श्री श्रीसंहितायां श्रीशारिकापरिच्छेदे प्रद्युम्नपीठसर्वशिला देवीरूपा महिमा नाम चतुर्थः पटलः ॥४॥

---

२८ खः मा युनस्तथा—मुनयस्तथा
३० खः मा कक्षस्यापि—कक्ष्यस्यापि

## अथ पञ्चमः पटलः

श्रीभैरवी

प्रत्यभिज्ञानपटलं श्रुत्वा प्रीतास्मि सुन्दर ।
स्मारं स्मारं महादेव विभवं पापनाशनम् ॥१॥

कृतार्थास्मि कृतार्थास्मि निर्वृत्तास्मि भवाम्बुधेः ।
इदानीं श्रोतुमिच्छामि तूपचारान्महेश्वरि ॥२॥

. . . . . . . . . . . . . . . . . . . . . . ।
अस्याः प्रदक्षिणञ्चैव वद लोकहितेच्छया ॥३॥

श्रीभैरवः

शृणु वक्ष्ये महादेवि रहस्यं परमाद्भुतम् ।
अस्य शक्तिस्वरूपस्य पीठस्य परिदक्षिणम् ॥४॥

श्रोतुमिच्छसि यन्मोहादनन्तस्यान्तमीश्वरि ।
शक्तिमूलाद्व्रजेत्तारां ताराया गणचक्रकम् ॥५॥

---

२ गः मा श्रोतुमिच्छास्मि—श्रोतुमिच्छामि

३ ग मा प्रदक्षणञ्चैव—प्रदक्षिणञ्चैव

घः मा लोकहितच्छया—लोकहितेच्छया

ततः कालीञ्च गच्छेत्तु ततो गुप्तान्तमीश्वरि ।
अन्तरा शारमासाद्याद्यावद्वंद्यन्तमीश्वरि ॥६॥

दुर्गाजननिसव्याद्वा व्रजेद्वद्यां समन्ततः ।
पञ्चक्रोशपरिमाणं प्रदक्षिणमुदाहृतम् ॥७॥

कलौ पादावशेषं तु शक्तिपीठं प्रदक्षिणम् ।
ओंकारपीठमेतद्वै पीठं प्रद्युम्नकं परम् ॥८॥

इदमेव परं ब्रह्म इदमेव परा गतिः ।
शक्तिपीठात्मिका प्रोक्ता वेदाद्यः प्रणवः परः ॥९॥

यः करोति सदा देवि कलौ पीठप्रदक्षिणम् ।
पदे पदेऽश्वमेधस्य फलमाप्नोति मानवः ॥१०॥

गृहात्प्रचलितस्यापि यावन्तः पांसुविन्दवः ।
तावत्कल्पं वसेद्देवि मम लोके निरामयः ॥११॥

---

७ गः मा पञ्चकोशपरिमानं —पञ्चक्रोशपरिमाणं

९ घः मा वेदाम: —वेदाद्यः

१० ग. मा पदेवमेधस्य —पदेऽश्वमेधस्य

११ खः मा पसुविन्दवः —पांसुविन्दवः

स एव रुद्र: स एव ब्रह्मा स हरिश्च सदाशिव: ।
स धाता स विधाता च कर्ता कारयिता च य: ॥१२॥

य: करोति महेशानि प्रातरुत्थाय प्रक्रमम् ।
. . . . . . . . . . . . . . . . . . . . . . . . . ॥१३॥

मण्डले प्रणवाख्ये च परिक्रमति नित्यश: ।
वेदपारायणं पुण्यं प्राप्नोत्येव न संशय: ॥१४॥

अर्धं वा पादशेषं वा परिक्रमति मण्डलम् ।
इह पुत्री सुखी भूत्वा सोऽन्ते याति परां गतिम् ॥१५॥

प्रदक्षिणीकृतं येन मण्डलं वीरपूजिते ।
प्रदक्षिणी कृता भूमि: सशैलवनकानना ॥१६॥

प्रणवाख्यस्य पीठस्य परिदक्षिणत: प्रिये ।
स याति शिवसायुज्यं यत्र गत्वा न शोचते ॥१७॥

स्वेष्टं स्वेष्टमपीशानि प्रदक्षिणपरायण: ।
स एव पूज्य: स श्रेष्ठ: स ज्येष्ठो लोकपूजित: ॥१८॥

---

१४ ख: मा प्राप्नुयेव—प्राप्नोत्येव

१८ क: मा स्वीष्टमपीशानि—स्वेष्टमपीशानि

ज्वालां व्यासर्षिपूज्यां तु परिक्रमणतत्परः ।
स याति परमं लोकं यत्र गत्वा न शोचते ॥१९॥

अथवा केवलं शृङ्गं भक्तियुक्तः परिक्रमेत ।
इह भुक्त्वा भवेद्भोगी सोऽन्ते याति परां गतिम् ॥२०॥

यः प्रातरुत्थितो येन पूजयित्वा च नित्यशः ।
प्रक्रमेत महेशानि स वै याति परां गतिम् ॥२१॥

गर्भयोनिविनिष्क्रान्तः पूजयित्वा महेश्वरीम् ।
पूजयित्वा परिक्रम्य याति सादाशिवं पदम् ॥२२॥

प्रदक्षिणोद्यतस्यानुग्रहात्प्रचलितस्य च ।
यावन्तः कणिकाः पांसुस्तावद्गोदानिकं फलम् ॥२३॥

यो यो यां यां देवतां तु परिक्रमति नित्यशः ।
स स तस्य हि सादृश्यं याति नात्र विचारणा ॥२४॥

मृदं वा दृषदं वापि कक्ष्यं वा सुरपूजिते ।
पूजयित्वा श्रेष्ठबुद्ध्या प्रदक्षिणपरायणः ॥२५॥

---

२० ग: मा भवेद्रोगी — भवेद्भोगी

२३ ग:-घ: मा पांसुस्तायंददोदानिकं — पांसुस्तावद्गोदानिकं

२४ ग: मा देवन्नां तु — देवतां तु

२५ क. मा दृषिदं — दृषदं

... ... ... ... ... ... ... ... ... ... ... ... ... ... ।
सर्वसिद्धिमवाप्नोति मनुः फलति सर्वदा ॥२६॥

तुष्टिपुष्टिश्च लक्ष्मीश्च दासीव तिष्ठति गृहे ।
स्मृतिर्मेधा मतिः प्रज्ञा बुद्धिः सिद्धिर्न दूरतः ॥२७॥

सूर्येण पूजितं यन्त्रं चन्द्रेण च महेश्वरि ।
तेजः प्रकाशसंयुक्तः प्रथितो भुवनत्रये ॥२८॥

अत्रागस्त्यो महाघोरं तपस्तप्त्वा शतं सदा ।
यन्त्रराजं समभ्यर्च्य परां सिद्धिमवाप्नुयात् ॥२९॥

क्रोधभट्टारकश्चापि रुद्रेशो वीरवन्दिते ।
अत्रैव यन्त्रमभ्यर्च्य परां सिद्धिमगात् वै ॥३०॥

लोपामुद्रापि यन्त्रेशमत्र पूज्य शतं सदा ।
श्रीविद्याजपसंयुक्ता उपारुढाभवच्च सा ॥३१॥

कुबेरोऽपि महेशानि पूज्य यन्त्रेशसन्निधौ ।
निधीशो ह्यभवत्सद्यः शिवभक्तः शिवप्रियः ॥३२॥

---

२७ ख: मा तिष्ठते — तिष्ठति

ख: मा तपस्तप्त: — तपस्तप्त्वा

२९ ग: मा यत्रराजं — यन्त्रराज

३२ क: मा कुबीरोऽपि — कुबेरोऽपि

शक्रेणाप्यर्चितं येन यन्त्रं वर्षशतं पुरा ।
परिक्रम्य महालक्ष्मी प्राप त्रैलोक्यविश्रुतम् ॥३३॥

पुरा देवर्षयः सिद्धाः पन्नगोरगराक्षसाः ।
नागा भूताः पिशाचाश्च विद्याधरमहर्षयः ॥३४॥

. . . . . . . . . . . . . . . . . . . . . . . ।
सम्पूज्य यन्त्रराजं तु सिद्धिं परमिकां गताः ॥३५॥

वह्निनाप्यत्र देवेशि यन्त्रराजः समर्चितः ।
सर्वाभिभाविकं तेजः प्राप्तवान्परमं शिवे ॥३६॥

यमेनाप्यत्र यन्त्रेशः पूजितः परमादरात् ।
सर्वसंयमनं तेजस्प्राप्तवान्धर्ममुत्तमम् ॥३७॥

. . . . . . . . . . . . . . . . . . . . . . . ।
विद्याधरमूलसम्भूतः चित्रगुप्तोऽर्चयच्छिवम् ॥३८॥

प्रद्युम्नपीठे गिरिजे यन्त्रपूजनतत्परः ।
देवी प्रसाददुर्दृप्तो देवहासपरायणः ॥३९॥

श्रीविद्यादर्शने लग्नो जपध्यानपरायणः ।
यन्त्रेशपूजने सक्तो पश्येद्देवीमनुत्तमाम् ॥४०॥

---

३४ खः मा पन्नोरगराक्षसाः—पन्नगोरगराक्षसाः

३८ घः मा चत्रगुप्तः—चित्रगुप्तः

दृष्ट्वात्र देवीं दुर्दृप्तो जहासादितिसंभवः ।
हासं दृष्ट्वा देवराजो वज्रमुद्यम्य सुन्दरि ॥४१॥

प्राहरत्तस्य कायं तु मषीवर्णो भवेत्तदा ।
तत्कारयुक्तां देवेश्यां गतं पादतलं परम् ॥४२॥

शोणितौघं मषीवर्णं दृष्ट्वा तस्य कृपान्विता ।
मे समार्ज महादेवी तत्कायस्थं मषीचयम् ॥४३॥

चुरकाण्डनजातस्तु निर्व्यथः स तदा प्रिये ।
शरमार्जनतोयेऽसौ ह्यभवत्कायं उत्तमम् ॥४४॥

एषा वाक्षररूपेण प्रादुर्भूता यदा हृदि ।
निष्पथा च ततो देवी प्राह प्रश्रितया गिरा ॥४५॥

अद्यापि तिष्ठत्काये मे लोहितं कृष्णपिङ्गलम् ।
स्पर्शेन जाने देवेशि भवेदनिर्व्यथो यतः ॥४६॥

श्रुत्वा तस्य वचो सौम्यं शरणं मार्जयत्युत ।
. . . . . . . . . . . . . . . . . . . . . ॥४७॥

---

४२ खः मा मसीवर्णः—मषीवर्णो
गः मा देवीश्यां—देवेश्यां

४५ घः मा प्रश्रिता गिरा—प्रश्रितया गिरा

तत्कायविपरीताच्च रेखाः समभवन्प्रिये ।
ताश्च म्लेच्छाक्षराण्यासन्कलिवृद्धिकराणि च ॥४८॥

ततः प्रोवाच तं देवी पुत्र ते यदनागता ।
प्रोवाच तां महादेवीं चित्रगुप्तः प्रतापवान् ॥४९॥

काकृतिस्तिष्ठति देवि वेदना निर्गता न हि ।
न जाने कारणं कार्यं निर्गता वेदना न मे ॥५०॥

प्रोवाच देवदेवी तं मा वै पुत्र कलेवरे ।
वेदना निर्गता सत्यं किन्तु म्लेच्छार्णपद्धतिः ॥५१॥

. . . . . . . . . . . . . . . . . . ।
विपरीता शरा ज्ञाताप्यत्र काये हि तिष्ठति ॥५२॥

आगामिनि कलौ पुत्र विपहस्तास्तु जन्तवः ।
बुद्धिहीनाः सिद्धिहीना वृद्धिहीना विजन्मनः ॥५३॥

दारिद्र्यशोकसंविघ्नक्षुत्पिपासार्दिता भृशम् ।
भविष्यन्ति न सन्देहो वेदशास्त्रपराङ्मुखाः ॥५४॥

---

४९ खः मा यनागता—यदनागता

५० खः मा वदना निगता न हि—वेदना निर्गता न हि

५४ खः मा क्षुत्पिपासा क्षुत्पिपासा

स्वधर्मत्यागिनो वर्णा भविष्यन्ति कलौ युगे ।
तेषामुपायो जातस्त्वत्काये वर्णपद्धतिः ॥५५॥

उल्लग्नाः सर्ववर्णास्तु भविष्यन्ति न संशयः ।
मत्प्रसादाच्च ते रक्ते शुद्धि स्यान्न संशयः ॥५६॥

देवी प्रसादजाताय निर्वृथाय महात्मने ।
मषीकलं सहस्ताय चित्रगुप्ताय वै नमः ॥५७॥

तस्मादत्र विपरीता वर्णपद्धतिरुद्गता ।
भवते देवतारुढा कायेऽस्मिस्तिष्ठति सदा ॥५८॥

. . . . . . . . . . . . . . . . . . . . . . . . ।
तस्मात्कायस्य इत्याख्ये भविष्यसि कलौ युगे ॥५९॥

चित्रं गुप्तोऽभिवज्ज्रं तु मया त्वं वै यतः स्वयम् ।
तस्मात्त्वं चित्रगुप्ताख्यो भविष्यसि न संशयः ॥६०॥

त्वद्देहसम्भवं रक्तमुत्पादं कृष्णतां गतम् ।
मषकाभं ततस्त्वं तु मषी भवतु माचिरम् ॥६१॥

या धारा लोहिता काया निस्सृता तव पुत्रक ।
सैव लाक्षेति नाम्ना वै प्रथिता भुवनत्रये ॥६२॥

---

५५ घः मा ढकाये—त्वत्काये

५९ गः मा इत्यख्ये—इत्याख्ये

६० कः मा चित्रगुप्तोभिवज्ञ—चित्रगुप्तोऽभिवज्ञं

द्वितीया याभवद्धारा नीलवर्णा त्वदंगता ।
तत्कज्जलं भवेत्त्वमृत्हितकृल्लेखकेष्विह् ॥६३॥

मिश्रिता लाक्षया नीलमषीति ह्यभिधावली ।
लेखकानां हितार्थाय भवेद्धेषा प्रकाशिता ॥६४॥

शरकांडेन यच्चात्र कार्यं ते मार्जितं मया ।
तदेव लेखनीरूपं जायते मदनुग्रहात् ॥६५॥

इदं लोहितकं भांडं कृत्वा हस्ते निगोयताम् ।
द्वितीये शरकांडं तु गृहीत्वा तिष्ठ पुत्रक ॥६६॥

दक्षिणेशवशो नित्यं लिख सर्वंशुभाशुभम् ।
वत्स त्वां तर्पयिष्यन्ति मनुष्या नित्यमेव हि ॥६७॥

मुदक्तश्चिरमातिष्ठ मत्प्रसादाद्भविष्यसि ।
सिद्धिवृद्धिप्रदस्तेषां भविष्यसि न संशयः ॥६८॥

श्रीभैरवः

इति प्रसादितो देव्याश्चित्रगुप्तो महेश्वरि ।
यमाज्ञापनमाश्रित्य तस्थौ चिरमतन्द्रितः ॥६९॥

---

६३ घः मा स्विह्—ष्विह्

६४ घः मा प्रकाशितः—प्रकाशिता

६७ खः मा लिखि—लिख
गः मा तर्पयष्यामि—तर्पयिष्यन्ति

तत्र लब्धवरो देवि जातकायस्य उत्तमः ।
नृत्यति तत्र देवेशि पीठे प्रद्युम्नसंज्ञके ॥७०॥

मांसमद्योपहारेण पूजयांश्च महेश्वरीम् ।
यन्त्रपूजनसंसक्तो लोकपालोऽभवच्चिरम् ॥७१॥

वरुणश्चात्र देवेशि यंत्रे संपूज्य चेश्वरीम् ।
केवलैश्च जलैर्देवि जडात्मादिच्युतिर्भवेत् ॥७२॥

वायुरप्यत्र यन्त्रेशे पूज्य त्रिपुरसुन्दरीम् ।
स्पर्शेन स्पर्शरूपोऽसौ बभूव दिक्पतिर्महान् ॥७३॥

कुबेरो नित्यशश्चात्र यन्त्रपूजनतत्परः ।
अस्नायी यक्षरूपोऽसौ दिक्पालः प्रबभूव सः ॥७४॥

ईशानोऽत्र महादेव्या मन्त्रपूजापरायणः ।
सर्वैश्वर्यञ्च सर्वज्ञं दिक्पालत्वमवाप सः ॥७५॥

ग्रहाणां नवकञ्चात्र यन्त्राराधनतत्परम् ।
दिक्पालेभ्योऽन्तरं पूजां प्राप सर्वज्ञतामपि ॥७६॥

नागा देवगणाश्चात्र यन्त्रपूजापरायणाः ।
देवानां वाहनत्वञ्च गत्वा देवि सुरेश्वरि ॥७७॥

---

७० घः मा नित्यति — नृत्यति

७१ कः मा मांसमुद्योपहारेन — मांसमद्योपहारेण

७६ खः मा यन्त्रराधन — यन्त्राराधन

यद्यच्च विभवं लोके यद्यद्दिव्यं महत्सुखम् ।
तत्तदाप्नोत्यसंदिग्धं श्रीचक्रस्य च पूजनात् ॥७८॥

असमर्थश्च य: कश्चिद्देवभक्तिसमन्वित: ।
गृहेऽपि यन्त्रपूजां वै कुर्वीत विधिना प्रिये ॥७९॥

तावच्च पूज्यं यन्त्रं वा शालिग्रामशिलोद्भवम् ।
*...... ह्युत्तमं तत्कथितं पूर्वसूरिभि: ॥८०॥

तदभावे मणिमयं स्फटिकं तदभावत: ।
सर्वधातुमयं यन्त्रं पूजयेत्तदभावत: ॥८१॥

पूर्वं पूर्वतरं शस्तं पूज्यते वीरपूजिते ।
चक्रं तिष्ठति यद्गेहे सर्वदेवमयं यत: ॥८२॥

.............................।
पूजितं यन्त्रमीशानि वसन्ति तत्र देवता: ॥८३॥

न विघ्ना कालकर्णी च विपदश्च ह्यनेकधा ।
ज्येष्ठा पिशाचा: क्रूराश्च ग्रहभूतगणा अपि ॥८४॥

---

७८ ग: मा तत्तदाप्नोतियसंदिग्धं — तत्तदाप्नोत्यसंदिग्धं

७९ घ: मा कुर्वेत — कुर्वीत

८० ख: मा सलिग्राम — शालिग्राम

*ग: त्रुटितोऽत्रपाठ:

८४ ग: मा कूराश्च — क्रूराश्च

यक्षरासक्षवेताला पापरोगा अपीश्वरि ।
न विश्यन्ति गृहे तस्मिन्निति सत्येन ते शपे ॥८५॥

यत्र दर्शनमीशानि महापापहरं मतम् ।
दुःखदारिद्र्यहरणं पूजनात्परिकीर्तितम् ॥८६॥

स्पर्शात्सौभाग्यजननं वन्दनान्नंददायकम् ।
अनुलेपनदेहस्य शोधनं परमं स्मृतम् ॥८७॥

पञ्चायतनभक्तोऽपि पूजनाद्यन्त्रनायकम् ।
सर्वपूजाफलं प्राप्य सोऽन्ते याति परां गतिम् ॥८८॥

कायशोधनपापघ्नं कलिदोषनिवारणम् ।
यन्त्रराजं समभ्यर्च्य याति सादाशिवं पदम् ॥८९॥

अपि पापसमाचारः कोटिहत्यार्दितः शिवे ।
यन्त्रेशं प्रातरुत्थाय पूजयित्वा शिवं व्रजेत् ॥९०॥

देवानां दुर्लभं यन्त्रं शालिग्रामशिलोद्भवम् ।
अनेकजन्मसम्भूतैः पुण्यैः प्राप्येत सुन्दरि ॥९१॥

---

८६ ख. मा महापारं – महापापहरं

८९ क: मा कायशोदन – कायशोधन

९१ ख: मा सालदामसिलोद्भवं – शालिग्रामशिलोद्भवं

चर्कति घोरपापानि पूजनाद्वन्दनादपि ।
दर्शनात् स्पर्शनात्स्नानं चक्रमेतदुदाहृतम् ॥६२॥

योजनाज्जायते यस्माद्याजकं वीरवन्दिते ।
अतो यन्त्रस्य यत्तत्वं कथितं तन्त्रपारगैः ॥६३॥

यमैश्च नियमैश्चैव यजनाज्जायते *- - - कम् ।
तस्माद्यन्त्रमिति प्रोक्तं मन्त्रतन्त्रविशारदैः ॥६४॥

यमिनश्च सुभक्तस्य त्राणादपि महेश्वरि ।
यन्त्रमेतत्पुराविद्भिः कथितं भुवि दुर्लभम् ॥६५॥

यन्त्रपूजापरो यस्तु प्रातरुत्थाय सुन्दरि ।
कलिकाले महाघोरे सदैव भुवि दुर्लभः ॥६६॥

तस्मात्सर्वप्रयत्नेन पूजयेत् महेश्वरीम् ।
यन्त्ररूपे महाचक्रे याति सादाशिवं पदम् । ६७॥

बहुनात्र किमुक्तेन कलावस्मिन्सुदुःखहा ।
यां काञ्चिद्देवतामिष्ट्वा यन्त्रे फलमवाप्नुयात् ॥६८॥

---

*त्रुटितोऽत्र पाठः

९४ खः मा त्रणादपि—त्राणादपि

९८ गः मा इष्टा—इष्ट्वा

भूयो भूयः किमुक्तेन प्रलापेन महेश्वरि ।
देवता पूजयेद्यन्त्रे सद्यः परमको भवेत् ॥९९॥

इति ते सर्वमाख्यातं यत्पृष्टोऽहमिह त्वया ।
प्रदक्षिणं पूजनञ्च वन्दनं नन्दनं तथा ॥१००॥

... ... ... ... ... ... ... ... ... ... ... ... ।
इदानीं देवदेवेशि किमन्यच्छ्रोतुमिच्छसि ॥१०१॥

इत्येष पटलो गुह्यस्तव स्नेहात्प्रकाशितः
श्रुतश्च पठितो ध्यातो यन्त्रपूजाफलप्रदः ॥१०२॥

इति [श्री] श्रीसंहितायां शारिकापरिच्छेदे प्रदक्षिणादि
श्रीचक्रमाहात्म्यं सम्पूर्णं पञ्चमः पटलः ॥५॥

---

१०२ खः मा स्नेहात्प्रकाशितं—स्नेहात्प्रकाशितः
घः मा यन्त्रपूजा—यन्त्रपूजा

## अथ षष्ठः पटलः

श्रीभैरवो

वद सत्यं महादेव लोकानुग्रहणेच्छया ।
शारिकागिरिमूलस्य विस्तरं परमेश्वर ॥१॥

पाय्यं पाय्यमपीशान त्वन्मुखाम्बुधिनिर्गतम् ।
न तृप्तास्मि न तृप्तास्मि पुण्यधर्मकथामृतम् ॥२॥

श्रीभैरवः

शृणु वक्ष्यामि पुण्यं वै शारिकागिरिसम्भवम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्जन्मकोटिभवैरघैः ॥३॥

हरिणा जलनिस्तारे भुवि रन्ध्रं कृतं पुरा ।
दैत्यद्वारं महाघोरं तीक्ष्णया चक्रधारया ॥४॥

तेनोक्तो य बको नित्यं बबाधे लोकसन्ततिम् ।
देवैर्विज्ञापितो देवि शिवः कारुणिको महान् ॥५॥

प्रोवाच पार्वती तत्र पूरय यन्त्ररन्ध्रकम् ।
बको नश्येन्महादेवि तलातलविनिर्गतः ॥६॥

सुमेरुशिखरेणाद्य पूरय तत्त्वरान्विता ।
विभुमागच्छ देवानां प्रियमाहर सुन्दरि ॥७॥

श्रुत्वैतद्वचनं सौम्यं शिवस्य परमात्मनः ।
रन्ध्रं सामान्यविधिना गत्वा गिरिसमन्ततः ॥८॥

पादतः पञ्चक्रोशान्तं मतं विस्तरतः परम् ।
क्रोशं शतोत्तरं ज्ञेयं योजनाशीतिरुच्चकैः ॥९॥

. . . . . . . . . . . . . . . . . . . . . . . . . ।
उत्पाद्य शृङ्गं मेरुश्च चञ्चुना पूरयेद्विलम् ॥१०॥

अकस्मात्पतितं श्रुत्वा पर्वतं दैत्यपुङ्गवः ।
तत्रासौ भुवनेशानि शब्दमुच्चैश्चकार ह ॥११॥

स शब्दस्तुमुलो घोरः क्षोभयेद्भुवनत्रयम् ।
आरावघोरश्रवणाद्बधिरं भुवनत्रयम् ॥१२॥

निर्गतो येन देशेन घोररावो बहिः प्रिये ।
स देशः प्रथितोऽद्यापि बहिरारावसंज्ञितः ॥१३॥

---

७ खः मा तरान्वित—त्वरान्वितः

८ गः मा समान्यविधिना—सामान्यविधिना

९ गः मा शतोर—शतोत्तर

११ गः मा तत्र सिद्—तत्रासौ

बहिः श्रुत्वापि देवेशि घोरं दैत्यरवं शिवे ।
त्रस्ताः समभवन्सर्वे देवा भूतगणा अपि ॥१४॥

मूर्च्छिताः कलिनिर्जीवा दृषद्भूता जना यथा ।
दृष्ट्वा देवा भूतगणांस्तत्रस्थान्मूर्छितानपि ॥१५॥

दृष्ट्वा मृतास्त्राविन्यां वै देवी तान्समजीवयन् ।
देवा भूतगणाश्चापि स देशः पावनः स्मृतः ॥१६॥

अमृतवाटो विख्यातः सर्वरोगापहारकः ।
तस्मात्सर्वप्रयत्नेन बहिरारावसंज्ञके ॥१७॥

देशे ह्यमृतवाटाख्ये स्नानदानजपादिभिः ।
होमार्चा नन्दनैः पुष्पैर्गेन्दचन्दनवन्दनैः ॥१८॥

पूजयेज्जगदीशानि यां काञ्चिदपि देवताम् ।
अनन्तफलमाप्नोति यद्यदिच्छति शाश्वतम् ॥१९॥

त्रस्ता देवा दैत्यरावाद्गुप्ता समभवन्तदा ।
यत्र गुप्ता देवगणाः स देशः पावनः परः ॥२०॥

---

१४ गः मा त्रस्था समभवत्सवे — त्रस्ताः समभवन्सर्वे

१७ घः मा सज्ञिके — संज्ञके

१८ घः मा गेन्द कन्दुकन्नाम कोशपाठः

दैत्यरावपरित्रस्ते गुप्तैर्देवगणैर्युताः ।
पूरितश्च ततः प्रोक्तो गुप्तपुराभिधा प्रिये ॥२१॥

दृष्ट्वा देवगणान्सर्वान्गुप्तास्त्रस्तात्मनः शिवः ।
अभयं दातुं कामासौ जहासोच्चैर्महेश्वरि ॥२२॥

तद्धामभयमुक्तास्ते देवा ब्रह्मा पुरोगमाः ।
स्तुतिमारेभिरे कर्तुं शारिकां भयहारिकाम् ॥२३॥

देवा ऊचुः

ॐ ह्रीं श्रीं ह्रां शां शारिकां देवीं दुर्गतिनाशिनीम् ।
प्रद्युम्नपीठनिलयां भक्ताभयवरप्रदाम् ॥२४॥

सिंहासनां महारौद्रीं कोटिसूर्यसमद्युतिम् ।
शरणं तां महाकालीं व्रजामो वीरवन्दिताम् ॥२५॥

ॐ ॐ ओंकाररूपिण्यै शारिकायै नमो नमः ।
मायाबीजस्वरूपायै भवान्यै ते नमो नमः ॥२६॥

अनामरूपरूपायै अमायै ते नमो नमः ।
ॐ आद्याकारगम्यायै दीर्घायै ते नमो नमः ॥२७॥

ओमिदंतास्वरूपायै इन्दिरायै नमो नमः ।
ईश्वरस्पन्दरूपायै ऐश्वर्यै ते नमो नमः ॥२८॥

अर्धाङ्गीकाररूपायै उकारायै नमो नमः ।
दीर्घाङ्गीकाररूपायै ऊंकारायै नमो नमः ॥२९॥

ऋषिदेवस्वरूपायै ऋंकारायै नमो नमः ।
उदात्तोद्रिक्तरूपायै ॠं बीजायै नमो नमः ॥३०॥

जगदुद्रिक्तलीनायै ऌंकारायै नमो नमः ।
दृश्यसंहारिणोक्तायै ॡंकारायै नमो नमः ॥३१॥

दृश्योद्रिक्ता समाख्याख्यै ऍंकारायै नमो नमः ।
वागीश्वर्यै च नित्यायै वाग्वादिन्यै नमो नमः ॥३२॥

ऍंकारबीजसंस्थायै कामाख्यायै नमो नमः ।
सर्वशास्त्रार्थरूपिण्यै ऐंकारायै नमो नमः ॥३३॥

जगदौदार्यशक्त्यै ते ॐ बीजायै नमो नमः ।
सर्वापस्तम्भनी शक्त्यै अं बीजायै नमो नमः ॥३४॥

विसर्गशक्त्यै सौम्यायै अः कारायै नमो नमः ।
ॐ काशिकायै कारिकायै कापाल्यै ते नमो नमः ॥३५॥

काल्यै कराल्यै कंकाल्यै कान्तायै कामदायिनी ।
कामेश्वर्यै कामिन्यै ते कामकाख्यै नमो नमः ॥३६॥

---

३६ गः मा कामेश्वर्यै—कामेश्वर्यै

कन्दर्पिण्यै करालायै काम्यायै ते नमो नमः ।
कापालकुण्डलाभेद्यै कपालमालधारिणे ॥३७॥
करालायै च कालायै क्रूरायै ते नमो नमः ।
कलिकल्मषनाशिन्यै कलहायै नमो नमः ॥३८॥
काञ्च्यै कंकणधारिण्यै किंकिणीध्वनये नमः ।
काशिवासजनानन्ददायिन्यै ते नमो नमः ॥३९॥
कुलायै कुलपूज्यायै कुलेशायै नमो नमः ।
कुलदेवकुरुकुल्लायै कामदायै नमो नमः ॥४०॥
कुलाकुलपदोज्ञायै कामदायै नमो नमः ।
केशिन्यै केशदायै ते कौशाम्ब्यै सततं नमः ॥४१॥
कोकिलकुलहंसायै कलहप्रियबन्धवे ।
कुलवागीश्वरी देव्यै कुक्कूटासनसंस्थिते ॥४२॥
कुक्कूटायै कुरूपिण्यै कुवासायै नमो नमः ।
कालायै कलकायै कापाल्यै ते नमो नमः ॥४३॥
कालिकालनिमग्नांध्यप्रकाशिन्यै च ते नमः ।
कुल्यायै कुङ्कुमादायै काश्मीर्यै ते नमो नमः ॥४४॥
कूष्माण्डायै च कूलायै कल्मषायै नमो नमः ।
खट्वाङ्गायै च खट्वायै खड्गायै ते नमो नमः ॥४५॥

---

४२ घः मा कुकटासनसंस्थित—कुक्कूटासनसंस्थिते

खज्योत्स्नायै खरूपायै खवासायै नमो नमः ।
खद्यायै ते खपथ्यायै खान्तायै ते नमो नमः ॥४६॥

खचित्रायै खवासिन्यै खड्गिन्यै ते नमो नमः ।
खण्डक्षीराज्यभोज्यायै खदिरांगारवर्चसे ॥४७॥

खाशायै खड्गधारिण्यै खमूर्तये नमो नमः ।
गौर्यै गरुडवासिन्यै गम्भीरायै नमो नमः ॥४८॥

गन्धर्वगीतिजनन्यै गीतिलयपरायणि ।
गेयायै ग्रामसंस्थायै ग्रामक्रान्त्यै नमो नमः ॥४९॥

गमागमपदोज्ञायै गोरूपायै नमो नमः ।
गङ्गायै गारुडीमूर्त्यै गोविन्दभगिन्यै नमः ॥५०॥

गणेशार्चितपादायै गणस्तुते नमो नमः ।
घोरायै घोररूपायै घोरघुर्घुरनादिनि ॥५१॥

घोराघोरात्मने तुभ्यं घर्घयै ते नमो नमः ।
घर्घराव्यक्तनाशायै घर्घर्यमृतपायिनि ॥५२॥

---

४९ क: मा गन्धगातजनन्यै — गन्धर्वगात्जनन्यै
घ: गामक्रान्त्य — ग्रामक्रान्त्यै
५० ग: मा गारुडीमूर्त्यं — गारुडीमूर्त्यै

घुणाक्षरायै घोरायै घुणायै ते नमो नमः ।
घनायै घनरूपायै नमः घनारावात्मनि ॥५३॥

घनाघनायै देवान्यै क्षोभनायै नमो नमः ।
असंख्यायै च शून्यायै नादायै ते नमो नमः ॥५४॥

चर्चायै चर्चनीयायै चर्चिकायै नमो नमः ।
चम्पायै चारुरूपायै चामीकरत्विषे नमः ॥५५॥

चारुस्थितायै चर्व्यै चकचितायै नमो नमः ।
चामर्यै चर्मणे तुभ्यं नमश्चमरधारिणि ॥५६॥

चन्द्रायै चन्द्ररूपायै चन्द्रचन्दनगन्धिनि ।
चार्विण्यै चमसायै च चक्रायै ते नमो नमः ॥५७॥

चक्रायुधायै चक्रिन्यै चक्रस्थायै नमो नमः
छमच्छमिति शब्दायै छत्रिण्यै ते नमो नमः ॥५८॥

छत्रप्रियायै देवेश्यै छत्रिकायै नमो नमः ।
जयन्त्यै जयरूपायै जयदायै नमो नमः ॥५९॥

जम्बुकायै जयायै च जर्जरिण्यै नमो नमः ।
जिह्लायै जीर्णवस्त्रायै जीरायै ते नमो नमः ॥६०॥

---

६० गः मा जिह्ायै – जिह्लायै

जीर्णजीर्णस्वरूपायै जर्जिकायै नमो नमः ।
जेमनाजस्यसंस्थायै जम्बिन्यै ते नमो नमः ॥६१॥

जम्बुकायै च जम्बायै जम्भीररुचये नमः ।
जगणायै जनिस्थायै जनन्यै ते नमो नमः ॥६२॥

जन्मिन्यै जनपारायै जरसे ते नमो नमः ।
नमो जगत्प्रतिष्ठायै जनपालनतत्परे ॥६३॥

जातायै जनगर्भायै जनिष्यन्त्यै नमो नमः ।
ज्वरार्तिहारिणी जीर्ण्यै ज्वरनाशनतत्परे ॥६४॥

जिह्वायै ज्वलरूपायै जालिकायै नमो नमः ।
जाम्र्यै जमिप्रियायै ते जम्पानन्दकरे नमः ॥६५॥

गृणन्त्यै झर्जरीस्थायै झाङ्कायै नमो नमः ।
झणझुणध्वने तुभ्यं झङ्कायै ते नमो नमः ॥६६॥

नादबिन्दुसुरूपायै शून्यायै परमेश्वरि ।
टङ्कखट्वांगधारिण्यै टङ्करायै नमो नमः ॥६७॥

---

६१ गः मा जेमजस्य – जेमनाजस्य

६२ कः मा जम्वकायै – जम्बुकायै

६५ कः मा ज्विह्वायै – जिह्वायै

गः मा जाम्रै – जाम्र्यै

६६ कः मा झृर्जरीस्थायै – झर्जरीस्थायै

टङ्कश्चातीतदंत्यायै नमस्ते टङ्कधारिणि ।
ठकुण्ठायै च ठाद्यायै ठकूरायै च ते नमः ॥६८॥

ठशब्दायै स्वरूपायै ठ ठं कारिणि ते नमः ।
. . . . . . . . . . . . . . . . . . . . . . . ॥६९॥

डामरायै डम्बरायै नमो डम्बरधारिणि ।
नमस्ते डंडिमुण्डायै डिंडिमायै नमो नमः ॥७०॥

ढक्कायै ढक्कवाच्यायै ढांकारायै नमो नमः ।
ढणत्ढणत्स्वनायै ते शून्यायै शून्यवादिनि ॥७१॥

आदिमध्यांतशून्यायै णमस्यायै नमो नमः ।
नमस्तव्यस्थितायै ते तनीयस्यै नमो नमः ॥७२॥

तारिकायै च तारायै तारिण्यै ते नमो नमः ।
तारिण्यै ताररूपायै तारिण्यै ते नमो नमः ॥७३॥

तातारायै ततिसंस्थितायै तुभ्यं सततं नमः ।
तापिन्यै तपसंस्थायै तपिन्यै ते नमो नमः ॥७४॥

तृप्तायै तर्पिण्यै तुभ्यं नमस्ते तर्पणाम्भसे ।
ततायै तन्तवे तस्यै तस्यै ते तमसे नमः ॥७५॥

---

७५ खः मा तुभ्यं—

तामसायै तुरीयायै तूर्यै सततं नमः ।
त्वरायै त्वरितायै ते तुरगारोहशालिनि ॥७६॥

त्वङ्कारायै त्वचे सर्वे तन्वन्त्यै सततं नमः ।
तत्तत्पदानुबन्धिन्यै तद्रूपायै नमो नमः ॥७७॥

तारकायै च संस्थायै नमस्ते ताम्ररूपिणि ।
तोतुलायै तुलाकोटिध्वनये सततं नमः ॥७८॥

तर्जन्यै तर्जनायै ते त्यागायै सततं नमः ।
स्तम्भिन्यै स्तम्भरूपायै तमस्यायै च ते नमः ॥७९॥

तपः प्रियायै तपसि स्थितायै तपसे नमः ।
तपनात्तपरूपायै तपः सिद्धिविधायिनि ॥८०॥

इति [श्री] श्रीसंहितायां शारिकामाहात्म्यं सम्पूर्णम्
षष्ठः पटलः ॥६॥

---

७६ घः मा शीलिनि—शालिनि

# भृङ्गीशसंहिता

# कपालमोचनमाहात्म्यम्

## *ॐ नमस्त्रिपुरसुन्दर्यै

## ॐ नमः शिवाय

ॐ श्रीभैरवी

ॐ श्रुतं भवत्प्रसादेन शूर्पायणमनुत्तमम् ।
इदानीं श्रोतुमिच्छामि द्विग्रामे तीर्थमुत्तमम् ॥१॥

कपालमोचनं नाम कुण्डं पापापनोदनम् ।
एक-द्वि-त्रिसंख्या वा किं ग्रामेऽस्मिन्परमेश्वर ॥२॥

. . . . . . . . . . . . . . . . . . . . . . . . ।
माहात्म्यं मत्स्यक्षेत्रस्य वद मे हितकाम्यया ॥३॥

---

*मा नमः त्रिपुरस्वन्दर्यं — नमस्त्रिपुरसुन्दर्यै,
ब ॐ नमः शिवाय

१ ध: ब द्विग्रामं — द्विग्रामे

२ ग: ब सख्यया — संख्या वा

भैरवः

श्रृणु वक्ष्ये महादेवि ग्रामे द्विसंज्ञके पुरा ।
त्रिसंज्ञके च मा इहि ग्रामेऽन्त्ये यदभूत्किल ॥४॥

ब्रह्मविष्णुमद्विभूती श्रुती सात्विकराजसी ।
स्पर्धया तामसी मूर्तिनामन्यतां सुरेश्वरि ॥५॥

तदज्ञानविनाशार्थं मूर्तिर्मे तामसी किल ।
तेजः स्वरूपा सहसाभूद्रोषेऽभवत्पुरा ॥६॥

असम्बर्धतया तद्वं निशीथान्तं महेश्वरि ।
वेपिता जनसंघास्तु दृष्ट्वा सन्मूर्तिमेश्वरीम् ॥७॥

सव्याप्य रोदसीं तावन्नाप्राज्ञायंत किञ्चन ।
व्याप्तां जगद्ग्रसयितुं दृष्ट्वा देवगणाः प्रिये ॥८॥

ब्रह्मविष्णोः परां गत्वा सम्यगूचुः प्रवेपिताः ।
देवाः किमिदं भगवन्ब्रूहि अकाण्डं प्रलयः ॥९॥

---

४ गः ब त्रिसंशे—त्रिसंज्ञके
५ खः ब श्रुती—श्रुती
६ घः ब दोषे—रोषे
९ कः ब पुरो—परां
घः च काण्डं—अकाण्डं

किमु जगत्सु तु किमुदितं तेजः पुञ्जं महेश्वरौ ।
जानीमो काण्डप्रलयः किमु ब्रूतां भयं हि नः ॥१०॥

श्रीभैरवः

श्रुत्वा तद्वचनं सौम्यं देवौ तावुचतुः प्रिये ।
अस्मदज्ञानजो देवाः तेजोराशिः समुद्यताः ॥११॥

तदागच्छत यामोऽत्र भगवन्तं सनातनम् ।
पृच्छामो भैरवं देवं किमेतदिति निश्चितम् ॥१२॥

ताभ्यां समागता देवा भैरवं भीमरूपिणम् ।
तेजः स्वरूपं ज्ञात्वा तु ह्यन्तं द्रक्ष्यामीहोद्यतौ ॥१३॥

ब्रह्मा जगामोपरिष्टादधस्ताद्धरिरेव च ।
दिव्यं वर्षसहस्रं वर्षाणां नान्तं जग्मतुरीश्वरि ॥१४॥

---

१० गः ब जानीमे—जानीमो

घः ब्रूताः—ब्रूतां

१२ कः ब तदा गच्छति—तदागच्छत

१३ खः ब भैरवी—भैरवं

घः ह्यन्तः द्रष्टुं—ह्यन्त द्रक्ष्यामि

१४ कः ब दिव्यहस्रं—दिव्यवर्षसहस्रं

अनन्तस्यांतमज्ञात्वा पुनर्निवर्तितस्ततः ।
ततो निवृत्य विष्णुर्हि भैरवं भैरवरूपिणम् ॥१५॥

. . . . . . . . . . . . . . . . . . . . . . ।
अनिश्चयेन विस्मृत्य विभुं परगिरं - - - यत् ॥१६॥

*श्रीभगवान्

*ॐ अपारपारं गहनावतारं
प्रज्ञार्थतारं स्वविमर्शकारम् ।
बुद्धेरपारं परमार्थसारं
संसारवारं शरणं व्रजामः ॥१७॥

*
. . . . . . . . . . . . . . . . . . . . . .
. . . . . . . . . . . . . . . . . . . . . . ।
रजस्सत्वादहमोजोऽघनाशं
कर्तुं प्रवृत्तो न समग्रं त्वमीदृक् ॥१८॥

---

*ब श्री भगवानुवाच—श्री भगवान्

*ब—ॐ नास्ति

१७ खः ब प्रज्ञावतारं—प्रज्ञार्थतारं, स्वविसर्गकारम्—स्वविमर्शकारम्

*मातृकायां त्रुटितः पाठः

ब—मातृकायामपि पाठो नास्ति ।

१८ गः ब अहमोजामनाशं—अहमोजोऽघनाशं

दृष्ट्वा घोरं रूपमेतत्तवेदं-
महो व्याप्तं दिव्यरूपं परं यत् ।
तदेतद्वं शंतमं सत्स्वरूपं
प्रवर्तय येन नौ दृक्प्रकाशम् ॥१९॥

अहं ब्रह्माशिवविघ्नेशसूर्याः
शक्तिश्चेन्द्रः सोमयमाग्निवायवः ।
कुबेर ईशो ग्रहचक्रं तथैतत्
इदं जगन्नाद इत्येव सिद्धः ॥२०॥

पिंडाकारस्समवेतं यदा त्वं
सर्वाधारं सर्वरूपं परं तत् ।
वित्वा चोमित्येकरूपञ्च बिन्दुं
ज्ञायन्ते त्वामवरेण परे ते ॥२१॥

---

१९ गः ब शान्तमं—शंतमं

२० खः मा सोमर्यमाग्निवायवाः—सोमयमाग्निवायवः

घः ब जगन्नाथ—जगन्नाद

२१ कः ब पिण्डाकारिस्—पिण्डाकारस्

बिन्दोश्च पारमवरे गृहीत्वा
ह्यनिर्वाच्यं परमं व्योमरूपम् ।
त एव कोलाहलवर्जिताः प्रभो
वित्वा महस्ते परतः परं हि ये ॥२२॥

त्वद्विमर्शाच्छान्तकोलाहला ये
वित्वा उत्सद्यान्ति तस्यापि पारे ।
महो विमर्शादवरे सुता ये
पारं प्रपन्नाश्च परं हि लोके ॥२३॥

विमर्शोऽपि त्रिविधो वै प्रभो ते
रूपं घोरं तामसं घोरघोरम् ।
रजसापि त्वन्महाघोररूपं
विमृश्यन्ति परप्रज्ञाभिमर्शात् ॥२४॥

---

२२ कः ब पारवारे—पारमवरे

२३ घः मा उच्छान्तकोलाहला ये उत्सद्यान्ति तस्यापि पारे ।
महो विमर्शादवरो . . . . . ॥ पुनरुक्तपाठः
ब—मातृकायां क्रमोऽस्ति ।

अवराणामेव विमर्शशक्तिः
साधकास्ते कथिता लोकतन्त्रे ।
परे विमर्शं च गता विभो ये
त एव लोकेऽपि* - - एवोपदिष्टाः ॥२५॥

बुद्धेरपारं परमं पदं यत्
विमर्शशून्यं परमार्थरूपम् ।
अनिर्वाच्यं व्योम विष्णोश्च पाद्यं
तेजोऽनन्तं शरणं त्वां प्रपन्नम् ॥२६॥

मया विमृष्टा महतोऽभिमानाच्च
तत्ततोऽनन्तमहस्तवेश ।
अदृष्टपारावह्माभिमानिना
वाच्यं स्वरूपं मध्य एवोपयातम् ॥२७॥

---

*सर्वत्र त्रुटितोऽयं पाठः

२५ गः ब पारे—परे

२६ घः ब प्रपन्नः—प्रपन्नम्

२७ कः ब विमृष्ट—विमृष्टा

विज्ञापितं भो प्रभुणापि त्वयै-
वाप्यहमिनो मध्य एवापि यामि ।
तस्मादावां मध्य एवाभियातौ
अनभिज्ञौ पतितौ त्वन्महिम्नः ॥२८॥

अविद्वांस्तु पारमस्य महिम्नः
पारमिच्छन्मध्य एवोपयाति ।
अहं ममेत्यभिमानी स एव
सर्वमहो नाहमित्येव मुक्तः ॥२९॥

विद्वांस्तु तं पारमुपेत्य देव
महिम्नो वै विश्वमेल्लोकतन्त्रे ।
तस्मात्तु लोकोऽप्यन्य एवेति मन्ये
लोकादपि सोऽन्य एवेति दृष्टः ॥३०॥

---

२८ खः ब वाप्यहसिनो—वाप्यहमिनो
घः ब अनुभिज्ञौ—अनभिज्ञौ

त्वामेव तस्मात्प्रयतेत्तु प्राप्तु-
मिन्द्रियार्थान्यत्नतः संविजित्य ।
परं परार्थं परमं गूढशून्यं
गुहाश्रयं शरणं त्वां प्रपन्नः ॥३१॥

अन्त्याद्‌गुणाद्‌घोरमीदृक् स्वरूपम्
दिव्यं महो बोधकं नौ प्रसन्नः ।
प्रवर्तयन्यः परमस्वभावः
तं त्वामेवं शरणं घोररूपम् ॥३२॥

कृष्णोऽहं वै तमोरूपः स्वरूपे
सत्वांतरङ्गो राजसो ब्रह्मरूपः ।
भवान्स्वरूपे सत्वरूपो बहिर्वै
तमोऽन्तरङ्गः सुप्रसिद्धलोके ॥३३॥

अजानन्वै महिमानं तवेमं
मध्ये भ्रमन्नाशमेवाभियाति ।
तावन्मुह्यन्ति कामक्रोधादयोऽ-
मी यावन्नायात्सुमत्तेज उग्रम् ॥३४॥

तावद्भयं भीमरूपात्कराला-
तावद्भयं रागद्वेषादिकेभ्यः ।
यावन्नायात्त्वत्महस्स्वप्रकाशम्
अप्रकाशो जन्तुरेव बिभेति ॥३५॥

स्वरूपतोऽपि नोदयंस्तमोऽन्धं
प्रकाश्य वै चाद्भुतं ज्योतिरूपम् ।
भवत्प्रकाशाश्शुक्लरूपोऽहमस्मि
विनाशयन्विघ्नसंघाननेकान् ॥३६॥

भीतो मृत्योर्जन्तुरेवाप्रकाशो
शुभ्रे उग्रे प्रपतन्याति मार्गे ।
यावद्भुवन्मह उग्रं न याति
दृष्ट्वा महो मृत्युरस्मादुपैति ॥३७॥

यस्मादिवें नान्त एवातिदृष्ट-
श्चिरं न यातौ स्वप्रकाशस्य पारम् ।
अप्रकाशौ भवता मोहकूपे
क्षिप्तौ भ्रमन्तौ मध्य एवाभियातम् ॥३८॥

यस्माच्छिरो ब्रह्मणा नैव दृष्टं
भवत्पादौ न मयापि प्रदृष्टौ ।
अनन्तस्यानन्तमेवालपन्तौ
लोके भ्रमन्तौ मध्य एवाभिशंतम् ॥३९॥

यस्मादपारस्य भवन्महिम्नश्चा-
वार एव भ्रमतो नौ सुरेश ।
संहृत्यैतद्घोरमेतत्स्वरूपम्
अस्मद्दृश्यं दर्शय स्वं स्वरूपम् ॥४०॥

यत्र विन्दन्ति वेदज्ञाः सांख्या ज्ञायन्ति यत्र हि ।
न तर्कयन्ति तर्कज्ञाः नैयायिका ना नुमान्त्यपि ॥४१॥

मीमांसयन्ति यत्रैव मीमांसार्थाभिगामिनः ।
तंत्रयन्ति न तन्त्रज्ञा यद्घोरं मह उत्तमम् ॥४२॥

अस्मज्जाड्यापहं घोरं महो दिव्यं प्रकाशितम् ।
तद्दिव्यं भैरवं रूपं भूयो भूयो नमाम्यहम् ॥४३॥

इति स्तुत्वा भैरवं तु विष्णुर्भूमौ चिरं पतन् ।
उत्थायोत्थाय पादयोः भैरवस्य पुनः पुनः ॥४४॥

प्रणम्याग्रे तेजसस्तु तूष्णीमास महेश्वरि ।
भैरवस्तेज उग्रञ्च हित्वा सौम्यं वपुः श्रितः ॥४५॥

उवाच श्लक्ष्णया वाचा विष्णुं पश्यन्सुरार्चिते ।
किं दृष्टस्तेजसोऽन्तो वै त्वया विष्णो वदस्व मे ॥४६॥

अद्भुतं ब्रह्मणा वापि घोरे तमसि चाद्भुतम् ।
. . . . . . . . . . . . . . . . . . . . . . . ॥४७॥

*विष्णुरुवाच

अद्भुतमद्भुते किं ते द्रष्टव्यं परमेश्वर ।
नान्तो न मध्यं नैवादिर्यस्य किं तस्य ते प्रभोः ॥४८॥

*भैरव उवाच

ज्येष्ठः श्रेष्ठस्त्वमेवासि सर्वेषामिति नः प्रभोः ।
दृष्टस्ते विस्मयः कश्चिद्ब्रह्मन्घोरे स्वरूपके ॥४९॥

---

*मा विष्णुः ऊचुः—विष्णुरुवाच

व विष्णोः

४८ कः व अद्भुतमेद्भुतं—अद्भुतमद्भुते

*मा भैरवः ऊचुः—भैरव उवाच

व भैरवः

श्रुत्वा प्रोवाच तं ब्रह्मा दृष्टोऽन्तस्ते मयेति च ।
धेनोः समक्षं शंखस्य केतकस्य - - - चाविभोः ॥५०॥

क्रोधमहारयाञ्चक्रे श्रुत्वा ब्रह्मवचो हरः ।
दृष्टोऽन्तस्त इत्युवाच ब्रह्माणं पुनरेव सः ॥५१॥

धेनुः शंखः केतकाश्च तदा शप्ता हरेण वै ।
कर्तरीमुद्रया ब्रह्मशिरः कृन्तुं महेश्वरि ॥५२॥

शिरः कपालं हत्यार्थं लग्नं हरकरे प्रिये ।
तदा प्रभृति देवेशि बिभ्रद्ब्रह्मशिरः करे ॥५३॥

चचार तीर्थान्विधिवद्ब्रह्महत्याव्रतं चरन् ।
काश्यां तु द्वादशाब्दांते तीर्थे च मणिकर्णिके ॥५४॥

ब्रह्महत्या गता दूरं स्खलितञ्च कपालकम् ।
कपालास्थिकरे लग्नं न गतं सुरपूजिते ॥५५॥

---

५० घः ब चाभिभो — चाविभोः

५२ गः ब कर्तुरी — कर्तरी

घः ब कृतुं — कृन्तुं

५५ खः ब कपालिकम् — कपालकम्

एवं विहरमानस्य भैरवस्य हिमालये ।
नन्दिना बाह्यमानस्य ग्राह्यमानस्य वै गणैः ॥५६॥

भूतैर्पिशाचैर्यक्षैश्च पुज्यमानस्य सुन्दरि ।
क्षेत्रं शूर्पायणं नाम पावयन्कृपया दृशा ॥५७॥

ततः प्रचलितः पुण्याद्विहरद्वृषभेण ह ।
महाराक्षसरूपां तां हत्यां दृष्ट्वा पुरा प्रिये ॥५८॥

कपालास्थिंकरे लग्नां क्रोधं चक्रे महेश्वरः ।
कपालं मे गतं काश्यां पुण्ये वै मणिकर्णिके ॥५९॥

हत्यापि सा गता तत्र केयं द्विरत्र वागता ।
इत्थं क्रोधाकुलेनापि हरेण वृषभे स्थितः ॥६०॥

---

५६ गः ब बाह्मिानस्य—बाह्यमानस्य

घः ब ग्राह्मिानस्य—ग्राह्यमानस्य

५७ कः मा भूतैपिशाचैः—भूतैर्पिशाचैः

खः मा स्वन्दरि— सुन्दरि

५८ घः ब पुरः—पुरा

६० खः ब चागता—वागता

चोदिते इट्चरहत्यां प्रति तत्र महेश्वरि ।
चलितो वृषभस्याशु खुरः स्खलित ईश्वरि ॥६१॥

दृषल्लग्नः खुरस्तत्र पृथिव्यां जगदम्बिके ।
खुरात्कुण्डमभूत्तत्र सूर्यं प्रस्तुतवान्हरः ॥६२॥

सूर्योऽपि तत्र कुण्डे वै स्नात्वा तुष्टाव वै हरम् ।
कपालास्थि तु पतितं कराक्षिप्रं हरस्य वै ॥६३॥

हत्या सपारिवारापि गता दूरं महेश्वरात् ।
दृष्ट्वा कपालं भ्रष्टं तु पातितं स्वकराद्धरः ॥६४॥

हत्याञ्च दूरं जाताञ्च सूर्यं प्रोवाच सुन्दरि ।
कपालं मोचितमत्र द्विर्हत्या च समागता ॥६५॥

किमेतदिति मे सूर्यं वद मे हितकाम्यया ।
एतच्छ्रुत्वा तु वचनं सूर्यः प्रोवाच शङ्करम् ॥६६॥

---

६१ गः ब चलतो—चलितो
क: मा इचलहत्यां——इट्चरहत्यां, ब इचलहत्यां ।
(श्रम० पण्डो गोपतिरिट्चरः)

६४ घः ब पतितं—पातितं

६६ घः मा शकरं—शङ्करं

कर्तरीमुद्रया देव द्विःकपालं समुद्धृतम् ।
त्रिरपि च प्रहारेण तस्माद्विरत्र मोचितम् ॥६७॥

यस्माद्विर्मोचितं ह्यत्र कपालं परमेश्वर ।
तस्माद्विर्ग्रामः कथितो मन्त्रतन्त्रविशारदैः ॥६८॥

कपालं मोचितमत्र कुण्डे यस्मात्महेश्वर ।
कपालमोचनं नाम तीर्थं भवतु ते वरात् ॥६९॥

श्रुत्वा सूर्यस्य तद्वाक्यं प्रभुः प्रोवाच सुन्दरि ।
कपालमोचनं नाम तीर्थं भवतु मे चिरम् ॥७०॥

भ्रूणहा ह्यामगर्भाश्च मृतगर्भाश्च सुन्दरि ।
स्रावाः पाताश्च नामोना दिनजा मासजा अपि ॥७१॥

पक्षजाः प्रेतभूताश्च राक्षसाश्च महेश्वरि ।
तृप्ता भवन्तु सुचिरं मुच्यन्ते प्रेतयोनितः ॥७२॥

अत्र येषां कृतं श्राद्धं ते तृप्यन्तु शतंसमाः ।
नामहीनाश्च ये नष्टा गर्भनष्टाश्च ये जनाः ॥७३॥

---

६७ कः ब कर्तुरीमुद्रया—कर्तरीमुद्रया

७१ कः ब ह्यापगर्भाश्च—ह्यामगर्भाश्च

७२ घः मा प्रेतयोरितः—प्रेतयोनितः

ब प्रेतयोनितः

भ्रूणस्रावाश्च पाताश्च नामोनास्ते प्रकीर्तिता: ।
तेषां नाम्ना तु माता वा पिता भ्राताथवा सुत: ॥७४॥

दृष्ट्वा शिवं ब्रह्महत्याघोरं संशब्द चाचलत् ।
बालगर्भाश्च भ्रूणाश्च तच्छ्रुत्वा पतिता: क्षितौ ॥७५॥

स्त्रीणां स्रावाश्च पाताश्च ह्यभवंतत्स्वनात्प्रिये ।
हत्यां लग्नाञ्च मर्त्येषु मोक्षोपायं गवेषयन् ॥७६॥

काष्ठप्रणालिकां ते च जलं दद्युर्यथा तथा ।
नामोना: कीर्तिता लोके तीर्थप्रेतप्रणालिका: ॥७७॥

नामोनान्दीयन्ते तत्र तीर्थे प्रेते प्रणालिका: ।
ते तृप्तिभाज: प्रेतास्तु शतकल्पं न संशय: ॥७८॥

कपालमोचने ये तु श्राद्धं कुर्वन्ति सुन्दरि ।
सर्वतौ सत्त्वावश्वमेधं प्राप्नुवन्ति न संशय: ॥७९॥

---

७४ ख: मा प्रकीर्तित:—प्रकीर्तिता:

७७ क: मा तेन—ते च

ब—तेन

ग: नमोता:—नमोना:

ये पुनर्मानवा लोके कपालमोचने मृताः
ते सिद्धिभाजो लोकेऽस्मिन्सिद्धिदाः कथिताः प्रिये ॥८०॥

कपालमोचने नाम तीर्थे परमपावने ।
यद्यत्कुर्वन्ति मनुजाः पापं वा पुण्यमेव वा ॥८१॥

तदक्षय्यं भवेदत्र सत्यं देव वरप्रद ।
इत्थं तीर्थवरं प्राप्य सूर्यः परमविस्मितः ॥८२॥

त्रिर्नष्टया नश्यते देव चतुःशीर्णो भविष्यति ।
इत्युक्त्वा भैरवं सूर्य उत्तस्थौ जगदम्बिके ॥८३॥

शिवोऽपि तत्र तीर्थे वै शूर्पायण अनुत्तमे ।
विजहार महेशानि देव्यास्सह महेश्वरः ॥८४॥

एतच्छ्रावणद्वादश्यां वृत्तमेवाभवत्प्रिये ।
कपालमोचनं नाम तीर्थं परमपावनम् ॥८५॥

---

८० खः मा मृता—मृताः

८४ घः मा देव्या सहेश्वरः—देव्यास्सह महेश्वर।

८५ खः मा वृत्तमेवाभव—वृत्तमेवाभवत्प्रिये

कपालमोचने क्षेत्रे स्नानं दानं सुरार्चनम् ।
श्राद्धं होमं जपञ्चैव कुर्वन्नक्षय्यमाप्नुयात् ॥८६॥

कुरुक्षेत्रे गयायाञ्च प्रयागे नैमिषे वने ।
हरद्वारे कनखले गङ्गासागरसङ्गमे ॥८७॥

स्नात्वा दत्वा यत्पुण्यमाप्नुयान्मनुजः प्रिये ।
तत्फलं समवाप्नोति द्वादश्यां श्रावणे प्रिये ॥८८॥

कपालमोचने कुण्डे स्नानदानजपार्चनैः ।
नन्दनैर्वन्दनैश्चापि दीपधूपार्घचन्दनैः ॥८९॥

अक्षयं फलमाप्नोति शतकल्पं न संशयः ।
अनेकविधिना यो वै कृत्वा विष्णुबलिं पुनः ॥९०॥

---

८६ ग — मातृकायामयमधिको पाठः—

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः
कपालमोचने स्नानं कुर्वन् शुद्धिमवाप्नुयात् ॥

८८ गः मा समवाप्नोतिति—समवाप्नोति

घ. मा प्रिय—प्रिये

८९ गः मा नन्दनैवन्दनैश्चापि—नन्दनैर्वन्दनैश्चापि

घः मा धूपार्ब—धूपार्घं

मोचयेत्प्रेतपुरुषान्यत्नतो यत्फलं लभेत ।
तत्फलं लभते मर्त्यो द्विग्रामे पिण्डमाहरन् ॥९१॥

प्रेतान्द्विग्रामके तीर्थे श्राद्धं कृत्वा विधानतः ।
स्नानं दानमपीशानि चाक्षय्यं फलमाप्नुयात् ॥९२॥

नन्दन्ति पितरस्तेषां शतकल्पं महेश्वरि ।
तृप्ताः पिण्डैर्विधिर्दत्तैर्दायादैरपि चेश्वरि ॥९३॥

यथा प्रमुञ्चेत्सर्पस्तु कञ्चुकं स्व शरीरतः ।
तथा प्रमुञ्चेत्स्नातस्तु पापकर्मात्र हि ॥९४॥

द्वादश्यां स्नानमात्रेण तीर्थे कपालमोचने ।
यत्फलं समवाप्नोति न तत्क्रतुशतैरपि ॥९५॥

---

९१ कः ब मोक्षयेत्—मोचयेत्

९२ कः मा प्रेतान—प्रेतान्

९४ कः ब प्रमुञ्चेत्—मुञ्चेत

घः मा पापकमात्र हि—पापकर्मात्र हि

ब पापकञ्चुकं हि

९५ घः मा नतुत्—न तत्

*भैरव्युवाच

सूर्येण कथितात्र किं नष्टा हत्या महेश्वर ।
कथं नष्टा ब्रह्महत्या शीर्णा किं कथमीश्वर ॥९६॥

. . . . . . . . . . . . . . . . . . . . . . ।
ब्रह्महत्यापहं तीर्थं वद मे हितकाम्यया ॥९७॥

*भैरव उवाच

शृणु देवि प्रवक्ष्यामि नष्टा हत्या यथा किल ।
त्रिःशीर्णा च यथा देवि तथा वक्ष्यामि ते प्रिये ॥९८॥

वृषभः प्रचचालैव क्रोधे - - - व प्रणोदितः ।
ग्रामे त्रिसंज्ञके नाम हत्यां दृष्ट्वा त्ववस्थितः ॥९९॥

तत्र दृष्ट्वा तु मां देवि मग्नां सरसि निर्मले ।
तत्र स्नात्वा भव *- - त्या चचाल लहरीं प्रति ॥१००॥

---

*ब भैरवी—भैरव्युवाच
९६ कः मा कथितात्रिः—कथितात्र
ब कथितात्रिः
घः मा कथमेश्वर—कथमीश्वर
*ब भैरवः—भैरव उवाच
९९ खः ब क्रोधेनै—क्रोधधे—व
मा त्रुटितः पाठः
१०० खः मा सरस्—सरसि
*त्रुटितोऽत्र पाठः

चलन्तीं तत्र तां दृष्ट्वा गणपोऽप्यवदत्प्रिये ।
मा एहि हत्ये दुष्टे त्वमिह शीर्णो भविष्यसि ॥१०१॥

गणेशेनोदिता हत्या शीर्णं भूत्वा स्वयं प्रिये ।
इत्थं नष्टा ब्रह्महत्या शीर्णो भूता च शीर्णत: ॥१०२॥

द्विग्रामे त्रिग्रामे मा एहि ग्रामे नष्टोग्रराक्षसी ।
तत: प्रोक्तमिदं तीर्थं द्वित्रिमा एहि संज्ञके ॥१०३॥

. . . . . . . . . . . . . . . . . . . . . . . . . ।
ग्रामे फलं समुद्दिष्टं किमन्यच्छ्रोतुमिच्छसि ॥१०४॥

भैरव्युवाच

पुनर्वद महादेव ग्रामे त्रिसंज्ञके कथम् ।
हत्या निवारिता तेन मा एहि ग्रामकेऽपि च ॥१०५॥

*भैरव उवाच

दृष्ट्वा तु लोकं कलितं हत्यया कृतमीश्वरि ।
अन्वेषयञ्जगामाशु भवो वृषभवाहन: ॥१०६॥

---

१०१ घ: मा शीर्णे—शीर्णो

१०४ क: मा ग्राम—ग्रामे

१०५ ग: मा हता—हत्या

१०६ घ: मा वृषभवाहना:—वृषभवाहन:

गच्छन्श्राद्धपुरे देवो हत्यां दूरे ददर्श ह ।
दृष्ट्वा हत्यां तु दूरस्थां त्वरया स जगाम ताम् ॥१०७॥

दूरीकर्तुं ब्रह्महत्यां शिवो भूमिं पदाहनत् ।
पदप्रहारादभवत्सरो दिव्यं सुनिर्मलम् ॥१०८॥

तत्र सस्नौ महादेवो हत्या दूरं चचाल ह ।
दृष्ट्वा प्रचलितां हत्यां विचार्य मनसा शिवः ॥१०९॥

मामद्यापि ब्रह्महत्या न जहात्येव निश्चितम् ।
इत्थं ययौ महादेवो मा एहि ग्राममुत्तमम् ॥११०॥

तत्रापि दृष्ट्वा हत्यां तामुच्चैः शीर्णमथावदत् ।
महागणपतिर्देवो दृष्ट्वा हत्यामधःस्थिताम् ॥१११॥

उवाच परमक्रुद्धो मा इहेहि च राक्षसि ।
उच्चैः शीर्णजलक्षोभादुच्चैः शीर्णा भविष्यसि ॥११२॥

इत्थं करे जलं धृत्वा गणेशो राक्षसीं तदा ।
शीकरोत्सेचनात्तत्र विशीर्णामकरोत्तदा ॥११३॥

---

१०७ घः मा तुरवास—त्वरया स

११० कः मा ममद्यापि—मामद्यापि

प्रटकीभूय द्वियंस्माद्धत्या राक्षसरूपिणी ।
शिवाद्भीता पलायात्सा तस्माद्विग्रामसंज्ञका ॥११४॥

पुनस्त्रि: प्रकटी भूत्वा शिवस्याभद्रराक्षसी ।
तत्रापि मग्ना सरसि तस्मात्त्रिग्रामसंज्ञका ॥११५॥

मा इह ग्रामे नष्टैव हत्या राक्षसरूपिणी ।
उच्चैः शीर्णे महाक्षेत्रे ततस्त्रिकवटी स्मृता ॥११६॥

एकस्मिन्नेव दिवसे द्वित्रिमा इह ग्रामके ।
यो यात्रां विधिवत्कुर्यात्तस्य हत्याभयं कुतः ॥११७॥

त्रिग्राममेकवारं वै यतो यात्रां महेश्वरि ।
ततस्त्रिकवटी प्रोक्ता मन्त्रतन्त्रविशारदैः ॥११८॥

---

११४ ग: मा शिवाद्रोता—शिवाद्भीता

घ: संज्ञका—संज्ञक:

११५ ग: मा सुरसि—सरसि

११६ ग: मा शीर्णो—शीर्णी, महाक्षेत्रै—महाक्षेत्रे

घ: मा प्रेकवटी—त्रिकवटी

११७ ख: मा इट—इह

११८ ग: मा स्रीकवटी—त्रिकवटी

कृत्वा त्रिकवर्टीं यो वै श्रावणद्वादशी दिने ।
पृथिवीप्रदक्षिणाफलं पुण्यमाप्नोति मानवः ॥११६॥

. . . . .  . . . . . . . . . .  .  . . ।
कोटिहत्या समं पापं तत्क्षणादेव नश्यति ॥१२०॥

संवत्सरकृतं पापं ज्ञानाज्ञानकृतञ्च यत् ।
कपालमोचने क्षेत्रे नश्येत्तत्स्नानमात्रतः ॥१२१॥

वेदपारायणं पुण्यं कृत्वा त्रिकवर्टीं नरः ।
प्राप्नोति निश्चितं देवि ज्योतिष्टोमादियागजम् ॥१२२॥

अश्वमेधसहस्रेण चान्द्रायणशतेन च ।
यत्फलं समवाप्नोति तत्स्नानेन लभेन्नरः ॥१२३॥

कृच्छ्रैः वराकैर्यत्पुण्यं तथा पञ्चाग्निधारणैः ।
... ... ... ... ...  ... ...  ... ... ... ... ॥१२४॥

क्रतुभिर्भूरियजनैर्यत्फलं समवाप्नुयात् ।
तत्फलं समवाप्नोति द्विग्रामे स्नानमात्रतः ॥१२५॥

---

२१ खः मा ज्ञानज्ञानकृतं च – ज्ञानाज्ञानकृतञ्च
घः नश्येत्तुत् – नश्येतत्
१२४ क. मा पराकैर् – वराकैर्

त्रिग्रामेऽपि महेशानि मा इह ग्रामकेऽपि च ।
द्विग्रामे दानफलजं पुण्यं शेषोऽपि वक्ति न ॥१२६॥

गङ्गायां पिण्डदानेन कल्पाय फलमाप्नुयात् ।
कपालमोचने क्षेत्रे सक्तुपिण्डात्तदाप्नुयात् ॥१२७॥

चूडामणौ कुरुक्षेत्रे कपिलाकोटिदानतः ।
- - - - - - - - - - - - - - - - - - - - - - ॥१२८॥

विधिवद्वेदविदुषे यत्फलं समवाप्नुयात् ।
तत्फलं समवाप्नोति द्विग्रामे स्नानतः प्रिये ॥१२९॥

मार्तण्डे मलमासे तु कृत्वा विष्णुबलिञ्च यत् ।
फलं सम्पूर्णमाप्नोति दत्वा पिण्डांस्तु मोचने ॥१३०॥

तत्फलं समवाप्नोति नरो नास्त्यत्र संशयः ।
कलावस्मिन्महाघोरे पापाचारे च दूनरे ॥१३१॥

कल्मषापहरं तीर्थं मयैव प्रकटीकृतम् ।
कपालमोचनं नाम कलिकल्मषनाशनम् ॥१३२॥

---

१२९ कः मा विद्वषे — विदुषे

१३१ घः मा पापचारे—पापाचारे

१३२ खः मा कृते— कृतम्

इति क्षेत्रं मया ख्यातं पुण्यं पापापनोदनम् ।
कपालमोचनं नाम द्विग्रामे पुण्य उत्तमे ॥१३३॥

इत्येष पटलो गुह्यो मया ते वै प्रकाशित: ।
श्रुतश्च पठितो ध्यात: सर्वपापापनोदन: ॥१३४॥

इति श्री श्रीसंहितायां भैरवीभैरवसम्वादे
द्विग्रामविषये श्रीकपालमोचनं माहात्म्यं
नाम प्रथम: पटल: ॥१॥

---

१३३ घ: मा पापपनोदने—पापापनोदनम्

# भृङ्गीशसंहिता
# मार्ताण्डमाहात्म्यम्

## ॐ श्री गणेशाय नमः

*श्रीदेव्युवाच

ॐ स्मारं स्मारं महेशान महिमानमनंतकम् ।
पुण्यमनन्तनागस्य नैकाक्ष विषये शिव ॥१॥

भगा सहस्रमिन्द्रस्य यत्र नेत्राणि चाभवन् ।
तथा सरो नलिन्या वै विष्णुक्षेत्रमनुत्तमम् ॥२॥

पिबोरे च महादेव गौतमक्षेत्रमुत्तमम् ।
करङ्केशस्य क्षेत्रस्य कृतार्थास्मि न संशयः ॥३॥

---

*श्रीदव्युवाच — श्रीदेव्युवाच

१ कः मा स्मर सुरं — स्मारं स्मार

खः महिमानंतक — महिमानमनतकम्

घः विणये — विषये

२ खः मा गोतम — गौतम

गः करङ्गेशस्य — करङ्केशस्य

घः कृतार्थस्मि — कृतार्थास्मि

. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ।
इदानीं श्रोतुमिच्छामि मार्ताण्डविषये महत् ॥४॥

श्रीभैरवः

शृणु देवि प्रवक्ष्यामि मार्ताण्डविषये महत् ।
कमलस्य च नागस्य विमलस्य तथैव च ॥५॥

चाकायाश्चैव देवेशि मार्ताण्डस्यापि सुन्दरि ।
फलं श्रीमत्स्यभवने यच्छ्रुत्वा मुच्यते भवात् ॥६॥

पुरा सिसृक्षतः स्रष्टुर्जगत्स्थावरजङ्गमम् ।
अभवन्मनसा देवि मरीचाद्याः महर्षयः ॥७॥

मरीचेः कश्यपो जज्ञे कश्यपस्यादितिः किल ।
भार्यासीद्दक्षदुहिता ज्येष्ठा श्रेष्ठा शुभैर्गुणैः ॥८॥

---

४ घः मा विशये — विषये

५ खः मा विशये — विषये

६ कः मा देशि — देवेशि

७ कः मा सिसृतत: — सिसृक्षतः
स्रष्तु — स्रष्टुः

८ घः मा शुभे गुर्णैः — शुभैर्गुणैः

अदितिश्चापि देवेशि निषेवे कश्यपंस्तदा ।
दृष्ट्वा प्रजापतिस्तत्रादितिं सेवापरां तदा ॥९॥

प्रेरयामास तां तत्र तपोऽर्थं वरवर्णिनीम् ।
तपश्चर त्वं कल्याणि येन विष्णुः प्रसीदति ॥१०॥

विष्णौ प्रसन्ने भद्रे त्वं पुत्रान्प्राप्नुह्यनुत्तमान् ।
अदितिः कश्यपेनोक्ता चचार दुश्चरं तपः ॥११॥

दुस्तरं तप्यमानाया दारुणं तप उत्तमम् ।
नारायणो महेशानि तस्या दर्शनमीयिवान् ॥१२॥

दृष्ट्वा तु देवदेवेशं नारायणमनुत्तमम् ।
स्तुत्या च दण्डवत्तस्यादितिः सुरवरार्चिते ॥१३॥

---

९ कः मा आदिति।—अदितिः

खः मा मिसे – निषेवे

११ खः मा प्राप्यमनुत्तम—प्राप्नुह्यनुत्तमान्

१२ खः मा तपमुत्तमम् — तप उत्तमम्

घः दर्शिनमीयवान् – दर्शनमीयिवान्

१३ खः मा नारायणमनुत्तु—नारायणमनुत्तमम्

प्रसादयामास तदा विष्णुं त्रिभुवनेश्वरम् ।

. . . . . . . . . . . . . . . . . . . . ॥१४॥

अदितिरुवाच

सुरेश्वरं वेदमनन्तमाद्यं
सर्वात्मिकं विश्वमनन्तमायम् ।
हिरण्यगर्भं प्रभुं विष्णुमीशं
श्रीविश्वनाथं शरणं प्रपद्ये ॥१५॥

अनादिरूपं परमं परेशं
परात्परस्थं परमं पराख्यम् ।
सूक्ष्मं बृहन्तं परमं पवित्रम्
वरं वरेण्यं शरणं प्रपद्ये ॥१६॥

परापराख्यं परमार्थसत्यं
बृहत्तमास्थूलमीशं पराद्रिम् ।
पुराणमीशं पुरुषं महाद्रिम्
महत्तमं तं शरणं प्रपद्ये ॥१७॥

---

१५ घ मा शिरणं—शरणं
१७ खः मा परादं—पराद्रिम्

गुणातीतं गुणेशानं गुणैर्हीनं गुणात्मकम् ।
गुणव्यतिकरं वन्दे विष्णुं जिष्णुं महेश्वरम् ॥१८॥

पुराणसंहितासूत्रकारणं धारकं सताम् ।
व्यक्तं समर्थं देवेशं प्रपद्ये शरणं हृदा ॥१९॥

अचिन्त्यं सर्वधातारमव्यक्तानन्तरूपिणम् ।
मायाभिः कलितं देवं प्रपद्ये शरणं परम् ॥२०॥

अव्यक्तरूपं विश्वाढ्यं विकाररहितात्मकम् ।
तद्ब्रह्म परमं वन्दे मनसा परमार्थदम् ॥२१॥

लक्ष्मीपतिं वासुदेवं वस्त्रदं वासनानुदम् ।
वासनारहितं बालं मुकुन्दं शरणं श्रये ॥२२॥

भैरवा ऊचुः

इति स्मृत्वादितिर्देवं दण्डवत्पतिता क्षितौ ।
उत्थाप्य देव देवेशि ह्यदितिं सा त्वया - -* ॥२३॥

---

२२ कः मा बासुदेवं—वासुदेवं

घः मकुन्दं—मुकुन्दं

*त्रुटितोऽत्र पाठः

वद भद्रे प्रसन्नोऽस्मि भक्तानुग्रहकारकः ।
वरं वरय भद्रं त्वं यत्ते मनसि वर्तते ॥२४॥

तत्तेऽहं संप्रदास्यामि देवानामपि दुर्लभम् ।
श्रुत्वा हरेर्वचः सौम्यं विष्णुं प्राहादितिः प्रिये ॥२५॥

*अदितिरुवाच

भगवन्देव देवेश भक्तानुग्रहकारक ।
भवद्दर्शनतो देव कोऽन्यश्च वर उत्तमः ॥२६॥

पुत्रान् प्रजापतेः कांक्षे तेजोबलसमन्वितान् ।
त्वत्समाना हि देवेश त्वत्प्रभावा अपीश्वर ॥२७॥

इत्युक्त्वोपरमत देवी ह्यादितिःपुरुषोत्तमम् ।
उवाच ह्यदितिं विष्णुर्मेघगम्भीरया गिरा ॥२८॥

---

*अदितिरुवाच – अदितिरुवाच

२६ कः मा देवेशि – देवेश

खः उत्तमम् — उत्तमः

२७ कः मा काक्षे — कांक्षे

गः समानपि — समाना हि

२८ कः मा इत्युक्ता — इत्युक्त्वा

*श्रीभगवान्

अदिते ते प्रसन्नोऽस्मि पुत्रान्शीघ्रमवाप्स्यसि ।
प्रजापतिं गच्छ भद्रे भजस्व परदैवतम् ॥२९॥

एकाग्रामं समायाहि कश्यपं शरणं तथा ।
ज्योतिर्मयान्पुत्रगणान्सर्वान्प्राप्स्यस्यनुत्तमान् ॥३०॥

तस्माद्गच्छ महाभागे कश्यपं भज निश्चितम् ।
अनिश्चित्यापि भजनात्कदाचिद्विघ्नमाप तम् ॥३१॥

. . . . . . . . . . . . . . . . . . . . . ।
इत्युक्त्वादितिं देवस्तत्रांतर्ध्यानमीयिवान् ॥३२॥

श्रुत्वा सौम्यं वचो विष्णुरदितिःकश्यपं तदा ।
जगाम भजनार्थं सा पुत्रकामप्रियं प्रिये ॥३३॥

---

*श्रीभगवाच — श्रीभगवान्

३० घः मा अनुत्तमं—अनुत्तमान्

३१ घः मा आपम्—आप तम्

३२ घः मा तत्रांतवान् — तत्रान्तर्ध्यानम्

३३ कः मा स्मोम्यं — सौम्यं
घः पुत्रका—पुत्रकाम

कश्यपं तु तपस्यन्तं दृष्ट्वा ह्यदितिरुत्तमा ।
कामयाना तु भर्तारं ददृशे देवमन्तरा ॥३४॥

महातेजस्विनं वीरमुग्रं देवं पिनाकिनम् ।
दृष्ट्वा तु तं महादेवं मुमोह परमा सती ॥३५॥

चेत्यमाना परं देवेशी ह्यदितिस्तु विसिस्मये ।
अदृष्ट्वा तु देवदेवेशं मारीचसेवामागता ॥३६॥

मारीचो ह्यदितिं दृष्ट्वा किञ्चित्क्रुद्धोऽब्रवीद्वचः ।
यस्मात्कामयमाना त्वं परं पुरुषमीक्षसे ॥३७॥

वन्ध्यागर्भा च तस्मात्त्वं भविष्यसि न संशयः ।
इत्युक्त्वोपरमत देवि ह्यदितिं कश्यपस्तदा ॥३८॥

श्रुत्वा तु तद्वचो घोरं ह्यदितिः कश्यपस्य च ।
क्रुद्धाचरत्तपो घोरं निधाय कश्यपं हृदि ॥३९॥

---

३४ खः मा हृयदेतिरुद्रमा — ह्यदितिरुत्तमा
गः कामयामा—कामयाना
३६ कः मा चेत्यामा—चेत्यमाना
देवेवी—देवेशी
३७ खः मा क्रद्धो — कुद्धो
घः ईक्ष्यसे—ईक्षसे
३९ गः मा क्रद्धा—कुद्धा

दुश्चरं तप्यमानायाश्चादितेस्तप उत्तमम् ।
जज्वाल ह्यदितिस्तत्र संवर्ताग्निवदुत्तमा ॥४०॥

दृष्ट्वा ज्वलंतीं तां देवीं तपसा दारुणेन च ।
कश्यपो ह्यदितिं प्राह तपसो विरम प्रिये ॥४१॥

श्रुत्वा तु तद्वचो देवी नोपवृत्ता च सा तदा ।
तदोत्थाय स्वयं देवि सान्त्वयामास तां प्रिये ॥४२॥

श्रीकश्यप ऊचुः

दिव्यं द्वादशवर्षाणां तपोऽर्थं यद्गतं तव ।
अस्मिंस्त्रयोदशेऽप्येवं देहशोधनतत्परा ॥४३॥

सर्वथा मुक्त आरोगी किं व्यर्थं वरवर्णिनि ।
मां भजस्व वरारोहे पुत्रान्प्राप्स्यस्यनुत्तमान् ॥४४॥

इत्यलं तपसा देवि भुंक्ष्व भोगाननेकशः ।
एतच्छ्रुत्वा वचः सौम्यं प्रियस्याप्यदितिस्तदा ॥४५॥

---

४० ख: मा तपमुत्तमं— तप उत्तमम्

ग: जजाल — जज्वाल

४१ क: मा जुलदीं— ज्वलन्तीं

४५ घ: मा अपिदिति:— अप्यदिति:

भवित्वा तपसो देवी तीव्रादुपरराम ह ।
. . . . . . . . . . . . . . . . . . . . . . . . ॥४६॥

स्नातां दृष्ट्वा तदा तत्र ह्यदितिं कृतपारणाम् ।
सुप्रसन्नेन मनसा कश्यपोऽप्यभजच्च ताम् ॥४७॥

कामयानां चाप्यदितिं कश्यपः कामसंयुतः ।
भुभुजे प्रियां भार्यामनवद्यां च सुन्दरीम् ॥४८॥

कालदोहदिनीं दृष्ट्वा प्रियां पाण्डुमुखीं प्रिये ।
परप्रीत्या तु तुषतुः दम्पती सहसा मुदा ॥४९॥

. . . . . . . . . . . . . . . . . . . . . . . . ।
उवाच ह्यदितिं चैव कश्यपः परया मुदा ॥५०॥

वरं वरय भद्रं ते मत्तो यदभिवाञ्छसि ।
तत्तेऽहं संप्रदास्यामि देवानामपि दुर्लभम् ॥५१॥

---

४६ ख: मा तीवाद — तीव्राद्

४७ ख: मा कृतपारण — कृतपारणाम्

घ: मा अभजेश्च — अभजच्च

४८ घ: मा सुन्दरं — सुन्दरी

श्रुत्वा तु तद्वचो सौम्यं प्रियं च दक्षिजा प्रिये ।
उवाच च तदा प्रीत्या प्रजापतिमानन्दिता ॥५२॥

वरं दास्यसि चेन्मह्यं पुत्रांस्तेजोमयान्प्रिय ।
यत्तेजसा पराभूता देवा अपि प्रजापतेः ॥५३॥

श्रुत्वैतस्या वचो देवि हसन्प्राह च तां प्रियाम् ।
यस्माद्द्वादशवर्षाणि चरितं दुश्चरं तपः ॥५४॥

क्रुद्धया तेजसा युक्तान्पुत्रान्प्राप्स्यसि द्वादश ।
अण्डा द्वादश वै गर्भा भविष्यन्ति हि जीविताः ॥५५॥

अण्डेभ्यश्च परं पुत्राः जीवंतः द्वादशैव ते ।
सर्वाभिभाविनो भद्रे भविष्यन्ति न संशयः ॥५६॥

अर्धं यत्तपसातीतं त्वया वर्षं त्रयोदशम् ।
अतो मृताण्डस्त्वद्देवि काले प्रादुर्भविष्यति ॥५७॥

इत्युक्त्वोपारमत देवीं कश्यपस्तपसे रतः ।
दक्षिजापि प्रसन्नासीच्छ्रुत्वा प्रियगिरं प्रियाम् ॥५८॥

---

५५ घः मा भविश्यन्ति-भविष्यन्ति
जीवितः— जीविताः
५६ खः मा जीवंतं— जीवन्तः
५७ घः मा प्रार्भविष्यति — प्रादुर्भविष्यति

कालेन सुषवे तत्र ह्यण्डो द्वादश लीलया ।
देवमाता महादेवि कश्यपश्च प्रजापतिः ॥५९॥

केनचित्त्वथ कालेन सौवर्णं मृतमप्यहो ।
अण्डं प्राजनयद्देवि काले प्रादुर्भविष्यति ॥६०॥

जातान्दृष्ट्वा तथा चाण्डान्ब्रह्मलोकपितामहः ।
आदित्यश्चादितिं प्राह हसन्मधुरया गिरा ॥६१॥

श्रीब्रह्मोवाच

दक्षपुत्रि प्रवक्ष्यामि ह्यण्डा एते सुदुर्लभाः ।
कालप्रतीक्षणां स्थेया न दूर्कलितमानसा ॥६२॥

कालेन ते भविष्यन्ति पुत्रास्तेजस्विनस्तव ।
तेजसाभिभविष्यन्ति ससुरासुरदानवान् ॥६३॥

अयं मार्ताण्डः क्षेप्तव्यः सतीसरसि शोभने ।
तत्रैवायं च कालेन मृतानुद्धरति क्षणात् ॥६४॥

. . . . . . . . . . . . . . . . . . . . . .

शर्मदः पुण्यदश्चापि स्वर्गदश्च भविष्यति ॥६५॥

---

६० ख: मा अहो—अहो

आसन्द्वादशपुत्रास्ते स्मृताः मासाधिपाः किल ।
अयं मृताण्डजः पुत्रस्तेजसाभिभविष्यति ॥६६॥

एतांस्तु द्वादशादित्यान्पुत्रान्कालेन दक्षजे ।
अस्मिन्कलियुगे घोरे महापातकिनो नराः ॥६७॥

प्रायेण प्रजनिष्यन्ति एते एव न संशयः ।
प्रमादिनो मृता यस्माज्जीवन्तस्तु प्रमादिनः ॥६८॥

पापिनस्तु मृताः प्रोक्ता पुण्या जीवन्ति एव हि ।
जीवत्वञ्च मृतत्वञ्चाप्येतदेवेति निश्चलम् ॥६९॥

मृ मृतानां पापिनां यस्मादुद्धारयेत्तत्क्षणात् ।
तस्मादयं च ते पुत्रो मृताण्डख्यातिमेष्यति ॥७०॥

तस्मात्पुत्रि भव स्वस्था लोकस्योद्धारिणी भव ।
देवानां जननी चैव तपसा दग्धकिल्विषा ॥७१॥

स्नुषया एवमुक्त्वा तु ब्रह्मलोकपितामहः ।
कश्यपं प्राह देवेशि वर्धस्व स्वकुलधनम् ॥७२॥

---

६६ गः मा मृताण्डजाः—मृताण्डजः

६७ घः मा नरः—नराः

६८ खः एता—एते

७२ कः मा स्मुषया—स्नुषया

इदं त्रयोदशं चाण्डं सतीसरसि शोभने ।
गत्वा निक्षिप भद्रं ते ततः श्रेयो भविष्यति ॥७३॥

तत्र सम्पत्स्यते क्षेत्रं मार्ताण्डं नाम नामतः ।
प्रख्यातं त्रिषु लोकेषु मृतोद्धरणमेष्यति ॥७४॥

. . . . . . . . . . . . . . . . . . . . . . . . . . . ।
इत्युक्त्वा कश्यपं देवि ब्रह्माप्यंतर्धिमागतः ॥७५॥

कश्यपो हि तदा देवि मृतमण्डं प्रगृह्य वै ।
सतीसरसि पुण्येऽस्मिन्प्राक्षिपद्ब्रह्मणो गिरा ॥७६॥

कालेन द्वादशादित्याः जाता अण्डेभ्य एव च ।
महातेजस्विनः प्रोक्ताः सर्वतेजोऽभिभाविनः ॥७७॥

तेषां पृथक् पृथक् नामस्थानानि च ददौ किल ।
कश्यपानां तु देवेशि ब्रह्मलोकपितामहः ॥७८॥

कदाचित्कालपर्यन्तं कश्यपो जगदम्बिके ।
निवृत्तस्तपसस्तीव्राद् ब्रह्माणं तमुवाच ह ॥७९॥

---

७३ ख: मा शुभने—शोभने

७४ ग: मा प्राख्यतं—प्रख्यात

७९ ग: मा तीव्रा—तीव्राद्

श्रीकश्यप उवाच

भगवन्सर्वलोकेश प्रसीद करुणानिधे ।
आगामिनि जगन्नाथ दारुणेऽस्मिन्कलौ युगे ॥८०॥

तपोऽर्थं जगदीशान पुण्यस्थानं समादिश ।
प्राय: कलियुगो यत्र नास्मानाभिभविष्यति ॥८१॥

एतच्छ्रुत्वा वचस्तस्य कश्यपस्य महात्मन: ।
जगाद वचनं ब्रह्मा सर्वलोकपितामह: ॥८२॥

हरमाराधय क्षिप्रं स ते स्थानं प्रदास्यति ।
. . . . . . . . . . . . . . . . . . . . . . . . ॥८३॥

श्रुत्वैतद्वचनं तस्य ब्रह्मणोऽव्यक्तजन्मन: ।
हरमाराधयामास कश्यप: परया मुदा ॥८४॥

दिव्यं त्रिवर्षं देवेशि निराहारो जपन्मुहु: ।
अङ्गुष्ठाग्रेण तिष्ठन्स वर्षमेकं महेश्वरि ॥८५॥

---

८१ क: मा तपोर्त्थं—तपोऽर्थं

८४ ग: मा आरादयामास—आराधयामास

८५ ख: मा मुद्द—मुहु:

एवं स्तुत्यमानस्य दुष्करं तप उत्तमम् ।
कश्यपस्य तदा तत्र देवो दर्शनमाययौ ॥८६॥

दृष्ट्वा देवं महादेवमुग्रं शूलिनमीश्वरि ।
दण्डप्रणाममकरोत्स्तुवन्वाचं मुहुर्मुहुः ॥८७॥

दृष्ट्वा तु पतितं तत्र दण्डवत्तं सुरार्चिते ।
उत्थायापि चावदत्तत्र कश्यपं श्लक्ष्णञ्च तम् ॥८८॥

त्र्यम्बकं त्रैधमीक्षं त्रिवर्णं त्रिधामपरमम् ।
प्रपद्ये कालमीशं गिरिशं चाष्टमूर्ति वीशम् ॥८९॥

शैवं गिरिशं विश्वरूपं
धीशं ह्लीशं धीरमीशानमुग्रम् ।
सूक्ष्मं स्थूलमण्डरूपं महान्तं
प्रपद्येम शरणं तं बृहन्तम् ॥९०॥

वागीश्वरं वागवाग्यं वदेशं
वीरेश्वरं वीर्यधं धीरवीरं ।
त्रिधामनं पुरुषं रूपमेकं
प्रपद्येम शरणं देवमुग्रम् ॥९१॥

---

८६ ख: मा तपमुत्तमं—तप उत्तमम्

८८ ख: मा स्वरार्चिते—सुरार्चिते

९० क: मा शैवं—शैव

सूक्ष्मात्सूक्ष्मतरमाद्यमवाङ्‌मनस गोचरम् ।
यं न जानाति योगो शस्तं वन्दे चण्डविक्रमम् ॥९२॥

देवं वाङ्‌मनसातीतं त्रिधामात्मानमीश्वरम् ।
तेज:पुञ्जस्थमीशानं भूयो भूयो नमाम तम् ॥९३॥

इति स्तुत्वा महादेवं तेज:पुञ्जस्थमीश्वरम् ।
प्रणम्य दण्डवद्भूमौ पतिताश्च मुहुर्मुहु: ॥९४॥

श्रुत्वा स्तुतिं महादेवि तेज:पुञ्ज स्थमीश्वर: ।
कराङ्गयुक्तो देवेशि तत्र दर्शनमीयिवान् ॥९५॥

कराङ्गयुक्तो यत्रैव दृष्ट्वा तेज:स्थ ईश्वर: ।
स ग्राम: प्रथितोऽद्यापि कराङ्गेशाभिधा पर: ॥९६॥

कराङ्गेशे कृतं स्नानं दानं होमो जपस्तथा ।
देवार्चनं तपश्चापि कृतमक्षय्यतां व्रजेत् ॥९७॥

. . . . . . . . . . . . . . . . . . . . . . . . ।
तेज:पुञ्जो य एवोक्त: स एवेश: प्रकीर्तित: ॥९८॥

---

९२ ख: मा अवाद्यमनसगोचरं—अवाङ्‌मनस गोचरं

९३ ग: मा तीज:—तेज:

९५ घ: मा र्दशिनं—दर्शनं

# अथ मार्तण्डध्यानम्

ॐ भास्वत्पुञ्जकरं प्रसन्नवदनं पीताम्बरालङ्कृतं
पद्मं चाभयपुस्तकं जपवटीं हस्तैर्दधानं प्रभुम् ।
संवर्ताग्निसमानकान्तिममलं नेत्रत्रयोद्भासितं
देवैःयत्परितस्स्थितं च वरदं मार्तण्डनाथं नुमः ॥९९॥

यस्मान्मृताण्डात्सम्भूतस्तेजःपुञ्जो महेश्वरि ।
तस्मात्प्रोक्तः पुराविद्भिरीशो मार्ताण्डसंज्ञितः ॥१००॥

अत्र द्वारे महादेवि मार्ताण्डः समधिष्ठितः ।
यत्र ज्वालाप्रकाशोऽभूत्योंऽशो दक्षिणको मतः ॥१०१॥

यत्र व्याप्तं न तत्तेजः स प्रोक्तो वामपार्श्वकः ।
यत्र प्रतिष्ठितो देवि वीरो मार्ताण्डनायकः ॥१०२॥

विषयस्यास्य नामाभूत्मार्ताण्डेति तदा प्रिये ।
अण्डस्य भवनं यत्र तत्प्रोक्तं भवनं परम् ॥१०३॥

---

१०० गः मा प्रोक्ता—प्रोक्तः

सम्पादनान्महेशानि मार्ताण्डेशस्य सुन्दरि ।
ग्रामस्य भवनं नाम ख्यातं जगति पावनम् ॥१०४॥

भवनात्क्षेत्रमुख्यस्य मृतानामपि भावनात् ।
तस्माद्भुवनमित्याख्यां प्रापितो ग्रामसत्तम: ॥१०५॥

गृहं मार्ताण्डनाथस्य यत: प्रोक्तं पुरातनै: ।
तस्माद्भुवनमित्याख्यां प्रापितो ग्राम उत्तम: ॥१०६॥

नेत्राभ्यां तस्य या ज्वाला सा वै भर्गशिखा मता ।
योगीश्वरीति हृदयाद्भीमा प्रोक्ता स्वत: शिवे ॥१०७॥

मुखात्तस्य तु सञ्जाता भास्वते वै महाकला ।
भवानी दक्षिणा पार्श्वा ज्वाला समधिजायते ॥१०८॥

अण्डखण्डद्वयं तत्र नागद्वयमभूत्किल ।
चक्राच्च निर्गता चाका नदी पुण्यप्रवाहिनी ॥१०९॥

---

१०४ ख: मा मार्ताण्डशस्य—मार्ताण्डेशस्य

१०५ ग: मा भव—भवन

१०७ क: मा य—या

घ: स्पत: —स्वत:

१०८ ग: मा पाश्वा पार्श्वा

घ: जाला—ज्वाला

१०९ ग: मा चक्राश्च —चक्राच्च

वाका—चाका

तस्मात्प्रोक्ता पुराविद्भिश्चाकेति च वरप्रदा ।
चाकंति घोरपापानि स्नानञ्च दानमीश्वरि ॥११०॥

तस्माच्चाकेति नामास्याः प्रथितं भुवनत्रये ।
चकितानि च पापानि स्नाता मानवारिणि ॥१११॥

तस्माच्चाकेति नामास्याः नद्या वै प्रथितं भुवि ।
जलस्य मलसंयुक्तं कमलं समुदाहृतम् ॥११२॥

यस्मात्मलविहीनं तदण्डखण्डमभूत्किल ।
ततो विमलमित्युक्तमण्डखण्डार्धमीश्वरि ॥११३॥

विष्णोरंशो यत्र लीयेते तिग्मतेजसि वारिणि ।
ततः स नागः विख्यातः कमलस्तत्र पारगः ॥११४॥

मत्समीपमनुप्राप्तो ह्यत्र स्नानाच्च पुण्यकृत् ।
तस्माच्छ्रीमत्स्यभवनं प्रथितं भुवनत्रये ॥११५॥

..... .................. ।
मत्स्यानां गाहमुद्दिष्टं श्रीमत्स्यभवनं शुभम् ॥११६॥

---

११० घः मा दान चमीश्वरि—दानमीश्वरि

११४ गः मा नागं—नागः

११५ खः मा स्नानाच —स्नानाच्च

गः तस्माश्रीमत्स्य—तस्माच्छ्रीमत्स्य

मत्सादृश्यमनुप्राप्तो ह्यत्र स्नातश्च पुण्यकृत् ।
तस्माच्छ्रीमत्स्यभवनं प्रथितं भुवनत्रये ॥११७॥

स्नानं दानं तपो होमो जपः स्वाध्याय एव च ।
अनन्तस्स्यान्महादेवि श्रीमत्स्यभवने शुभे ॥११८॥

इति ते कथितं चाद्य श्रीमत्स्यभवनं परम् ।
इदानीं देवदेवेशि किं भूयः श्रोतुमिच्छसि ॥११९॥

इति श्रीभृङ्गीशसंहितायां मार्ताण्डविषये श्रीमत्स्यभवनं
नाम प्रथमः पटलः ॥१॥

# अथ द्वितीयः पटलः

ॐ श्रीदेवी

वद सत्यं महादेव योगिन्यष्टकमुत्तमम् ।
कस्मिन्क* - - महास्थाने योगिन्यः संप्रतिष्ठिताः ॥१॥

पूज्याश्च ताः कथं देव पूजनाच्चैव किं फलम् ।
... ... ... ... ... ... ... ... ... ... ... ... ॥२॥

श्रीभैरव उवाच

शृणु देवि प्रवक्ष्यामि योगिनीस्थानमुत्तमम् ।
पूजनञ्च फलञ्चापि लोकानुग्रहकाम्यया ॥३॥

पुरा मार्ताण्डनाथस्य नेत्राज्ज्वाला समुत्थिता ।
ज्वालन्ती पापसङ्घांश्च विघ्नांश्चापि महेश्वरि ॥४॥

---

*त्रुटितोऽत्र पाठः

१ ख: मा प्रतिष्ठितः — संप्रतिष्ठिताः

२ क: मा तः — ताः

३ ग: मा पूजनाश्च — पूजनञ्च

४ ख. मा नेत्राजाला — नेत्राज्ज्वाला

तस्माज्ज्वालेति विख्याता लोके यत्र विशारदैः ।
भर्गो यन्त्रेऽत्र या देवि सैव ज्वलति शब्दिता ॥५॥

भजनात्कर्मसङ्गानां पापानामपि सुन्दरि ।
तस्माद्भर्ग इति ख्यातं भुवनेषु महेश्वरि ॥६॥

शिरः खात्वोत्थिता यस्माच्छिखेति समुदाहृता ।
भर्गस्तेज इति ख्यातं भुवनेषु महेश्वरि ॥७॥

तस्मात्पुरातनैर्देवि माता भर्गशिखेति सा ।
तत्वज्ञैरपि सा प्रोक्ता श्रीमत्त्रिपुरसुन्दरी ॥८॥

वेदविद्भिश्च गायत्री सावित्री च सरस्वती ।
दुर्गा भद्रा भवानीति कालेति त्रिविधा प्रिया ॥९॥

भ्रामरी ह्यङ्गलीत्याख्या बीजरूपा परापि च ।
ओङ्कारी च तथा माया कामाख्यापि च सुन्दरि ॥१०॥

---

६ खः मा स्वन्दरि— सुन्दरि

घः भुवनेश्च —भुवनेषु

७ खः मा समुदाहृतः—समुदाहृता

१० खः मा रापि—परापि

सैव विश्वेश्वरी विश्वा विश्वाज्ञा मन्त्ररूपिणी ।
वेदरूपा चिदानन्दा चित्स्वरूपा चिदुद्भवा ॥११॥

स्थूलसूक्ष्मतरा सूक्ष्मा सूक्ष्मबुद्धिप्रदा स्मृता ।
भक्तानुग्रहमोहन्ती स्थूला सैव बभूव ह ॥१२॥

त्रिनेत्रा चारुवेदानां सूर्यकोटिसमद्युतिः ।
रक्ताम्बरधरा तन्वी सुमध्या चारुहासिनी ॥१३॥

शंखत्रिशूलबाणैश्च सर्पभूषितबाहुका ।
नागयज्ञोपवीता च सर्वाभरणभूषिता ॥१४॥

सिंहासना शैलपृष्ठे विहरन्ती महेश्वरी ।
भजनीया महेशानि दुर्गा भर्गशिखेति सा ॥१५॥

दृष्ट्वा भर्गशिखां तत्र पर्वतस्थां महेश्वरि ।
मुच्यते कोटिहत्याभिः सर्वपातकसञ्चयैः ॥१६॥

गवां कोटिसहस्रस्य सम्यग्दत्तस्य यत्फलम् ।
-- - - - - - - - - - - - - - - - - - - - - - - ॥१७॥

चन्द्रसूर्योपरागे च कुरुक्षेत्रे महेश्वरि ।
यत्फलं लभते मर्त्यस्तदस्या दर्शनाद्भवेत् ॥१८॥

---

१४ ग: मा उपनीताश्च — उपवीता च

१५ क: मा शैलपृष्टे — शैलपृष्ठे

अकामो वा सकामो वा देवीं भर्गशिखां श्रयेत् ।
देवतादर्शने तस्या दासवत्तां श्रयिष्यति ॥१९॥

पुरश्चरणं मन्त्रैर्वै यः कश्चित्कुरुते नरः ।
स शीघ्रं सिद्धिमाप्नोति नात्र मेऽस्ति विचारणा ॥२०॥

गायत्र्युपासको यश्च श्रेयो भर्गशिखां प्रिये ।
सिद्धिमाप्नोति मनुजः शीघ्रमेव न संशयः ॥२१॥

चान्द्रायणैः कृच्छ्रशतैर्महासांतापनैरपि ।
जलकृच्छ्रार्धकृच्छ्रैश्च प्राजापत्यैरपीश्वरि ॥२२॥

अश्वमेधैर्वाजिपेयैर्ज्योतिष्टोमादिभिर्मखैः ।
सहस्रस्तु कृतश्चापि विधिना सुरसुन्दरि ॥२३॥

---

१९ घः मा दासवत्त श्रयष्यति—दासवत्तां श्रयिष्यति

२० कः मा मर्न्त्रैवं —मन्त्रैर्वै

२१ घः मा शीघ्रसेव—शीघ्रमेव

२२ गः मा कृच्छ्रेच्च—कृच्छ्रैश्च

घः अमीश्वरि—अपीश्वरि

२३ कः/खः वाजिपेयै ज्योतिष्टोम—वाजिपेयैर्ज्योतिष्टोम

यत्फलं लभते मर्त्यस्तवत्रैकाहपूजनात् ।
महापातकयुक्तो वा युक्तो वाह्युपपातकैः ॥२४॥

अर्चयित्वा च देवेशीं पुण्यां भर्गशिखां प्रिये ।
पातकैर्मुच्यते मर्त्य इत्याख्यां परमेश्वरीम् ॥२५॥

इन्द्रो पातकादत्र मुक्तः सद्यो भवेत्क्षणात् ।
स्त्रीत्वादिलोपिभवने पूजयित्वा महेश्वरीम् ॥२६॥

स्त्रीवान्मुक्त इति ख्यातं शास्त्रेषु वरवर्णिनि ।
- - - - - - - - - - - - - - - - - - - - ॥२७॥

भार्गवोऽपि पुरा मातृवधात्त्रिपुरसुन्दरीम् ।
पूजयित्वात्र भवने मुक्तिं प्राप्नोति विश्रुतः ॥२८॥

वृत्रासुरवधाच्चापि शक्रो मुक्तोऽत्र पूजनात् ।
ब्रा* - - - दुःखसंतप्तो यः स भर्गां समाश्रयेत् ॥२९॥

---

२५ कः मा देवीशी—देवेशीं
खः पुण्यं —पुण्यां
घः इत्यापारमेश्वरी — इत्याख्यां परमेश्वरीम्
२६ गः मा स्नोत्वा —स्त्रीत्वा
घः पूजमित्व —पूजयित्वा
*त्रुटितोऽत्र पाठः
२९ घः मा भर्मा — भर्गां

दारिद्र्यान्मुच्यते जन्तुः दुःखादपि न संशयः ।
पुण्यकामं महेशानि पुण्यां भर्गां समाश्रयेत् ॥३०॥

पुण्यमाप्नोति मनुजो वाजिमेधादिकोटिजम् ।
अन्नकामो महादेवि पुण्यां भर्गां समाश्रयेत् ॥३१॥

धनदस्तं महेशानि दासवत्संश्रयिष्यति ।
पुत्रकामः महेशानि पुण्यां भर्गां समाश्रयेत् ॥३२॥

पुत्रांशूरानवाप्नोति पण्डितानपि शोभनान् ।
स्त्रीकामश्च महादेवि पुण्यां भर्गशिखां श्रयेत् ॥३३॥

स्त्रियं सुरूपामाप्नोति मनोवृत्तानुसारिणीम् ।
कन्यां सुशीलामाप्नोति चानुरूपां वराङ्गनात् ॥३४॥

विद्याकामो महेशानि भर्गां पुण्यां समाश्रयेत् ।
ब्रह्मविद्यामपीशानि प्राप्नोत्येव न संशयः ॥३५॥

---

३१ कः मा मनजो—मनुजो

घः पुणं—पुण्यां

३३ घः मा शोभनात्—शोभनान्

३४ गः मा स्वशीलाम्—सुशीलाम्

मोक्षकामो महेशानि पुण्यां भर्गां समाश्रयेत् ।
मोक्षमेव समाप्नोति सत्यमेव न संशय: ॥३६॥

दर्शनात्स्पर्शनादस्या: पूजना* - - - सुन्दरि ।
बलिदानात्तथा होमाज्जपाच्च सुरसुन्दरि ॥३७॥

इष्टमर्थं समाप्नोति मनुजो भवने प्रिये ।
बहुनात्र किमुक्तेन मनसा यद्यदिच्छति ॥३८॥

मनुजस्तदवाप्नोति नात्र मेऽस्ति विचारणा ।
अधुना शृणु देवेशि भवानीं भगिनीं मम ॥३९॥

महामार्ताण्डनाथस्य भैरवस्य महात्मन: ।
मुखाद्या निर्गता ज्वाला भवानीति निगद्यता ॥४०॥

भर्गस्य वर्धयन्ती च नीरूपा या यत: स्थिता ।
तस्मात्प्रोक्ता भवानी च पुराविद्भिर्योगिनी यता ॥४१॥

---

३७ क: मा स्पंश — स्पर्श

*त्रुटितोऽत्र पाठ:

घ: स्वरस्वन्दरि — सुरसुन्दरि

३८ ख: मा मनजो — मनुजो

४० ग: मा मुख्याद्दा — मुखाद्या

भवं* - - पं ता नीता च रक्षणार्थं च शम्भुना ।
तस्मात्पुरातनी प्रोक्ता भवानी नाम योगिनी ॥४२॥

भवान्या पूरितो यस्मात्ते* - - सा सुरसुन्दरि ।
तस्माद्भवानीपूराख्यो ग्रामो जगति कीर्त्यते ॥४३॥

स्नानं दानं जपो होमः स्वाध्यायश्च सुरार्चिते ।
कृतो भवानीपूराख्ये ग्रामेऽनंतो भवेद्ध्रुवम् ॥४४॥

अङ्गीभ्यो भास्वते नाम प्रादुर्भूता महात्मनः ।
भास्वती नाम सा देवी पर्वताग्रस्थिता सदा ॥४५॥

ययौ वै भासितं सर्वं जगत्स्थावरजङ्गमम् ।
सा प्रोक्ता च पुराविद्भिर्भास्वती नाम वै कला ॥४६॥

ज्ञानेन भासयेत्सर्वमर्चनाद्वन्दनादपि ।
भास्वत्याः समीपे तु यत्किञ्चित्क्रियते नरैः ॥४७॥

स्नानं दानं तपो होमो जपः स्वाध्याय एव च ।
तदक्षय्यं भवेद्देवि नात्र मेऽस्ति विचारणा ॥४८॥

---

४६ खः मा जग्म — जङ्गमम्

४७ गः मा भासुत्या— भास्वत्याः

४८ कः मा स्नानं दानं होमो —स्नान दानं तपो होमो

कर्णयोः नासिकायाश्च या ज्वाला निस्सृता प्रिये ।
भीमं तदभवत्तस्याश्शक्तिर्भीमेति कथ्यते ॥४९॥

तया वाधिष्ठितं स्थानं भीमं द्वीपमिति स्मृतम् ।
भीमद्वीपे च यत्किञ्चित्क्रियते वरवर्णिनि ॥५०॥

स्नानं ध्यानं तथा योगः स्वाध्यायश्चार्चनं तथा ।
तदनन्तं भवेद्देवि नात्र कार्या विचारणा ॥५१॥

दैत्यानां दानवानाञ्च भूतानां यक्षरक्षसाम् ।
क्षेत्रे विघ्नकरा लोका प्रादुर्भूताः पुरा किल ॥५२॥

लोकोद्विग्नाः पुरा देवा मार्ताण्डं शरणं ययुः ।
श्रीमत्स्वभवने पुण्ये गीर्भिराढ्याभिरीरयन् ॥५३॥

श्रीदेवा ऊचुः

नमो मार्ताण्डनाथाय स्थाणवे परमात्मने ।
भैरवाय सुभीमाय त्रिधाम्नेश नमो नमः ॥५४॥

मृतोद्धरणदक्षाय गर्भोद्धरणहेतवे ।
तेजसां केतवे तुभ्यं हेतवे जगतामपि ॥५५॥

---

५१ घः मा विचारणाम्—विचारणा

५३ घः मा रयन् – ईरयन्

धीप्रणोदाय* - - - - गर्भरूपाय ते नम: ।
ओङ्कारव्याहृतिस्थाय महावीराय ते नम: ।।५६।।

वीरेशाय नमस्तुभ्यं क्षेत्रेशाय नमो नम: ।
वेदार्थाय च वेदाय वेदगर्भाय शम्भवे ।।५७।।

विश्वामित्राय सूर्याय सूराय परमात्मने ।
महाभैरवरूपाय भैरवानन्ददायिने ।।५८।।

द्विविधध्वांतध्वंसाय महामोहविनाशिने ।
मायान्धकारनाशाय चक्षुस्तिमिरभञ्जिने ।।५९।।

मन्त्राय मन्त्ररूपाय मन्त्राक्षरविचारिणे ।
मन्त्रवाच्याय देवाय महामन्त्रार्थदायिने ।।६०।।

यंत्राय यन्त्ररूपाय यंत्रस्थाय यमाय ते ।
यंत्रैर्नियन्त्रैर्नियमैर्यमिनां फलदाय च ।।६१।।

अज्ञानतिमिरध्वंसकारिणे क्लेशहारिणे ।
महापातकहर्त्रे च महाभयविनाशिने ।।६२।।

---

*त्रुटितोऽत्र पाठ:

५८ ग: मा माहाभैरव—महाभैरव
घ: दायिनी — दायिने

६२ ग: मा हत्रे — हर्त्रे
घ: महामयि—महाभय

भयदाय सुशीलाय भयानकरवाय ते ।
बीभत्साय च रौद्राय भीताभयप्रदाययिने ॥६३॥

तेजस्वितेजोरूपाय चण्डायोग्राय ते नमः ।
बीजाय बीजरूपाय बीजभर्गाय ते नमः ॥६४॥

क्रोधभर्गाय देवाय लोभभर्गाय ते नमः ।
महाभर्गाय वै तुभ्यं ज्ञानभर्गाय ते नमः ॥६५॥

घोरभर्गाय ते तुभ्यं भीतिभर्गाय ते नमः ।
सुशोकाय विशोकाय ज्ञानभर्गाय ते नमः ॥६६॥

तत्वभर्गाय देवाय मनो भर्गाय वै नमः ।
दारिद्र्यदुःखभर्गाय कामभर्गाय ते नमः ॥६७॥

हिंसाभर्गाय तामिस्रभर्गाय जगदात्मने ।
अतिदुर्वासनाभर्गं नमस्ते भैरवात्मने ॥६८॥

---

६३ गः मा भीमत्साय—बीभत्साय

घः प्रदायिनी—प्रदायिने

६४ कः मा तेजरूपा—तेजोरूपाय

घः भीज—बीज

ध्यायंते यं भर्ग इति भर्गभर्गाय ते नमः ।
रोगभर्गाय देवाय पापभर्गाय ते नमः ॥६९॥

महापातकभर्गाय ह्युपपातकभर्गिणे ।
महानिरयभर्गाय नृत्तभर्गाय ते नमः ॥७०॥

क्लेशभर्गाय देवाय भौतिकघ्नाय ते नमः ।
मृत्युभर्गाय देवाय दुर्गभर्गाय ते नमः ॥७१॥

ध्यानाद्ध्यायन्ति यद्भर्गं यमिनः संयतेन्द्रियाः ।
नाथाय भर्गनाथाय भर्गाय सततं नमः ॥७२॥

वीरवीरेश देवेश नमस्तेऽस्तु त्रिधामक ।
महामार्तण्ड वरद सर्वाभयवरप्रद ॥७३॥

नमो वीराधिवीरेश सूर्यचन्द्रातिधामक ।
अग्निधामातिधाम्ने च महामार्तण्ड ते नमः ॥७४॥

---

७० ग. मा पहा—महा
घः नत—नृत्त
७२ कः मा ध्यावन्ति—ध्यायन्ति
खः यमिणः—यमिनः
संयतेन्द्रियः—संयतेन्द्रियाः
घः सनत—सततं
७३ कः मा वेरवेरेश—वीरवीरेश

वीरातिवीर वीरेश घोरघोरातिघोरक ।
महामार्ताण्डदेवेश भूयो भूयो नमो नमः ॥७५॥

श्रीभैरवः

इत्थं स्तुत्वा महादेवि वीरं मार्ताण्डमादरात् ।
देवानां दर्शने तस्थौ मार्ताण्डो जगदीश्वरः ॥७६॥

तेजोरूपत्रिनेत्रस्तु कराभ्यां कमले वहन् ।
वरं चाभयमन्याभ्यां धारयन्नग्रतः स्थितः ॥७७॥

दृष्ट्वा देवास्तु मार्ताण्डं पुरःस्थममरेश्वरि ।
दण्डवत्पतिता भूमौ प्रणेमुश्च मुहुर्मुहुः ॥७८॥

उत्थायापि जगदीशानि देवान्मार्तण्ड ईश्वरः ।
उवाच सान्त्वयन्वाचा देवा वृणुत भो वरम् ॥७९॥

श्रुत्वा देवा वचः सौम्यं देवः प्रणतवत्सलम् ।
प्रत्यूचुः जगदीशानि विनयाक्षरया गिरा ॥८०॥

---

७८ घः मा प्राणेमृश्च — प्रणेमुश्च

७९ कः मा उत्थापि — उत्थायापि

८० गः मा जगदेशानि — जगदीशानि

श्रीदेवा ऊचुः

भगवन्देवदेवेश लोकानुग्रहकारक ।
लोकोद्विग्ना वयं देव त्वत्पादशरणं श्रिताः ॥८१॥

श्रीमत्स्यभवनेऽमुष्मिन्क्षेत्रे देवविनन्दिताः ।
दैत्यलोकं विनिघ्नन्ति विघ्नैर्बहुविधैरपि ॥८२॥

तदुद्विग्ना भवत्पादकमलं शरणं श्रिताः ।
. . . . . . . . . . . . . . . . . . ॥८३॥

श्रीभैरवः

देवानां वदतो वेत्थं श्रुत्वा मार्ताण्ड ईश्वरः ।
क्रोधमाहारयाञ्चक्रे दैत्यान्प्रति महेश्वरि ॥८४॥

कोपाज्जज्वाल मार्ताण्डो भर्गा प्रादुर्भूस्ततः ।
नेत्रास्यश्रोत्रनासाभ्यस्तश्चैवयं समगच्छत ॥८५॥

---

८१ घः मा श्रितः—श्रिताः

८२ खः मा देव विनदितः—देवविनन्दिताः

घः विघ्नैर्बहु—विघ्नैर्बहुः

८४ कः मा व्रचनो वदतो

जेत्थं—वेत्थं

संयोगाद्योगिनी जाता कला मम महेश्वरि ।
रक्तमाल्याम्बरधरा चन्द्रभूषितमस्तका ॥८६॥

त्रिनेत्रा शंखचक्राभ्यां सर्वभूषितपाणिका ।
खड्गं पद्मं तथान्याभ्यां धारयन्ती पुरःस्थिता ॥८७॥

योगदा योगिनी नाम तेजो योगाच्च योगिनी ।
दृष्ट्वा पुरःस्थितां तत्र योगिनीं नाम केवलाम् ॥८८॥

मार्ताण्डः पाणिना गृह्य पादेनाभ्यहनत्स्थलीम् ।
अत्रैव वस देवेशि क्षेत्रे रक्षार्थमीश्वरि ॥८९॥

दैत्यलोकविनाशाय विघ्नसंघान्निवारय ।
इत्युक्तो योगिनीं देवः पुनः पर्वतमाययौ ॥९०॥

मार्तण्डपादक्रमणाकुलं समभिजायत ।
तदा प्रभृति देवेशि पादस्थमभवत्प्रिये ॥९१॥

---

८६ ख। मा चद्र—चन्द्र

८७ कः मा नित्रेना—त्रिनेत्रा

गः खड्गां—खड्गं

९१ गः मा तद—तदा

योगिनीश्वर्यपि पादस्था तिष्ठ तत्र महेश्वरि ।
दैत्यलोकान्विघ्नभूता ग्रासन्ती वीरशासनात् ॥९२॥

लोकानां शत्रुभूता च समयोगीश्वरी कला ।
तेनैव हेतुना तत्र लोकारिरभवद्यत: ॥९३॥

. . . . . . . . . . . . . . . . . . . . . . . . ।
तत: प्रोक्तं सूर्यपादस्थलं लोकारिसंज्ञितम् ॥९४॥

लोकारौ च कृतं स्नानं ध्यानं परमपावनम् ।
अक्षय्यं च भवेद्देवि यद्यदाभूतं संप्लुतम् ॥९५॥

श्राद्धं पुण्यं पूजनं च जप: स्वाध्याय एव च ।
अनन्तफलदं प्रोक्तं लोकारौ विधिना कृतम् ॥९६॥

प्रयागे शतकल्पस्तु तर्पणात्तृप्तिरुत्तमा ।
जाह्नव्यां च महेशानि गङ्गायां तर्पणादपि ॥९७॥

---

९३ क: मा शोत्र—शत्रु

९५ क: मा लोकारो—लोकारौ

ख: चानं—ध्यान

ग: मा सप्लतं—संप्लुतम्

९६ घ: मा लोकारो—लोकारौ

तत्तु मलिम्लुचे मासि लोकारौ तर्पणाद्भवेत् ।
. . . . . . . . . . . . . . . . . . . . . . . ॥९८॥

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
स्नानाल्लोकारिके तीर्थे सद्यो मुच्येत सुन्दरि ॥९९॥

यत्किञ्चिन्मानवो देवि लोकारौ श्राद्धमाचरेत् ।
तृप्ताः पितृगणाः प्रीता भविष्यन्ति न संशयः ॥१००॥

शतकल्पं च नृत्यन्ति वर्धयन्ति स्वकान्धनैः ।
घृतकुल्या मधोः कुल्याः क्षीरकुल्यास्तथैव च ॥१०१॥

वध्नस्तु जगदीशानि ह्युपतिष्ठन्ति तान्प्रिये ।
मनोरथैरात्रिदिनमतिवाहन्ति वै गणाः ॥१०२॥

पितृणां प्रसमीक्षार्थं प्रसन्ना न विचारणा ।
अस्माकं च कुले कश्चिद्दायादः स्यात्कदापि च ॥१०३॥

---

९९ गः मा स्नाना—स्नानात्

१०० गः मा तृप्ः—तृप्ताः

१०१ गः मा कुल्पः—कुल्याः

१०२ कः मा जगदेशानि—जगदीशानि

पुण्ये मार्ताण्डविषये यः कश्चित्तर्पयेच्छुभैः ।
जलैर्लोकारिक्षेत्रे च तिलदर्भसमन्वितैः ॥१०४॥

मधुक्षीरायुतैश्चैव पुण्ये लोकारिक्षेत्रके ।
श्राद्धे वा विधिवद्द्यात्तृप्तः स्याम शतंसमः ॥१०५॥

नृत्यंतः प्रवदन्तीत्थं स्वदा *- - दान्प्रतीश्वरि ।
मा गच्छध्वं प्रयागं वै गयाञ्च जाह्नवीं तथा ॥१०६॥

कुरुक्षेत्रं नैमिषं च पुण्यां वाराणसीमपि ।
पृथूदकं प्रभासं च मा प्रयासेन खिद्यत ॥१०७॥

पुण्ये मलिम्लुचे मासि मार्ताण्डक्षेत्र उत्तमे ।
श्रीमत्स्यभवनाख्ये च ग्रामराजे ह्यतंद्रितः ॥१०८॥

लोकारौ च विशेषेण यतध्वं श्राद्धकर्मणि ।
सक्तौ सक्तौ यत्र भवेत्पुण्यं गोकोटिसम्भवम् ॥१०९॥

शतकल्पं च दायादस्तृप्तिश्चात्र भवेत्पुनः ।
गयापिण्डैश्च सा तृप्तिर्मलिनैः कार्यतो भवेत् ॥११०॥

---

*त्रुटितोऽत्र पाठः

१०८ ग: मा भवनेख्ये – भवनाख्ये

गवां कोटिसहस्रस्य सम्यग्दत्तस्य यत्फलम् ।
विधिना वेदविदुषे कुरुक्षेत्रे पृथूदके ॥१११॥

चन्द्रसूर्योपरागे च मलिने मासि चोत्तमे ।
तत्फलं समवाप्नोति लोकारौ पिण्डदानतः ॥११२॥

इति पितृगणा देवि प्रत्यक्षाश्चन्द्रपुत्रकान् ।
अंशा न सन्ति देवेशि पितृकामा मुहुर्मुहुः ॥११३॥

तस्मात्सर्वप्रयत्नेन लोकारौ श्राद्धमाचरेत् ।
सूर्यपादेऽत्र गंगायां मुक्तिपिण्डाञ्जले क्षिपेत् ॥११४॥

मधुतृप्ताः* --- रतृप्ता घृततृप्ता महेश्वरि ।
दधितृप्ताश्च पितरो भविष्यन्ति शतं समाः ॥११५॥

---

११२ घः मा लोकारो– लौकारौ

पिण्डमतः — पिण्डदानत

११३ खः मा प्रत्यक्षो — प्रत्यक्षाः

घः मुहुर्मुहु — मुहुर्मुहुः

*त्रुटितोऽत्र पाठः

प्रीता भवन्ति देवेशि दायादान्वर्धयन्ति च ।
आयुषाधानसन्तानैः बुद्धचा ऋद्धचा सुरेश्वरि ॥११६॥

स्मृत्वा ध्यात्वा च तुष्टाव पुष्ट्या कान्त्या च प्रज्ञया ।
आरोग्यविभवैश्चापि सुगत्या च तथेश्वरि ॥११७॥

ततो यतेत क्षेत्रेऽस्मिन्श्राद्धकर्मणि नित्यशः ।
गोदानं वाजिदानं वा तिलदानमथापि वा ॥११८॥

विद्यां रथं च दासीं च महिषीं स्वर्णमेव च ।
रौप्यं वाप्यथ निष्कं वा दातव्यमत्र यत्नतः ॥११९॥

अक्षय्यं फलमाप्नोति यावदाभूतसंप्लवम् ।
चान्द्रायणादिभिः पुण्यैश्चातुर्मासैरपीश्वरि ॥१२०॥

एकान्तरैश्च षड्रात्रैस्तथा मासोपवासकैः ।
यत्फलं भवेन्नृणां तदत्रैकाहतो भवेत् ॥१२१॥

स्नानाद्दानाज्जपाद्धोमाच्छ्राद्धादेवार्चनादपि ।
फलमाप्नोति मनुजो वेदपारायणं शिवे ॥१२२॥

---

११७ कः मा ध्यात्या — ध्यात्वा
घः स्वगत्या — सुगत्या
१२० खः मा यावदाभूतसम्प्लवम् — यावदाभूतसंप्लवम्
१२१ कः मा षद्रारैः — षड्रात्रैः
१२२ कः मा सनानदानात् — स्नानाद्दानात्

बहुनात्र किमुक्तेन नरः पातकवान्कलौ ।
स्नात्वा लोकारिक्षेत्रे मुच्यते नात्र संशयः ॥१२३॥

. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ।
इति ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि ॥१२४॥

इत्येष पटलो गुह्यो महापातकमुक्तिदः ।
श्रुतश्च पठितो ध्यातः पुण्यदो पापनाशनः ॥१२५॥

इति श्री मार्ताण्डमाहात्म्ये लोकारिवर्णनं
नाम द्वितीयः पटलः ॥२॥

---

१२३ खः मा किलौ—कलौ

# अथ तृतीयः पटलः

श्रीदेवी

मलिम्लुचविधिं ब्रूहि फलञ्चापि सुरेश्वर ।
अयं त्रयोदशो मासः किमर्थं मलिनः शिव ॥१॥

मलिने पावनः देशः कुतः प्रोक्तस्त्वयानघ ।
सूर्यास्तु द्वादशैवेते प्रोक्ता मासाधिपास्त्वया ॥२॥

त्रयोदशेऽत्र मासेऽस्मिन्नु मार्तण्डः प्रभुः शिव ।
सूक्ष्मेऽस्मिंशास्त्रजालेऽस्मिन्न श्रुतः कुत्रचिन्मया ॥३॥

अज्ञानान्धाः परिभ्रान्ता अस्मिन्संशयजालके ।
वद सत्यं महादेव लोकानुग्रहकारक ॥४॥

श्रीभैरवः

शृणु वक्ष्ये महादेवि विधिं मलिनसम्भवम् ।
यच्छ्रुत्वा न पुनर्मोहमेवं यास्यसि सुन्दरि ॥५॥

---

१ गः मा त्रियोदशो—त्रयोदशो
२ कः मा पावने—पावनः
३ गः मा अस्मि—अस्मिन्
५ घः मा मोहम्मेवं—मोहमेवं

रसर्षिनवभिर्देवि भाग्यं हृत्वा पतेच्च यः ।
मासः मलिनः प्रोक्तः सर्वकर्मसु गर्हितः ॥६॥

दर्शश्च पौर्णमासश्च भानुना यत्र लङ्घितः ।
स भानुमासः कथितो मन्त्रतन्त्रविशारदैः ॥७॥

यावद्वा त्रिशतं मासान्मलः स्यादण्डसम्भवः ।
मलिनत्वं च मासस्य प्रोक्तमेतत्पुरातनैः ॥८॥

तदण्डमलिनं मासं दृष्ट्वा भीतो भवेद्यतः ।
दर्शपूर्णे समाप्लुत्य संक्रमेच्चान्यमेव हि ॥९॥

स भानुः लंघितः प्रोक्तो मासे मङ्गलवर्जितः ।
ब्रह्मणो वरदर्पाच्च भानुमासो महेश्वरि ॥१०॥

तेजसाभिर्भवेद्देश मार्तण्डरविरुत्तमः ।
ततस्तन्मासके तस्य मासेशस्य क्रियाश्च याः ॥११॥

. . . . . . . . . . . . . . . . ।
नताः प्रणामं कुर्वन्ति तेजोभिर्भवनाद्रवेः ॥१२॥

---

६ कः मा रसर्षि—रर्षि

ग: प्रोक्ता—प्रोक्तः

११ कः मा देष—देश

१२ गः मा नतः—नताः

यज्ञोद्वाहोपनयनमङ्गलोद्यापनादिकाः ।
क्रिया विवर्जनीयाश्च मलमासे न संशयः ॥१३॥

हिमवत्कुक्षिसम्भूता मलिम्लुचे न संशयः ।
मासाधिपोऽपि मलिनो मार्ताण्डाभिभवात्प्रिये ॥१४॥

यतो भवेत्ततस्तस्मिन्न माङ्गल्यं समाचरेत् ।
व्रतं चापि विशेषेण पशुपुत्रधनक्षयात् ॥१५॥

तीर्थयात्रामपीशानि विना मार्ताण्डक्षेत्रकम् ।
वर्जनीयश्च द्विविधो मासो मङ्गलके प्रिये ॥१६॥

षष्टिश्च दिवसैर्मासः सर्वमङ्गलवर्जितः ।
द्विविधानां जनानां च ह्यतः प्रोक्तः पुरातनैः ॥१७॥

दुर्लभस्य यश्च राज्ञो देशोऽन्य आपतेद्यदा ।
आभिभूयैकतस्तिष्ठेन्नृपस्तत्रान्य एव सः ॥१८॥

.........................।
न षष्टिदिवसो मासः कदाचित्स भविष्यति ॥१९॥

---

१५ कः मा भवेततः—भवेत्ततः
१७ कः मा षष्ठा च—षष्टिश्च
१८ गः मा तिष्ठेनृप—तिष्ठेन्नृप
१९ गः मा भवष्यति—भविष्यति

सर्वमङ्गलके कार्य्ये व्रतेऽपि सुरसुन्दरि ।
दिवसाः षष्टिरित्युक्तो वर्जनार्थं पुरातनैः ॥२०॥

ततो वै मलिनः प्रोक्तः सर्वकर्मसु गर्हितः ।
ततो मार्ताण्डविषये श्राद्धयागादिकर्मणाम् ॥२१॥

मलिनेऽपि तिथिश्राद्धं कृत्वा मार्ताण्डके प्रिये ।
पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ॥२२॥

पावनं चापि मलिने वर्जयेत् प्रिये तदा ।
स्यान्मुक्ता मलिनां देवि ततः कार्यं न संशयः ॥२३॥

स्वकर्मवशतो यस्य मलिने मृतिरापतेत् ।
अथवा तन्मृतो मध्ये मलिम्लुचसमागमः ॥२४॥

श्राद्धं कृत्वा विधानेन पिण्डान्सप्तदशान्ददेत् ।
मलिनेऽपि मृतो देवि तथा मध्यसमागमः ॥२५॥

---

२१ कः मा प्रोक्ता—प्रोक्तः
खः गर्हितः—गर्हितः
२२ घः मा संशयः—संशयः
२३ गः मा सान्मुक्ता—स्यान्मुक्ता
२४ गः या तामृतो—तन्मृतो

अष्टादश समादद्याद्विधिनैव समाहित: ।
अन्त्यैव षोडश: प्रोक्तो वेदतन्त्रविशारदैः ॥२६॥

क्षेत्रं प्राप्य महेशानि वपनं तु समाचरेत् ।
अकृत्वा वपनं तु ते जायन्ते ब्रह्मराक्षसा: ॥२७॥

न श्राद्धदिवसे कुर्यात्पितृहा चैव जायते ।
यावन्ति नखरोमानि संकृतिश्राद्धमाचरेत् ॥२८॥

तावत्कल्पं प्रयान्त्यैव तत्पूर्वं नरकान्बहून् ।
तस्मात्सर्वप्रयत्नेन पूर्वेद्युर्वपनं चरेत् ॥२९॥

श्राद्धं कृत्वा तु वपनं यश्चरेज्ज्ञानदुर्लभ: ।
स याति दारुणांलोकान्पूर्वेभि: पितृभि: सह ॥३०॥

अकृत्वा वपनं श्राद्धं भद्रे यस्तु समाचरेत् ।
महारोगी भवेत्प्रेत्यै: सह पूर्वपितामहै: ॥३१॥

---

२६ ख: मा समोहित:—समाहित:
२७ ख: मा समाचरे—समाचरेत्
ग: मा तो—ते
२८ क: मा नां—न
ख: दोमाणि—रोमानि
३१ क: मा श्रा—श्राद्धं
ग: महेलेम—महारोगी

तस्मात्कुर्वीत पूर्वेद्युर्वपनं सुरसुन्दरि ।
रोम्नि रोम्नि अश्वमेधं ज्योतिष्टोममवाप्नुयात् ॥३२॥

चतुरशीतिलक्षाञ्च निरयान्याति दारुणान् ।
प्रयाति क्रमशो देवि श्राद्धाहे वपनं चरन् ॥३३॥

अश्वमेधसहस्रस्य वाजपेयस्य यत्फलम् ।
प्राप्नोति मनुजो देवि पूर्वेद्युर्वपनान्नरः ॥३४॥

गङ्गायां भास्करे तीर्थे पितृमातृगुरुक्षये ।
मधुसत्यां प्रयागे च वपनं सप्तमाचरेत् ॥३५॥

पुण्ये वै मलिने मासि श्राद्धं यस्तु समाचरेत् ।
गयासहस्रगुणिते फलमाप्नोति पुष्कलम् ॥३६॥

यदा भवति देवेशि रविवारे च सप्तमी ।
शुक्ला श्रवणसंयुक्ता करयुक्तादिता वापि ॥३७॥

पुष्येण सहिता सौम्येनामृताभ्यामथापि वा ।
सा प्रोक्ता विजया नाम सप्तमी बहुपुण्यदा ॥३८॥

---

३२ क: मा कुर्वंत – कुर्वीत
ग: राजपेय – अश्वमेधं
३४ ग: मा मनुजें—मनुजो
३८ ग: मा प्रोक्तं—प्रोक्ता

बहुपुण्यैरवाप्नोति दण्डं तस्यापि सुन्दरि ।
दण्डोऽपि दुर्लभः प्रोक्तो मार्ताण्डक्षेत्र उत्तमे ॥३९॥

श्रेष्ठा च सर्वा पार्वत्या प्रोक्ता तंत्रविशारदैः ।
... ... ... ... ... ... ... ... ... ... ... ... ॥४०॥

लोकारो मद्यपात्रे च सप्तम्यां श्राद्धमाचरेत् ।
तृप्तास्तस्य भवन्त्येवाकल्पं पितृगणाः प्रिये ॥४१॥

यः करोति महेशानि लोकारिक्षेत्र उत्तमे ।
श्राद्धतर्पणमीशानि स तु मामुपतिष्ठति ॥४२॥

पितृणां श्राद्धं कर्तुं वै पुण्यं भवति निश्चितम् ।
ग्रहणेऽपि च लोकारो समे दर्शेऽपि सुन्दरि ॥४३॥

श्राद्धं दानं तथा स्नानं कृत्वा मुच्येत संकटात् ।
बहुनात्र किमुक्तेन लोकारो यत्कृतं प्रिये ॥४४॥

---

४१ कः मा लोकारो——लोकारो

घः पितृगणः — पितृगणा।

४२ खः मा क्षेत्रमुत्तमे—क्षेत्र उत्तमे

४४ गः मा किमु—किमुक्तेन

स्नानं दानं तपो होमः स्वाध्यायो देवतार्चनम् ।
तत्तदक्षय्यतां याति ह्यति सत्येन ते शपे ॥४५॥

इत्थं कृतं मया तेऽद्य संशयच्छेदनं प्रिये ।
मलिनस्य च मासस्य माहात्म्यमपि सुन्दरि ॥४६॥

अधुना शृणु देवेशि चाकायाश्चैव निर्णयम् ।
यच्छ्रुत्वा मुच्यते जन्तुः कोटिजन्मभवैरघैः ॥४७॥

चक्रधाराभिघातश्च क्षितेरन्ध्रो भवेत्किल ।
अस्पृशं तु तदा विष्णुरङ्गुष्ठाग्रेण सुन्दरि ॥४८॥

तस्माद्विनिस्सृतस्तोयप्रवाहः सुरसुन्दरि ।
स एव पवनो जातो मार्ताण्डविशये किल ॥४९॥

---

४५ कः मा होमाः—होमः

खः स्वाध्यायोदैवणा—स्वाध्यायो देवता

गः तन्नदक्षियतां—तत्तदक्षय्यतां

घः चपे—शपे

४७ गः मा यः श्रुत्वा – यच्छ्रुत्वा

४९ कः मा निस्मृतः—निस्सृतः

खः प्रवाहा प्रवाहः

चाकेति नाम्ना प्रथिताः प्रवाहाः सुरसिन्धुजाः ।
चक्राद्याता ज्योतिर्विष्णोः जातास्तोयप्रवाहकाः ॥५०॥

सा एव नाम्ना चाकेति प्रथिता भुवनत्रये ।
चाकन्ति घोरपापानि विघ्नान्यपि महेश्वरि ॥५१॥

स्नातानामपि विधिवत्तस्माच्चाकेति वै स्मृता ।
चकितानि च पापानि दृष्ट्वापि च वै सुन्दरि ॥५२॥

चाकेति कथिता तस्माद्वेदतन्त्रविशारदैः ।
चाकिता कालनागेन जाह्नवी हरिणा यतः ॥५३॥

ग्रामस्य पावनार्थं च तस्माच्चाकेति कथिता ।
॥५४॥

मलिनमासमाहात्म्यमुपपाद्य चाकानिर्णयकोऽपूर्णोऽयं
मार्ताण्डविषयकः तृतीयः पटलः ॥३॥

५० खः मा सिन्धुजः — सिन्धुजाः
गः द्योति — ज्योतिः
५२ घः मा चम — च वै
५३ गः मा नेगेन — नागेन

# भृङ्गीशसंहिता

# हरमुकुटगङ्गामाहात्म्यम्

### ॐ श्रीमहागङ्गाभगवत्यै नमः

### अथ गङ्गामाहात्म्यम्

श्रीभैरवी

ॐ श्रुत्वा मा एहि ग्रामस्य महिमानमनन्तकम् ।
उच्चैश्शीर्णस्य क्षेत्रस्य कृतार्थास्मि न संशयः ॥१॥

अधुना श्रोतुमिच्छामि गङ्गामुकुटसम्भवाम् ।
यत्र स्नात्वा च पीत्वा च मुच्यते ब्रह्महत्यया ॥२॥

अस्थिक्षेपं कथं कुर्यात्कथं यात्रां महेश्वर ।
किं फलं च महेशान शत्रुगेहस्य किं फलम् ॥३॥

---

१ कः मा उच्चै—उच्चैः

२ कः मा कुर्या—कुर्यात्
खः शत्रगेहस्य—शत्रुगेहस्य

केशवापस्य वृषतां दर्शनात्कि फलं लभेत ।
महिषीपद्धतौ चैव तथा ब्रह्मसरोवरे ॥४॥

हंसद्वारस्य माहात्म्यं तथा कौलसरोवरे ।
अस्त्रुबिन्दोश्च माहात्म्यं नन्दिक्षेत्रे फलं तथा ॥५॥

तथा मुकुटमाहात्म्यं दर्शनात्कि फलं लभेत ।
वद सत्यं महादेव कृपया परमेश्वर ॥६॥

श्रीभैरवः

वक्ष्ये मुकुटगङ्गायाः माहात्म्यमुत्तरोत्तमे ।
येन वै श्रुतमात्रेण सद्यो मुच्येत पातकात् ॥७॥

..... ....................।
हरं मुक्त्वा कावटते यस्माद्मुकुटगङ्गिका ॥८॥

मुक्त्वा कुटिलतां भूमौ गता यस्मान्महेश्वरि ।
तस्मान्मुकुटगङ्गाख्या प्रसिद्धा पृथिवीतले ॥९॥

मुक्ता कुतूहलाद्यस्माद्देव्या दर्शनकाङ्क्षया ।
अटते भूमिगा नित्यं तस्मान्मुकुटगङ्गिका ॥१०॥

पुरा कैलासशिखरे क्रीडमानस्य धूर्जटेः ।
प्रमोदः प्रबभूवात्र मानसः कोऽपि सुन्दरि ॥११॥

---

११ खः मा दूर्जटेः—धूर्जटेः
गः बभूव - प्रबभूव

गङ्गा प्रादुरभूत्तत्र तथा क्रीडितुमिच्छति ।
विमर्शानन्दलहरीहृदया काश्यपाश्रुतः ॥१२॥

द्रवीभूतोद्गता शम्भुमुकुटान्निस्सृता प्रिये ।
प्रमोदलहरी जाता आनन्दाम्बुजलात्मिका ॥१३॥

निस्सृता नेत्रमध्याच्च शिवस्याद्भुतरूपिणी ।
प्रोक्ता चाकाशगङ्गेति अन्तराकाशनिर्गता ॥१४॥

. . . . . . . . . . . . . . . . . . . . . . . . ।
निर्गतत्वाच्च मनसो मानसं सर उच्यते ॥१५॥

पतितोत्तारणाच्चेयं नित्यं चोत्तरदिविस्थिते ।
मानसोत्तरगङ्गा सा शिवसायुज्यदायिनी ॥१६॥

भगीरथेन यानीता गङ्गा स्वपितुमुक्तये ।
सा स्वर्गदा देवि का च गङ्गांशत्वान्न मोक्षदा ॥१७॥

---

१२ ग: मा विमर्श (यत्र मुख्यफलोपायोद्भिन्नो गर्भतोऽधिकः,
आपार्थः सांतरायश्च स विमर्श इति स्मृतः — मुद्रा०)
१४ घ: मा मन्तरा — अन्तरा
१६ ख: मा दिवस्थते — दिविस्थिते
ग: सो—सा
१७ क: मा भगीरथीयन या नेता— भगीरथेन यानीता
घ: शत्वा— अंशत्वान्न

विशिष्टा सर्वगङ्गानां गङ्गा चोत्तरमानसे ।
मुख्या महेशमूर्ध्नि स्यान्महापातकनाशिनी ॥१८॥

या पार्वत्या स्पर्धयन्ती मुहुर्मुहुरनेकदा ।
शिवस्य क्रीडामनसो गङ्गा प्रादुरभूत्पुरा ॥१९॥

कृत्वा स्व विग्रहं देवी निर्मलं चाति सुन्दरम् ।
तया चिक्रीड भगवान्कैलासोपरि शुभे ॥२०॥

क्रुद्धा देवी ततो याता गङ्गां दृष्ट्वातिविह्वलाम् ।
दृष्ट्वा तया तु क्रीडन्तं ईशानमपराजितम् ॥२१॥

क्रोधमाहारयाञ्चक्रे हरं प्रति महेश्वरी ।
हरं जघान गिरिजा क्रुद्धा माल्यैः सुशोभनैः ॥२२॥

क्रुद्धां देवीं तथा यान्तीं दृष्ट्वा गङ्गातिविह्वला ।
अन्तर्धिमगमत्सद्यो मुकुटे जगदीशितुः ॥२३॥

---

१८ गः मा मूध्नि—मूर्ध्नि

घः पाकनाशिनी—पातकनाशिनी

२१ कः मा क्रद्धा—क्रुद्धा

२३ घः मा मुक्तदे—मुकुटे

. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . । 

दृष्ट्वा देवो हसद्वाक्यं अब्रवीद्गिरिजां प्रिये ॥२४॥

किं गतं किञ्च सम्पन्नं यद्वंसि विविधैः प्रिये ।
माल्यैः कटाक्षैः कुटिलैर्विलग्नासि पुनः पुनः ॥२५॥

श्रुत्वैतद्गिरिशस्यैव वचो मनोहरं पुनः ।
पार्वती प्रत्युवाचेदं गिरीशं सुमनोहरम् ॥२६॥

कयाचित्क्रीडमानस्य वदतीव हि विह्वलाम् ।
मनश्च व्याकुलं ते यच्छरीरञ्चैव कम्पते ॥२७॥

रोमोद्रेकश्च भवति शङ्कमारस्य काकवत् ।
निर्लज्जश्च त्वमेवासि मां निर्लज्जां वदेः कथाम् ॥२८॥

---

२५ ख: मा पद्वसि—बद्धंसि

२६ ख: मा मनोनहं—मनोहरं

२७ घ: मा कम्पती—कम्पते

२८ ख: मा काक्वत्—काकवत्

ग: निर्लज्ञ:—निर्लज्ज:

घ: कथाम्—कथाम्

श्रुत्वैवंतद्गिरिशो वाक्यं प्रत्युवाचेश्वरीं तथा ।
का दृष्टा कुत्र सा देवि वदन्ती त्वं न लज्जसे ॥२९॥

एतच्छ्रुत्वा भगवतो वचो दिव्यं तु सुन्दरम् ।
करणं जग्राह ततो जटाजूटं महेशितुः ॥३०॥

तद्बन्धं शिथिलं कृत्वा कटाक्षैस्तं जघान सा ।
घ्नन्तीं दृष्ट्वा कटाक्षैस्तैर्देवदेवं महेश्वरम् ॥३१॥

गङ्गा कुतूहलाविष्टा मुकुटाच्च पपात ह ।
पतितां तां हरो दृष्ट्वा हसन्प्रोवाच पार्वतीम् ॥३२॥

स्वयं पतति वै देवि प्रच्छन्नपापकृन्नरः ।
तस्माद्गङ्गा स्वयं देवि पतिता तव पादयोः ॥३३॥

प्रसन्ना भव देव्यस्या मुकुटात्पतिता भव ।
प्रच्छन्नपापिनी गङ्गा जाह्नवी तव पादयोः ॥३४॥

---

२९ कः मा वाक्यवर्यं—वाक्यं

घः देविः—देवि

३० खः मा दिव्येति—दिव्य तु

३१ घः मा तैंदेव—तैर्देव

३२ खः मा मुकुटाश्च—मुकुटाच्च

प्रसन्ना भव देव्यस्या मुकुटात्पतिता सती ।
कुर्याद्यदि पतेत्सद्यो नरकानेकविंशतिम् ॥३५॥

नरो वा यदि वा नारी प्रच्छन्नं पापमाचरेत् ।
सद्यः पतति देवेशि गङ्गायाञ्चैव दुर्गतिः ॥३६॥

संश्रुत्य वचनं भर्तुर्देवदेवी महेश्वरी ।
उवाच वचनं देवं हसन्तो वाक्यकोविदा ॥३७॥

यस्मात्प्रच्छन्ना प्राक्रीड मम पत्या स्वयञ्चिरम् ।
तस्मादटत भूमिस्था देवि मद्वाक्यतो भृशम् ॥३८॥

मुकुटात्पतिता देवभूमावटत सुन्दरि ।
पुनर्मुकुटमारोढुं नार्हती कृतपातकम् ॥३९॥

जटा शीघ्रं भगवतो पतिता तु रणतले ।
त्रिभिः मार्गैर्गता यस्मात्तस्मात्ख्याता त्रिमार्गगा ॥४०॥

---

३६ ख: मा गगायञ्चैव – गङ्गायाञ्चैव

दुर्गदि — दुर्गतिः

३८ क:/ख: प्राक्रीडमम — प्राक्रीड मम

४० क: मा पीघ्रं भगवता — शीघ्रं भगवतो

इत्युक्त्वा वचनं देवी क्रोधाच्च विरराम ह ।
तथा शप्ता हरो दृष्ट्वा भवान्या जगदम्बिके ॥४१॥

गङ्गां प्रोवाच वचनं सद्यः प्रीतिकरं प्रिये ।
पुण्ये भाद्रपदे मासि सिंहसंस्थे दिवाकरे ॥४२॥

अष्टम्यामट देवेशि पावयन्पतितान्बहून् ।
पुण्ये भाद्रपदे मासि सिंहसंस्थे दिवाकरे ॥४३॥

पतितास्थिसमा पातात्पुण्या भागीरथी नदी ।
मलिनापि सरोभिश्च सरिद्भिः सागरैः समा ॥४४॥

आयान्तु तास्त्वदुत्सङ्गे ताः पुनीहि स्वयं चिरम् ।
भागीरथीदेविकाद्या अंशभूतास्तथैव हि ॥४५॥

यः कश्चिन्मानवोऽत्रैव भाद्राष्टम्यां महेश्वरि ।
स्नानं दानं तपो होमो स्वाध्यायं चास्थिक्षेपणम् ॥४६॥

---

४१ खः मा क्रोधाग्च —क्रोधाच्च

४३ कः मा अष्टम्यांमिट — अष्टम्यामट

४४ घः मा समं – समा

४५ कः मा त्वदुत्सरे—त्वदुत्सङ्गे

. . . . . . . . . . . . . . . . . . . . . . . . . . . । <br>
करोति विधिवद्देवि तस्य पुण्यफलं शृणु ॥४७॥

शतकल्पं महेशानि काशीवासान्न यत्फलम् । <br>
तत्फलं लभते मर्त्यो दर्शनान्मुकुटस्य हि ॥४८॥

प्रयागे माघमासे हि स्नात्वा वर्षसहस्रकम् । <br>
यत्फलं लभते मर्त्यस्तदेकदिनतः प्रिये ॥४९॥

. . . . . . . . . . . . . . . . . . . . . . . . . . . । <br>
स्नानान्मुकुटगङ्गायाः प्राप्नोत्येव न संशयः ॥५०॥

ब्रह्महा हेमहारी च सुरापी गुरुतल्पगः । <br>
तत्संसर्गी तु मुच्येत स्नानेनात्र महेश्वरि ॥५१॥

अविद्यो वा सविद्यो वाप्यकामी चाथ कामवान् । <br>
स्नात्वा मुकुटगङ्गायां मुच्येतापि न संशयः ॥५२॥

गोघ्नोऽप्यथ कृतघ्नोऽपि स्त्रीघ्नो मातृघ्न एव च । <br>
स्नात्वा मुकुटगङ्गायां सद्यो मुच्येत सुन्दरि ॥५३॥

---

४७ ग: मा विदिवद्देवि — विधिवद्देवि

४९ -: मा तदेयादिनत: — तदेकदिनत:

५१ ग. मा त — तु

नात: परं तीर्थवरं नात: पुण्यं महेश्वरि ।
नातो धर्मो न यज्ञोऽपि जपो होमोऽथ पार्वति ।।५४।।

य: स्नाति मुकुटाधोऽपि पतिते जल उत्तमे ।
- - - - - - - - - - - - - - - - - - - - ।।५५।।

बाहुनात्र किमुक्तेन नर: पातकवान्कलौ ।
यात्रा मुकुटगङ्गाया: प्रकुर्वीत च यत्नत: ।।५६।।

हरद्वाराच्छतगुणं वाराणस्यास्सहस्रकम् ।
पुण्यं मुकुटगङ्गाया: कथितं शिवशासने ।।५७।।

करङ्कक्षेत्रं देवेशि शत्रुगेहाभिधं तथा ।
रामाराधनतीर्थञ्च पुण्यो वै भरतो गिरि: ।।५८।।

केशवापस्वरूपस्य भार्गवस्य महेश्वरि ।
दृषत्क्षेत्रमपि तथा यत्र नित्यं प्रतिष्ठितम् ।।५९।।

महिषीपद्धतिश्चापि तथा ब्रह्मसरोवर: ।
हंसद्वारं क्रौञ्चरध्रं अस्रुबिन्दुर्महेश्वरि ।।६०।।

---

५४ क: ख: मा नत:—नात:

५८ क: मा देशि—देवेशि

५९ ग: मा दृषत्वेत्र—दृषत्क्षेत्र

६० घ: मा क्रौच—क्रौञ्च

घ: असु बिन्दुमहेश्वरि—अस्रु बिन्दुर्महेश्वरि

नन्दिक्षेत्रं महाकालक्षेत्रं परमपावनम् ।
तथा हरमुखाख्यञ्च गिरितुङ्गं महत्तरम् ॥६१॥

पुण्या मुकुटगङ्गा च महापातकविनाशिनी ।
मायापुर्याः शतगुणा माया तस्याः प्रकाशिता ॥६२॥

- - - - - - - - - - - - - - - - - - - - - - ।
अत्र यात्रा प्रयत्नेन कर्तव्या मोक्षकाङ्क्षिभिः ॥६३॥

नरो वाप्यथवा नारी स्नात्वा गङ्गासरोवरे ।
धर्मं परममाप्नोति सत्यं सत्यं वरानने ॥६४॥

इति श्री श्रीसंहितायां महरविषयोपजाततीर्थसङ्ग्रहे
हरमुकुटगङ्गामाहात्म्यं नाम प्रथमः पटलः ॥१॥

---

६१ घः मा महत्तुरम्—महत्तरम्

६२ गः मा शतगुणः—शतगुणा

## अथ द्वितीयः पटलः

श्रीभैरवी

यात्रामुत्तरगङ्गायाः प्रभाते कृपया वद ।
यां कृत्वा मुच्यते जन्तुर्जन्मान्तरभवैरघैः ॥१॥

भैरव।

शृणु देवि प्रवक्ष्यामि यात्रामुत्तरमानसे ।
यां श्रुत्वापि महेशानि गङ्गायात्राफलं लभेत ॥२॥

आदौ शुभे मुहूर्ते तु श्राद्धं कृत्वा विधानतः ।
अम्बोजपात्रे चास्थिनि स्थापयेद्विधिवद्द्विजः ॥३॥

अभ्युक्ष्य पञ्चगव्यैस्तु संपूर्य तिलसर्पिषैः ।
कृष्णैः सितैश्च संवेष्टच क्षौमैर्मन्त्रैश्च वैदिकैः ॥४॥

---

१ खः मा प्रभासे—प्रभाते
गः या—यां

२ घ. मा लभेत्—लभेत

३ गः मा चास्थिति—चास्थिनि

४ कः मा पच—पञ्च
गः कृष्णोः—कृष्णः

संमान्य विधिवद्देवि संपूज्या सुविनायिका ।
ततो गेहाद्विनिर्गत्य गच्छैवोत्तरां दिशम् ॥५॥

ततो विचारकुण्डेऽत्र स्नात्वा गच्छेत्ततोऽम्बिके ।
अम्बोरुहवने पुण्ये स्नात्वा पादक्षिवारिणि ॥६॥

ततो हिरण्यगर्भायां स्नात्वा व्यूहाश्रमं व्रजेत् ।
तत्र स्नात्वा महेशानि गन्धर्वांपुरमाव्रजेत् ॥७॥

तत्र स्नात्वा महेशानि षोडशीं समुपाश्रयेत् ।
षोडशीं तत्र संस्मृत्य तदोन्नोरसं व्रजेत् ॥८॥

ततो व्रजेन्महेशानि वात्पालिग्राममुत्तमम् ।
तत्र स्नात्वा व्रजेद्देवि करङ्कं तीर्थमुत्तमम् ॥९॥

तत्र स्नात्वा समभ्युक्ष्य कोकसानि च वारिणा ।
श्राद्धं कृत्वा व्रजेत्तत्र शत्रुगेहं पुनः प्रिये ॥१०॥

ततो रामाराधनकं तीर्थं परमपावनम् ।
दृष्ट्वा स्नात्वा च विधिवत्ततो भरतमारुहेत् ॥११॥

---

५ क: मा विनायकां—विनायिका
१० घ: मा शत्रगेहं—शत्रुगेहं

दृषत्क्षेत्रं ततो दृष्ट्वा प्रभाते विमले शुभे ।
महिषीपद्धतिश्चैव यायाद्ब्रह्मसरः शुभम् ॥१२॥

स्नात्वा तत्र महेशानि श्राद्धं कुर्याद्विधानतः ।
हंसद्वारं ततो यायाद्भृगुतुङ्गं विशेषतः ॥१३॥

अस्नुबिन्दौ ततः स्नात्वा गच्छेत्कोलसरः शुभम् ।
तत्र स्नात्वा महेशानि नन्दिक्षेत्रं समाश्रयेत् ॥१४॥

संप्राप्य वपनं कुर्यादुपवासमपीश्वरि ।
द्वितीये दिवसे स्नात्वा ह्यस्थिक्षेपं समाचरेत् ॥१५॥

श्राद्धं कृत्वा तु विधिवद्विप्रान्संपूज्य भोजनैः ।
चतुर्विधैस्कन्दमूलैः फलैश्चैव विशेषतः ॥१६॥

---

१२ गः मा पद्धतीश्चैव—पद्धतिश्चैव

१४ कः मा अत्रविन्दौ—अस्नुबिन्दौ

१५ खः मा उपवासं अपीश्वरि—उपवासमपीश्वरि

गः द्विवसे—दिवसे

१६ गः मा विधैः स्कन्दमूलैः—विधैस्कन्दमूलैः

वस्त्रैः क्षौमैराभरणैः गोभिरश्वैर्गजैरपि ।
रत्नैर्दासीभिरीशानि दासैश्चैव तथा प्रिये ॥१७॥

तर्पयेद्ब्राह्मणान्सम्यक्बुद्ध्या परया प्रिये ।
स याति ब्रह्मसदनं यत्र गत्वा न शोचते ॥१८॥

गङ्गाप्रतिकृतिं कृत्वा मत्स्ययुक्तां महेश्वरि ।
पद्मस्थां ताम्रकुम्भस्थां चतुर्भिश्च सुवर्णकैः ॥१९॥

क्षौमैः सुशोभनैश्चैव वस्त्रैराभरणैरपि ।
गङ्गां सम्पूज्य विधिवदाचार्याय समर्पयेत् ॥२०॥

गाङ्गयाः प्रतिमादाय प्रभुत्वाद्यन्मयार्जितम् ।
पुण्यं तदस्तु मोक्षाय पितृणां मम चापि भो ॥२१॥

यात्रा साफल्यहेत्वथ मया दानमिदं कृतम् ।
इति मन्त्रेण चेशानि दत्वा विप्रं क्षमापयेत ॥२२॥

---

१७ गः मा रत्नैदासीभि.—रत्नैर्दासीभि.

घः दासश्चैव—दासैश्चैव

घः प्रिलेः – प्रिये

१८ कः मा ब्रह्मणान् – ब्राह्मणान्

१९ गः मा ताम्र – ताम्र

एवं कृत्वा तु यो यात्रां गङ्गायाः कुरुते नरः ।
सद्यः स रुद्रो भवति विष्णुर्वा जगदम्बिके ॥२३॥

इति प्रोक्ता मया तेऽद्य यात्रा परमपावनी ।
यां श्रुत्वा प्राप्नुयाज्जन्तुर्गङ्गास्नानं दिने दिने ॥२४॥

इति [श्री] श्रीसंहितायां हरमुकुटयात्रावर्णनं
नाम द्वितीयः पटलः ॥२॥

---

२४ ग: मा प्राप्नुयाजन्तु. - प्राप्नुयाज्जन्तुः

# अथ तृतीयः पटलः

श्रीभैरवी

अस्थिक्षेपमपीशान श्राद्धमपि महेश्वर ।
वद केन विधानेन ह्यस्थिक्षेपणमुत्तमम् ॥१॥

नरः कुर्याद्यथाशक्तितत्सर्वं वद विस्तरात् ।
. . . . . . . . . . . . . . . . . . . . . . ॥२॥

श्रीभैरवः

शृणु वक्ष्यामि देवेशि सुशुभे दिन उत्तमे ।
स्नात्वास्थीनि समुद्धृत्य श्राद्धं कृत्वा प्रयत्नतः ॥३॥

. . . . . . . . . . . . . . . . . . . . ।
भुक्त्वा किञ्चित्स्वके गेहे प्रतिष्ठेत ततः पुरा ॥४॥

श्रीषोडशीं नमस्कृत्य तथा युद्धविनायकम् ।
तीर्थे करङ्कके पुण्ये स्नायाच्च विधवत्ततः ॥५॥

श्राद्धं कुर्यात्प्रयत्नेन ह्यस्थीन्यभ्युक्ष्य वारिणा ।
यात्रां च सफलां कुर्याद्विधिज्ञो विधिना ततः ॥६॥

---

१ गः मा वध —वद
घः हस्थाक्षेपण — हस्थिक्षेपण

यः कश्चिच्च महादेवि करङ्केनाम्भसा नहि ।
अभ्युक्ष्य ह्यस्थिनिचयं विघ्नं गङ्गा करोति च ॥७॥

श्रीभैरवी

कथं करङ्कके ग्रामे नदी कारङ्किकाभिधा ।
पूतापि का मता देव तत्सत्यं कृपया वद ॥८॥

भैरवः

शृणु देवि पुरा वृत्तं यद्भूतं पृथिवीतले ।
यस्य श्रवणमात्रेण वाजपेयं लभेन्नरः ॥९॥

दधीचर्षेश्च पृष्टास्थां निचयेन प्रचक्रिरे ।
देवैर्वज्रेर्गिरिपक्षौ च्छेदनार्थं महेश्वरि ॥१०॥

स करङ्कः प्रभातेऽभूत्पतितः सैकतोक्षितः ।
विष्णुना ताक्ष्र्य आज्ञप्तः क्षिप तं मुकुटाम्भसि ॥११॥

गृहीत्वा स करङ्कं तं दधीचर्षेर्महात्मनः ।
आगत्य प्राप्तो हरविषयं तत्र दृष्टवान् ॥१२॥

---

१० कः मा पृटास्थां—पृष्टास्थां

११ कः मा प्रभासे—प्रभाते

गः आज्ञाप्तः—आज्ञप्तः

सर्पाणां कदनं तच्च दृष्ट्वा देवः शिवस्स्वयम् ।
प्रतिषेधगरुत्मन्तं प्राह विरमेति पुनः ॥१३॥

गरुत्मानपि तं प्राह भगवन्तं शिवं तदा ।
यत्र यत्र च ते दृष्टिः सर्पास्तत्र भवन्तु वा ॥१४॥

अन्यथा कदनं ह्येषां करोम्यद्याविचारयन् ।
तथेत्युक्तो भगवता पुनः सर्पाञ्जघान ह ॥१५॥

आज्ञापयामास ततो गणान्देवः शिवस्स्वयम् ।
स्व पर्णं निष्कालयत सद्यस्त्याः प्रमथा इति ॥१६॥

गणैर्निषिद्धः स ततो गरुत्मांश्च स्वमालयम् ।
जगाम त्वयत्वा त्वरितः करङ्कं नभस्तलात् ॥१७॥

यस्मात्करङ्के देवेशि तदुत्सृष्टो गरुत्मता ।
तस्मात्करङ्को ग्रामश्च प्रथितो भुवनत्रये ॥१८॥

---

१३ घः मा विरमेति पुनः — प्राह विरमेति पुनः

१४ घः मा सा — वा

१६ गः मा निष्ठालयत — निष्कालयत

घः सद्गत्याः — सद्यस्त्याः

१८ खः मा ततोत्सृष्टो — तदुत्सृष्टो

तस्मात्क्षेत्रं समुत्पन्नं करङ्कं नाम विश्रुतम् ।
तत्र स्नात्वा च पीत्वा च मुच्यते ब्रह्महत्यया ॥१९॥

. . . . . . . . . . . . . . . . . . . . . . . . . ।
करङ्काख्ये सुतीर्थे वै स्नातव्यमविशङ्कया ॥२०॥

श्राद्धं कृत्वा यथान्यायं अस्थीन्यभ्युक्ष्य वारिणा ।
यात्रा सफलतामेति सत्यं सत्यं वरानने ॥२१॥

आपेयमानान्मुच्येत करङ्कके जल उत्तमे ।
स्नात्वा पीत्वा च भुक्त्वा च श्राद्धं कृत्वा महेश्वरि ॥२२॥

यः करङ्कं महाक्षेत्रं समुल्लङ्घ्यान्यतो व्रजेत् ।
स याति नरकं घोरं यात्रा तस्य च निष्फला ॥२३॥

तस्मात्करङ्कतीर्थं वै यत्नतः समुपाश्रयेत् ।
स्पृष्ट्वा स्नात्वा जलं तत्र मुच्यते ह्युपपातकैः ॥२४॥

पितरस्तृप्तिमायान्ति दत्तैः कारङ्ककैर्जलैः ।
तस्मात्सर्वप्रयत्नेन कारङ्किके निर्मले जले ॥२५॥

. . . . . . . . . . . . . . . . . . . . . . . . . ।
तर्पणं तत्र कर्तव्यं पितॄणां तृप्तिहेतवे ॥२६॥

---

२३ खः मा समुल्लंघ—समुल्लङ्घ्य
२५ खः मा कारंककजलैः—कारङ्ककैर्जलैः

कारङ्कं जलमाश्रित्य पितरः स्वर्गतः सदा ।
आस्फोटयन्ति नृत्यंति गाथां कुर्वन्ति सर्वदा ॥२७॥

अपि नः सकुले कश्चिज्जायते जगतीतले ।
तीर्थं करङ्कं श्रयेत तर्पयेन्नः समागतान् ॥२८॥

इति नित्यं महेशानि स्वर्गे पितृगणास्सदा ।
सर्वतो गीतिका देवि गायन्ति च विशेषतः ॥२९॥

इति तच्च मया ख्यातं क्षेत्रं कारङ्कमुत्तमम् ।
अधुना शृणु देवेशि शत्रुगेहाभिधं पुरम् ॥३०॥

इति [श्री] श्रीसंहितायां करङ्कनदीमाहात्म्यं
नाम तृतीयः पटलः ॥३॥

---

२८ कः/खः मा कश्चितनाजन्ति — कश्चिज्जायते

घः तर्पये नः — तर्पयेन्नः

३० कः मा स च मया ख्यातां — तच्च मया ख्यातं

घः शत्रगेह — शत्रुगेह

## अथ चतुर्थः पटलः

भैरवः

शत्रुगेहाभिधं वक्ष्ये शृणु पापभयापहम् ।
यस्य श्रवणमात्रेण न विघ्नाः प्रभवन्ति हि ॥१॥

पुरा परशुरामेण कार्तिकेयो विनायकः ।
स्पर्धाञ्चक्रे ततो राम उत्प्रासनं करोतु यः ॥२॥

आधिक्याल्लाघवादासीर्दधिकोऽपि तयोश्च सः ।
विघ्नानाज्ञापयामास गणेशः सुरसुन्दरि ॥३॥

रामशस्त्रं नाशयन्तु विघ्ना ह्येते मयोदिताः ।
शत्रुभूता भवन्त्वद्य चात्रैवं विघ्नकारिणः ॥४॥

रामस्य शत्रुभूतास्ते ह्यभवंलक्ष्यपातने ।
रामो ध्यायंश्चिरं तस्थौ के विघ्नान्प्रचरन्ति मे ॥५॥

---

२ ख: मा उत्प्राश्रम—उत्प्रासनं
   यो:—यः

ईशं विज्ञाप्य देवेशि शब्दपातिनमाहरत् ।
मन्त्रं जजाप विधिवशब्दपातिनमाह वैं ॥६॥

तेनास्त्रेण महेशानि भार्गवो विधिना ततः ।
विघ्नान्संक्षोभयामास शत्रुगेहस्थितांस्तदा ॥७॥

. . . . . . . . . . . . . . . . . . . . . . . . ।
रामेण क्षोभिता ह्यासन्बाणेन शब्दपातिना ॥८॥

यत्र स्थिता महाविघ्नाश्शत्रुभूता महेश्वरि ।
तस्मात्प्रसिद्धो ग्रामोऽभूच्छत्रुगेहाभिधः प्रिये ॥९॥

शत्रुगेहे जपो होमस्तपस्स्वाध्याय एव च ।
यात्यानन्त्यं महेशानि सत्यं सत्यं मयोदितम् ॥१०॥

. . . . . . . . . . . . . . . . . . . . . . . . ।
न विघ्नाः प्रभवन्त्यत्र शत्रुगेहे महेश्वरे ॥११॥

---

६ घः मा वे—वैं

७ घः मा शत्रगेह—शत्रुगेह

९ गः/घः मा ग्रामोभूद शत्रुगेह—ग्रामोऽभूच्छत्रुगेह

० कः मा होमोस्तपः—होमस्तपः

ग यात्यानंत्यं—यात्यानन्त्यं

दृष्ट्वा वै शत्रुगेहाख्यं नगरं सुन्दरं प्रिये ।
नश्यन्ति पापसंघाताः पुण्यं चैव विवर्धते ॥१२॥

यः शत्रुगेहे सुवंद्यपूजिते . . . . . . . .
स्नायाच्च तत्पुण्यजले विधिज्ञः ।
*पितृंश्च संतर्प्य विभुं प्रपूज्य*
स याति सायुज्यमपीश्वरस्य ॥१३॥

शत्रुगेहं गतस्यापि पितृणां श्राद्धकारिणः ।
पितरस्तृप्तिमायान्ति यात्रा च सफला भवेत् ॥१४॥

शत्रुगेहं समासाद्य विष्णुपूजां करोति यः ।
स याति विष्णुसायुज्यं यत्र गत्वा न शोचते ॥१५॥

शत्रुगेहं समासाद्य पुरश्चर्यां करोति यः ।
मंत्रसिद्धिर्भवेत्तस्य देवदर्शनमाप्नुयात् ॥१६॥

---

१३ कः मा सुवद—सुवंद्य
खः जणे—जले
१४ घः मा यत्रा—यात्रा
१५ खः मा या—यः
१६ खः मा पुरश्चमां—पुरश्चर्यां
गः मत्र—मन्त्र
घः दर्शनकामाप्नुयात्—दर्शनमाप्नुयात्

शत्रुगेहं परो गच्छेद्रामाराधनमीश्वरि ।
यत्र स्नात्वा जप्त्वा च परं पदमवाप्नुयात् ॥१७॥

. . . . . . . . . . . . . . . . . . . . . . . . ।
इति ते कथितं देवि शत्रुगेहाभिधं पुरम् ॥१८॥

करङ्कमपि चेशानि तीर्थं परमपावनम् ।
यच्छ्रुत्वा च पठित्वा च गङ्गास्नानं फलं लभेत ॥१९॥

इति श्री श्रीसंहितायां लहरविषयोपजाततीर्थसंग्रहे
शत्रुगेहं नाम माहात्म्यं नाम चतुर्थः पटलः ॥४॥

---

१९ कः मा देशानि—चेशानि

## अथ पञ्चमः पटलः

भैरवी

वद सत्यं महादेव रामाराधनकपुरम् ।
देवदेवो महेशानो रामेणाराधितः कथम् ॥१॥

.............................. ।
तीर्थं कथं समुद्भूतं कृपया परमेश्वर ॥२॥

श्रीभैरवः

शृणु देवि प्रवक्ष्यामि रामेणाराधितो यथा ।
देव्यास्सह महादेवो भैरवोष्णरसार्तिहा ॥३॥

अस्त्रं जिज्ञासमानेन रामेण सुमहात्मना ।
अत्रैव सुमहत्तप्तं तपः परमदारुणम् ॥४॥

निराहारो महाकालं काल्या सह महेश्वरि ।
सम्यक्प्रसादयामास समा द्वादश सुन्दरि ॥५॥

---

३ खः मा रामेणाधितो—रामेणाराधितो

गः देव्या सह—देव्यास्सह

घः भैरवोस्ण—भैरवोष्ण

तस्यैवं वर्तमानस्य भार्गवस्य महात्मनः ।
काल्या सह महाकालो दर्शनं समुपेयिवान् ॥६॥

दृष्ट्वा देवं महाकालं कालिकाङ्कं महाप्रभुम् ।
भार्गवः पतितो भूमौ दण्डवत्सुरपूजिते ॥७॥

हर्षगद्‌गदया वाचा भैरवं समुदैरयत् ।
. . . . . . . . . . . . . . . . . . . . . . . . . . . . . . ॥८॥

भार्गवः

कल्पांतकालाग्निसमानभासं
चतुर्भुजं कालिकयोपजुष्टम् ।
कपालखट्वाङ्गवराभयाढ्य-
करं महाकालमनन्तमीडे ॥९॥

नमः परमरूपाय परामलसुरूपिणे ।
नियति प्राप्ते देहाय तत्त्वरूपाय ते नमः ॥१०॥

---

६ गः मा कल्या — काल्या
घः समुपेयित्वान् — समुपेयिवान
९ घः मा माहाकालं — महाकालं
ईरे — ईडे

नमः परमरूपाय परमार्थैकरूपिणे ।
वियन्मायास्वरूपाय भैरवाय सुरूपाय ॥११॥

ॐ नमः परमेशाय परतत्त्वार्थदर्शिणे ।
वियन्मायाद्यधीशाय धीविचित्राय शम्भवे ॥१२॥

त्रिलोकेशाय गूढाय सूक्ष्मायाव्यक्तरूपिणे ।
पराकाष्ठादिरूपाय पराय शम्भवे नमः ॥१३॥

ॐ नमः कालिकाङ्काय कालाञ्जननिभाय ते ।
जगत्संहारकर्त्रे च महाकालाय ते नमः ॥१४॥

नम उग्राय देवाय भीमाय भयदायिने ।
महाभयहर्त्रे तुभ्यं सृष्टिसंहारकारिणे ॥१५॥

---

११ घः मा भैरवाय सुरूपाय कपर्दिने—भैरवाय सुरूपाय
(अत्र कपर्दिने पाठोऽधिकः)

१३ कः मा गूढा—गूढाय

१४ गः मा कत्रे—कर्त्रे

१५ कः मा देवा—देवाय

खः दायिदायिने—भयदायिने

गः हृते—हर्त्रे

नमः परापरानन्दस्वरूपाय महात्मने ।
परप्रकाशरूपाय प्रकाशानां प्रकाशिने ॥१६॥

ॐ नमो ध्यानगम्याय योगिहृत्पद्मवासिने ।
वेदतन्त्रार्थगम्याय वेदतन्त्रार्थदर्शिने ॥१७॥

वेदागमपरामर्शपरमानन्ददायिने ।
तन्त्रवेदान्तवेद्याय शम्भवे विभवे नमः ॥१८॥

धियां प्रचोदकं यत्तु परमं ज्योतिरुत्तमम् ।
तत्प्रेरकाय देवाय परमज्योतिषे नमः ॥१९॥

गुणाश्रयाय देवाय निर्गुणाय कपर्दिने ।
अतिस्थूलाय देवाय ह्यतिसूक्ष्माय ते नमः ॥२०॥

त्रिगुणाय त्र्यधीशाय शक्तित्रितयशालिने ।
नमस्त्रिज्योतिषे तुभ्यं त्र्यक्षाय च त्रिमूर्तये ॥२१॥

वाचामगोचरं देवमनन्तं चित्सुरूपिणम् ।
भक्त्या स्तुवन्मुहुश्चापि न जिह्रेमि महेश्वर ॥२२॥

---

१६ ग: मा रूपा—रूपाय

२१ घ: मा त्रिक्षाय—त्र्यक्षाय

२२ क: मा अघोचर—अगोचरं

कीर्त्यमाने यन्महिम्नब्रह्मादीनामपीश्वर ।
वाचा प्रकुण्ठिता यत्र मम का तत्र वर्णना ।।२३।।

भैरवः

इति स्तुत्वा महेशानं दण्डवत्पादयोः पतन् ।
मुहुर्मुहुः स चोत्थाय नमश्चक्रे स भार्गवः ।।२४।।

श्रुत्वा स्वयं महाकालो भार्गवस्य महेश्वरि ।
उवाच सान्त्वयन्रामं वाचा परमया निशम् ।।२५।।

देवः

साधु भार्गव तुष्टोऽस्मि भक्त्या परमया भृशम् ।
शमेन च दमेनापि तपसापि स्तवेन च ।।२६।।

इदं स्तोत्रं च यो नित्यं पठति नियतस्सदा ।
स चाप्नोति महत्पुण्यं अश्वमेधादियज्ञजम् ।।२७।।

इदं स्तोत्रं पठन्वीरः साधकः सिद्धिमाप्नुयात् ।
पुरश्चरणमाप्नोति वेदपारायणं फलम् ।।२८।।

---

२३ गः मा प्रकुण्विता—प्रकुण्ठिता

२४ गः मा महर्मुहुः—मुहुर्मुहुः

२७ क्षः मा पठते—पठति

इदं स्तवमधीयानः शुचिस्तद्गतमानसः ।
यद्यन्मनसि कुर्याद्वै तत्तदाप्नोत्यसंशयम् ॥२९॥

कामिनां कामदं प्रोक्तमकामानां च मोक्षदम् ।
बहुनात्र किमुक्तेन पठन्स्तवमनुत्तमम् ॥३०॥

शृण्वन्वापि समाप्नोति शिवज्ञानमसंशयम् ।
श्रुत्वैतद्वचनं देवि भार्गवो द्विपदांवरः ॥३१॥

प्रोवाच तं महादेव भक्तिनम्रः कृताञ्जलिः ।
योगिनां यो हृदि गम्यं स सन्दर्शपदं गतः ॥३२॥

पदे पदे महाकालस्तस्मात्को वर उत्तमः ।
न तथापि याचे देवेशि अस्त्राणां विधिमुत्तमम् ॥३३॥

इति श्रुत्वा वचस्तस्य भार्गवस्य महात्मनः ।
प्रोवाच वचनं देवो हर्षयन्परया गिरा ॥३४॥

देवः

इहैव सुगिरौ रम्येत तथा भारमहे दृढे ।
अस्त्राणि मत्तः शिक्षस्व सरहस्यानि चानघ ॥३५॥

---

२९ घः मा याप्नोति संशयं — आप्नोत्यसंशयम्

३० घः मा पटन् — पठन्

भरतं तरति चास्त्राणां यतस्त्वत्तेजसोऽपि च ।
तस्मात्प्रोक्तो पुराविद्भिर्भरतो नाम वै गिरिः ॥३६॥

भरतो नति चास्त्राणां यतो भार्गवतेजसः ।
तस्माद्भविष्यति ख्यातो भरतो गिरिरुत्तमः ॥३७॥

तस्मात्त्वं पठ विप्रर्षे कुमारेण समं तथा ।
गणेशेनापि चास्त्राणि साङ्गोपाङ्गं च भार्गव ॥३८॥

कुमाराद्गणपश्चापि प्रियो मे त्वं भविष्यसि ।
इदं रामाराधनकं तीर्थं परमपावनम् ॥३९॥

यत्र स्नानं जपो होमो स्वाध्यायं तप उत्तमम् ।
करोति विधिवद्विप्रः स याति परमं पदम् ॥४०॥

---

३६ घ: मा गिरः—गिरिः

३७ क: मा भरज्ञोनति—भरतो नति

३९ ग: मा इन—इदं

४० क: मा होमं—होमो

भैरव

इति दत्वा वरं तस्मै भार्गवाय महात्मने ।
महाकालो महेशानि तत्रैवान्तर्धीयत ॥४१॥

तदा प्रभृति तत्रैव भूतेशमर्चयन्मुहुः ।
अशिक्षत्परमास्त्राणि सरहस्यानि भार्गवः ॥४२॥

तदा प्रभृति देवेशि रामाराधनकं परम् ।
पावनं पतितानाञ्च महापातकिनामपि ॥४३॥

रामाराधनकं तीर्थं दृष्ट्वा मुच्येत सङ्कटात् ।
स्नात्वापि प्रति मुच्येत जन्मान्तरभवैरघैः ॥४४॥

रामाराधनकं तीर्थं पश्येत्स्नाति न यो नरः ।
तस्य स्नानं निष्फलं स्यात्गङ्गायां सुरपूजिते ॥४५॥

तस्माद्रामाराधनकं तीर्थं परमपावनम् ।
स्नायाच्च परमभक्त्या नरो मुक्तिमवाप्नुयात् ॥४६॥

---

४१ ख: मा महात्मवे —महात्मने

४५ ख: मा पश्यात् —पश्येत्

इति ते कथितं देवि रामाराधनकं परम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥४७॥

दर्शनात्तु रतस्येह गिरेः परमपावनात् ।
मोक्षमाप्नोति मनुज इति सत्येन ते शपे ॥४८॥

इति श्री श्रीसंहितायां रामाराधन[क]भरतगिरिवर्णना
नाम पञ्चमः पटलः ॥५॥

४८ कः मा दर्शनान्न—दर्शनात्तु

# अथ षष्ठः पटलः

श्रीभैरवी

श्रावं श्रावं महादेव रामाराधनकं परम् ।
तीर्थं च परमेशान भरतं गिरिमुत्तमम् ॥१॥

कृतार्थास्मि कृतार्थास्मि कृतार्थास्मि न संशयः ।
इदानीं श्रोतुमिच्छामि वृषत्क्षेत्रमपीश्वर ॥२॥

महिषीमार्गमीशान तथा ब्रह्मसरो महत् ।
हंसद्वारमपीशान वद मे कृपया शिव ॥३॥

भैरव

शृणु सुन्दरि वक्ष्येऽहं वृषत्क्षेत्रं महत्परम् ।
यद्दर्शनादवाप्नोति गङ्गास्नानं दिने दिने ॥४॥

अस्त्राण्यभ्यस्यमानस्य भार्गवस्य महात्मनः ।
कलहः समभूद्देवि गणेशेन समं तदा ॥५॥

कुमारेण च देवेशि खुरलीकलहो ह्यभूत् ।
तथा विवदमानस्य बाणान्संघर्षयन्भृशम् ॥६॥

---

२ कः खः मा कृतार्थास्मिम् — कृतार्थास्मि

६ कः मा कुमारीण — कुमारेण

भर्त्सयन्कार्तिकेयं च गणेशमपि सुन्दरि ।
तथापि वदतोरेवं भृगुगणपयोर्भृशम् ॥७॥

शिवयोश्च मिथो जातो हासः परमहर्षतः ।
शिवश्च कथयामास भार्गवं गणपं तथा ॥८॥

कुमारमपि चेशानो गिरिं प्रहरन्तं भृशम् ।
तच्छ्रुत्वा वचनं तस्य कुमारः प्राहरच्च तम् ॥९॥

अर्धं गिरिं प्रहृत्य तु विरमद्गण उत्तमः ।
दृष्टं गिरिं ह्यर्धच्छिन्नं शिवः प्रोवाच भार्गवम् ॥१०॥

अस्त्रं दर्शय विप्रर्षे प्रहर गिरिमुत्तमम् ।
श्रुत्वैतद्वचनं तस्य देवदेवस्य सुन्दरि ॥११॥

---

७ कः मा भर्त्सय – भर्त्सयन्
कार्तिकेयं—कार्तिकेयं
गः तथावि—तथापि
घः गणपयोभृशं – गणपयोर्भृशम्
९ कः मा कुमारं अपि—कुमारमपि
घः प्राहरश्च—प्राहरच्च
१० कः मा प्रहृत्वा— प्रहृत्य
खः गाण—गण

प्राहरद्भार्गवः शीघ्रं गिरितुङ्गं महेश्वरि ।
छित्वा तु गिरिश्रृङ्गं तं भार्गवो हर्षितः प्रिये ॥१२॥

रामः प्रोवाच वचनं घर्षयन्बाणमुत्तमम् ।
दृषत्सु बाणैर्युवयोः श्मश्रुनि वीपयाम्यहम् ॥१३॥

यस्मात्कृतोऽत्र सङ्घर्षो बाणानां श्मश्रुलुञ्चने ।
भार्गवेन दृषत्क्षेपेनापि ख्यातिं गतं पुरा ॥१४॥

. . . . . . . . . . . . . . . . . . . . . . . . . ।
दृषद्दर्शनमात्रेण वाजपेयं फलं लभेत ॥१५॥

प्रभाते विमले शुद्धे दृषत्क्षेत्रस्य सुन्दरि ।
दर्शनं कुरुते यस्तु स याति परमं पदम् ॥१६॥

दृष्ट्वैतच्चरितं तस्य भार्गवस्य महात्मनः ।
जहास परमेशानो विस्मितः परमहर्षितः ॥१७॥

हसन्तं तं महादेवं दृष्ट्वा देवातिकोपिनम् ।
. . . . . . . . . . . . . . . . . . . . . . . . . ॥१८॥

---

१२ गः मा गिश्रृङ्गं — गिरिश्रृङ्गं

१४ गः मा क्षेपेनापि—क्षेपेनापि

घः ताक्यं—ख्याति

१८ कः मा हेसन्त — हसन्तं

खः देवपतिकोपितः — देवातिकोपिनम्

हरं जगाद गिरिजा रूक्षभिर्वाग्भिरुत्तमम् ।
श्मशानमाश्रय विभो गार्हस्थ्येन च किं तव ॥१६॥

यत्परं शिक्षयस्वैवं स्वतनूजानां शिक्षये ।
मूर्खौ तनूजौ स्वौ दृष्टौ हसन्हृष्टो न लज्जसे ॥२०॥

यथेच्छं कुरु शम्भोस्त्वं गच्छ वा तिष्ठ वा शिव ।
तच्छ्रुत्वा तु वचो देव्याः शिवः परमदारुणम् ॥२१॥

रूपं कृत्वा महेशानि ह्यन्तर्ध्यानमभूत्तदा ।
देव्या दृष्टो महादेवः पश्चात्तापमगात्ततः ॥२२॥

तथा संतप्यमाना तु जगाम सुरसुन्दरि ।
तेन मार्गेण संतप्ता महिषीवदधोमुखी ॥२३॥

यस्मादधोमुखी देवी तेन मार्गेण सुन्दरी ।
तस्मात्पुरातनः प्रोक्तो महिषीमार्ग उत्तमः ॥२४॥

यो गच्छेन्महिषीमार्गेण ब्रह्मणः सर उत्तमम् ।
पदे पदेऽश्वमेधस्य फलमाप्नोति सुन्दरि ॥२५॥

---

१९ खः मा ऊक्षभिः—रूक्षभिः

२४ गः मा तमात्—तस्मात्

गङ्गायात्रा द्विगुणा स्यात्त्रिगुणा वा महेश्वरि ।
संतापायास्तु गच्छन्त्या देवदेव्या प्रयत्नतः ।।२६।।

समज्जतः पदे तस्याः शुभे ब्रह्मसरोवरे ।
दृष्ट्वा ब्रह्मसरस्तत्र पप्रच्छ जगदम्बिका ।।२७।।

किं त्वया देवदेवेशो न दृष्टः शम्भुरुत्तमः ।
श्रुत्वैतत्सरसो वाक्यमनृतमम्बिका स्वयम् ।।२८।।

जगाम परं संतापं तस्मिन्गिरिवरे तदा ।
मुञ्चन्ती परमाश्रूणि ह्यरुदज्जगदम्बिका ।।२६।।

तदात्र शोकजैरेवमस्रुभिः समपद्यत ।
उष्णं सरोवरं दिव्यं महापातकनाशनम् ।।३०।।

ततो जगाम देवी सा ह्युच्चैर्हरमुखाभिधम् ।
दृष्ट्वा हर्षपरोगीव प्रफुल्लवदनप्रभा ।।३१।।

हरमालिङ्ग्यामास हर्षनिर्भरमानसा ।
ततोऽर्धन सहिता च ह्यागता च महेश्वरी ।।३२।।

पुनरश्रूणि मुञ्चन्ती हर्षनिर्भरमानसा ।
तदभूच्च सरो देवि द्वितीयं शीतलं महत् ।।३३।।

तदा शशाप देवेशि भुवं ब्रह्मसरो महत् ।
अनृतं तु भवेदत्र द्विशीर्णं सर उत्तमम् ॥३४॥

तदा प्रभृति देवेशि विशीर्णमभवत्सर: ।
... ... ... ... ... ... ... ... ... ... ... ... ॥३५॥

देव: प्रोवाच दृष्ट्वा तच्छप्तं ब्रह्मसरोवरम् ।
पतितान् पावयंस्तिष्ठ सरोवरस्त्वयं चिरम् ॥३६॥

यावन्न क्रियते स्नानं श्राद्धं तज्जल उत्तमे ।
अस्थ्नामभ्युक्षणे चैव तावद्गङ्गा फलं नहि ॥३७॥

यावन्न क्रियते स्नानमस्मिञ्जलसमागमे ।
तावन्न यात्रासाफल्यं भवेद्देव न संशय: ॥३८॥

. . . . . . . . . . . . . . . . . . , . . . . . . ।
तस्मात्त्वमत्र तिष्ठस्व यावद्गङ्गा च तिष्ठति ॥३९॥

पावयन्पतितांञ्जन्तून्महापातकिनोऽपि च ।
इति दत्वा वरं शम्भु: तत्रैवान्तर्धीयत ॥४०॥

---

३४ क: मा देवीशि—देवेशि

३६ ग: मा देवा—देव:

घ: ब्रह्मह्मसरोवर—ब्रह्मसरोवरम्

४० क: मा पतिता—पतितान्

तस्माद्देवि प्रयत्नेन स्नायाद्ब्रह्मसरोवरे ।
मुच्यते सततं देवि कोटिजन्मभवैरघैः ॥४१॥

किं पुरश्चरणे यत्नं करोति मूढधीनरः ।
स्नात्वा ब्रह्मसरस्तोये पुरश्चरणमाप्नुयात् ॥४२॥

इति ते कथितं देवि दृषदो क्षेत्रमुत्तमम् ।
महिषीमार्गमपोशि ब्रह्मणः सर उत्तमम् ॥४३॥

...... ..................... ।
श्रुत्वा पठित्वा मुच्येत ब्रह्महत्यादिपातकैः ॥४४॥

इति ल[ह]रविषयोपजाततीर्थसङ्ग्रहे दृषत्क्षेत्रमहिषीमार्ग-
ब्रह्मसरो वर्णनं नाम षष्ठः पटलः ॥६॥

---

४१ गः मा तस्मादेयि—तस्माद्देवि

## अथ सप्तमः पटलः

श्रीभैरवी

स्मारं स्मारं महादेव पुण्यं ब्रह्मसरोवरम् ।
अद्य भाग्यवती वास्मि कृतार्थास्मि न संशयः ॥१॥

अधुना श्रोतुमिच्छामि पुण्यं चाम्बुजतीर्थजम् ।
हंसद्वारस्य माहात्म्यं तथा कौलसरोवरम् ॥२॥

. . . . . . . . . . . . . . . . . . . . . . . . . ।
वद मे कृपया शम्भो नन्दिक्षेत्रं तथैव च ॥३॥

भैरवः

शृणु वक्ष्ये महादेवि माहात्म्यमम्बुक्षेत्रजम् ।
हंसद्वारस्य पुण्यं वै श्रुत्वा मुच्येत सङ्कटात् ॥४॥

- - - - - - - - - - - - - - - - - - - - ।
हन्त्यविद्यां यतो देवि ततो हंसा प्रकीर्तिता ॥५॥

---

१ गः मा भाग्यवर्ता—भाग्यवती

२ कः मा अधना—अधुना

३ घः मा शंम्भ—शम्भो
नंन्तिक्षेराम्—नन्दिक्षेत्रम्

५ खः मा प्रकीर्तिनाः—प्रकीर्तिता

हंसानां च यतो द्वैतं गृह्णाति वरवर्णिनि ।
ततः प्रोक्तं पुराविद्भिर्हंसद्वारमिदं जनैः ॥६॥

मोक्षद्वारमिदं प्रोक्तं स्वर्गद्वारमिदं परम् ।
ब्रह्मद्वारमिदं देवि शिवद्वारमनुत्तमम् ॥७॥

देवीनां च बुधैः प्रोक्तं विष्णोर्द्वारमनुत्तमम् ।
तस्मात्सर्वप्रयत्नेन हंसद्वारं व्रजेद्बुधः ॥८॥

मोक्षं प्रयाति देवेशि नात्र कार्या विचारणा ।
गर्भागारं न स विशेद्यो विशेद्धंसद्वारकम् ॥९॥

यो नरो याति हंसानां द्वारं सुरवरार्चिते ।
हंसाना गतिमाप्नोति मम नास्त्यत्र संशयः ॥१०॥

सन्यासिनो महाभागा जितद्वैतास्सनातनाः ।
यां गतिं प्रतिपद्यन्ते तां दर्शनकृतो नरः ॥११॥

निर्ममा निरहङ्कारा: जितश्वासाश्च योगिनः ।
न तां गतिं प्रयान्त्येव यां दर्शनकृतो नरः ॥१२॥

---

६ ख: मा जर्वैः—जनैः
७ क: मा मोद्वारमिदं—मोक्षद्वारमिदं
११ ख: मा सनातनः—सनातनाः

तपस्विनो दानपराः साधका व्रतिनस्तथा ।
न तां सिद्धिं प्रयान्त्येव यां दर्शनकृतो नरः ॥१३॥

गर्भागारं संस्मृतिं च मरणं चापि सुन्दरि ।
न ते दुःखं प्रयान्त्येव ये दर्शनकृतो नराः ॥१४॥

बहुनात्र किमुक्तेन कलौ मलभयापहम् ।
हंसद्वारं समाश्रित्य मोक्षं याति नरोत्तमः ॥१५॥

घोरं कलियुगं प्राप्य निकटस्थं विलोक्य यः ।
ततः सर्वं समुत्सृज्य हंसद्वारं समाश्रयेत् ॥१६॥

हंसद्वारं अतीत्यैव यत्किञ्चित्क्रियते नरः ।
तत्सर्वं च वृथा याति नात्र कार्या विचारणा ॥१७॥

तस्मात्सर्वप्रयत्नेन हंसद्वारं विशेषतः ।
सर्वसफलतां याति चेति सत्यं वरानने ॥१८॥

बहुनात्र किमुक्तेन भूयो भूयो महेश्वरि ।
हंसद्वारमुपाश्रित्य सिद्धिमाप्नोति मानवः ॥१९॥

---

१५ गः मा समाश्रि—समाश्रित्य
१८ खः मा विशेनरः – विशेषतः
घः चेत्य – चेति

हंसद्वारमिदं प्रोक्तं पापिनां पापमोक्षदम् ।
शुद्धानां ज्ञानं देवि मुमुक्षुणां च मोक्षदम् ॥२०॥

. . . . . . . . . . . . . . . . . . . . . . ।
शिवद्वारकवाटस्य पाटनं द्वारमुत्तमम् ॥२१॥

इति ते कथितं देवि पुण्यं वै हंसद्वारजम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥२२॥

अधुना शृणु देवेशि माहात्म्यमस्रुजं परम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्जन्मकोटिभवैरघैः ॥२३॥

यः स्नाति शोकजे तोये देवीनेत्रसमुद्भवे ।
स तु संसारदुःखं न प्राप्नोति च महेश्वरि ॥२४॥

दारिद्र्यदुःखमरणञ्च दुःखं
दुःखं तु रोगोद्भवमीश्वरीह ।
यः स्नाति नित्यं गिरिजास्रुतोये
शोकोद्भवो नैव पुनः स चाप्नुयात् ॥२५॥

---

२१ कः मा अदुना – अधुना

२४ कः मा शाकजे—शोकजे

२५ गः मा गिरिजास्रुतोये –गिरिजास्रु तोये

घः न चाप्नुयात्—स चाप्नुयात्

तस्मात्सर्वप्रयत्नेन नेत्रजं वारि चाश्रयेत् ।
सर्वसिद्धिमवाप्नोति नात्र कार्या विचारणा ॥२६॥

हर्षवारि महादेव्याः नेत्रोद्भूतं महेश्वरि ।
समाश्रित्य नरो याति परमं हर्षमुत्तमम् ॥२७॥

स्नात्वा हर्षोद्भवे तोये महेज्याः शीतले शुभे ।
नरो मुक्तिमवाप्नोति न मेऽत्रास्ति विचारणा ॥२८॥

अतीत्य सरसी द्वे तु यो मज्जेद्गाङ्गवारिणि ।
स तीर्थद्रोही भवति यात्रा तस्य च निष्फला ॥२९॥

तस्मात्सर्वप्रयत्नेन सरसी द्वेऽवगाह्य च ।
यायात्कौलसरं दिव्यं कौलानां सिद्धिदं परम् ॥३०॥

यत्समाश्रित्य देवेशि कौला संसिद्धिमागताः ।
कलावस्मिन्महाघोरे कौलधर्मिण एव च ॥३१॥

---

२७ कः मा हर्षवारि – हर्षवारि
गः यान्ति—याति
२८ खः मा महेज्यः – महेज्याः
शीवले – शीतले
२९ कः मा सरसीद्वेतु—सरसी द्वे तु
३१ खः मा आगतः —आगताः

स्नानं दानं तपश्चैव व्रतं स्वाध्याय एव च ।
यद्यत्र कुरुते तत्र तद्दानान्त्याय कल्पते ॥३२॥

भूयः किं बहुभाषणेन गिरिजे यः स्नाति शोकोद्भवे
तोये हर्षसमुद्भवेऽपि च तथा कौलसरस्यद्भुते ।
नो रोगो न भयं न शोकमपि वा नो दासभावं प्रिये
न स्त्रीत्वं न च कालभयमपि नो जन्तुः कदाप्याप्नुयात् ॥३३॥

इत्थं प्रकाशितं तेऽद्य मया पुण्यं हि तीर्थजम् ।
महाफलं समुद्दिष्टं किं भूयः श्रोतुमिच्छसि ॥३४॥

इति लहरविषयोपजाततीर्थसंग्रहे हंसद्वाराख्यक्षेत्रमहिमा
नाम सप्तमः पटलः ॥७॥

## अथ अष्टमः पटलः

भैरवी

पुनर्वद महादेव किं कौलं सर उच्यते ।
माहात्म्यमपि देवेश सर्वपापभयापहम् ॥१॥

भैरवः

शृणु कौलं सरो दिव्यं तस्मिन्गिरिवरे शुभे ।
यच्छ्रुत्वा साधको देवि मन्त्रसिद्धिमवाप्नुयात् ॥२॥

मातृहत्या प्रतप्तेन भार्गवेन महात्मना ।
अस्मिन्गिरिवरे पुण्ये सुघोरं चरितं तपः ॥३॥

निराहारो यतात्मासौ वायुभक्षो जितेन्द्रियः ।
कालीसमर्चनरतो बभूव सुरसुन्दरि ॥४॥

श्यामाराधनतीर्थस्य भार्गवस्य महात्मनः ।
व्यतीतं सुचिरं कालं दिव्यं वर्षशतं पुरा ॥५॥

तथा संतप्यमानस्य तपो घोरं महात्मनः ।
कालो जगाम गिरिजे काले दर्शनकाङ्क्षणः ॥६॥

---

६ ध: दर्शनकाक्षणः— दर्शनकाङ्क्षणः

तामदृष्ट्वा महादेवि रामः शोकं परं ययौ ।
तथा संशोचतस्तस्य भार्गवस्य महात्मनः ॥७॥

सततं तप्यमानस्य वाक् च प्राहाशरीरिणी ।
पुरश्चरणमातिष्ठ मन्त्रसिद्धिमवाप्स्यसि ॥८॥

पुरश्चरणहीनस्य का बुद्धिरिह भार्गव ।
पुरश्चरणकृन्मंत्री मन्त्रसिद्धिमवाप्नुयात् ॥९॥

न कुर्याच्च पुरश्चर्यां यः कश्चित्साधको भुवि ।
न स सिद्धिमवाप्नोति वर्षलक्षैरपि द्विजः ॥१०॥

तस्माद्राम पुरश्चर्यां कुरु नित्यं समाहितः ।
कालीदर्शनं संप्राप्य भविष्यति न संशयः ॥११॥

. . . . . . . . . . . . . . . . . . . . . ।
इत्युक्त्वा विरमद्वाणी देवदूतस्य सुन्दरि ॥१२॥

श्रुत्वा तु देवदूतस्य वचनं भृगुनन्दनः ।
चकार विधिवत्तत्वं पुरश्चरणमुत्तमम् ॥१३॥

---

८ घः मा मत्र—मन्त्र
आवाप्ससि—अवाप्ससि

१० घः लक्षंरपि लक्षैरपि

कौलधर्मेण विधिना जजाप मन्त्रमुत्तमम् ।
इत्थं संजप्यमानस्य भार्गवस्य महेश्वरि ॥१४॥

महाकालेन सहिता श्यामा दर्शनमागता ।
कालीं दृष्ट्वा पुनस्ते न करालवदना शुभा ॥१५॥

विस्रस्तकेशाभरणा पाशखट्वाङ्गधारिणी ।
नृमुण्डमालाभरणा कपालडमरूद्गता ॥१६॥

दृष्ट्वा तु तां तदा रामो भक्त्या त्रिभुवनेश्वरीम् ।
सहस्रैर्नामभिर्दिव्यैस्तुष्टाव सुसमाहित: ॥१७॥

स्तुत्या प्रसन्ना ह्यभवन्महादेवी तु भार्गवम् ।
प्रोवाच श्लक्षया वाचा भार्गवं जमदग्निजम् ॥१८॥

ब्रह्महत्यां हनिष्यामि पाशैर्बध्नामि भार्गव ।
प्रसन्नास्मि द्विज श्रेष्ठ त्वदाराधनतो मुने ॥१९॥

इत्युक्तां मातृहत्यां तां निर्गतां तु शरीरत: ।
बबन्ध पाशै: श्यामाङ्गी खट्वाङ्गेनाहनद्भृशम् ॥२०॥

---

१६ ग: मा नृमण्डमाला—नृमुण्डमाला

१९ ग: मा प्रसास्मिन्द्विज—प्रसन्नास्मि द्विज

२० ख: मा त—तु

पुनः प्रोवाच तं काली कृशोऽसि तपसा मुने ।
पिबामृतं प्रदत्तं हि मया तेऽत्र प्रसन्नया ॥२१॥

इत्युक्त्वा प्राहनच्छ्यामा खट्वाङ्गेन क्षितिं तदा ।
सरः कौलं समुद्भूतं जीवनं कुलधर्मिणाम् ॥२२॥

काली तममृतं काल्या खट्वाङ्गेनोद्धृतं यतः ।
ततः प्रोक्तं पुराविद्भिः शुभं कौलसरोवरम् ॥२३॥

तस्मात्सर्वप्रयत्नेन कौलं सर उपाश्रयेत् ।
समुपाश्रित्य देवेशि ब्रह्महत्या व्यपोहति ॥२४॥

कौले सरस्समुद्भूते तोये पुण्यप्रदे कलौ ।
ममज्ज रामो गिरिजे पपौ चामृतमुत्तमम् ॥२५॥

तदा प्रभृति रामो सो चिरजीव्यभवत्प्रिये ।
श्यामापीत्थं वरं दत्वा तत्रान्तर्ध्यानमागता ॥२६॥

. . . . . . . . . . . . . . . . . . . . . . . . . ।
रामोऽपि तत्र देवेश समीपमगमत्पुनः ॥२७॥

यः कश्चिदत्र मनुजः कौलं सर उपाश्रयेत् ।
पुरश्चरणमाप्नोति वेदपारायणं फलम् ॥२८॥

---

२६ ग: मा श्यामापोऽर्थं —श्यामापीत्थं

मायापुर्यैः शतगुणं काशीवासात्सहस्रकम् ।
पुण्यं द्विगुणमाप्नोति कौले सरसि स्नानतः ॥२९॥

गवां कोटि सहस्रस्य सम्यग्दत्तस्य यत्फलम् ।
कुरुक्षेत्रे सूर्यग्रहे ब्राह्मणे वेदपारगे ॥३०॥

. . . . . . . . . . . . . . . . . . . . ।
तत्फलं समवाप्नोति स्नात्वा कौलसरोवरे ॥३१॥

अविद्यो वा सविद्यो वाप्यकामो वाथ कामवान् ।
स्नात्वा सिद्धिमवाप्नोति स्नात्वा कौलसरोवरे ॥३२॥

अतीत्य कौलं यो गच्छेद्गङ्गात्रिभुवनेश्वरीम् ।
वृथा दर्शनमाप्नोति गङ्गाया भुवनेश्वरी ॥३३॥

नास्ति कौलसमं तीर्थं भुवि दिव्यंतरिक्षगम् ।
गङ्गायात्रातिफलदं मन्त्रसिद्धिप्रदं कलौ ॥३४॥

इति ते सर्वमाख्यातं तीर्थं परमं पावनम् ।
दिव्यं कौलं सरो नाम सर्वपापभयापहम् ॥३५॥

अधुना शृणु देवेशि नन्दिक्षेत्रं महत्सरः ।
महाकालं तथेशानि ब्रह्महत्या निवारणम् ॥३६॥

---

२९ कः मा मायापुर्याः—मायापुर्यां:

३३ गः मा दर्शन—दर्शनं

प्रच्छन्नोऽभूद्यदा देव्या महाकालो महेश्वरि ।
तदा स देवदेवेशो भृत्यमाज्ञापयत्स्वयम् ॥३७॥

नंदिनः कश्चिदपि न दर्शनं प्राप्तुमर्हति ।
सावधानो भव द्वारि मा कश्चिद्विशतामिह ॥३८॥

तथेत्युक्त्वा ततो नन्दी सावधानोऽभवत्प्रिये ।
द्वारसंरक्षणे तत्र गिरौ हरमुखे तदा ॥३९॥

ततो देव्यत्र सम्प्राप्ता अन्वेष्टुं पतिमागता ।
दृष्ट्वा तु गिरिजां तत्र पतिमन्वेष्टुमागताम् ॥४०॥

नन्दी संशयमाविष्टश्चिरं दध्यौ तथा प्रिये ।
किं निषिध्यामि देवेशीमथवा जगदीश्वरम् ॥४१॥

विचिन्त्य बहुधा नन्दी निश्चयं चाजगाम ह ।
देवदेवी महेशानी न निषेद्धुमिहार्हति ॥४२॥

---

३८ क:/ख: अहमेदर्शनं प्राप्तं कश्चिदपि न दर्शनं प्राप्तुं

४० ख: मा अन्वेष्टं—अन्वेष्टुं

ग: गिजा—गिरिजां

४१ ग: मा देवीशी—देवेशी

अनया देवदेवेश्या शप्तं ब्रह्मसरः शुभम् ।
तस्मादारोहितुं गिरिं हरदर्शनलालसा ॥४३॥

इत्युक्त्वा देवदेवेशीं नमस्कृत्य स्वयं तदा ।
प्रोवाच विनयेनात्र भृत्यो वै नन्दिकेश्वरः ॥४४॥

गिरिमारोहितुं स्वयं देवदेवी महेश्वरी ।
गिरावत्र हरमुखं पश्यतु स्वयमीश्वरी ॥४५॥

श्रुत्वा तु नन्दिनो वाचं देवीहर्षमुपागता ।
पुत्रं सञ्जीवहि चिरं आशिषः प्रयुयोज तम् ॥४६॥

इत्युक्त्वा गिरिमारुह्य दृष्ट्वा हरमुखं तदा ।
सती विस्मयमापन्ना जहर्ष च मुहुर्मुहुः ॥४७॥

आलिलिङ्ग हरं तत्र मुहुर्मुहुरतन्द्रितः ।
हरो विस्मयमापन्नस्तथा दृष्ट्वा गतां सतीम् ॥४८॥

. . . . . . . . . . . . . . . . . . . . . . ।
प्रोवाच नन्दिनं देवो देवदेवो वृषाकपिः ॥४९॥

यस्माज्जडः स्वयं भूत्वा मदाक्षं अतिलङ्घसे ।
तस्मादत्र गिरौ पुण्ये जडरूपो भविष्यसि ॥५०॥

---

४३ गः मा आरोहतु--आरोहितु

५० कः मा तड—जड

श्रुत्वा तत्तु प्रभोर्वाक्यं सरो भूत्वा महेश्वरि ।
तदेव नन्दिक्षेत्रं तु प्रथितं भुवनत्रये ॥५१॥

क्रोधेन कृष्णवर्णोऽभूद्धरोहरमुखे गिरौ ।
तेन क्रुद्धेन देवेशि शप्तो नंदी महात्मना ॥५२॥

तथा शप्तं तु तं दृष्ट्वा नन्दिनं जगदीश्वरी ।
शिवं प्रोवाच गिरिजा प्राहर क्रुद्धया वृशा ॥५३॥

यस्मान्निरपराधो वै नंदी शप्त: स्वयं चिरम् ।
तस्मात्त्वमपि देवेशि महाकालसरोवरे ॥५४॥

नन्दिक्षेत्रे सरो भूत्वा भविष्यसि न संशय: ।
इत्युक्त्वा जगदीशानी क्रोधयुक्ता जगाम ह ॥५५॥

रुरोध तां तथा यां तं जहास च हर: स्वयम् ।
मम क्रोधो भवत्येव सरो भूत्वा महेश्वरि ॥५६॥

नन्दिक्षेत्रार्धमाश्रित्य कालरूपश्चिरं भुवि ।
तस्मात्त्वमत्र तिष्ठस्व मया सह महेश्वरि ॥५७॥

---

५२ ग: मा क्रुद्धेन—क्रुद्धेन

५५ क: मा नन्दिक्षे—नन्दिक्षेत्रे

इत्युक्त्वा देवदेवेशो शिवाप्यन्तर्धिमागता ।
तदा प्रभृति देवेश नन्दिक्षेत्रमहत्फलम् ॥५८॥

महाकालमपि सरो ह्यभवत्प्रथितं भुवि ।
प्रयागे नैमिषारण्ये तथैवोक्तसुजंगले ॥५९॥

दत्वा च कपिलां कोटिं विधिवद्वेदपारगे ।
यत्फलं लभते मर्त्यस्तदत्र स्नानत: प्रिये ॥६०॥

भूयो भूयो प्रलापेन किमुक्तेन महेश्वरि ।
घोरे कलियुगे प्राप्ते नन्दिक्षेत्रं समाश्रयेत् ॥६१॥

. . . . . . . . . . . . . . . . . . . ।
नन्दिक्षेत्रं समं तीर्थं न भूतं न भविष्यति ॥६२॥

इत्थं देवि मया ख्यातं फलं वै नन्दिक्षेत्रजम् ।
महाकालस्य चेशानि महापातकनाशनम् ॥६३॥

इति श्रीनन्दिक्षेत्रकोलसरो वर्णनं
नाम अष्टम: पटल: ॥८॥

## अथ नवमः पटलः

श्रीभैरवी

क्रीतास्म्यनुग्रहीतास्मि निवृत्तास्मि भवार्णवात् ।
महानन्दे निमग्नास्मि श्रुत्वा वै तीर्थजं फलम् ॥१॥

भूयो वद महादेव गङ्गामाहात्म्यमुत्तमम् ।
श्रुत्वापि नत्वा वापि याति पीत्वामृतं नरः ॥२॥

श्रीभैरवः

शृणु वक्ष्ये सुरेशानि गङ्गामाहात्म्यमुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुः गङ्गास्नानफलं लभेत ॥३॥

शतकल्पं ब्रह्मचर्यं चरित्वा यत्फलं लभेत ।
तत्फलं लभते मर्त्यो गङ्गायाः स्नानतः प्रिये ॥४॥

कृच्छ्रैर्महासांतपनैर्जलकृच्छ्रैस्तपोश्वरि ।
स्नानान्मुकुटगङ्गाया एकाह स्नानतः प्रिये ॥५॥

---

१ गः निमग्नया –निमग्ना

५ कः मा कृच्छ्रै –कृच्छ्रैर्

सांतपनै– सान्तपनैर्

हरद्वारे कुशावर्ते नैमिषे च महेश्वरि ।
प्रभासे पुष्करे चैव यत्फलं लभते नरः ॥६॥

तत्फलं समवाप्नोति गङ्गामुकुटसम्भवाम् ।
अवगाह्य च तत्पुण्यमाप्नोति गिरिजे नरः ॥७॥

पृथिव्यां यानि तीर्थानि तानि काश्मीरमण्डले ।
काश्मीरे यानि तीर्थानि तानि हरमुखे गिरौ ॥८॥

तस्मात्सर्वप्रयत्नेन पश्येद्धरमुखं प्रिये ।
दृष्ट्वा हरमुखं देवि हरमाप्नोति यज्ञजम् ॥९॥

वेदैर्पुराणैर्यत्पुण्यं श्रुत्वा च विधिना प्रिये ।
यत्फलं समवाप्नोति मुखं दृष्ट्वा हरस्य तत् ॥१०॥

अश्वमेधैर्वाजपेयैर्ज्योतिष्टोमैश्च यत्फलम् ।
तत्फलं समवाप्नोति दृष्ट्वा हरमुखं प्रिये ॥११॥

---

६ ग: मा प्रमासे—प्रभासे

८ क: मा तीथाणि—तीर्थानि

ग: कश्मीरे—काश्मीरे

१० क: मा वेदं—वेदैर्

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
गङ्गां मुकुटगां स्नात्वा सर्वपापैः प्रमुच्यते ॥१२॥

यस्याथीनि महादेवि महापातकिनः कलौ ।
निधायाम्बुजिने पात्रे संस्थाप्य ताम्रसम्पुटे ॥१३॥

तिलैः कृष्णैस्तथा देवि श्वेतैश्च सर्षपैस्तथा ।
पूरयेच्च तथाभ्युक्षेत्पञ्चगव्यैर्महेश्वरि ॥१४॥

संवेष्ट्य विविधैः क्षौमैर्मन्त्रैश्च मन्त्रयेत्प्रिये ।
तान्त्रिकैर्वैदिकैर्वापि तथा संवेष्ट्य सुन्दरि ॥१५॥

गङ्गाम्भसि प्रक्षिपेत्तु भाद्राष्टम्यां महेश्वरि ।
तदेव नरकोद्धारः सप्तभिः पुरुषं समम् ॥१६॥

यस्यास्थीनि महेशानि गङ्गाम्भसि निमज्जयेत् ।
स्वर्गद्वारकवाटञ्च पाटयेत्स महेश्वरि ॥१७॥

---

१२ खः मा ह्युपपातकैः—ह्युपपातकैः

१५ खः मा मत्रैः—मन्त्रैः
गः वेदिकैः—वैदिकैः

१६ खः भद्राष्टम्यां—भाद्राष्टम्यां
गः तदेव—तदेव

१७ कः मा महीशानि—महेशानि

मातृगामी स्वसृगामी भ्रातृजायाग इत्यपि ।
पितृस्वसृमातृस्वसृगुरुपत्नीग इत्यपि ॥१८॥

स्नात्वा मुकुटगङ्गायां सद्यो मुच्येत पातकात् ।
स्वर्णस्तेयी मधुपः स्त्रीलोलुपः स्त्रीघ्न एव च ॥१९॥

. . . . . . . . . . . . . . . . . . . . . . . ।
गोघ्नः कृतघ्नोऽपीशानि सद्यो मुच्येत पातकात् ॥२०॥

प्रायश्चित्तं नृणां येषां न दृष्टं शास्त्रसङ्ग्रहे ।
तेषामत्र मया दृष्टं भाद्रे हरमुखं जलम् ॥२१॥

भाद्राष्टम्यां तु शुक्लायां वर्षासु भुवनेश्वरि ।
काले मुकुटगङ्गायां कथितः शुभदः शुभः ॥२२॥

यदा भवति वै कालं तदा मुकुटमाश्रयेत् ।
न वारो न ग्रहो कश्चिद्विषमो वा समोऽपि वा ॥२३॥

गङ्गायां विषमः प्रोक्तो यदा काले समागतः ।
तदा श्रयेत देवेशि पुण्यं मुकुटजं जलम् ॥२४॥

---

२२ कः भद्राष्टम्यां— भाद्राष्टम्यां

२३ गः मा ग्रहा— ग्रहो

मलिनानि भवन्त्येव महापातकिसंगतः ।
तीर्थानि जगदीशानि तान्यायान्ति जले शुभे ॥२५॥

स्नातुं मुकुटगङ्गायां भाद्राष्टम्यां महेश्वरि ।
तस्मात्सर्वप्रयत्नेन घोरं ज्ञात्वा कलौ प्रिये ॥२६॥

कालं वा स्व शिरस्थं च शीघ्रं हरमुखं व्रजेत् ।
न यत्र कालो देवेशि महाकालप्रभावतः ॥२७॥

कालभंगो न चास्त्येव निरयो वापि सुन्दरि ।
न भयं संसृतेर्वापि मरणं वापि चेश्वरि ॥२८॥

ग्रहपीडा न चास्त्येव नास्ति दुर्भिक्षजं भयम् ।
ईतिभ्योऽपि भयं नास्ति स्नात्वा मुकुटगङ्गिकाम् ॥२९॥

नातः परतरं पुण्यं तीर्थं नातः परं शुभम् ।
न दानं न व्रतं पुण्यं न घोरं तप उत्तमम् ॥३०॥

समं मुकुटगङ्गाया न भूतं न भविष्यति ।
सत्यं सत्यं महादेवि कलौ घोरे सुदारुणे ॥३१॥

---

२५ गः मा तीथानि—तीर्थानि

घः तान्यान्ति—तान्यायान्ति

२६ घः मा कलिप्रये—कलौ प्रिये

२८ खः मा स्वन्दरि—सुन्दरि

स्नात्वा मुकुटगङ्गायां न समा मखजाः क्रियाः ।
तस्मात्सर्वप्रयत्नेन गङ्गामुकुटजां प्रिये ॥३२॥

नश्यन्ति दर्शनात्तस्याः निरयानां च कोटयः ।
त्रिऋणान्मुक्तिमाप्नोति गत्वा मुकुटजां प्रिये ॥३३॥

स्नात्वा च तर्पयित्वा तु देवान्पितॄन्समाहितः ।
पितृलोकस्थितान्तेषां प्रक्षेपणं विधानतः ॥३४॥

तर्पणं वा प्रकुरुते श्राद्धं वा विधिनाथवा ।
अस्थीन्युत्तरगङ्गायां प्रक्षिपेत् विधानतः ॥३५॥

तर्पणं वा प्रकुरुते श्राद्धं वा विधिनाथवा ।
ब्राह्मणान्भोजयित्वा तु पुण्ये गङ्गातटे शुभे ॥३६॥

इति पितृगणा गाथां प्रगायन्ति महेश्वरि ।
प्रस्थितं गोत्रजं दृष्ट्वा हरिं हरमुखं प्रिये ॥३७॥

. . . . . . . . . . . . . . . . . . . ।
आस्फोटयन्ति नृत्यन्ति गायन्ति पितरो मुदा ॥३८॥

---

३४ कः मा तर्पयत्वा — तर्पयित्वा

खः प्रक्षेप — प्रक्षेपणं

३८ गः मा अस्फोटयन्ति — आस्फोटयन्ति

भूयो भूयः किं प्रलापैर्नरः पातकवान्कलौ ।
गङ्गामुकुटजां स्नात्वा सर्वपापैः प्रमुच्यते ॥३६॥

माहात्म्यमपि देवेशि पुण्ये हरमुखे गिरौ ।
वक्तुं मुकुटगङ्गाया न शक्तोऽपि शतं समः ॥४०॥

इदं मुकुटगङ्गाया माहात्म्यं सर उत्तमे ।
सर्वपापहरं देवि तव स्नेहात्प्रकाशितम् ॥४१॥

इदं रहस्यं परमं नाख्येयं वेदनिन्दके ।
शठे क्रूरे तथा द्यूते मधुपे तत्र दूषके ॥४२॥

चौरे हीने कुचाले च गुरुनिन्दाप्रवर्तिनि ।
गङ्गाभक्तिविहीने च तथैव वेदनिन्दके ॥४३॥

तीर्थनिन्दापरे चापि नाख्येयं गुह्यमुत्तमम् ।
इदं रहस्यं देवेशि तव स्नेहात्प्रकाशितम् ॥४४॥

गुह्यं गोप्यतमं चैव चेति सत्येन ते शपे ।
इति गुह्यतमं शास्त्रं श्रुत्वा प्राप्नोति यज्ञजम् ॥४५॥

---

४१ खः मा माहात्म्यमसरोत्तमे—माहात्म्यं सर उत्तमे

गः सर्वपापहरा—सर्वपापहरं

४२ खः मा नाख्यर्य—नाख्येयं

फलं पठित्वापि तथा गङ्गास्नानं दिने दिने ।
इदं पठन्नरो मुच्येद्घोराद्वै कलिजाद्भवेत् ॥४६॥

शृण्वन्वापि महेशानि वाजपेयफलं लभेत ।
इति प्रोक्तं मया तेऽद्य फलं मुकुटजं प्रिये ॥४७॥

. . . . . . . . . . . . . . . . . . . . . . . . ।
यत्पृष्टञ्च त्वया देवि किमन्यच्छ्रोतुमिच्छसि ॥४८॥

इति श्री श्रीलहरविषयोपजाततीर्थसंग्रहे हरमुकुटगङ्गामाहात्म्य
वर्णनं नाम नवमः पटलः ॥९॥

ॐ नमः श्रीगङ्गाभगवत्यै ।

# भृङ्गीशसंहिता
# अमरनाथमाहात्म्यम्

## ॐ श्रीगणेशाय नमः

## ॐ नमः शिवाय

ॐ श्रीदेव्युवाच

ॐ श्रावं श्रावं महादेव महिमानमनुत्तमम् ।
पुण्यं ह्यनन्तनागस्य सूर्यक्षेत्रस्य वै तथा ॥१॥

अधुना श्रोतुमिच्छामि यात्राममरनाथजाम् ।
रसलिङ्गस्य माहात्म्यं श्रुत्वा मुच्ये महदघात् ॥२॥

यात्रामकृत्वा देवेश यो लिङ्गं पश्यति प्रभोः ।
स कां गतिं प्रयात्येवं वद शीघ्रं दयानिधे ॥३॥

---

१ गः मा ह्यनन्त – ह्यनन्त

२ घः मा मुच्येमहादघात् — मुच्ये महदघात्

३ गः मा प्रयात्ये — प्रयात्येवं

श्रीभैरव उवाच

यात्रामकृत्वा देवेशि लिङ्गं पश्यति यो नर: ।
स याति नरकं घोरं तीर्थद्रोही भवेन्नर: ।।४।।

शृणु देवि प्रवक्ष्यामि यात्राममरनाथगाम् ।
यां श्रुत्वापि नर: पुण्यमाप्नुयात्तीर्थजं प्रिये ।।५।।

आदौ षोडशक्षेत्रे तु शिवपारं तत: परम् ।
तत्रोपस्पृष्टापदृष्टौ पुण्ये गङ्गाम्भसि प्रिये ।।६।।

पद्मपुरे सिद्धक्षेत्रे स्नात्वा यायादत: परम् ।
ततो युवद्यामिष्टो हि वत्तिकासिद्धक्षेत्रके ।।७।।

तत्रोपस्पृश्य च जलं महानागस्य सुन्दरि ।
हरिद्राख्यं गणपतिं नुत्वा स्नात्वा व्रजेत्तत: ।।८।।

बलिहारे महाक्षेत्रे स्नात्वा प्रायादत: परम् ।
वागाश्रमे हस्तिकर्णं नत्वोपस्पृश्य च व्रजेत् ।।९।।

---

५ ख: मा यात्रामरनाथकां—यात्राममरनाथगाम्

६ ग: मा ततोप—तत्रोप

७ क: मा पात्वा—स्नात्वा

८ ख: मा स्वन्दरि—सुन्दरि

९ ग: मा हस्तकर्णो—हस्तिकर्णं

चक्रेशे च ततः स्नायात्ततो देवकतीर्थके ।
स्नात्वा पुनः हरिचन्द्रतीर्थं यायात्ततः प्रिये ॥१०॥

स्थलवाटे ततस्स्नात्वा मृततीर्थे महेश्वरि ।
ततो गच्छेत्सूर्यस्य गुहवाटं महेश्वरि ॥११॥

तत्र लम्बोदरीस्नानं कुर्यादेवमतन्द्रितः ।
ततः सूर्याश्रमं गत्वा सूर्यगङ्गाजले शुभे ॥१२॥

... ... ... ... ... ... ... ... ... ... ... ... ... ... ।
स्नात्वा दत्वा च विधिवन्मुच्यते ब्रह्महत्यया ॥१३॥

ततः स करमासाद्य स्नात्वा तत्पादमूलके ।
सम्पूज्य गणपं यायाद्बद्धोरसि महेश्वरि ॥१४॥

हयशीर्षाश्रमे पुण्ये स्नात्वाश्वतरनागके ।
बद्धोरसि पुनर्गङ्गामवगाह्य सुरेश्वरि ॥१५॥

गच्छेत्सरलके ग्रामे तत्र स्नात्वा पुनः प्रिये ।
तत्र खिल्पायणे पुण्ये प्रणम्य विधिवद्धरिम् ॥१६॥

नारायणं महापुण्यं तीर्थं तत्र पुरातनम् ।
महाग्रामे मामलके गणेशं समुपाश्रयेत् ॥१७॥

दृष्ट्वा मामेश्वरं लिङ्गं स्नात्वा मामेशवारिणि ।
स्नायाद्भृगुपते: क्षेत्रे नीलगङ्गाजले शुभे ॥१८॥

स्थाण्वाश्रमे नदीं पुण्यां कोटिजन्माघनाशिनीम् ।
तत्र पञ्चतरङ्गिण्यां जलं तदवगाह्य वै ॥१९॥

आरुह्य पर्वतं देवि गर्भागारस्य मध्यत: ।
अवरुह्यामरावत्यां स्नानं भस्माङ्गलेपनम् ॥२०॥

विभूतिसितदेहश्च नृत्यमानो दिगम्बर: ।
आरुहेत्पर्वतं गुह्यं महापातकनाशिनीम् ॥२१॥

प्रणम्य विधिवद्भक्त्या स्वधा लिङ्गं सनातनम् ।
नरो न लिप्यते पापै: कोटिजन्मसमुद्भवै: ॥२२॥

दर्शनात्स्पर्शनाच्चापि पूजनाच्चापि वन्दनात् ।
अमरेशस्य लिङ्गस्य मुच्यते सर्वकिल्विषै: ॥२३॥

---

१९ क: मा स्थाण्वाश्रमे—स्थाण्वाश्रम

२० ग: मा अमरावत्यां—अमरावत्यां

२१ ख: मा दिगस्वर:—दिगम्बर:

२३ ख: मा पूजनाश्चापि—पूजनाच्चापि

षट्स्नानानि वितस्तायां प्रोक्तानि जगदम्बिके ।
सप्तदशस्थलस्थानि स्नानान्यन्यानि सुन्दरि ॥२४॥

. . . . . . . . . . . . . . . . . . . . ।
त्रयोविंशाभिधा यात्रा स्मृता ह्यमरनाथगा ॥२५॥

एवं कृत्वा नरो यात्रां पश्येल्लिङ्गं रसात्मकम् ।
स याति शिवसायुज्यं यत्र नास्ति कृताकृतम् ॥२६॥

इति श्री श्रीदक्षिणपार्श्वोपतीर्थसंग्रहे अमरनाथयात्रावर्णनं
नाम प्रथमः पटलः ॥१॥

## अथ द्वितीयः पटलः

श्रीदेव्युवाच

अधुना श्रोतुमिच्छामि पुण्ये मामलके शुभे ।
क्षेत्रं मामलकं नाम महापातकनाशनम् ॥१॥

कथं मामलके नाम महागणपतेः फलम् ।
यदि ह्यहमनुग्रहा प्रिया तेऽस्मि तदा वद ॥२॥

भैरव उवाच

शृणु देवि प्रवक्ष्यामि स्थानं मामलकं शुभम् ।
यस्य दर्शनमात्रेण नश्येत्ते विघ्नराशयः ॥३॥

पुरा भक्तस्य कस्यचिन्नाम्ना सोऽभूदजापहः ।
क्रीतोऽहं तपसा तेन तदर्थञ्च कृतं मया ॥४॥

स्थानं स्थलवाटिकायां सर्वविघ्ननिवारणम् ।
स्थलवाटात्पुरा देवि प्राचलत्स महेश्वरः ॥५॥

संस्थाप्य गणपं देवं द्वारस्थं कक्ष्यद्वये शिवे ।
गतः खेलनकादूर्ध्वं दण्डकस्य मुनेर्वनम् ॥६॥

---

६ ख: मा द्वास्थं — द्वारस्थं
शवे — शिवे

तत्र क्षणञ्च विश्रम्य देवास्तत्रागमन्मुदा ।
दृष्ट्वा देवान्समायातान्मामेति प्रवदन्मुहुः ॥७॥

मा मा गच्छत देवास्तु प्राक्रोशञ्च मुहुर्मुहुः ।
दृष्ट्वा क्रोशन्तमीशानं* ... ... ... ॥८॥

ॐ श्रीभैरव्युवाच

सरलग्राममाहात्म्यं श्रुत्वा प्रीतास्मि सुन्दर ।
इदानीं श्रोतुमिच्छामि तीर्थं खिल्यापनं महत् ॥९॥

ग्रामे खिल्यापने पुण्ये तीर्थं नारायणाभिधम् ।
यदभूद्भगवन्सर्वं तन्मे त्वं कृपया वद ॥१०॥

श्रीभैरव उवाच

शृणु वक्ष्ये महादेवि तीर्थं खिल्यापनं परम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातकसञ्चयात् ॥११॥

पुरा महर्षयः सिद्धा बालखिल्याभिधाः शिवे ।
चेरुस्तपो दुश्चरन्ते नियमेनोर्ध्वरेतसः ॥१२॥

---

७ ख: मा दवा—देवा.

*त्रुटितोऽत्र पाठः

१० क: मा खिल्यावनं — खिल्यापने

१२ ख: मा नियमेनोर्वरेतसः — नियमेनोर्ध्वरेतसः

निराहारा यतात्मानः पादाङ्गुष्ठाग्रसंस्थिताः ।
समा विलीना ह्यभवन्सहस्रं परिवत्सरान् ॥१३॥

विष्णुध्यानपरासक्ताः शान्तात्मनो महौजसः ।
चिरेण भगवान्विष्णुर्दर्शनमीयिवान्प्रभुः ॥१४॥

समापि मुक्ता दृष्ट्वा तं भगवान्नु सनातनम् ।
उत्थायोत्थाय सहसा प्रणम्य दण्डवत्स्थिताः ॥१५॥

नीलजीमूतसङ्काशं प्रफुल्लजलजेक्षणम् ।
. . . . . . . . . . . . . . . . . . . . . . ॥१६॥

शङ्खचक्रगदापद्मपाणिं पापहरं हरिम् ।
गरुडस्थं पतं विष्णुं गिरा परमयास्तुवन् ॥१७॥

ऋषय ऊचुः

महाविष्णुं प्रभविष्णुं पुराणं
मीढुष्टमं शिपिविष्टं वरिष्टम् ।
गरीयांसं च्छारसहं वशिष्टं
प्रपद्यऽस्मरशरणं तारांशिष्टम् ॥१८॥

---

१३ गः मा विलीन - विलीना

१४ घः मा प्रनुः—प्रभुः

१८ खः मा मादुष्ट— मीढुष्टम

वेदात्मकं वेदवेद्यं पुराणं
वरं वरेण्यं वरदं त्वां शरण्यम् ।
हिरण्यगर्भमादिदेवाधिदेवं
हिरण्यबाहुं शरणं त्वां प्रपद्ये ॥१९॥

त्रिलोकनाथं लोकपालीशमीशं
लोकाधारं लोकवन्द्यं महेशम् ।
लोकद्वारं विश्वरूपं पुराणं
लोकात्मकं त्वां शरणं प्रपद्ये ॥२०॥

वितत्याजं जवनीपार्थरूपं
क्षणं बालं तरुणं वै क्षणं त्वाम् ।
क्षणं पुमांस्त्रीस्वरूपं क्षणं वा
महानटं शरणमुपैमि दिव्यम् ॥२१॥

प्रसार्य जालं रागदोषादितन्त्वं
दृष्टं मनः पक्षिणं प्राणमध्ये ।
दशग्राहं परिगृह्णाति सत्यं
महाधादं त्वां शरणं प्रपद्ये ॥२२॥

---

१९ घ: मा गिरणं—शरणं

अनाद्यन्तं सवितारमजेशं
पुरातनं नवं नवं जायमानम् ।
वेदान्तवेद्यं सांख्ययोगेन योग्यं
भूयो भूयः शरणं त्वां प्रपन्नाः ॥२३॥

श्रीभैरव उवाच

इति स्तुत्वा महेशानं महाविष्णुं महेश्वरम् ।
प्रणम्य पतिता भूमौ पुनरुत्थापिताः प्रिये ॥२४॥

उवाच तांस्तदा विष्णुर्मेघगम्भीरया गिरा ।
उपासनेन तुष्टोऽस्मि वरयध्वं वरं पुनः ॥२५॥

. . . . . . . . . . . . . . . . . . . . . . ।
ददामि दुर्लभं विप्रा देवासुरसुदुर्लभम् ॥२६॥

श्रुत्वा तु वचनं तस्य विष्णोरमिततेजसः ।
प्रत्युचुस्तं महादेवं बालखिल्या महर्षयः ॥२७॥

त्वद्दर्शनात्परः कोऽन्यो वरः श्रेष्ठो महेश्वर ।
तथापि वरदा देवा वृणीमस्तीर्थमुत्तमम् ॥२८॥

---

२३ खः मा पारातनं पुरातनं
२५ घः मा वारयध्वं—वरयध्वं
२६ गः मा ददापि—ददामि
२८ कः मा वद्दर्शनात्परः—त्वद्दर्शनात्परः
गः द्‍वा—देवा

यत्र वासान्महाविष्णोर्सिद्धि प्राप्तुमनुत्तमाम् ।
श्रुत्वा तेषां वचस्सौम्यमानन्दाश्रुपरिप्लुतः ॥२९॥

दृष्टिं पदोः समाधाय गङ्गां समुदचालयत् ।
पावनं चाश्रमं तेषां मुनीनां भावितात्मनाम् ॥३०॥

स्वयं तस्थौ च तत्रैव ग्रामे खिल्याभिधेयिनाम् ।
अभूतसंप्लवं तावदिदं परमपावनम् ॥३१॥

बालखिल्याभिधं तीर्थं भविष्यति न संशयः ।
इत्युक्त्वा तांस्तदा विष्णुर्गतोऽन्तर्धानमच्युतः ॥३२॥

बालखिल्या यत्र चेरुस्तपः परमकारुणम् ।
ततस्तु प्रथितो ग्रामो बालखिल्या यतः परः ॥३३॥

नारायणपदोद्भूतं क्षेत्रं यदभवत्किल ।
ततश्च प्रथितं क्षेत्रं तीर्थं नारायणाभिधम् ॥३४॥

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
सद्यः प्रमुच्यते स्नानात्क्षेत्रे नारायणाभिधे ॥३५॥

---

२९ गः मा श्रुत्वा—श्रुत्वा
३१ कः मा सुयं—स्वयं
३३ कः/खः मा चेदुस्तप.—चेरुस्तपः
परमकरणं—परमकारुणम्

नारायणाभिधे क्षेत्रे स्नातव्यमविशङ्कया ।
घोरात्कलियुगाद्देवि भीरुणा पुरुषेण ह ॥३६॥

आजन्म यदि देवेशि पीयते मदिरां मुदा ।
मासमात्रं जलं तत्र पीत्वा मुच्येदसंशयम् ॥३७॥

अभक्ष्यभक्षणाद्देवि तपेद्यस्य न पानतः ।
खिल्यापने प्रमुच्येत जलपानान्न संशयः ॥३८॥

नारी वा पुरुषो वापि ग्रामे खिल्यापने परे ।
स्नात्वा पीत्वा च विधिवन्मुच्यते वर्षतः प्रिये ॥३९॥

मातृश्वसृपितृश्वसृभ्रातृजायाभिकामुकः ।
भ्रूणहा ब्रह्महा चापि व्यभिचारी तथैव च ॥४०॥

वृषलीपतिश्वपाकेशः नपुंस्कश्चापि सुन्दरि ।
स्नात्वा पीत्वा च विधिवन्मुच्यते वर्षतः प्रिये ॥४१॥

रजस्वलाभिगामी च पूतिका कामुकोऽपि च ।
गोघातकः पितृहा च मातृहा सुरसुन्दरि ॥४२॥

---

३८ कः मा घभक्ष्य – अभक्ष्य
गः पिल्यापने – खिल्यापने
घः पाञाप्न — पानान्न
३९ कः मा नागी – नारी
४० घः मा यमिचारी — व्यभिचारी

गरदो ह्यग्निदश्चैव शास्त्रपाणिधनापहा ।
स्त्रीघाती बालघाती च मुच्येदावसतः प्रिये ॥४३॥

पुण्ये खिल्यापने ग्रामे विष्णोर्क्षेत्रे परे शिवे ।
याति विष्णोः परं स्थानं यत्र गत्वा न शोचते ॥४४॥

. . . . . . . . . . . . . . . . . . . . . . ।
खिल्यापनसमं तीर्थं न भूतं न भविष्यति ॥४५॥

खिल्यापने पुण्ये ग्रामे विष्णोर्क्षेत्रे ह्यनुत्तमे ।
नरो मुक्तिमवाप्नोति स्नानदानजपार्चनैः ॥४६॥

. . . . . . . . . . . . . . . . . . . . . . ।
इति खेलनके ग्रामे क्षेत्रं नारायणाभिधम् ॥४७॥

इत्येतत्पटलं गुह्यं महापातकनाशनम् ।
श्रुत्वा पठित्वा मुच्येत महापातककोटिभिः ॥४८॥

इति श्रीदक्षिणापार्श्वोपतीर्थसंग्रहे श्रीअमरनाथमाहात्म्यं
खिल्यापनं नाम द्वितीयः पटलः ॥२॥

---

४३ गः मा धनापहाः—धनापहा
घः मुच्येणावसतः—मुच्येदावसतः
४५ गः मा खिल्यावनं—खिल्यापन
४७ खः मा क्षत्रं—क्षेत्रं

## अथ तृतीयः पटलः

* . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . . । 
- - - - - - - - - - देवो गणपतिस्त्वरन् ॥१॥

स्वयम्भुः संभ्रमयुतः पातालादुत्थितस्तदा ।
मामेति प्रवदन्देवा प्रगृह्य परशुं स्वयम् ॥२॥

मामेव प्रवदत्येव महागणपतिस्तदा ।
सर्वे देवास्तु तच्छब्देऽभूवल्लीना ह्यसंशयम् ॥३॥

यतः प्रलीना देवौघा ईश्वरे सच्चिदात्मनि ।
ततः स प्रथितो ग्रामो मामलाख्यो जगत्त्रये ॥४॥

मा मा गच्छत देवौघा भयाल्लीनाः परे शिवे ।
ततः स प्रोक्तो देवेशि ग्रामो मामलसंज्ञकः ॥५॥

दृष्ट्वा गणपतिं त्रस्ताः पातालादुत्थितं प्रिये ।
तदा प्रोवाच तं देवं गणेशं वै शिवः स्वयम् ॥६॥

---

*तृतीयपटलस्य प्रारम्भिकः पाठः नोपलब्धः

२ कः मा सु यभुः—स्वयम्भुः

यस्मान्मामेति शब्दं त्वं कृत्वा वोदचलस्स्वयम् ।
तस्मादत्र चिरं तिष्ठ विघ्नसङ्घान्प्रनाशय ॥७॥

यः कश्चिन्मानवो लोके ह्यत्र त्वां पूजयिष्यति ।
सर्वान्विघ्नान्विनिर्जित्य सिद्धिं समधिगच्छति ॥८॥

. . . . . . . . . . . . . . . . . . . . . . . . ।
सर्वान्कामानवाप्नोति गणपतिप्रसादतः ॥९॥

वर्षे वर्षे तु यः कश्चिन्माघवे मासि नित्यदा ।
चतुर्दश्यां शुक्लपक्षे पूर्णं फलं लभेन्नरः ॥१०॥

विनायकचतुर्थ्यां वा पूजयेद्यो गणेश्वरम् ।
मामेश्वरसमीपे तु ह्यनन्तफलमाप्नुयात् ॥११॥

त्वां पूजयित्वा यो देव मामेशं पूजयेन्नरः ।
स पुण्यफलमाप्नोति न पुनर्स्तन्यपो भवेत् ॥१२॥

इति दत्वा वरं देवो गणेशस्य स्वयं हरः ।
पुण्ये वै दण्डकारण्ये लीनो मामेश्वराख्यया ॥१३॥

---

८ घः मा सिधि – सिद्धि

९ घः मा गणपत्यप्रसादत —गणपतिप्रसादतः

१० खः मा मघवे—माघवे

दृष्ट्वा मामेश्वरं लिङ्गं पुण्ये मामलके नरः ।
पूजयित्वा गणपतिमश्वमेधमवाप्नुयात् ॥१४॥

स्नातो मामेश्वरे कुण्डे दृष्ट्वा मामलकं विभुम् ।
नरो न लिप्यते पापैः पद्मपत्रमिवाम्भसा ॥१५॥

स्वयम्भुवं गणपतिं मामलेश्वरसन्निधौ ।
यः पूजयेत् परं भक्त्या ज्योतिष्टोममवाप्नुयात् ॥१६॥

विनायकं च मामेशं दृष्ट्वा प्राप्नोति पुष्कलम् ।
फलञ्च सोमयागस्य नरो नियमसंयुतः ॥१७॥

इत्थं मामलके ग्रामे माहात्म्यं गणपस्य ते ।
कथितं कृपया देवि महापातकनाशनम् ॥१८॥

इत्येष पटलो गुह्यो मया तेऽद्य प्रकाशितः ।
श्रुत्वापि पठितश्चापि विघ्नसंघात्प्रमुच्यते ॥१९॥

इति श्री अमरनाथ१*माहात्म्ये मामलेश्वरमहिमा
नाम २*तृतीयः पटलः ॥३॥

१९ खः मा सयाते—मया ते

१*महात्म्ये—माहात्म्ये

२*द्वितीया—तृतीयः

## अथ चतुर्थः पटलः

ॐ श्रीदेव्युवाच

श्रुत्वा महागणपते महिमानमनुत्तमम् ।
मामेश्वरस्य च तथा क्रीतास्मि जगदीश्वर ॥१॥

इदानीं श्रोतुमिच्छामि नदी लम्बोदरी तथा ।
अनुग्रहा प्रिया तेऽस्मि तदा मे कृपया वद ॥२॥

श्री ईश्वर उवाच

एकदा संस्थितस्यापि कैलासे परमेशितुः ।
द्वारस्थोऽभूच्च देवेशि स्वयं गणपतिस्तदा ॥३॥

गणेशं कथयामास स्वयं स भगवान्हरः ।
मा कश्चिदत्र देवोऽपि ह्यागच्छेदित्यभाषत ॥४॥

श्रुत्वा वाक्यं महेशस्य महागणपतिस्तदा ।
निषेध नन्दिना सार्धं शासनं पालयन्प्रभोः ॥५॥

---

२ गः मा अनुग्रह्य—अनुग्रहा

३ खः मा परमेशितः—परमेशितुः

४ खः मा सा—स

देव्यास्सह महादेवः क्रीडालापपरोऽभवत् ।
तयोरेव निवसतोः कैलासे शुभमन्दिरे ॥६॥

एतस्मिन्नन्तरे देवि शक्रो देवगणैस्सह ।
त्रिपुरान्दितो ह्याजगाम द्रष्टुकामो महेश्वरम् ॥७॥

स्वयं गणपतिस्तत्र न्यषेधत्सुरपं तदा ।
शक्रः क्रोधसमाविष्टो वज्रघातं समाधदे ॥८॥

हुङ्कारेण गणेशोऽपि बाहुमस्तंभयद्धरेः ।
स्वबाहुं स्तंभितं दृष्ट्वा शक्रो गणपतिं तदा ॥९॥

तुष्टाव वाग्भिरंक्याभिर्दण्डवत्प्रणिपत्य सः ।
- - - - - - - - - - - - - - - - - - - - ॥१०॥

शक्रः

अप्रमेयगुणं नित्यं गणेशं सुरपूजितम् ।
पार्वती प्रियपुत्रं च प्रणमस्ये गणेश्वरम् ॥११॥

देवानामादिकर्तारमादिमध्यान्तवर्जितम् ।
चिदचित्पदगम्भीरं प्रणमामि विनायकम् ॥१२॥

वेदान्तैः सूरसिद्धैश्च आगमैरपि सुन्दरम् ।
सूक्ष्मं शान्तं बृहत्स्थूलं प्रणमामि गणेश्वरम् ॥१३॥

---

७ खः मा सहा—सह

शान्तञ्चिदद्वयं देवं विमर्शोद्भवरूपिणम् ।
तत्वसारं महत्तत्वं प्रणमस्ये गणेश्वरम् ॥१४॥

ब्रह्माद्वयानवच्छेद्यं शिवाद्वयविबोधितम् ।
स्वप्रकाशं परात्पारं प्रपद्ये तं विनायकम् ॥१५॥

मोदकाहारपरमं साक्षमालाकरं परम् ।
त्रिनेत्रं गणवक्त्रञ्च प्रपद्ये महेश्वरम् ॥१६॥

सुदन्तं परशुञ्चैव धारयन्तं भुजद्वये ।
रक्तवस्त्राम्बरधरं रक्तमालाधरं तथा ॥१७॥

. . . . . . . . . . . . . . . . . . . . ।
विघ्नराशीन्विकिरन्तं करोत्क्षेपं मुहुर्मुहुः ॥१८॥

अनन्तं परमं तत्वं सारात्सारतरं परम् ।
वेदागमदुर्निन्त्यं प्रपद्ये गणनायकम् ॥१९॥

अप्रमेये गुणायापि ह्यक्षाय वरवर्णिनि ।
विनायकाय देवाय भूयो भूयो नमो नमः ॥२०॥

---

१४ ख: मा रूपिनं — रूपिणं

१५ क: मा ब्रह्ना — ब्रह्मा

श्रीभैरव उवाच

इत्थं गणपतिः श्रुत्वा वाचं सुरपतेः तदा ।
परं क्रोधं सञ्जहार दृशापश्यत्सुरेश्वरम् ॥२१॥

. . . . . . . . . . . . . . . . . . . . . . . ।
मोचयामास तं बाहुं गणेशः परया मुदा ॥२२॥

देवोऽपि स्वं जगामाशु धामकामसमन्वितः ।
प्रणिपत्य महेशस्य सूनुं मन्त्रविनायकम् ॥२३॥

क्रोधसंहारकं नाम स्तोत्रं गणपतेस्सदा ।
त्रिःकालं श्रद्धया युक्तो पठन्मुच्येत सङ्कटात् ॥२४॥

ततो गणपतिर्देवि तृषितः क्षुधितोऽपि च ।
भुक्त्वा स्वादुफलं तत्र पपौ गङ्गां सुपुष्कलाम् ॥२५॥

पीत्वा गङ्गां स विघ्नेशस्तदा लम्बोदरोऽभवत् ।
लम्बोदरीति वै नाम्ना ह्याजुहाव हरस्तदा ॥२६॥

शुष्कां दृष्ट्वा तत्र गङ्गां हरो गणपतेः प्रिये ।
डमरुणाहनत्तस्य ह्युदारमुदरस्तदा ॥२७॥

---

२५ घः मा पुष्कलान्—सुपुष्कलाम्

२६ गः मा लम्बोदरोति—लम्बोदरीति

घः मा रहस्तदा—हरस्तदा

अथमन्मुखतो गङ्गां तदा गणपतिः प्रिये ।
यस्माल्लम्बोदरात्तस्य गणेशस्य विनिस्सृता ॥२८॥

तस्मात्प्रोक्ता पुराविद्भिर्महालम्बोदरी नदी ।
लम्बोदर्यां नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥२९॥

गोभूहिरण्यवासांसि लम्बोरनदीतटे ।
यो ददाति द्विजश्रेष्ठो ह्यनन्तफलमाप्नुयात् ॥३०॥

लम्बोदरनदीतीरे यः स्नायात्परया मुदा ।
स याति शिवसालोक्यं यत्र गत्वा न शोचते ॥३१॥

इति ते कथितं देवि लम्बोदरी नदी शुभा ।
श्रुत्वा सुभक्तितः पुंभिर्महापातकनाशनी ॥३२॥

इत्येष पटलो गुह्यः कलिकल्मषनाशनः ।
श्रुतोऽनुध्यातः पठितो महापापनुत्तये ॥३३॥

इति लम्बोदरी [नदी] नाम महिमा पटलः ॥४॥

---

३३ गः मा पटितो— पठितो

## अथ पञ्चमः पटलः

*श्रीभैरव उवाच

शृणु देवि प्रवक्ष्यामि भृगुतीर्थमनुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातकपञ्जरात् ॥१॥

भृगुर्मुनिवरो देवि परिशीलवने शुभे ।
तपश्चचार सुमहद्देवैरपि सुदुष्करम् ॥२॥

दिव्यं वर्षसहस्रं तु परिशीलयुते वनम् ।
जगाम परमर्षेश्च नियतस्य परात्मनि ॥३॥

आजगाम तदा तं तु विष्णुर्दर्शयितुं मुदा ।
स वै देवगणैस्सार्धं भृगुः प्रोवाच तं हरिम् ॥४॥

भृगुरुवाच

विष्णो जिष्णो महाविष्णो प्रभविष्णो जगत्पते ।
अप्रमेयानन्तगुणभूयो भूयश्च ते नमः ॥५॥

---

*पटलारम्भेऽत्र श्रीभैरवीप्रोक्तः जिज्ञासाप्रश्नो नास्ति ।

२ खः मा शील—शील

४ खः मा दर्शयियं—दर्शयितुं

इति स्तुत्वा महाविष्णुं प्रभविष्णुं सुरेश्वरम् ।
दण्डवत्प्रणिपत्याशु भूयो भूयो नमस्करोत् ॥६॥

. . . . . . . . . . . . . . . . . . . . ।
उत्थाप्य प्रणते तत्र भृगुं विष्णुः सनातनः ॥७॥

आनन्दास्रुपरिक्लिन्नं सुस्वेन्मूर्धनि तं मुनिम् ।
आलिलिङ्ग तयोरन्योऽन्यं भृगुर्विष्णू महेश्वरि ॥८॥

तदङ्गप्रस्वेदभवैः जलैः परमपावनैः ।
पुण्यं तीर्थमभूद्देवि परिशीलवने शुभे ॥९॥

भृगोरालिङ्गनाद्यस्माद्धरिस्वेदसमुद्भवम् ।
पुण्यं तत्प्रथितं तस्माद्भृगुतीर्थं महेश्वरि ॥१०॥

भृगुतीर्थे नरस्स्नात्वा दत्वा ताम्रं तथाक्षिपन् ।
वस्त्रञ्च रत्नदीपञ्च दद्याद्यत्नेन मानवः ॥११॥

---

८ कः मा परिक्लिनं — परिक्लिन्नं
खः सुस्वन्मूर्ध — सुस्वेन्मूर्धनि
गः त्वरन्योन्यं — त्वन्योऽन्यं

९ कः मा प्रसेद — प्रस्वेद
घः शून — शील

१० गः मा स प्रथितं — तत्प्रथितं

. . . . . . . . . . . . . . . . . . . . . . . . । . . . . ।
भृगुतीर्थे नरस्स्नात्वा पुण्यं प्राप्नोत्यनुत्तमम् ॥१२॥

भृगुतीर्थे महाविष्णुस्वेदोद्भूते महेश्वरि ।
स्नात्वा पीत्वा प्रमुच्येत ब्रह्महत्यादिकोटिभिः ॥१३॥

श्राद्धं कुर्यात्तीर्थवरे भृगौ परमपावने ।
पितरस्तृप्तिमायान्ति कतकल्पं न संशयः ॥१४॥

शुभे वै भार्गवे क्षेत्रे स्नात्वा पीत्वा च सुन्दरि ।
नरो न लिप्यते पापैः पद्मपत्रमिवाम्भसि ॥१५॥

भूयो भूयः किमुक्तेन नरः पातकवान्कलौ ।
भृगुतीर्थं समासाद्य मुच्यते सर्वकिल्बिषात् ॥१६॥

श्रीदेव्युवाच

भृगुतीर्थस्य माहात्म्यं श्रुत्वा प्रीतास्मि सुन्दर ।
. . . . . . . . . . . . . . . . . . . . . . . . ॥१७॥

इदानीं श्रोतुमिच्छामि नीलगङ्गासमुद्भवम् ।
यच्छ्रुत्वा मुच्यते जन्तुः कोटिजन्मभवैरघैः ॥१८॥

---

१२ गः मा नर स्नात्वा—नरस्स्नात्वा

१४ कः मा कुर्यातीर्थवरो—कुर्यातीर्थवरे
गः स्त्रिप्ति—तृप्ति

१७ खः मा स्वन्दर—सुन्दर

*श्री ईश्वर उवाच

श्रृणु देवि प्रवक्ष्येऽहं नीलगङ्गासमुद्भवम् ।
यच्छ्रुत्वा प्राप्यते मर्त्यैरग्निष्टोमफलं प्रिये ॥१६॥

एकदा क्रीडतस्तस्य शिवस्य वरवर्णिनि ।
देव्या सौरतसंलापैरन्यैः क्रीडनकैरपि ॥२०॥

अक्षिण्यश्रुमतः तस्या पार्वत्या वरवर्णिनि ।
कालाञ्जनार्थं वदनं सामभूतस्य सुन्दरि ॥२१॥

कालाञ्जनाङ्कितं दृष्ट्वा मुखं देवस्य पार्वती ।
दर्शयामास वै तस्मै ह्यादर्शं विमलं तदा ॥२२॥

दृष्ट्वाञ्जनार्थं वदनं स्वं देवो भगवान्हरः ।
जटाभिरीक्षद्वदनं कालाञ्जनयुतं शुभम् ॥२३॥

प्रक्षालयामास तदा वदनं गङ्गया शिवे ।
सा वै गङ्गा समुत्पन्ना कालाञ्जननिभाभवत् ॥२४॥

---

*ईश्वरुवाच —ईश्वर उवाच

२१ कः मा अक्षिणीश्रुमुतः—अक्षिण्यश्रुमतः

२२ खः मा पावनी—पार्वती

२४ गः मा स—सा

नीलगङ्गेति विख्याता महापातकनाशिनो ।
नीलगङ्गां नरस्स्नात्वा महापापैः प्रमुच्यते ॥२५॥

नीलयङ्गधारणस्पर्शात्तद्वत्संसर्गतो सतो ।
आत्मदोषादिस्त्रीणां वै नाशं सा नयति परम् ॥२६॥

नीलगङ्गामृदञ्चापि यो दद्यादङ्गके स्वके ।
स याति ब्रह्मसदनं यत्र गत्वा न शोचते ॥२७॥

. . . . . . . . . . . . . . . . . . . . . . . . ।
तथा नीलजलं पुण्यं महापापप्रणाशनम् ॥२८॥

नीलगङ्गानदीपुण्ये स्नानाज्जलशुभे जले ।
स याति शिवसायुज्यं यत्र गत्वा न शोचते ॥२९॥

इति ते कथितं देवि माहात्म्यममरोत्तमे ।
भृगोः क्षेत्रस्य नीलाया महापापप्रणाशनी ॥३०॥

इत्येष पटलो गुह्यो स्त्रीणां पापप्रणाशनः ।
ईश्वरो वचनाद्देवि त्रिमलघ्नः प्रकीर्तितः ॥३१॥

इति श्रीपरिशीलवने भृगुतीर्थनीलगङ्गा नाम पटलः ॥५॥

---

३० खः मा महात्म्यं — माहात्म्यं
घः प्रणाशनं — प्रणाशनी

## अथ षष्ठः पटलः

*भैरव उवाच

शृणु देवि प्रवक्ष्यामि स्नाण्वाश्रमवनं महत् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥१॥

पुरा चचार सुमहत्तपो हैमवते नगे ।
गिरिशो दक्षतनुजा विश्लेषिततनुशिवः ॥२॥

दिव्यं वर्षसहस्रांतं समाधिनिरतोऽभवत् ।
तत्रैव पार्वती देवी हरसेवार्थमागता ॥३॥

. . . . . . . . . . . . . . . . . . . . . . . . . . ।
सेवापरा ह्यभूत्तत्र चिरं देवी महेश्वरी ॥४॥

स्थाणुवत्सस्थितो यत्र महेशस्तपसि स्थितः ।
स्थाण्वाश्रमस्ततः प्रोक्तो महापातकनाशनः ॥५॥

स्थाण्वाश्रमसमीपे तु यः स्नायात्सुरवन्दिते ।
स याति शिवसदनं यत्र गत्वा न शोचते ॥६॥

---

*अत्रापि भैरवीजिज्ञासाप्रश्नो नास्ति

२ कः/खः मा सुमदत्तपो —सुमहत्तपो

६ घः मा शोचते — शोचते

स्थाण्वाश्रमे तु यो देवि श्राद्धं कृत्वा विधानतः ।
पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ॥७॥

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
स्थाण्वाश्रमवने पुण्ये मुच्यते सर्वकिल्विषात् ॥८॥

गवां कोटिसहस्रस्य सम्प्रदानस्य यत्फलम् ।
तत्फलं कोटिगुणितं स्नात्वा स्थाण्वाश्रमे जले ॥९॥

कुरुक्षेत्रे प्रयागे च गङ्गासागरसङ्गमे ।
स्नात्वा यत्फलमाप्नोति तत्स्थाणोर्दर्शनात्प्रिये ॥१०॥

स्थाण्वाश्रमसमीपे तु स्नानं कृत्वा विधानतः ।
अश्वमेधादियज्ञानां गोदानानां परं फलम् ॥११॥

क्षौमं हिरण्यं वस्त्रं परमं पुण्यमाप्नुयात् ।
देवार्चनमत्र कुर्वंस्तिलतर्पणमेव च ॥१२॥

जपञ्च मुच्यते जन्तुः महापातककोटिभिः ।
स्थाण्वाश्रमे नरो भक्त्या कुर्वन्वै किल्विषापहम् ॥१३॥

---

७ गः मा पितरस्त्रिप्ति — पितरस्तृप्ति

९ खः मा सम्परदातस्य — सम्प्रदानस्य

१० घः मा स्पाणो — स्थाणोः

न करोति महास्नानं दानं वा जगदम्बिके ।
स याति नरकं घोरं जन्मनि जन्मनि च पातकी ॥१४॥

तस्मात्स्थाण्वाश्रमे भक्त्या सन्ध्यातर्पणमाचरेत् ।
सन्ध्याकोटिगुणा प्रोक्ता तर्पणं स्यादनन्तकम् ॥१५॥

*श्री ईश्वर उवाच

राक्षसाश्च पुरा देवदर्शनार्थमुपागताः ।
देवैस्साधञ्च मिलितास्स्थाण्वाश्रमे समन्ततः ॥१६॥

अहं पूर्वमहं पूर्वमित्येवं स्पर्धया पुरा ।
कलहञ्चक्रिरेऽन्योऽन्यं गताश्च सुरसत्तमैः ॥१७॥

युद्धञ्च चक्रिरेऽन्योऽन्यं भुजाभुजि महेश्वरि ।
गिर्यारोहणकाले तु दैत्या पिष्टास्सुरोत्तमैः ॥१८॥

पिष्टा दैत्यास्तत्र गिरौ लीनास्तत्रैव सुन्दरि ।
दैत्यान्पिष्टान्देवगणा दृष्ट्वा हर्षमवाप्नुयुः ॥१९॥

यस्मिन्गिरौ देवगणैः पिष्टाः दैत्यास्समन्ततः ।
स गिरिपरमोद्धारः पेषाख्यो प्रथितो भुवि ॥२०॥

---

१४ ख: मा जन्मे जन्मे—जन्मनि-जन्मनि

*श्रीईश्वरउवाच— श्री ईश्वर उवाच

२० क: मा गिरो—गिरौ

कुरुक्षेत्रे प्रयागे च गङ्गासागरसङ्गमे ।
स्नानाद्यत्फलमाप्नोति तत्पेषस्य तु दर्शनात् ॥२१॥

गिरेरारोहणे देवि यावन्तो रेणुबिन्दवः ।
तावन्ति वाजपेयानि प्राप्नोत्येव न संशयः ॥२२॥

नैमिषे च प्रयागे च गङ्गासागरसङ्गमे ।
वाराणस्यां शतगुणं सहस्रं कुरुजाङ्गलात् ॥२३॥

लक्ष्मांमानसक्षेत्रात्तु पेवाख्यो गिरिरुत्तमः ।
पिनष्टि यत्र पापानि नरो नियतमानसः ॥२४॥

ततः प्रोक्तं पुराविद्भिः पेवाख्यो गिरिरुत्तमः ।
आरोढुमिच्छति यस्तु गिरन्देवि समन्ततः ॥२५॥

श्री श्री श्री शितिकण्ठेश इदं मंत्रमनुस्मरेत् ।
स ब्रह्मभवनं याति यत्र गत्वा न शोचते ॥२६॥

महान्ति मेरुतुल्यानि पापानि यदि सुन्दरि ।
तान्यस्य दर्शनादेव नाशमायान्ति तत्क्षणात् ॥२७॥

---

२४ खः मा उत्तमाः—उत्तमः

२५ ग. मा इच्छते—इच्छति

२६ खः मा इममत्रमनुस्मरेद्—इदं मन्त्रमनुस्मरेत्

. . . . . . . . . . . . . . . . . . . . . . . . . . ।
स याति च शिवस्थानं यत्र नास्ति कृताकृतम् ॥२८॥

विधिना यो नरो देवि पेषमारुहते नरः ।
पापसंघान्स पिष्ट्वात्र पदं सादाशिवं व्रजेत् ॥२९॥

पेषदर्शनमात्रेण भूताः प्रेताः पिशाचकाः ।
डाकिन्याद्याश्च सर्वास्ता नाशमायान्ति तत्क्षणात् ॥३०॥

नमस्करोति देवेशि पुण्यं पेषगिरिं नरः ।
आरुह्य पुण्यमाप्नोति सत्यं सत्यं वरानने ॥३१॥

इति प्रोक्तो मया देवि पेषस्य महिमा गिरेः ।
श्रुतोऽनुध्यातः पठितो महापातकनाशनः ॥३२॥

इत्येष पटलो गुह्यो प्रोक्तस्तव वरानने ।
श्रुतश्च पठितश्चापि ज्योतिष्टोमादियज्ञदः ॥३३॥

इति स्यन्वाश्रमपेषमहिमा नाम पटलः ॥६॥

---

३२ खः मा पेशस्य — पेषस्य

३३ कः मा गुह्यः — गुह्यो

## अथ सप्तमः पटलः

श्रीभैरव्युवाच

पेषो गिरिर्मया देव श्रुतो भवदनुग्रहात् ।
सुश्रमं नागराजं सर्पगोनासमण्डितम् ॥१॥

. . . . . . . . . . . . . . . . . . . . . . . . . . . ।
कृतार्थास्मि कृतार्थास्मि कृतार्थास्मि न संशयः ॥२॥

अधुना श्रोतुमिच्छामि नागस्यापि महेश्वर ।
प्रभावञ्च समुत्पत्तिं कथय स्वप्रसादतः ॥३॥

भैरव उवाच

शृणु सुश्रोणि वक्ष्यामि शेषस्य नागरूपिणः ।
माहात्म्यञ्च प्रभूतिञ्च सर्वपापप्रणाशनम् ॥४॥

पुरा कृतयुगे देवि स्थानं चक्रे हिमालये ।
शिखरे वै महापुण्ये चामरेश्वरसन्निधौ ॥५॥

पूजार्थं दर्शनार्थं तपोऽर्थं सुरसुन्दरि ।
त्रिदशास्सिद्धगन्धर्वा देवजातिसमन्विताः ॥६॥

---

४ कः मः सुश्रं णि— सुश्रोणि

५ घः मा सन्निधोः—सन्निधौ

एतस्मिन्नन्तरे कश्चिद्घातरूपधरो बली ।
दैत्येन्द्रोऽभून्महावीर्यस्तपो गर्वेण गर्वितः ॥७॥

. . . . . . . . . , . . . . . . . . . . . . . . . ।
अत्रस्था समूहा देवानीरयामास शक्तितः ॥८॥

ततो देवाः महेन्द्रेण शरणं परमेश्वरम् ।
निकटस्थं समाजग्मुः स्तुतिभिः परितोषयन् ॥९॥

*देवा ऊचुः

नमस्ते देवदेवाय शम्भवे परमात्मने ।
जगत्स्थितिविनाशाय हेतुभूताय वै नमः ॥१०॥

त्वं माता सर्वभूतानां त्वमेव जगतांपिता ।
त्वं सुहृद्बन्धुरं वासि त्वतो नान्यजगत्त्रये ॥११॥

अनाथानां तु नाथस्त्वमगतीनां गतिस्तथा ।
आर्तानामार्तिहा त्वं वै त्वमेव शरणं विभो ॥१२॥

---

७ गः मा भूर्—अभूत्

८ गः मा समूहा —समूहा

*देवाअचुः—देवा ऊचुः

१० गः मा स्थिविनाशाय —स्थितिविनाशाय
घः हेत—हेतु

११ गः मा सुहृदुबुधरं—सुहृद्बन्धुरं

इति स्तुत्या महादेवः प्रादुराभूद्दयानिधिः ।
उवाच श्लथया वाचा देवानां दुःखभाजिनाम् ॥१३॥

सर्वं श्रुतं मया देवा दैत्येन्द्रस्य दुरात्मनः ।
मया सम्बर्धिता दैत्यच्छेतुं नाहं सुराधिपाः ॥१४॥

तस्माद्व्रजध्वं शरणं शरणार्तिप्रणाशनम् ।
भगवन्तं चतुर्बाहुं शंखचक्रगदाधरम् ॥१५॥

क्षीरसागरमध्यस्थं शेषशायिनमेव च ।
इति विसृज्य तान्देवानन्तर्धिप्राप्नुवान्हरः ॥१६॥

ततो देवा गणास्सर्वे हर्षसम्पूर्णमानसाः ।
क्षीराम्बुधिं प्राप्य तुष्टा तुष्टवुर्जगतांपतिम् ॥१७॥

देवा ऊचुः

नमो नमो ह्यनन्ताय रूपातीताय वै नमः ।
नमः सर्वस्वरूपाय सर्वतीताय वै नमः ॥१८॥

---

१३ खः मा अभीत्—अभूत्

१६ खः मा मैव—मेव

१७ कः मा देदा—देवा

घः तु तुष्टावुः—तुष्टवुः

गणेशाय गुणज्ञाय गुणातीताय वै नमः ।
सर्वेशाय च सर्वाय सचराय च ते नमः ॥१९॥

वेदाय वेदरूपाय वेदगम्याय ते नमः ।
ध्यानाय ध्यानगम्याय ध्यानातीताय वै नमः ॥२०॥

जगत्कर्त्रे नमस्तुभ्यं जगद्धर्त्रे च वै नमः ।
जगत्पालनसंसक्तं चिताय चित्स्वरूपायणे ॥२१॥

एवं स्तुत्या तु देवेशः प्रसन्नोऽभूद्दयापरः ।
उवाच वचनं देवास्सर्वदुःखनिवारणम् ॥२२॥

गच्छध्वं देवदेवेशा नाकं शोकहरं परम् ।
तं दुष्टं सकुलं हन्मि वातरूपं दुरासदम् ॥२३॥

इत्युक्त्वा तदाथविष्णुर्भक्तानामार्तिनाशनः ।
पातालाद्गिरिराजे वै प्रादुर्भूतो जगत्प्रभुः ॥२४॥

शेषारूढश्चतुर्बाहुः सलक्ष्मीकोऽपि सायुधः ।
आज्ञापयामास तदा शेषं शतफणान्वितम् ॥२५॥

वातं पिब फणोद्भूतं सहस्रवदनंस्तथा ।
प्राणांस्तर्पय नागेश यतः त्वं पवनाशनः ॥२६॥

---

१९ कः मा गणेशय—गणेशाय

२० घः मा ध्यानतीताय—ध्यानातीताय

२१ कः मा कर्ते —कर्त्रे

एवं श्रुत्वा भगवतो वचनममृतोपमम् ।
प्रादुर्भूय च तं दैत्यं वायुरूपं पपौ क्षणात् ॥२७॥

पुनर्वातस्य शेषो वै प्राभवत् गिरिमस्तके ।
पुनश्च वसतिं चक्रे तटे परमपावने ॥२८॥

तदा प्रभृति देवा निर्विघ्नास्माञ्चितवे तदा ।
पुनः प्रोवाच भगवांशेषं च पवनाशनम् ॥२९॥

अत्र तिष्ठ फणीन्द्र त्वं भयं नाशय वाततम् ।
तदा प्रभृति देवेशि नागोऽभूच्छेषसंज्ञकम् ॥३०॥

सुश्रमोऽभिधो नागो वर्णितो योगिसत्तमैः ।
यत्र स्नात्वा श्रमं याति सुखेन मनुजां प्रिये ॥३१॥

अश्रमेन लभेल्लोको देवानामपि सुन्दरि ।
सुखेनात्र प्लुतो लोकांस्तस्मान्नागोऽपि सुश्रमः ॥३२॥

---

२७ खः मा अमृतापममृ—अमृतोपमम्

२८ घः मा तगे—तटे

२९ खः मा निविघ्ना—निर्विघ्ना

३० कः मा फणेन्द्र—फणीन्द्र

३१ कः मा सुवसो—सुश्रमो

३२ खः मा स्वश्रमः—सुश्रमः

स्वाश्रमोऽपि बुधैः प्रोक्तो नागराजोऽपि सुन्दरि ।
यस्मात्सुखेन लब्धं वै स्वाश्रमं त्रिदिवौकसैः ॥३३॥

. . . . . . . . . . . . . . . . . . . . ।
अत्र दर्शनमात्रेण मुच्यते पापराशिकृत् ॥३४॥

दर्शनात् स्पर्शनात्स्नानाद्दानाद्धोमाज्जपात्तथा ।
स्वाध्यायस्तुतिपाठाच्च ह्यनन्तं पुण्यमाप्नुयात् ॥३५॥

कमला पूजनाद्यत्र स्थिरां प्राप्नोति वैन्द्रियम् ।
स्मरणादपि देवेशि मुच्यते पापसञ्चयैः ॥३६॥

बहुनात्र किमुक्तेन नागराजस्य सुन्दरि ।
ब्रह्महा मुच्यते सद्यः पानाद्दानाज्जलस्य वै ॥३७॥

महागेनसनामानमारुह्येत्य वातात्तमम् ।
यत्रारोहणमात्रेण न गच्छेद्यममन्दिरम् ॥३८॥

इति श्रीशुभ्रमनागराज महागेनसनाम महिमा नाम पटलः ॥७॥

इति श्रीदक्षिणापाञ्चोंपतीर्थसंग्रहे

---

३३ कः मा स्वाश्रोमो—स्वाश्रमो

गः लब्धा—लब्धं

घः त्रिपिवौकसः—त्रिदिवौकसैः

३४ गः मा दर्श—दर्शन

३५ गः मा पाह्राच्च—पाठाच्च

३८ कः मा महागोन—महागेन

## अथ अष्टमः पटलः

*भैरव्युवाच

पेषो गिरिर्मयादेव श्रुतो भवदनुग्रहात् ।
अधुना श्रोतुमिच्छामि तीर्थं वै वायुवर्जनम् ॥१॥

कथं तत्क्षेत्रमित्याहुः पुण्यं वै वायुवर्जनम् ।
किमर्थं मठिकां तत्र कुर्वते प्रस्तरैः शुभैः ॥२॥

. . . . . . . . . . . . . . . . . . . . . . . . ।
वद मे कृपया शम्भो तत्र तीर्थे च किं फलम् ॥३॥

भैरव उवाच

देवैश्च पिष्टान्दैत्यांस्तु पृषतो नाम दानवः ।
श्रुत्वा समीरणो भूत्वा बबाधे देवतास्तदा ॥४॥

वायुना परिभूताश्च देवास्ते शरणं गताः ।
देवदेवं महादेवं तुष्टवुः परया गिरा ॥५॥

---

*भैत्रीयुवाच —भैरव्युवाच

२ घः मा कुर्वते—कुर्वते

४ कः मा मिष्ठान —पिष्टान्

देवा:

नमो देवादिदेवाय शर्वाय शम्भवे भुवे ।
आदिमध्यान्तशून्याय पराय प्रभवे नमः ॥६॥

नमो भैरवरूपाय भीमाय भयनाशिने ।
भयानकाय दैवाय मुञ्जमेखलिने नमः ॥७॥

नमो मृतसुरूपाय मृत्युमृत्युविनाशिने ।
कलानिधिविभूषाय कालरूपाय ते नमः ॥८॥

शान्ताय श्वेतदेहाय शान्तिवाहाय ते नमः ।
अमरेशाय देवाय भूयो भूयो नमो नमः ॥९॥

इति श्रुत्वा नुतिं प्रीत्या कृतां परमदैवतैः ।
जगाद भगवाञ्छम्भुर्देवान्परमया मुदा ॥१०॥

श्रीभगवानुवाच

श्रुतं मया पूर्वमेव बाधनं दानवस्य च ।
अत्रैव मठिकां कृत्वा तिष्ठध्वमविशङ्कया ॥११॥

- - - - - - - - - - - - - - - - - - - ।
मठिकासु च देवेशा कुरुध्वं वायुवर्जनम् ॥१२॥

---

१० ख: मा दैवतेः— दैवतैः
११ घ: मा तिष्ठध्वं—तिष्ठध्वं
१२ घ: मा कुरुध्वं—कुरुध्वं

इत्थं कृत्वा ततो देवा मठिकास्तत्र प्रस्तरैः ।
स्थितास्तत्रैव देवेशि मठिकासु सुखान्विताः ॥१३॥

वायुः शशास सुमहान्दैत्यः परमदारुणः ।
दर्शयामास तदुग्रं रूपं दैत्यं पुरन्दरः ॥१४॥

दृष्ट्वा दैत्यमुग्ररूपमिन्द्रो वज्रं समाधदे ।
अहनद्दानवं देवस्तत्रैव वायुवर्जने ॥१५॥

वायुवर्जननामाख्यं तीर्थं भूतं सुरार्चिते ।
अनन्तं पुण्यमाप्नोति वायुवर्जनदर्शनात् ॥१६॥

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
मुच्यते पातकाद्घोराद्दृष्ट्वा वै वायुवर्जनम् ॥१७॥

वायुवर्जनदेशे च स्नात्वा पीत्वा च सुन्दरि ।
नरो न लिप्यते पापैर्महापातकजैरपि ॥१८॥

स्नानं कृत्वा च दत्वाक्षतिलानमपि सुन्दरि ।
अनन्तं फलमाप्नोति पुण्ये वै वायुवर्जने ॥१९॥

वायुवर्जनदेशे तु कृत्वा श्राद्धमतन्द्रितः ।
पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ॥२०॥

---

१७ ख: मा व्होपपातकं – ह्युपपातकैः

२० ख: मा श्राद्धमतिन्द्रितः—श्राद्धमतन्द्रितः

मठिकां ये न कुर्वन्ति तत्रैव वायुवर्जने ।
दारुणं नरकं यान्ति शतकल्पं न संशयः ॥२१॥

कृत्वा तु मठिकां देवि पूजयेद्विधिपूर्वकम् ।
अर्पयेद्देवप्रीत्यर्थं दक्षिणाभिः समन्वितम् ॥२२॥

- - - - - - - - - - - - - - - - - - - - - - ।
कृत्वैवं पातको नास्ति जन्मान्तरशतेष्वपि ॥२३॥

यो न कुर्यान्महादेवि स्नानं दानं जपं हविः ।
स याति नरकं घोरं तत्तीर्थं निष्फलं भवेत् ॥२४॥

इति ते कथितं देवि तीर्थं वै वायुवर्जनम् ।
श्रुत्वा पठित्वा मुच्यते महापातकपञ्जरात् ॥२५॥

श्रीदेव्युवाच

वद सत्यं महादेव शुष्कं चैव सरोवरम् ।
हेतुना केन देवेश शुष्कीभूतं महत्सरः ॥२६॥

*भैरव उवाच

शृणु सुश्रोणि वक्ष्येऽहं शुष्कीभूतं सरोवरम् ।
येन विज्ञानमात्रेण नरो मुच्येत पातकात् ॥२७॥

---

२३ घः मा शतैष्वपि—शतेष्वपि

२५ घः मा पंतरात्—पञ्जरात्

*भीरव उवाच—भैरव उवाच

हतशेषांसि रक्षांसि तिरोभूतानि वै ह्रदे ।
सुमायया जलचरान्घोररूपसमन्वितान् ॥२८॥

चिरकालेन ते तत्र पुनर्देवान्वबाधिरे ।
कुर्वन्तो मुनिसंघानां विघ्नांश्चैव समन्ततः ॥२९॥

एकदा तत्रतो देवि स्वेच्छया ह्यागतौ तदा ।
वीक्ष्य प्रबाधितान्देवान् राक्षसैः परमेश्वरौ ॥३०॥

मुनीन्परमकारुण्याद्देवी देवमुवाच ह ।
दयालो परमेशान पश्यैतान्मुनिसत्तमान् ॥३१॥

विघ्नितान्राक्षसौघैश्च पीडितानपि शङ्कर ।
श्रुत्वा देवीवचः सोऽपि देवान्तान् ऋषिसत्तमान् ॥३२॥

वीक्ष्य विघ्नीकृतान्दैत्यैर्हुङ्कारमकरोत्तदा ।
हुङ्कारेण हता दैत्या मग्नास्ते तु सरोवरे ॥३३॥

मग्नान्दृष्ट्वा ततो देवी शशाप सर उत्तमम् ।
मुनिविघ्नकरान्यस्माद्रक्षसे दैत्यदानवान् ॥३४॥

---

३१ खः मा देवमयच ह—देवमुवाच ह

३३ कः मा विक्ष्य—वीक्ष्य

खः हुंकरं—हुङ्कारं

शुष्कोऽभवत्सरस्तस्माद्धव्यकव्यविजितम् ।
इति शप्तं सरो दिव्यं सद्यः शुष्कमभूत्किल ॥३५॥

शुष्कीभूतस्तु सरसो निर्गतं रक्षसां गणम् ।
नाशयामास सुगणैः पाशमुद्गरपाणिभिः ॥३६॥

[illegible] ।
तदा प्रभृति देवेशि नष्टं शुष्कं सरोऽभवत् ॥३७॥

श्रीदेव्युवाच

वद सत्यं महादेव पुण्यां पञ्चतरङ्गिणीम् ।
यां दृष्ट्वा मुक्तिमाप्नोति जन्मान्तरभवैरघैः ॥३८॥

पुण्यमक्षय्यमाप्नोति हयमेधादिकं प्रिये ॥३९॥

पुरा ताण्डवलग्नस्य नृत्यमानस्य धूर्जटेः ।
कपर्दः शिथिलो भूतः पञ्चधा च सुरेश्वरि ॥४०॥

ततो वै पञ्चधा देवी प्रादुर्भूता कपर्दतः ।
गङ्गा भगवती देवी महापातकनाशिनी ॥४१॥

---

३५ गः मा शप्ता—शप्तं

४० गः मा कम सिथिलो —कपर्दः शिथिलो

या पञ्चधा महेशानि कपर्दात्पञ्चधाभवत् ।
सैव प्रोक्ता पुराविद्भिर्नदी पञ्चतरङ्गिणी ॥४२॥

नद्यां पञ्चतरङ्गिण्यां स्नानं कुर्यादतन्द्रितः ।
मुच्यते पातकैर्घोरैः ब्रह्महत्यादिकोटिभिः ॥४३॥

गोघ्नः कृतघ्नो देवेशि भ्रूणहा गुरुतल्पगः ।
स्नात्वा दत्वा च विधिवत् सद्यो मुच्येत सुन्दरि ॥४४॥

कुरुक्षेत्रे प्रयागे च गङ्गायां नैमिषेऽथवा ।
. . . . . . . . . . . . . . . . . . . . . . . . . ॥४५॥

स्नात्वा दत्वा च विधिवद्यत्फलं लभते नरः ।
तत्फलं समवाप्नोति स्नात्वा पञ्चतरङ्गिणीम् ॥४६॥

श्राद्धं च विधिना कुर्यात् पिण्डदानमथापि वा ।
पितरस्तस्य तृप्यन्ति शतकल्पं न संशयः ॥४७॥

गोहिरण्यं सुवासश्च क्षौमं चन्दनमेव च ।
कुङ्कुमागुरुकर्पूरमृगनाभिमपीश्वरि ॥४८॥

. . . . . . . . . . . . . . . . . . . . . . . . . ।
यो ददाति विजिन्द्राय स शैवं लोकमाप्नुयात् ॥४९॥

---

४४ ग: मा दत्ता – दत्वा

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
सद्यः प्रमुच्यते जन्तुः स्नात्वा पञ्चतरङ्गिणीम् ॥५०॥

- - - - - - - - - - - - - - - - - - - - - - ।
आरुहेद्रत्नशिखरं ततो डामरकं श्रयेत् ॥५१॥

दृष्ट्वा डामरकं तत्र शिलभूतं महागणम् ।
पुण्यमाप्नोति मनुजो ह्यश्वमेधादियागजम् ॥५२॥

महापातकयुक्तो वा युक्तो वा भ्रूणहादिभिः ।
पुण्यं डामरकं दृष्ट्वा मुच्यते पातककोटिभिः ॥५३॥

इति श्रीवायुवर्णनाद्रिपञ्चतरङ्गिणी महिमा नाम पटलः ॥८॥

## अथ नवमः पटलः

श्रीदेव्युवाच

कोऽसौ डामरको देव भवता कथितस्तु यः ।
गणः कथं शिलीभूतो वद सत्यं महेश्वर ॥१॥

श्रीभैरव उवाच

शृणु वक्ष्ये महेशानि चरितं डामरुसंभवम् ।
येन कर्मविपाकेन शिलीभूतो गणेश्वरः ॥२॥

यच्छ्रुत्वा मुच्यते जन्तुः विघ्नभङ्गैरनेकशः ।
पुरानर्तनशीलस्य धूर्जटेः संध्ययोर्द्वयोः ॥३॥

षण्मुखं क्रीडमानस्य संध्याकालोऽभवत्प्रिये ।
संध्यातिवाहनात्तस्य चिन्ता मनसि चाभवत् ॥४॥

चिन्तमानस्य तस्यैव देवी पृष्टवती मुहुः ।
किमिदं चिन्तसे देव का चिन्ता भगवांस्तव ॥५॥

४ घ। मा चिता—चिन्ता

५ कः मा चिन्तयानस्य —चिन्तमानस्य

वद सत्यं महादेव मनो मे शर्मनाश्नुते ।
इति श्रुत्वा वचो देव्याः प्रियायाः परमेश्वरः ॥६॥

प्रावदद्भगवान्देवी सन्ध्याकालोऽत्यगान्मम ।
सन्ध्यालोपान्मया चिन्ता प्राप्ता च महती प्रिये ॥७॥

इति श्रुत्वा वचस्तस्य देवदेवस्य धूर्जटेः ।
प्रत्युवाच पुनर्देवी भगवन्तं सनातनम् ॥८॥

अयं महागणो देव डमरुं गृह्य तिष्ठतु ।
सन्ध्याया वेदनार्थं च चिरकालं महेश्वर ॥९॥

इति श्रुत्वा वचो देव्यास्तथेत्युक्ता महेश्वरः ।
हासयन्थंडरवं तत्र पुनर्देव्या महालपत् ॥१०॥

तदा प्रभृति देवेशि महाडमरुको गणः ।
तस्थौ सन्ध्यावेदनार्थं भवस्य सुरपूजिते ॥११॥

एकदा क्रीडमानस्य शिवस्य तनुजं स्वयम् गणः ।
प्रमादी निद्रायां लीनोऽभूत् सुरसुन्दरि ॥१२॥

---

१२ खः मा सुयं—स्वयं

सन्ध्याकाल: पुनस्तत्र व्यत्यगाच्च कपर्दिन: ।
विमृष्य सन्ध्यालोपं स देवदेवो भव: स्वयम् ।।१३।।

क्रुद्ध: शशाप गिरिजे महाडमरुकं गणम् ।
यस्मान्निद्रावशेनापि सन्ध्यालोप: कृतस्तु य: ।।१४।।

मम तस्माश्चिरं तिष्ठ शिलीभूतो गणाधनम् ।
इति शप्त्वा गणं तत्र देवदेवो हर: स्वकम् ।।१५।।

तस्थौ ध्यानस्थितो देवि चिरं तत्र महेश्वर: ।।१६।।

तदा प्रभृति देवेशि महाडमरुको गण: ।
दृषद्रूपोऽभवत्तत्र रत्नपर्वतमूर्धनि ।।१७।।

य: कश्चिन्मानवो लोके गणं डामरुकं श्रयेत् ।
स याति ब्रह्मणं लोकमिति सत्यं वदामि ते ।।१८।।

य: कश्चिदपि चेशानि पुण्यं गर्भगृहं श्रयेत् ।
गर्भात्स मुच्यते जन्तुरिति सत्येन ते शपे ।।१९।।

श्रीदेव्युवाच

गर्भागाराश्च को देव किमर्थं तत्र स्थापित: ।
किं फलं निस्सृतानां च नराणां च कलौ युगे ।।२०।।

भैरव उवाच

शृणु वक्ष्ये महादेवि गर्भागारमनुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातकसञ्चयात् ॥२१॥

पुरा नन्दिनमासाद्य देवा विवदिनो भृशम् ।
ते निषिद्धास्तेन पुनर्युयुधुस्ते परस्परम् ॥२२॥

विना सुरैस्ततो नंदी प्रणिपत्य परो हरम् ।
दण्डं त्यक्त्वा च विज्ञप्तिं चक्रे च सुरपूजिते ॥२३॥

भगवन्करुणाम्भोधे लोकनाथजगत्पते ।
उद्विभजामि भृशं त्रस्तो देवेभ्य इति चेश्वरम् ॥२४॥

. . . . . . . . . . . . . . . . . . . . . . . . . . . . ।
पुनर्विज्ञापयामास हरं प्रणतवत्सलम् ॥२५॥

श्रुत्वा नन्दिवचो देवि हरः प्रोवाच तं मुदा ।
गृहाण दण्डं भो नन्दिः किं कुर्वन्ति च तेऽसुराः ॥२६॥

गर्भद्वारमिदं सम्यक्स्थापयाशु समन्ततः ।
यतो निस्सरणे शक्तिं न लभन्ते सुरासुराः ॥२७॥

---

२३ कः मा नद्री—नन्दी

 घः स्वरपूजिते - सुरपूजिते

२७ कः मा समिक्—सम्यक्

इति तस्य वचः श्रुत्वा महेशस्य महागणः ।
महाप्रस्थं समुथाप्य गर्भागारमकारयत् ॥२८॥

गर्भद्वारान्निस्सरति यः कश्चिन्मानवः प्रिये ।
स याति शिवसालोक्यं न पुनः स्तन्यपो भवेत् ॥२९॥

यः कश्चिदपि चेशानि भ्रूणहा गुरुतल्पगः ।
मातृहा पितृहा चापि सुरापी भ्रातृहापि च ॥३०॥

स याति परमं दिव्यं पदं सादाशिवं प्रिये ।
महापापवनच्छेतुं प्रसभमिच्छसि प्रिये ॥३१॥

तदा श्रयस्व देवेशं गर्भागारविनिस्सृता ।
स्नात्वामरावतीं नाम्नां नदीं परमपावनीम् ॥३२॥

भस्माङ्गसितदेहाश्च बहुवस्त्रविवर्जिताः ।
प्रलपंश्चिरं पन्थानं देहि मे परमेश्वर ॥३३॥

---

३० कः मा सेशानि—चेशानि

३३ गः मा चिब—चिरं

तदा रोहिद्गिरिवरं त्यक्त्वा क्रोधादिविक्रियाम् ।
तदा प्रणम्य देवेशं गुहास्थं ह्यमरेश्वरम् ॥३४॥

गोलो वा कुण्डजो वापि यः कश्चिदत्र निस्सृतः ।
स भवतु गणो देवि चेति सत्येन ते शपे ॥३५॥

इति श्रीडामरकगर्भागारनिस्सरणो नाम पटलः ॥९॥

३५ गः मा भवेतु—भवतु

## अथ दशमः पटलः

श्रीदेव्युवाच

स्मारं स्मारं महेशान पुण्यं माहात्म्युत्तमम् ।
तीर्थानाञ्च विशेषेण निर्वृत्तास्मि भवार्णवात् ॥१॥

इदानीं श्रोतुमिच्छामि ह्यमरेशं महेश्वरम् ।
कथं स ह्यमरेशाख्यो गुहास्थोऽप्यभवत्किल ॥२॥

नदी च परमा दिव्या कथं सा ह्यमरावती ।
तत्सङ्गमस्य माहात्म्यं वद मे प्रियकाम्यया ॥३॥

*भैरव उवाच

साधु साधु महाभागे प्रश्नमेतत्सुदुर्लभम् ।
कृतं त्वया पूजितया जन्तूनां हितकाम्यया ॥४॥

शृणु वक्ष्ये महातीर्थं ह्यमरेशस्य सुन्दरि ।
यच्छ्रुत्वापि प्रमुच्येत महापातककोटिभिः ॥५॥

सदा सदासीत्ततो नैव नासीत्किञ्चन सुन्दरि ।
नियतिरभवत्तस्मात्परमाश्च परात्परः ॥६॥

---

४ घः मा जंथनां—जन्तूनां

नियतेरहमुत्पन्न इति शुश्रुम सुन्दरि ।
अहो मे सर्वभगवत्सर्वे देवाः सवासवाः ॥७॥

ऋषय पितरश्चापि गन्धर्वोरगराक्षसाः ।
यक्षभूतगणाश्चापि कूष्माण्डा भैरवादयः ॥८॥

मनुष्या जम्बुकाः क्रूरा दैत्यदानवपुङ्गवाः ।
एते चान्ये च बहव तत्पन्नानियतेः स्वयम् ॥९॥

चतुर्दशविधो भूतसर्गः प्रादुर्भूत्किल ।
मृत्युस्तानग्रसत्सर्वान्देवानपि सवासवान् ॥१०॥

देवास्ते मृत्युना ग्रस्ता व्याकुला ह्यभवन्प्रिये ।
समेत्य शरणं जग्मुः शरण्यं परमेश्वरम् ॥११॥

. . . . . . . . . . . . . . . . . . . . . . . . . . ।
तुष्टुवुः परमप्रीत्या शङ्करं तमनाशनम् ॥१२॥

श्रीदेव उवाच

ॐनमः शिवाय देवाय विष्णवे प्रभविष्णवे ।
नमश्चिच्चन्द्रिकोद्बोधप्रकाशानन्दस्वरूपिणे ॥१३॥

---

११ ग: मा जग्मुः—जग्मुः

परमार्थदशास्थाय स्थाणवे विश्वमानवे ।
नमश्चित्याय चिन्त्याय चितिज्ञाय चिदर्थिने ॥१४॥

चिच्चन्द्रनाशिताशेष स्वान्तमोहाय शम्भवे ।
विमर्शिने विधिज्ञाय मुक्तिरूपाय ते नमः ॥१५॥

विश्वाहविशेषज्ञाय जय विश्वोपकारिणे ।
विश्वरूपाय देवाय विश्वासाय ते नमः ॥१६॥

निषेधज्ञाय देवाय तत्स्वरूपाय ते नमः ।
नमस्ते सर्वमृग्याय सूक्ष्ममार्गार्थदर्शिने ॥१७॥

नमो नियतिरूपाय तत्त्वरूपाय ते नमः ।
महत्तत्त्वाय देवाय सूक्ष्मतत्त्वाय ते नमः ॥१८॥

नमो मृताय देवाय नमो मृतस्वरूपिणे ।
मृत्युञ्जयाय देवाय भूयो भूयो नमो नमः ॥१९॥

इति श्रुत्वा तु देवानां स्तुतिं परमपावनीम् ।
हरो गम्भीरया वाचा देवांस्तान्प्रत्युवाच ह ॥२०॥

---

१४ ख: मा स्थासाव – स्थाणवे

घ: चिवथिने — चिदर्थिने

किमर्थमागता यूयं व्याकुलाः सुरसत्तमाः ।
कथयध्वं यतः सर्वं मदीयं मयि वर्तते ॥२१॥

इति तस्य महेशस्य श्रुत्वा देवाः सवासवाः ।
प्रत्यूचुस्तं हरं मृत्युर्ग्रसतीति बलाद्धि नः ॥२२॥

यतः स मृत्युर्नश्यन्तो न सेवेश्च बलेन हि ।
तत्कुरुष्व महादेव भक्तानामार्तिनाशनम् ॥२३॥

श्रीभैरव उवाच

श्रुत्वा देववचः सौम्यं महेशः प्रत्युवाच तान् ।
मृत्यूपायं करिष्यामि सहध्वं क्षणमुत्तमाः ॥२४॥

गृहीत्वा शिरसा तत्र हरश्चन्द्रकलां स्वयम् ।
संपीत्य देवानवदन्मृत्युभेषजपीडनात् ॥२५॥

या निस्सृता च धारा तत्र पारमिका प्रिये ।
सैव भूता नदी पुण्या नाम्ना वै ह्यमरावती ॥२६॥

ये बिन्दवश्च्युता देवि शरीरे मृतबिन्दवः ।
ते भस्मरूपतां प्राप्य च्युताच्चाशनतां गताः ॥२७॥

---

२१ खः मा कुला—व्याकुलाः

२४ गः मा मृत्युपापं—मृत्यूपायं

२७ घः मा आशनतां—अशनतां

प्रेम्णा तेषां महादेवि शिवोऽपि द्रवतामगात् ॥२८॥

ते दृष्ट्वा तु शिवं तत्र द्रवीभूतं महेश्वरि ।
पुनः पुनः प्रणेमुस्ते भवकारुणिकं परम् ॥२९॥

देवान्नुतिपरान्दृष्ट्वा प्रोवाच सुरसत्तमाः ।
हरः परमया वाचा शृणुध्वं देवसत्तमाः ॥३०॥

यस्माद्भवद्भिर्दृष्टं मे प्रेमलिङ्गं दरीगृहे ।
तस्मान्न मृत्युर्युष्मान्वै धार्यते मदनुग्रहात् ॥३१॥

इहेव अमरा भूत्वा गच्छध्वं शिवयुज्यताम् ॥३२॥

इतः प्रभृति मे लिङ्गममरेशाख्यमुत्तमम् ।
पुण्यं परमकं देवास्त्रिलोकख्यातिमेष्यति ॥३३॥

नत्वा च दण्डवत्तत्र लिङ्गं तदमरेश्वरम् ।
देवा प्रदक्षिणीकृत्य स्वं स्वमालमाययुः ॥३४॥

श्रीभगवानुवाच

इति दत्वा वरं देवानमरेशो महेश्वरि ।
तदा प्रभृति लीनोऽभूद्गिरिदर्यन्तरे हरः ॥३५॥

अमां सोमकलां गृह्य देवानां हितकाम्यया ।
मृत्युनाशं चकाराशु तस्माद्वै ह्यमरेश्वरः ॥३६॥

मृत्युहीना यतो देवि चेश्वरेण कृताः सुराः ।
ततः प्रोक्तं पुराविद्भिरमरेश्वरसंज्ञकम् ॥३७॥

भवरोगं च गृह्णाति भक्तानां चेश्वरः ।
स्वयं यद्दर्शनात्प्रोक्तं ह्यमरेशाख्यमुत्तमम् ॥३८॥

अमां प्रभृति पूर्णान्तं कलां गृह्णाति चेश्वरः ।
ततः प्रोक्तं च तन्त्रज्ञैर्भगवानमरेश्वरः ॥३९॥

यदसुरनाशाच्चैव जरामरणनाशनम् ।
मोक्षैश्वर्यप्रदं यस्मात्प्रोक्तममरसंज्ञकम् ॥४०॥

इदं रसमयं लिङ्गं महाप्रेमसमुद्भवम् ।
सामरस्यप्रदं देवि तव स्नेहात्प्रकाशितम् ॥४१॥

यात्रां कृत्वा तु देवेशि स्नात्वा मृतवती जले ।
भस्मना लिप्य चाङ्गानि मोक्षमाप्नोति मानवः ॥४२॥

कृत्वा तु ताण्डवं देवि गुहायां च सुहर्षितः ।
अमर एव कथितो नरः परमपावनः ॥४३॥

---

३७ घः मा संज्ञतं — संज्ञकम्

भस्मावासं गुहास्थं च पश्येल्लिङ्गमुत्तमम् ।
स याति नरकं घोरं यावदिन्द्राश्चतुर्दश ॥४४॥

य पश्येद्भस्महीनाङ्गो रसलिङ्गसनातनम् ।
स कुष्ठी च भवेद्देवि जन्तुर्जन्मनि जन्मनि ॥४५॥

यात्रामकृत्वा यो देवि पश्येद्वं ह्यमरेश्वरम् ।
स याति दारुणान्घोरान्नरकानेकविंशतिम् ॥४६॥

यो कृत्वा ताण्डवं देवि पश्येद्गिरिगुहान्तरे ।
रत्नलिङ्गं तीर्थद्रोही भवतीव न संशयः ॥४७॥

यो पूज्य प्रतियात्येव नरोऽमरगुहान्तरम् ।
स चतुराशिति लक्षाणि नरकानि प्रयाति वै ॥४८॥

यो गत्वा पुनरायाति ह्यमरेशगुहान्तरात् ।
स याति नरकं घोरं दारुणं कालसूत्रकम् ॥४९॥

---

४४ कः मा वस्मवासा—भस्मावासं

४६ कः मा यात्रा स कृत्वा—यात्रामकृत्वा

४८ गः मा लक्ष्माणि—लक्षाणि

४९ कः मा दत्वा—गत्वा

भ्रूणहा गुरुतल्पी च सुरापी स्वर्णहारकः ॥५०॥

एतद्दृष्ट्वा महेशानममरेश्वरसंज्ञकम् ।
मुच्यन्ते तत्क्षणाद्देवि महापातकिनोऽपि च ॥५१॥

*गोमांसभक्षी मधुपः सुरेज्यत्यागी प्रिये
वत्सहा बालहापि गर्भघाती ।
शवकृत्पातकृतश्च सद्यो
मुच्येद्वीक्ष्य मां लिङ्गरूपम् ॥५२॥

महाक्रोधी लोभमोहाभिभूतः
स्वर्णस्तेयी परजायाभिगामी ।
च्छिद्रप्रेक्षी साधुनिन्दारतश्च
दम्भाचारी नृतवागल्पबुद्धिः ॥५३॥

दृष्ट्वा देवममरेशाख्यं स्वरूपम्
द्रवीभूतं पर्वतरे च मुच्येत् ।
तस्मात्पापसंघाश्च देवि
सत्यं सत्यं नानृतं ते वदामि ॥५४॥

---

५० ख: मा सुर्णहारकः—स्वर्णहारकः

*छन्दः चिन्त्यम्

चान्द्रायणमहाकृच्छ्रं शशतैः सान्तपनैश्च यत् ।
फलं प्राप्नोति यद्देवि तत्प्राप्नोत्यस्य दर्शनात् ॥५५॥

कुरुक्षेत्रे प्रयागे च नैमिषे कुरुजाङ्गले ।
गवां कोटिसहस्रस्य सम्यग्दत्तस्य यत्फलम् ॥५६॥

तत्फलं समवाप्नोति ह्यमरेशस्य दर्शनात् ।
सुसूक्ष्मैः श्वेतवासोभिर्मृगकुङ्कुमचन्दनैः ॥५७॥

कर्पूरैः स्वर्णपुष्पैश्च रौप्यैर्वापि महेश्वरि ।
पूजयित्वामरेशाख्यं लिङ्गं दिव्यं सुधामयम् ॥५८॥

स एव रुद्रो भवति न पुनर्स्तन्यपो भवेत् ॥५९॥

नारी वा पुरुषो वापि पूजयेल्लिङ्गमुत्तमम् ।
स याति शिवसायुज्यं यत्र गत्वा न शोचते ॥६०॥

अमरेशं महालिङ्गं दृष्ट्वा स्पृष्ट्वा कलां नरः ।
सद्यो ह्यमरतां याति सत्यं सत्यं वरानने ॥६१॥

पीत्वा ह्यमरधारां तु पतितां तु गुहान्तरे ।
सोऽपि याति शिवस्थानं यत्र नास्ति कृताकृतम् ॥६२॥

---

६० घः मा शोचति—शोचते
६२ घः मा कृते—कृतम्

द्रष्टुं ह्यमरनाथस्य पदं यस्तु व्रजेद्गृहात् ।
पदे पदेऽश्वमेधानां यज्ञानां प्राप्यते फलम् ॥६३॥

कपोतांस्तु गणास्तत्र दृष्ट्वान्यानण्डजान्नरः ।
स एव रुद्रो भवति जयेति प्रवदन्मुहुः ॥६४॥

*श्रीदेव्युवाच

कपोताः के गणास्तत्र कथं कुत्र स्थिता प्रभो ।
वद मे कृपया शम्भो लाकोनां हितकाम्यया ॥६५॥

श्रीभैरव उवाच

शृणु सुश्रोणि वक्ष्यामि कपोता ये भवन्किल ।
याञ्छ्रुत्वा मुच्यते जन्तुर्जीवहत्यादिपातकात् ॥६६॥

यदा प्रभृति देवेशि महाडामरुको गणः ।
तदा प्रभृति तत्रैव स्थापितास्ते गणा मया ॥६७॥

ताण्डवावेदनार्थं च सन्ध्याकालस्य सुन्दरि ।
एकदा नृत्यमानस्य सन्ध्यायां चैव धूर्जटेः ॥६८॥

स्पर्धया कुरु कुर्वत्यूचुः ततस्तेऽमरवन्दिते ।
परस्परं स्पर्धयात्र शब्दं कुर्वीति चक्रिरे ॥६९॥

---

*श्रीदेवी उवाच—श्रीदेव्युवाच

तत: क्रुद्धो महेशानो गणानशपदोजसा ।
यस्मात्कुरु कुरु शब्दं कुर्वाणा स्पर्धया मुहुः ॥७०॥

तस्मात्कुरु कुरु शब्दं कुर्वाणाः स्थचिरं गणाः ।
कपोतरूपास्तीर्थेऽस्मिन्विघ्नसंघापहारिणः ॥७१॥

इत्थं शप्तास्ततो देवि हरेण परमात्मना ।
कृत्वा कपोतरूपास्ते तीर्थे विघ्नापहारिणः ॥७२॥

यो दृष्ट्वा तु गुहान्तस्थान्कपोतान्गगनात्प्रिये ।
अवारुहेद्गिरेस्तस्मात्तीर्थद्रोही स्मृतो बुधैः ॥७३॥

तस्मात्तत्र दर्शनीयाः कपोताः गणसत्तमाः ।
महापापहराः प्रोक्ता यात्रिभिः पारमार्थिकैः ॥७४॥

स्नातं दृष्ट्वा श्रुता चापि स्पृष्टा देवि समन्ततः ।
अमरैश्वर्यतां याति ततः प्रोक्तामरावती ॥७५॥

अमरावत्यां नरः स्नात्वा सद्यो मुच्येत सङ्कटात् ॥७६॥

कलिकल्मषघोरनाशनं रसलिङ्गं समुदीरितं प्रिये ।
पशुपाशविनाशकारकममरेश्वरनामकं परम् ॥७७॥

यः करोति महापूजां स्वधालिङ्गस्य सुन्दरि ।
स याति शिवसायुज्यमित्थं सत्यं वदामि ते ॥७८॥

सिद्धिलिङ्गमिदं देवि बुद्धिलिङ्गमिदं प्रिये ।
शुद्धिलिङ्गमिदं प्रोक्तं वृद्धिलिङ्गमिदं परम् ॥७९॥

इदं पुंसवनं लिङ्गं महस्तेजोऽभिवर्धनम् ।
कन्याप्रदं पावनं च परमं योगदं कलौ ॥८०॥

विना ध्यानं विना दानं विना योगं यदिच्छसि ।
तदाश्रयस्व देवेशि लिङ्गममरसंज्ञकम् ॥८१॥

शरीरं यौवनं द्रव्यं दारान्पुत्रान्गृहं तथा ।
चञ्चलं सर्वतो ज्ञात्वा ह्यमरेशं समाश्रयेत् ॥८२॥

यावन्न ग्रसते मृत्युर्यावन्नेन्द्रियविप्लवः ।
यावद्देहे जराव्याधिः शीर्यते जगदम्बिके ॥८३॥

तावदेवामरेशाख्यं लिङ्गं रसमयं प्रिये ॥८४॥

त्रैलोक्ये यानि तीर्थानि स्थानानि जगदम्बिके ।
अमरेशाख्यलिङ्गस्य लिङ्गं रसमयं प्रिये ॥८५॥

---

७८ कः मा महपूज्यां—महापूजां
घः इत्यं—इत्थं
८३ घः मा गदम्बिके—जगदम्बिके
८४ कः मा अयरेशख्य—अमरेशाख्यं

अमरेशसमं लिङ्गं दिव्यं भूम्यन्तरिक्षगम् ।
महापापहरं देवि सद्यः कल्मषनाशनम् ॥८६॥

भूयो भूयो किमुक्तेन नरः पातकवान्कलौ ।
अमरेशं समाश्रित्य मुक्त एव न संशयः ॥८७॥

इत्थं माहात्म्यमीशानि पुण्यं ह्यमरनाथगम् ।
श्रुत्वा पठित्वा मुच्येत ब्रह्महत्यादिकोटिभिः ॥८८॥

अपेयपानान्मुच्यते तथाभक्ष्यस्य भक्षणात् ।
बन्धात्प्रमुच्यते बद्धो रोगाद्रोगी प्रमुच्यते ॥८९॥

इदं प्रजननं सौम्यं श्रोतॄणां पुष्टिवर्धनम् ।
पठित्वा पाठयित्वा वा मुच्यते सर्वकिल्बिषात् ॥९०॥

आयुष्प्रदं कान्तिदं च कीर्तिदं जगदीश्वरि ।
धनदं पुत्रदं चापि कन्याप्रदमनुत्तमम् ॥९१॥

इत्येष पटलो गुह्यो गोपनीयः कलौ प्रिये ।
श्रुतोऽनुध्यातः पठितो महापातकहा कलौ ॥९२॥

इति श्री अमरनाथमाहात्म्यं नाम पटलः ॥१०॥

---

८८ खः मा ह्मरणाथगं—ह्यमरनाथगम्

# अथैकादशः पटलः

*श्रीदेव्युवाच

श्रुत्वा श्रुत्वा महेशान स्मारं स्मारमनुत्तमम् ।
पुण्यममरनाथस्य रसलिङ्गस्य सम्भवम् ॥१॥

कृतार्थास्मि कृतार्थास्मि कृतार्थास्मि न संशयः ।
क्रीतास्मि जगदीशान तारितास्मि भवार्णवात् ॥२॥

जय शम्भो त्रिनेत्रे च जय भक्तकृपाम्बुधे ।
जय शिव जयेशान त्रिपुरासुरसूदन ॥३॥

जय कपर्दिन्भगवञ्जय शूलधराच्युत ।
पिनाकपाणे वरद जयान्धकविमर्दन ॥४॥

जय भक्तजनोद्दाम कामनावरदेश्वर ।
जय भक्तिरसास्वाद स्वादिताखिलविश्वप ॥५॥

जय घोरातिघोरेश जय पापनिकृन्तन ।
जय भैरवभीमेश जय श्रीपरभैरव ॥६॥

---

*श्रीदेव्यु उवाच—श्रीदेव्युवाच

४ घः मा विमदन—विमर्दन

माहात्म्यं ह्यमरेशस्य श्रुतं त्वन्मुखपङ्कजात् ।
पुनर्वद महादेव पुण्यं ह्यमरनायगम् ॥७॥

कस्मिन्काले स्मृता यात्रा महाफलप्रदा तु या ।
दर्शनस्पर्शनाद्वापि पूजनादपि सुन्दर ॥८॥

श्राद्धञ्च ह्यमरावत्यां पञ्चनद्याञ्च सङ्गमे ।
दानात्किं फलमाप्नोति नर: पापयुतो कलौ ॥९॥

विशेषतश्च किं प्रोक्तं दानमत्युत्तमं प्रिय ।
यत्कृत्वा मुच्यते जन्तुर्नर: पातककोटिभि: ॥१०॥

फलं ह्यमरनाथस्य विस्तरेण वदस्व मे ॥११॥

भैरव उवाच

साधु पृष्टं त्वया देवि यतो भक्तिस्तवानघे ।
पुण्ये च ह्यमरेशाख्ये तीर्थे परमपावने ॥१२॥

यत: स्वं दर्शयामास श्रावण्यां च हर: स्वयम् ।
ततश्च कथिता यात्रा श्रावण्यां पुण्यदायिनी ॥१३॥

श्रावणे शुक्लपक्षे तु यात्रां कृत्वा विधानत: ॥१४॥

---

८ ख: मा त्वया —तु या

१३ ग: मा किथितायात्र—कथिता यात्रा

यः प्रपश्येत्पूर्णिमायां स्वधालिङ्गं सनातनम् ।
याति शैवं पदं सोऽपि पशुपाशविवर्जितः ॥१५॥

यः श्रावण्यां महादेवि प्रपश्येद्गिरिमध्यगम् ।
लिङ्गं ह्यमरनाथाख्यं स गच्छेच्छिवसन्निधौ ॥१६॥

स्पर्शनाद्देवदेवस्य लिङ्गस्य जगदेशितुः ।
पापकञ्चुकनिर्मुक्तो याति शैवं परं पदम् ॥१७॥

वाराणस्या दशगुणं प्रयागाच्च शतं स्मृतम् ।
सहस्रगुणितं देवि नैमिषात्कुरुजांगलात् ॥१८॥

सपुण्यफलदं प्रोक्तं मया तव प्रियेच्छया ।
दिव्यं वर्षसहस्रं तु लिङ्गार्बुधप्रपूजनात् ॥१९॥

सुवर्णपुष्पमुक्ताभिः क्षौमैर्वरपटैस्तु यत् ।
तत्फलं समवाप्नोति रसलिङ्गस्य दर्शनात् ॥२०॥

एकाहेन महादेवि मृगकर्पूरचन्दनात् ।
कर्पूरचन्दनञ्चापि पूजयेदमरेश्वरम् ॥२१॥

आप्नोति च महापुण्यं ह्यमरेशस्य पूजनात् ॥२२॥

---

१५ कः मा प्रणिमायां—पूर्णिमायां
१७ गः मा पापकचक—पापकञ्चुक
१८ कः मा वारणस्या—वाराणस्याः

मुक्ताभिः स्वर्णपुष्पैश्च रौप्यैर्वा सुरसुन्दरि ।
नरो मुक्तिमवाप्नोति सत्यं सत्यं वरानने ॥२३॥

अन्यैश्च विविधैर्द्रव्यैः पूजयेद्योऽमरेश्वरम् ।
धूपदीपैश्च नैवेद्यैः पुण्यमाप्नोति वा गणम् ॥२४॥

आरात्रिकां महेशस्य घृताभ्यक्तां करोति यः ।
तिलतैलाभ्यक्तां वापि स याति परमं पदम् ॥२५॥

घृतगुग्गुलसयुक्तां यो धूपयति सुन्दरि ।
सर्वपापविनिर्मुक्तो याति माहेश्वरं पदम् ॥२६॥

प्रदक्षिणार्धं यो देवि यो वा दद्यात्महेश्वरे ।
पदे पदेऽश्वमेधानां सहस्रं प्राप्नुयान्नरः ॥२७॥

यो दण्डवच्च प्रणमेद्भूमौ देवि सुरेश्वरम् ।
तं ब्रह्मा च हरिश्चापि प्रणमेत्तु इति स्थितिः ॥२८॥

यद्यत्करोति तत्रस्थः पुण्यं अमरसन्निधौ ।
तत्तदक्षय्यतां याति चेति सत्येन ते शपे ॥२९॥

बहुनात्र किमुक्तेन भूयो भूयो वरानने ।
मानुष्यं दुर्लभं ज्ञात्वा देहं ज्ञात्वा जराकुलम् ॥३०॥

---

२७ ख: मा ब—वा

३० घ: मा देहु—देहं

सर्वं चञ्चलमाज्ञाय श्रयेद्वै ह्यमरेश्वरम् ।
ततो वारुहेच्छैलात्तु श्रयेत्सङ्गममुत्तमम् ॥३१॥

श्राद्धं कृत्वा विधानेन तर्पयेत्पितृदेवता: ।
मोदन्ति पितरस्तस्य नृत्यन्ति च समन्ततः ॥३२॥

अथ कुर्वन्ति दायादा: सङ्गमे श्राद्धमुत्तमम् ।
गयापिण्डप्रदानैश्च शतकल्पं सुरेश्वरि ॥३३॥

गच्छन्ति यां तृप्तिमित: पितर: सुरपूजिते ।
क्षीरखण्डादिभोज्यैश्च ब्राह्मणानाञ्च भोजनात् ॥३४॥

तामाप्नुवन्ति देवेशि सक्तुपिण्डाश्च सङ्गमे ।
कुरुक्षेत्रे प्रयागे च मकरेऽपि दिवाकरे ॥३५॥

शतकल्पं महेशानि स्नानाद्यत्फलमाप्नुयात् ।
तदाप्नोति नरोऽत्रैव एकाहस्नानमात्रत: ॥३६॥

चूडामणौ महायोगौ कुरुक्षेत्रे च तर्पणात् ।
यां तृप्तिं पितरो यान्ति तां यान्ति सङ्गमे प्रिये ॥३७॥

---

३२ क: मा विधानेव—विधानेन

३३ क: मा अघ—अथ

३४ ख: मा ब्रह्मणां—ब्राह्मणानां

३६ ख: मा स्नानयफलम्—स्नानाद्यत्फलम्

अमरावतीपञ्चनद्याः सङ्गमे सुरपूजिते ।
नारी वा पुरुषो वापि यः कुर्याच्छ्राद्धमुत्तमम् ।।३८।।

पितरस्तस्य तृप्यन्ति शतकल्पैर्न संशयः ।
गां हिरण्यं सवासांसि क्षौमं रौप्यमपीश्वरि ।।३९।।

मुक्ताफलं मणिं वापि याति शैवं पदं पुमान् ।।४०।।

विशेषतः पीठदानममरेशस्य सुन्दरि ।
दत्वा मुक्तिमवाप्नोति सत्यं सत्यं वरानने ।।४१।।

श्रीदेव्युवाच

किंविधं पीठदानस्य शिवार्थं भगवंस्त्वया ।
कथितं तन्महेशान वद मे हितकाम्यया ।।४२।।

श्रीभैरव उवाच

पलपञ्चकमादाय यवपिष्टस्य सुन्दरि ।
सुचतुर्भद्रकं कृत्वा लेपयित्वा तु कुङ्कुमैः ।।४३।।

कर्पूरचन्दनैर्वापि मृगजैश्च महेश्वरि ।
चतुष्कोणेषु संस्थाप्य सुवर्णानां चतुष्टयम् ।।४४।।

---

३९ कः मा तुप्तिन्ति—तृप्यन्ति

४३ खः मा मिष्टस्य—पिष्टस्य

४४ घः मा सुर्णानां—सुवर्णानां

मध्ये सयुक्तं सुवर्णञ्च स्थापयित्वा सुरोत्तम ।
अथवा रौप्यमुद्राणां पञ्चकं मनुजेश्वरि ॥४५॥

निष्कानां चापि देवेश स्थापयित्वा सुरेश्वरि ।
अर्चयित्वा गन्धपुष्पैर्ब्राह्मणाय समर्पयेत् ॥४६॥

आधारशक्त्यादिभिर्मन्त्रैर्पूजयित्वा सुबासयेत् ।
वस्त्रैः श्वेतपटैर्दिव्यैस्तथा यज्ञोपवीतकैः ॥४७॥

दक्षिणाभिर्भक्तिपूर्वंमन्त्रमेनं समुच्चरेत् ।
यात्रासाफल्यहेतोश्च ह्यमरेशस्य चाज्ञया ॥४८॥

पीठं मयार्चितं दिव्यं सुवासोभिरलङ्कृतम् ।
मृत्युञ्जय महादेव भिया संसारसागरात् ॥४९॥

अर्पितं त्वत्सुरूपाय ब्राह्मणाय महात्मने ।
इदं गृहाण विप्रेश स्वरूपिनवशासनात् ॥५०॥

---

४५ गः अपवा—अथवा

४६ कः मा निकानां—निष्कानां

४७ घः मा यज्ञोप वेतकैः—यज्ञोपवीतकैः

५० खः मा ब्रह्मणाय—ब्राह्मणाय

गः पिप्रेश—विप्रेश

पीठं ह्यमरनाथस्य महापापापनुत्तये ।
यन्मया दुष्कृतं किञ्चित्कृतं गुर्वण्यथवापि वा ॥५०॥

भ्रूणहत्यादिकं पापं ब्रह्महत्यादिकं तथा ।
गुरुहत्यादिकं पापं मातृहत्यादिकं च यत् ॥५२॥

स्वर्णस्तेयादिकं पापं सुरापानमपीश्वरि ।
गोहत्यानृतभाषित्वं क्रोधं लोभमथापि वा ॥५३॥

परदाराभिगामित्वं परीवादं परस्य वा ।
भर्तुस्त्यागादन्यासक्तं कृतं चेत्स्यात्सुरेश्वरि ॥५४॥

लघुसूक्ष्मं बृहद्वापि यत्कृतं पापमुत्तमम् ।
तत्सर्वं नाशमायातु पीठदानान्महेश्वरि ॥५५॥

इति मन्त्रेण देवेशि पीठं विप्राय चार्पयेत् ॥५६॥

तथा मया प्रोक्तमिदं तवानघे
दानं च पीठस्य परं रहस्यम् ।
ददस्व देवेशि परं किमन्यै–
र्दानैः कलौ स्वल्पफलप्रदैश्च ॥५७॥

---

५४ ग: मा अन्यसत्यं —अन्यासक्तं

इदं रहस्यं परमं नाख्येयं यस्य कस्यचित् ।
गोपनीयं विशेषेण कलौ सिद्धिप्रदं नृणाम् ॥५८॥

लक्ष्म्याः कृतमिदं दानं पार्वत्याश्च महेश्वरि ।
सायुज्यमपि तत्स्थाने प्राप्नुतः परमेश्वरि ॥५९॥

ततो पापान्महाग्रामे मामलाख्ये महेश्वरि ।
पशूपहारैः पुष्पैश्च पूजनीयः प्रयत्नतः ॥६०॥

प्रसाद्य गणपं तत्र नानाबल्युपहारकैः ।
प्रायान्नवदले गङ्गां यष्टिं तत्रार्पयेद्बुधः ॥६१॥

यष्टे ह्याधारभूतस्य साक्षिभूतासि वै यतः ।
सत्कर्मणश्च तीर्थस्य यात्रां मम निवेदय ॥६२॥

यष्टे सृष्टिस्वरूपासि स्थितिप्रलयकारिणि ।
यष्टे विष्णुप्रियासि त्वं शिवशक्तिस्वरूपिणि ॥६३॥

तस्मान्मे पापसंघाश्च हित्वा याहि स्वकं पदम् ।
गङ्गे प्रियाहि देवस्य शिरसि धूर्जटेः ॥६४॥

प्रियाः पुरतो देवदेवस्य यात्रां मम निवेदय ।
इति मन्त्रेण देवेशि यष्टिं गङ्गाम्भसि क्षिपेत् ॥६५॥

---

५८ कः मा परं—परम

स्नात्वा पातालगङ्गायां ततो यायात्स्वकं गृहम् ॥६६॥

एवं कृत्वा तु देवेशि नारी वा पुरुषोऽपि वा ।
वेदपारायणं पुण्यं प्राप्नोत्येव न संशयः ॥६७॥

यात्रामेवं विधं कृत्वा पुण्याममरनाथजाम् ।
मुक्तिमेव समाप्नोति विना चेन्द्रियनिग्रहैः ॥६८॥

इह लोके सुखी भूत्वा ह्यन्ते सायुज्यमाप्नुयात् ॥६९॥

इति गुह्यं मयाख्यातं फलममरनाथजम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥७०॥

इत्येष पटलो गुह्यो महापापप्रणाशकः ।
श्रुतश्च पठितश्चापि हयमेधादियागदः ॥७१॥

इति श्री श्रीभृङ्गीशसंहितायां श्रीभैरवभैरवीसम्वादे
दक्षिणापार्श्वोपतीर्थसंग्रहे श्री-अमरनाथफलवर्णनं
नाम एकादशः पटलः ॥११॥

६८ घ: मा चिण्द्रियनिग्रहैः—चेन्द्रियनिग्रहैः
६९ क: मा सुखंभूत्वा—सुखी भूत्वा

# भृङ्गीशसंहिता
# वितस्तामाहात्म्यम्

## ॐ श्रीगणेशाय नमः

नमताशेषविघ्नौघवारणं वरवारणम्[1] ।
कारणं सर्वसिद्धिनां दुरितार्णवतारणम् ॥१॥

ॐ अक्षसूत्राम्बुजकरामादर्शकलशान्विताम् ।
मीनपद्मासनां[2] देवीं वितस्तां शरणं श्रये ॥२॥

*पार्वत्युवाच

श्रुत्वा भृङ्गीशविषये ह्यर्धनारीश्वरम्महत् ।
तीर्थं परमदुष्प्राप्यं कृतार्थास्मि न संशयः ॥३॥

अधुना श्रोतुमिच्छामि महिमानमनुत्तमम् ।
विरहाख्यस्य नागस्य योगिनामपि दुर्लभम् ॥४॥

---

१ ख: ब वारणाननम्—वरवारणम्

२ ग: ब मीनपद्मासनासीनां—मीनपद्मासनां

*पार्वतीउवाच—पार्वत्युवाच

यतो देवी भगवती वितस्ता पापनाशिनी ।
निस्सारिता महादेव त्वया भुक्तहितेच्छया ॥५॥

त्रैलोक्ये यानि तीर्थानि तानि काश्मीरमण्डले ।
काश्मीरे यानि तीर्थानि नित्यं तानि महेश्वर ॥६॥

वसन्त्यस्यां महेशान श्रुतं त्वन्मुखपङ्कजात् ॥७॥

त्रैलोक्यप्रक्रमाद्देव यत्फलं प्राप्यते नरैः ।
तत्फलं समवाप्नोति काश्मीरप्रक्रमान्नरः ॥८॥

यावत्कल्पं महेशान काश्मीरस्य प्रदक्षिणम् ।
करोति विधिवद्यस्तु यत्फलं लभते नरः ॥९॥

तत्फलं समवाप्नोति वितस्तायास्स्नानतः ।
इत्येतदपि सर्वज्ञ श्रुतं भवदनुग्रहात् ॥१०॥

---

५ घः व भक्तिहितेच्छया — भुक्तहितेच्छया

६ खः/गः व कश्मीर — काश्मीर

८ खः व लभते — प्राप्यते

१० घः व वितस्ताञ्च — वितस्तायाः

११ घः व सर्वत्र — सर्वज्ञ

विस्तरेण महादेव महिमानमनुत्तमम् ।
*वितस्ताया महानद्या वद सत्यं महेश्वर ॥११॥

लोकानां पापशीलानां संसारे नित्यदुःखदे ।
विशेषतः कलियुगे घोरा गतिरनुत्तमा ॥१२॥

वितस्ता कथिता नाथ त्वयैव जगदीश्वर ॥१३॥

यदि ह्यहमनुग्राह्या प्रिया तेऽस्मि महेश्वर ।
तदा वितस्तामाहात्म्यं कथय स्वप्रसादतः ॥१४॥

भैरव उवाच

शृणु देवि प्रवक्ष्यामि महिमानमनुत्तमम् ।
वितस्वाया महानद्या रहस्यं परमाद्भुतम् ॥१५॥

इदं गोप्यं महेशानि नाख्येयं यस्य कस्यचित् ।
नराणां बकवृत्तीनां तथा पाषण्डवृत्तिनाम् ॥१६॥

तथा वेदागमाचारनिन्दकानां महेश्वरि ।
गुरुभक्तिविहीनानां गुरुनिन्दारतात्मनाम् ॥१७॥

---

*प्रथममातृकायामयं पाठोऽनुपलब्धः १८ पत्राणि नष्टानि ।
निर्दिष्टपाठो 'ब' मातृकातः समुद्धृत्य सम्पादितः ।

महापातकिनां देवि घोरपापरतात्मनाम् ।
ग्रस्तानां दीर्घरोगैश्च तथा संसर्गिणां प्रिये ॥१८॥

न वक्तव्यं न वक्तव्यं न वक्तव्यं महेश्वरि ॥१९॥

पुरा महर्षयः सिद्धाः कश्यपाद्या महेश्वरि ।
गोविन्दं तपसोग्रेण तोषयन्भक्तिभाविनाः ॥२०॥

द्रष्टुकामाः परं देवं श्वेतदोपसमीपतः ।
तेषां वै भक्तिभावेन प्रसन्नो जगदीश्वरः ॥२१॥

दर्शयामास गोविन्दो देवानां स्वं यथायथम् ।
स्तुत्या स्तोत्रैर्हरिं देवं दण्डवत्प्रणिपत्यते ॥२२॥

तथा प्राञ्जलयस्तस्थुर्देवस्याग्रे हरप्रिये ।
उवाचेदं प्रसन्नस्स हरिस्तान्देवसत्तमान् ॥२३॥

किमर्थमागतास्सर्वे वदध्वं सुरसत्तमाः ।
करोमि वोऽविलम्बेन कामं वो निश्चिता मतिः ॥२४॥

इत्युक्तास्तेन हरिणा देवाः प्रोचुः पुनर्हरिम् ।
भगवन्करुणाम्बोधे स्थानं दत्तं त्वयैव भोः ॥२५॥

अस्मिन्सतीसरोदेशे हिमाचलशिरोधृते ।
स्थित्वा चैवेह भगवन्ध्यातव्यं पादपङ्कजम् ॥२६॥

मनो विरुद्धय देवस्य परमस्य जनार्दन ।
तथापि च मनोऽस्माकं तीर्थभ्रान्तिर्न मुञ्चति ॥२७॥

अस्मिन्सतीसरोदेशे तीर्थानामुत्तमोत्तमम् ।
देहिन: कृपया देव मलानां क्षालनं महत् ॥२८॥

इत्युक्त्वा मुनयस्सर्वे मौनमेवावतस्थिरे ।
क्षणं ध्यात्वा हरिस्तेषामुत्तस्थौ च समीपत: ॥२९॥

प्रतस्थुस्तेन हरिणा सह कैलासमुत्तमम् ।
सिद्धचारणगन्धर्वरक्षोयक्षोरगार्चितम् ॥३०॥

किन्नरैर्गणदेवैश्च पूजितं नित्यं नित्यदा ।
सर्वर्तुफलपुष्पाढ्यं नानापक्षिसमाकुलम् ॥३१॥

नानारत्नसमायुक्तं धातुभिश्चित्रितं तथा ।
विनायककुमाराद्यैरर्चितं च महेश्वरि ॥३२॥

तत्र स्थित्वा च ते देवास्तुष्टवुर्जगदीश्वरम् ।
अनुवाकैर्महेशानि रौद्रैर्मन्त्रैर्विशेषत: ॥३३॥

शताध्यायैर्महादेवि चमसकैर्महेश्वरि ।
तेषां स्तुत्या च भक्त्या च प्रसन्नोऽभून्महेश्वर: ॥३४॥

दर्शयामास तान्देवानात्मानमम्बिकापति: ।
दृष्ट्वा तं देवदेवेशं प्रसन्नमुखपङ्कजम् ॥३५॥

जटामुकुटसंवेतं शूलमुद्गरधारिणम् ।
कमण्डलुधरं देवं शशाङ्ककृतशेखरम् ॥३६॥

मृत्युञ्जयं महादेवं विभूतिकृतसुन्दरम् ।
त्रिनेत्रं चारुहसितं गङ्गामुकुटिनं प्रभुम् ॥३७॥

नेमुः प्राञ्जलयो देवास्सर्वज्ञमम्बिकापतिम् ॥३८॥

दृष्ट्वा तान्देवदेवेश उवाच श्लक्ष्णया गिरा ।
वरं वृणीध्वं देवेशा यद्वो मनसि वाञ्छितम् ॥३९॥

ददाम्यहमतिप्रीतो गणेशस्यापि दुर्लभम् ।
इत्युक्तो देवदेवेन गोविन्दो जगदीश्वरः ।४०॥

उवाच तं महेशानं भक्तिनम्रेक्षणं प्रभुः ॥४१॥

हरिरुवाच

कश्यपस्य महेशान तीर्थं कश्मीरमण्डले ।
यत्स्नानात्प्राप्नुयुर्देवास्त्रैलोक्ये तीर्थसम्भवम् ॥४२॥

एकाहेन फलं सर्वं तत्तीर्थं देहि सुव्रत ।
एतच्छ्रुत्वा हरेस्तस्य वचनं सुरसुन्दरि ॥४३॥

देवीं तां पार्वतीमग्रेस्थितां संवदतीं मुहुः ।
उवाच च प्रसन्नात्मा भवानीं पापनाशिनीम् ॥४४॥

स्वस्थाने जगदीशानि देहि तीर्थमनुत्तमम् ।
देवानां कार्यसिद्धयर्थमृषीणां च विशेषत: ॥४५॥

श्रुत्वा तदम्बिका देवी मौनं परमास्थिता ।
इत्युक्ता देवदेवेशस्सन्ध्याताण्डवमारभत् ॥४६॥

शूलं गृहीत्वा परमं ननर्त परमेश्वर: ।
देवीं मुहुर्मुहुश्चापि जगादेति विनिश्चित: ॥४७॥

गच्छ देवि स्वयं तत्र पावयन्ती सतीसर: ।
ऋषीणां कार्यसिद्धयर्थं देवानामपि सुव्रते ॥४८॥

इत्युक्ता गिरिशेनात्र देवी विस्मयमागता ॥४९॥

साधूनां सुप्रसन्नानां नादेयं नापि किञ्चन ।
पुत्रान्दारान्गृहं वित्तं दास्यन्त्येव न संशय: ॥५०॥

इत्यवश्यं च गन्तव्यमीश्वरस्याज्ञया मम ।
तस्माद्गमिष्यामीत्येवं निश्चिता सुरसुन्दरि ॥५१॥

देवस्याग्रे स्थिता देवी करं कृत्वा वितस्तिकम् ।
देह्याज्ञां तत्र यास्यामि नदीभूता महेश्वर ॥५२॥

वितस्तिकं करं दृष्ट्वा शूलमुद्गृह्य तेजसा ।
विदार्य शिखिरं दिव्यं शूलाग्रेण महेश्वरि ॥५३॥

तत्र वितस्तिमात्रोऽभूद्गर्तो वै शूलनिर्मितः ।
ततो वै निस्सृता देवी नदी परमपावनी ॥५४॥

वितस्तिमात्राद्गर्तार्द्ध यतोऽग्रे निस्सृता स्वयम् ।
तस्माद्वितस्तेति सदा प्रथिता भुवनत्रये ॥५५॥

विशेषेण तनुर्यत्र स्नानाद्भवति वै सितः ।
बहिरन्तर्वितस्तेति तस्मान्नित्यं प्रकीर्तिता ॥५६॥

विरलां च तनुं यत्र स्तिमितां च महेश्वरि ।
करोति सर्वलोकानां वितस्तेति ततस्स्मृता ॥५७॥

निस्सृता च विरालापान्कुर्वन्ती च महानदी ।
न गच्छामि न गच्छामि त्वया विरहिता प्रभो: ॥५८॥

महापातकिनां सङ्गान्मलिना स्यामहं सदा ।
कथं त्वदङ्गस्पर्शं च लभेयमपि शङ्कर ॥५९॥

तस्मान्न गच्छामि परं शुभे कश्मीरमण्डले ।
नदी भूत्वा महादेव भीता पातकसङ्गतः ॥६०॥

इत्येवं बहुलालापान्कुर्वती जगदम्बिका ।
निस्मारिता महेशेन गच्छ गच्छेति वादिना ॥६१॥

विरावान्कुर्वती यस्मान्निस्मारिता महानदी ।
महेशेन यतस्तस्माद्विरनागेति कीर्तितम् ॥६२॥

विष्णुं गृह्णाति यत्स्नानाद्दर्शनादपि सुन्दरि ।
तस्माद्विरेति नागोऽभूत्प्रथितो भुवनत्रये ॥६३॥

इत्युत्पत्तिर्मया ख्याता वितस्तताया महेश्वरि ।
श्रुत्वैतत्सर्वतोभद्रं मुच्यते पातकैः प्रिये ॥६४॥

इति श्रीभृङ्गी[श]संहितायां भुवनकोशवर्णनोद्योते सतीसरो-
विशेषविनिर्णये भृङ्गीशविषयोपजाततीर्थ-
प्रस्तावे नवमः वितस्तामाहात्म्यवर्णनं
नाम प्रथमः पटलः ॥१॥

## अथ द्वितीयः पटलः

*ॐ श्रीभैरव्युवाच

श्रुत्वोत्पत्ति वितस्तायाः कृतार्थास्मि न संशयः ।
अधुना श्रोतुमिच्छामि विस्तारेण फलं महत् ॥१॥

वितस्ताया महादेव स्नानाद्दर्शनपानतः ।
कथं भूयो महादेव विराविभ्य उपारता ॥२॥

त्वदङ्गस्पर्शनं सौख्यं कथं प्राप्तवती पुनः ।
केनोपायेन देवेश मलं प्रक्षालितं तथा ॥३॥

घोरं महापातकजं ह्युपपातकसम्भवम् ।
कुत्र कुत्र महेशान ददातीष्टं फलं विभोः ॥४॥

स्नाता च पूजिता देव कृपया बद चेश्वर ॥५॥

भैरव उवाच

शृणु सुन्दरि वक्ष्येऽहं वितस्तास्नानजं फलम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्घोरैः पातकसञ्चयैः ॥६॥

---

*भैरवी उवाच—भैरव्युवाच

कुरुक्षेत्रे प्रयागे च गङ्गासागरसङ्गमे ,
स्नानादेव महेशानि यत्फलं प्राप्नुयान्नरः ॥७॥

तत्फलं च वितस्ताया एकाहेनैव स्नानतः ।
विरवान्बहुलान्देवीं कुर्वन्तीं सान्त्वयन्हरिः ॥८॥

उवाच श्लक्ष्णया वाचा वितस्तां पापनाशिनीम् ।
गच्छ देवि करिष्यन्ति तव देवि सहायताम् ॥९॥

सर्वलक्ष्मीः महाहारपथा चाकाविशेषतः ।
लम्बोदरी च भृङ्गीशी तथा रामेश्वरी नदी ॥१०॥

चक्रेशं सङ्गतायाश्चैव तरिण्यादयश्च ताः ।
सौरी चान्यानि तीर्थाणि हाटकेश्वर एव च ॥११॥

महापद्मसरश्चैव चन्द्रक्षेत्रं तथैव च ।
वराहक्षेत्रं देवेशि तथान्यासां च सङ्गमः ॥१२॥

मलं प्रक्षालयिष्यन्ति नात्र कार्या विचारणा ।
इत्युक्त्वा हरिणा देवी परं हर्षमवाप सा ॥१३॥

जगाम हर्षसंयुक्ता पावयन्ती सतीसरः ।
दृष्ट्वा तु तां तथायान्तीं नदीं परमपावनीम् ॥१४॥

जगाद लक्ष्मीं देवेशो गच्छ त्वमपि सुन्दरि ॥१५॥

वितस्ता शोकनाशार्थं लोकानामपि सुन्दरि ।
श्रुत्वा भर्तुर्वचो लक्ष्मी देवी परमपावनी ॥१६॥

तथेति प्रत्यसंभाष्य तां नदीमन्वयात्पुनः ।
सैवाभूद्देवदेवेशि विशोका शोकनाशिनी ॥१७॥

यस्याः स्नानाद्दर्शनाच्च लोकाः शोकं त्यजन्ति वै ।
तस्माद्विशोका देवेशि प्रथिता भुवनत्रये ॥१८॥

यत्स्नाता विमलाः शक्रलोकं गच्छन्त्यशंकिताः ।
तस्माद्विशोका कथिता ह्यागमज्ञैर्महेश्वरि ॥१९॥

यत्स्नाता विमला लोका विष्णोर्वै शंकरस्य च ।
मन्दिरं सुन्दरं देवि गमिष्यन्ति ह्यप्रावृताः ॥२०॥

तस्माद्विशोका प्रथिता लक्ष्मी वै भुवनत्रये ॥२१॥

यत्र देवी वितस्ता च मिलितापि विशोकया ।
तत्र ब्रह्मादयो देवाः कांक्षन्ते स्नानमुत्तमम् ॥२२॥

वाराणस्यां कल्पवासात्प्रयागे कल्पवासतः ।
यत्फलं लभते मर्त्यस्तदेकाहेन स्नानतः ॥२३॥

---

१६ गः ब भर्तवचो—भर्तुर्वचो

विशोका मिलिता यत्र महेश्वरि वितस्तया ।
कुरुक्षेत्रे महादेवि ग्रहणे च चन्द्रसूर्ययो: ।।२४।।

नियुतं कपिलानां च ददाति विधिना च य: ।
स पुत्राय च विप्राय यत्फलं समवाप्नुयात् ।।२५।।

तत्फलं समवाप्नोति सङ्गमस्य दर्शनात् ।
गङ्गायां पिण्डदानेन यावत्कल्पं महेश्वरि ।२६।।

तत्फलं समवाप्नोति तदत्रैकाह् स्नानत: ।
प्राप्नुयात्तत्फलं देवि नात्र कार्या विचारणा ।।२७।।

प्रयागे माघमासे तु यावत्कल्पशतं प्रिये ।
स्नात्वा यत्फलमाप्नोति तदेकाह्नेन सङ्गमे ।।२८।।

यत्फलं वै भवेन्नित्यं निमिषारण्यवासिनाम् ।
तत्फलं समवाप्नोति त्र्यहस्नानेन मानव: ।।२९।।

तुलापुरुषदानाद्यैर्मायापुर्यां महेश्वरि ।
स्नानाद्दानाज्जपाद्धोमाद्यावत्कल्पशतं प्रिये ।।३०।।

तदाप्नोति महेशानि त्र्यहस्नानेन सङ्गमे ।।३१।।

मायापुर्यां कल्पवासात्फलं यत्प्राप्नुयान्नरः ।
तदाप्नोति महापुण्ये सङ्गमे स्नानमात्रतः ॥३२॥

अवन्तिकायां देवेशि कल्पं वसति यो नरः ।
एकाहस्नानमात्रेण तदाप्नोत्यत्र सङ्गमे ॥३३॥

[अध्याय द्वितीयः] अनेन पाठेन द्वितीयपटलस्य
निर्देशः प्रतीयते ॥२॥

# अथ तृतीयः पटलः

*भैरव्युवाच

वद सत्यं महादेव वितस्तास्नानजं फलम् ।
संवभूव यथा देवी नदी वै विरनागतः ॥१॥

भैरव उवाच

शृणु देवि प्रवक्ष्यामि वितस्तास्नानजं फलम् ।
यच्छ्रुत्वा मुच्यते जन्तुः जन्मकोटिभवैरघैः ॥२॥

सम्भूय नागतो देवि वितस्ता परमा नदी ।
चलाल परिमाणेन वैतस्तेन महेश्वरि ॥३॥

अग्रे दृष्ट्वा पातकिनो नदी ह्यन्तर्धिमागता ।
अन्तर्भूतां नदीं प्रेक्ष्य कश्यपः शरणं शिवम् ॥४॥

जगाम च पुनर्देवि शिवः काश्यपमब्रवीत् ।
प्रजायते शृणु वचो मम सत्यमनुत्तमम् ॥५॥

महापातकिसंघाच्च नदी ह्यन्तर्धिमागता ।
तस्मात्प्रजापते गच्छ वितस्तान्वतरिष्यति ॥६॥

---

*भैरवी उवाच—भैरव्युवाच

ततो वचः परं श्रुत्वा कश्यपः प्रययौ पुनः ।
ततस्तु धारावर्त्तिकाभिर्वितस्तानुससार वै ॥७॥

यत्र धारा वर्तिकाभिश्चचाल महानदी ।
ततस्सदेशः प्रथितो वितस्तावर्तिकाभिधः ॥८॥

वितस्तावर्तिकां स्नात्वा महापातककोटिहा ।
ततः सा शीतसोमेन मिलिता दूरदेशगा ॥९॥

स्नाता महापातघ्नी महापुण्यप्रदा स्मृता ।
पुलहाश्रमसंस्था च वितस्ता पापनाशिनी ॥१०॥

महापातकहर्त्री च भुक्तिमुक्तिफलप्रदा ।
तथा सीतान्धकग्रामे सीतानागेन सङ्गता ॥११॥

वितस्ता हरते पापं स्नानाज्जन्मशतोद्भवम् ॥१२॥

ततस्त्रिलोकभवने चक्रधारादिपुष्करैः ।
वामनद्रोणकाभिश्च समेता मलहर्त्र्यलम् ॥१३॥

पुरा भृङ्गिरिटि देवि चचार सुमहत्तपः ।
दिव्यं वर्षसहस्रं तु पुण्यं हंसवतीगिरौ ॥१४॥

निराहारो निरीहस्य स्थाणुभृत्यो महागणः ।
ततः प्रसन्नो भगवान्प्रादुरासीद्गणाग्रतः ॥१५॥

गणं प्रच्छन्दयामास वरेण भगवान्भव: ।
श्रुत्वा तु वचनं तस्य प्रोवाच भवमुत्तमम् ॥१६॥

त्वद्दर्शनादृते देव कोऽन्यो वर उदाहृत: ।
भगत्पादाम्बुजे देव भृङ्ग: स्याज्जन्मजन्मनि ॥१७॥

यथा वियोगं नाप्स्यामि तथा कुरु महेश्वर: ।
इत्युक्त्वा तु गणो देवि लिलेह चरणाम्बुजम् ॥१८॥

शिवस्य परमेशानि भृङ्गी भूत्वा सुरार्चितै: ।
श्रुत्वा तु वचनं तस्य गणस्य भक्तिमुत्तमम् ॥१९॥

संप्रोक्ष्योवाच तं देव एवमस्त्विति पार्षद ।
यस्मान्दश्चरणाम्भोजं भृङ्गी भूत्वा महत्पुरा ॥२०॥

भृङ्गीशनाम्ना तस्मात्त्वं गणेषु ख्यातिमेष्यति ।
भृङ्गीभूत्वा स्तुवद्यन्मां गणपुटेश्च प्रेमत: ॥२१॥

तस्माद्भृङ्गिरिटिरपि ख्यातिमेष्यति सर्वदा ।
कुमारयो: समो नित्यं निंदनो वर उत्तम: ॥२२॥

भविष्यति न सन्देह: पार्षदेभ्योऽपि मे प्रिय: ।
सत्पाश्वॅव स नित्यं तु सत्कर्म परमो भव ॥२३॥

इदं त्वदभिधानेन तपः स्थानं भविष्यति ।
इत्युक्त्वा जूटमुत्पीडय गङ्गामेतावतारयत् ।।२४।।

इतः प्रभृति यः कश्चित्तव स्थानं उपेष्यति ।
नारी वा पुरुषो वापि शीघ्रं सिद्धिः भविष्यति ।।२५।।

इत्युक्त्वा गणपो देवो ह्यन्तर्धिमहमागतः ।।२६।।

ततः प्रभृति देवेशि भृङ्गीशविषयात्ततः ।
चचाल स्वमहापुण्या नदी परमपावनी ।२७।।

यत्र भृङ्गिरिटिर्देवि चचार दुश्चरं तपः ।
स देशः प्रथितोऽद्यापि भृङ्ग इत्याख्यया पुरा ।।२८।।

भृङ्गो भूत्वा यत्र देवि स्वयं भृङ्गिरिटिः पुरा ।
लिलेह चरणौ शंभोः स देशो भृङ्गिसंज्ञितः ।।२९।।

घोरेण तपसा यत्र भूत्वा ज्ञानमनुत्तमम् ।
तस्माद्भृङ्गि इति ख्यातिमगमद्विषयः पुरा ।।३०।।

भृङ्गात्प्रचलितायां वै नदीजूटसमुद्भवा ।
सैव प्रख्यापिता लोके भृङ्गीति प्रसृता नदी ।।३१।।

भृंग्या सह महादेवि वितस्ता यत्र सङ्गता ।
स्नाता दृष्ट्वापि तत्रैव घोरपातकध्वंसिनी ।।३२।।

ततो जालोद्भवो नाम रक्षः परमदारुण: ।
आहारमकरोत्तत्र पथिनद्योर्भृशार्दन: ॥३३॥

दृष्ट्वाहारं पुनर्नद्यो: कश्यपश्च प्रजापति: ।
जटा प्रजप्यं सुमहच्छिवस्य परमात्मन: ॥३४॥

कश्यपस्य जपाद्देवि शिव: प्रादुर्बभूव ह ।
प्रोवाच स पुनर्देवान्कि भयं किं भयं पुर: ॥३५॥

सूचय सुमहाब्रह्मन्मा विलम्बं विधीयताम् ।
इति श्रुत्वा तु वचनं महेशस्य महात्मन: ॥३६॥

प्रत्युवाच महादेवं सूचयामि महेश्वर ।
किं विभत्सि महाभीतिं त्वत्प्रसादाद्व्रजमपि ॥३७॥

जलोद्भवेन दैत्येन नद्यौ वा हारितौ पथि ।
तन्मुक्त्यर्थं महादेव त्वामहं शरणं गत: ॥३८॥

इत्युक्त्वा कश्यपो देवं विरगम महेश्वरि ।
शिवस्त्रिशूलं प्रगृह्य प्रद्रावद्राक्षसं प्रति ॥३९॥

वक्षो विदार्य शूलेन रक्षसो वरवर्णिनि ।
विदीर्णं तद्वपुस्थार्या पथिशीघ्रं पपात ह ॥४०॥

ततो वै निस्सृतौ नद्यौ समेत्य जगदम्बिके ।
जग्मतु: परमोदग्रौ तत्राहरपथेन वै ॥४१॥

किं कथं कश्यपस्योक्तं यत्र तेन महात्मना ।
प्रत्युक्तं कश्यपेनापि किं बिभर्षि भयं प्रभोः ॥४२॥

ततः स ग्रामः कथितः कस्वयाख्यापरो भुवि ॥४३॥

कस्वये प्रथिते ग्रामे वितस्ता भयनाशिनी ।
स्नाद्दानाज्जपाद्धोमात्सर्वसिद्धिप्रदायिका ॥४४॥

सूचय स्वेति कथितं शिवेन परमात्मना ।
यत्र स प्रथितोऽद्यापि सूचनो ग्राम उत्तमः ॥४५॥

सूचने स्नानप्राशाद्यैः फलं यज्ञादिजं भवेत् ।
जलोद्भवेन दैत्येन यत्र चाहारिते ततः ॥४६॥

स ग्रामः प्रथितो मद्यो आहाराख्ये महेश्वरि ।
महाफलप्रदा प्रोक्ता पुण्यापतितपावनी ॥४७॥

ततस्तु चाकया तत्र मिलिता परमा नदी ।
दीर्घरोगापहर्त्री च कथिता तन्त्रपारगैः ॥४८॥

शिवपूजापरैर्यत्र पुष्पवाटीगणैः कृता ।
स्वनैः देव्या महापूजां कुर्वद्भिः सततं स्वरैः ॥४९॥

समेत्य सरले देवि सर्पवत्कुटिला कृता ।
तत्र स्नात्वा दृष्ट्वा च महापुण्यफलप्रदा ॥५०॥

पुष्पवट्यां वितस्तां तु स्नात्वा पीत्वा च सुन्दरि ।
अतिरात्रस्य यज्ञस्य फलं दास्यत्यनुत्तमम् ॥५१॥

पुष्पवट्यां महास्नानाद्दानादपि महेश्वरि ।
वितस्ता हरते पापं पुण्यं दास्यत्यनुत्तमम् ॥५२॥

इति ते कथितं देवि पुण्यं परमपावनम् ।
वितस्ताया महानद्या माहात्म्यं देवदुर्लभम् ॥५३॥

यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ।
यथैव पटलो गुह्यो न वक्तव्यो यथा तथा ॥५४॥

क्रूरे शठे चौरके च पठितो विघ्नदो भवेत् ॥५५॥

तस्मात्सर्वप्रयत्नेन भक्ति कृत्वा महेश्वरि ।
श्रोतव्यो सर्वध्यानेन सर्वसिद्धिपरो भवेत् ॥५६॥

इति श्रीभृङ्गीशसंहितावितस्तामाहात्म्यं नाम तृतीयः पटलः ॥३॥

---

५५ क: ब कठे—शठे

५६ क: ब सर्वप्रयुक्तेन—सर्वप्रयत्नेन

## अथ चतुर्थः पटलः

*श्रीभैरव्युवाच

पुनर्वद महादेव नद्या माहात्म्यमुत्तमम् ।
हरनागेन मिलिता किं फलं दास्यति प्रभोः ।।१।।

भैरव उवाच

शृणु देवि परं गुह्यं वितस्तास्नानजं फलम् ।
गङ्गास्नानसहस्रन्तु नर्मदास्नानलक्षितम् ।।२।।

यत्फलं लभते मर्त्यः तत्फलं प्राप्नुयान्नरः ।
स्नात्वा यत्र वितस्ता च हरनागेन सङ्गता ।।३।।

गवां कोटिसहस्रस्य दानपुण्यं लभेन्नरः ।
य स्नाति च वितस्तायां हरतीर्थस्य सङ्गमे ।।४।।

योगिनीनां गणैर्यत्र यागे वै शिवरात्रिके ।
वारुण्या सह देवेशि देवीमारभ्य वै पुरा ।।५।।

पूजयित्वा भैरवाय बलिर्मत्ते महात्मने ।
तं दृष्ट्वा देवदेवेशः परं क्षोभमगात्पुनः ।।६।।

---

*भैरवी उवाच—भैरव्युवाच

दृष्ट्वा क्षोभं परं देवि भैरवस्य महात्मनः ।
योगिनीनां गणं शीघ्रं पलायनपरोऽभवत् ॥७॥

शूलमुत्थाप्य भगवान्योगिनीनां गणं तदा ।
पलायनपरं दृष्ट्वान्वधावत्स्वगणैर्वृतः ॥८॥

दृष्ट्वा तथानुधावन्तं भैरवं योगिनीगणः ।
मीनीभूतोऽपतद्देवि वितस्तायां जले तथा ॥९॥

भगवान्नर्पि तत्रैवान्वपतद्बलिभिर्वृतः ।
आज्ञापयत्तदा देवो गणाश्चूर्णयतेति च ॥१०॥

मीनीभूत्वा योगिनी च शूलेन गणसत्तमाः ।
एवमस्त्विति ते सर्वे गणास्तं योगिनीगणम् ॥११॥

मीनीभूतं तदा शूलैश्चूर्णयामासुरायुधैः ।
कुन्तैः प्रहरितो यत्र योगिनी गण उत्तमः ॥१२॥

तस्मात्कुन्तिप्रहारोऽयं ग्रामः परमपावनः ।
शूलप्रोतस्तदा देवि योगिनीनां गणो महान् ॥१३॥

पुनर्देवी समुत्थाप्य दर्शयामास भैरवम् ।
दृष्ट्वा देवी तदा देवः पुनरुत्थापिता पुरा ॥१४॥

जगाम परमं हर्षं समुत्फुल्लविलोचनः ।
योगिनीनां गणो देवि दुद्रुवे भयविह्वलः ॥१५॥

पलायनपरं दृष्ट्वा योगिनीनां गणं पुनः ।
भवः प्रोवाच तां सर्वान्गणान्प्राद्रवतेति च ॥१६॥

यस्मादनाधृतपरो मां गतो योगिनीगणः ।
तस्मादेनं मीनगणं मारयच्च न संशयम् ॥१७॥

अप्सां फाल्गुणसप्तम्यामत्रैव समवार्षिके ।
गणार्धलिमाहारध्वं यागे वै हरत्रात्रिके ॥१८॥

श्रुत्वावधीरयंतस्ते वचस्तस्य भवस्य तत् ।
क्रोधं जगाम देवेशः शशाप स महागणान् ॥१९॥

यस्मादनाधृत्य वचो मम तिष्ठत वै गणाः ।
पशुवत्पशुतां यूयं गमिष्यथ न संशयः ॥२०॥

पशुभूता पुनर्यूयं बल्यर्थं शिवरात्रिके ।
बल्यर्थं च भवान्मा वै यागे नित्यं भविष्यथ ॥२१॥

इति शप्त्वा गणान्देवि भैरवः स्वयमेव हि ।
शूलमुद्धृत्य जरसासीनां ताञ्च जघान ह ॥२२॥

दृष्ट्वाघातं योगिनीनां गणं देव्यवदत्पुनः ॥२३॥

भैरव्युवाच

भगवन्करुणाम्बोधे सर्वज्ञ भव भैरव ।
योगिनीनां गणानां च कृपां कुरु महेश्वर ॥२४॥

श्रुत्वा देव्या वचः शम्भुर्भवानीं वाक्यमब्रवीत् ।
त्वत्प्रसादात्महेशानि योगिन्यश्च गणाश्च ते ॥२५॥

वर्षे वर्षे भविष्यन्ति मीनास्ताः पशवस्त्विमे ।
बल्यर्थमुपयुक्तांश्च यागे वै शिवरात्रिके ॥२६॥

अपरं तु वरं देवि शृणु नित्यमहस्थिता ।
लोकान्समुद्धरिष्यन्ति वितस्ताजल उत्तमे ॥२७॥

तच्छ्रुत्वा देवदेवेशी जगाम परमं मुदम् ॥२८॥

वर्षे वर्षे तु सप्तम्यां कृष्णाया फाल्गुनस्य च ।
बलिं च विधिवद्दत्वा ततः प्रभृति धीवराः ॥२९॥

हरनागे महादेवि मत्स्यानाजघ्नुरुत्तमे ।
तस्माद्वै हरतीर्थाख्यं वितस्ता मध्यगं प्रिये ॥३०॥

त्रिशूलेन गतं देवि मीनान्वेषतः पुरा ।
गणैर्निरुद्धा मत्स्याश्च सप्तम्यां फाल्गुनस्य च ॥३१॥

हरनागे यतो जालैस्तस्माद्वै जालसप्तमी ॥३२॥

सप्तम्यां तु नरः स्नात्वा हरतीर्थे विशेषतः ।
मुच्यते पातकैर्घोरैर्महापातकजैरपि ॥३३॥

हरतीर्थे नरः स्नात्वा मुच्यते ब्रह्महत्यया ।
महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ॥३४॥

स्नात्वा तीर्थे वितस्तायां हरतीर्थे विशेषतः ।
मुच्यते पातकैर्जन्तुर्नात्र कार्या विचारणा ॥३५॥

व्याधिं हरति विघ्नांश्च स्नातानां ह्यत्र नित्यदा ।
तस्माद्वै हरतीर्थाख्यं प्रथितं भुवनत्रये ॥३६॥

हरस्य सङ्गमो यत्र योगिन्यन्वेषणे पुरा ।
तस्मात्तीर्थं हराख्यं च कथितं तन्त्रपारगैः ॥३७॥

हयग्रीवश्च रामश्च यत्र स्नातौ प्रबोधिनौ ।
तस्माद्धराभिधं तीर्थं कथितं भुवनेश्वरि ॥३८॥

तस्माद्धराख्ये तीर्थे वै स्नातव्यमविशंकया ।
इच्छद्भिः परमां सिद्धिं तथा मोक्षमवाप्सुभिः ॥३९॥

पुनः स्नायाद्वितस्तायाश्चाकायाः सङ्गमे प्रिये ।
ब्रह्महत्यादिपापानां क्षयं कर्तुं यदीच्छसि ॥४०॥

चकति घोरकर्मंपापानि विघ्नानि च महेश्वरि ।
तस्मान्मृताण्डविषये चाकेति कथिता भुवि ॥४१॥

चकितानि च पापानि यस्या दर्शनमात्रतः ।
चाकेति कथिता लोके मन्त्रज्ञैर्जगदम्बिके ॥४२॥

तस्मात्स्नातव्यमीशानि सङ्गे चाकावितस्तयोः ।
ब्रह्महत्यादिपापानि नश्यन्तीति न संशयः ॥४३॥

आकामो वा सकामो वा यः स्नाति जगदम्बिके ।
चाकावितस्तयोः सगे स याति परमां गतिम् ॥४४॥

कुष्ठी च दीर्घरोगी च यत्र स्नाति च मानवः ।
द्विमासं वा त्रिमासं वा मुच्यते नात्र संशयः ॥४५॥

सूर्यं हरिं हरं पूज्य मुच्यते ब्रह्महत्यया ॥४६॥

स्वर्णस्तेयी महादेवि ह्यत्र यः स्नाति मानवः ।
षण्मासान्मुच्यते जन्तुर्नात्र कार्या विचारणा ॥४७॥

सुराप्यत्र महादेवि वर्षमात्रं जलं पिबेत् ।
मुच्यते च महादेवि सुरापानान्न संशयः ॥४८॥

गुरुतल्प्यत्र देवेशि स्नाति मासत्रयं नरः ।
मुच्यते जगदीशानि पातकाद्गुरुतल्पजात् ॥४९॥

श्वित्रे च पाण्डुरोगे च गुल्मी चैव विशेषतः ।
स्नाति ह्यत्र त्रिमासं वा मुक्तः स्याद्रोगजाद्भयात् ॥५०॥

एतच्छ्रुत्वा महादेवि पटलं कामदं प्रिये ।
पठित्वा चापि मुच्यन्ते महापातककोटिभिः ॥५१॥

इति श्रीवितस्तामाहात्म्ये विशोकाविहरनामचाका-
माहात्म्यं नाम चतुर्थः पटलः ॥४॥

## अथ पञ्चमः पटलः

भैरव उवाच

पुनः स्नातव्यं महेशानि लम्बोदर्याश्च सङ्गमे ।
मुच्यते पातकैः घोरैर्महापातकसञ्चयैः ॥१॥

गवां कोटिप्रदानाच्च विधिना वेदपारगे ।
यत्फलं च कुरुक्षेत्रे राहुग्रस्ते दिवाकरे ॥२॥

तत्फलं समवाप्नोति स्नात्वा लम्बोदरीजले ।
किं पुनः सङ्गमे देवि वितस्ताया विशेषतः ॥३॥

आधिं हरति व्याधिं च विघ्नांश्चैव विशेषतः ।
लम्बोदरं जलं देवि वितस्ताजलसङ्गतम् ॥४॥

भैरव्युवाच

कुन्तप्रहारे ग्रामे वै हरनागं महेश्वरम् ।
श्रावं श्रावं महापुण्यं कृतार्थास्मि न संशयः ॥५॥

अधुना श्रोतुमिच्छामि सिखनेर्बलिमुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥६॥

---

१ कः ब महीशानि—महेशानि

भैरव उवाच

पुरा सतीसरोदेशे कोलरूपो हरिः स्वयम् ।
चक्रेण शतधारेण जलं न्यस्मारयत्तदा ॥७॥

वराहरूपेण शिवे छित्त्वा तु पर्वतं तदा ।
यत्र कुत्रापि विष्टं तु देशतोयमनुत्तमम् ॥८॥

तथा समुत्थिता देवि जन्तुर्वै विघ्नकारिणः ।
आस ऋषिणां वरदे विष्णुः परमविस्मितः ॥९॥

कुतस्तु दैत्या मिलिता मुनिविघ्नकरा इमे ।
इति चिन्तापरो विष्णुर्दैत्यान्वेषणतत्परः ॥१०॥

अदृष्टदैत्यसंघांस्तु विष्णुः परमविस्मितः ।
अन्वेषयामास तदा दैत्यानाह निहत्तमः ॥११॥

ततो न्यसारयच्छिष्टं तोयं सर्वमशेषतः ।
शिष्टं तु तोयं तत्रस्थं दृष्ट्वा चक्रखनात्प्रभुः ॥१२॥

तत्र ययौ स्वयं विष्णुः जलं न्यसारयत्प्रभुः ।
यदा देवेन दत्तस्तु प्रहारोऽप्यरिणा स्वयम् ॥१३॥

---

१० ख: ब इने—इमे

तृतीयापि गलत्तत्र धाराचक्रस्य सुन्दरि ।
धारा याप्युत्थिता ज्वाला घोरा ह्याकाशगामिनी ॥१४॥

सा च मूर्तिसतीपुण्या सिंहस्था बलशालिनी ।
रक्ताम्बरधराक्षी वा त्रिशूलवरधारिणी ॥१५॥

अभयं चाकुंशमालां घण्टां षड्भिर्महाभुजः ।
धारयन्ती त्रिनेत्रां च नागाभरणभूषिताम् ॥१६॥

चन्द्रचूडारत्नहारकेयूरांगदधारिणीम् ।
सुवर्णकुण्डलधरां महामुकुटधारिणीम् ॥१७॥

दिव्याम्बरधरां देवीं दिव्यसौगन्धिलेपिनीम् ।
सर्वाङ्गसुन्दरीं ध्यायेत्खनिं रत्नाम्बरोज्वलाम् ॥१८॥

ततः सा निस्सृता देवी पातालमवतारिता ।
ज्वाला तत्रावतरन्ती दृष्ट्वा देवस्स्वयं प्रभुः ॥१९॥

बलिं ददुस्ततस्तस्यै खनये बलिमुत्तमम् ।
जलोद्भवान्दैत्यगणान्तान्प्रसन्ना अभूत्खनिः ॥२०॥

ररक्ष तान्महादैत्यान्देशविघ्नकरान्प्रिये ।
विष्णुर्दृष्ट्वा दैत्यगणान्रक्षितान्विष्णुमायया ॥२१॥

स्वयं बलिं प्रदत्वा तु खनये भगवान्प्रभुः ।
चक्रेण प्रहरद्दैत्यान्देशविघ्नकरान्प्रिये ॥२२॥

चक्रेण दृष्ट्वा दैत्यांस्तु नष्टान्देवी खनिः पुरा ।
प्रादुर्बभूव देवेशि विष्णुर्भगवतः प्रिये ॥२३॥

दृष्ट्वा खनिं महादेवो विष्णुः परमपावनः ।
उवाच तं दुर्मनसां खिन्ना दैत्यवधेन च ॥२४॥

सा खिद्या परमेशानि खनेर्विष्णुप्रिये सदा ।
दापयामि बलं तुभ्यं जनैस्सर्वैर्महेश्वरि ॥२५॥

इत्युक्त्वा तां ततो देवीं भगवान्हरिरीश्वरः ।
अदापयद्बलिं लोकैः खनये सुरपूजिते ॥२६॥

बलिं दृष्ट्वा तु लोकानां खनिर्भगवती पुरः ।
प्रसन्ना प्रबभूवात्र निर्वृत्ता च महेश्वरि ॥२७॥

दृष्ट्वा प्रसन्नां वरदां खनिं भगवतीं तदा ।
अवदच्च महाविष्णुरत्रैव स्वररक्षया ॥२८॥

लोकानां च महेशानि देशस्य च विशेषतः ।
बलिं गृहे स्वलोकानां वरदा भव सुव्रते ॥२९॥

इत्युक्त्वा देवदेवेशीं विष्णुर्ह्यन्तर्धिमागतः ।
तथेत्युक्त्वा भगवती लीना खनिस्तदावितः ॥३०॥

वितस्तापि खनौ लग्ना महासिद्धिप्रदा स्मृता ॥३१॥

खनेर्देव्या यत्र लोकैर्बलिदत्ता महात्मभिः ।
स ग्रामः प्रथितोऽद्यापि खनिबल्याख्यया प्रिये ॥३२॥

खनिबलौ नरः स्नात्वा दत्वा भुक्त्वार्चनं प्रिये ।
फलमाप्नोति मनुजो ज्योतिष्टोमादियागजम् ॥३३॥

प्रयागे नैमिषारण्ये मेरुं दत्वापि यत्फलम् ।
तत्फलं समवाप्नोति स्नानात्खनिबलौ प्रिये ॥३४॥

कुरुक्षेत्रे सूर्यग्रहणे कोटिं विधिवत्प्रिये ।
सुपात्राय प्रदातुं यत्फलं प्राप्नोति मानवः ॥३५॥

तत्फलं समवाप्नोति स्नात्वा खलिर्वलिं नरः ।
अष्टम्यां वा नवम्यां वा चतुर्दश्यां विशेषतः ॥३६॥

स्नात्वा खनिबलौ रात्रौ कृत्वा जागरणं नरः ।
सर्वसिद्धिमवाप्नोति सत्यं सत्यं वरानने ॥३७॥

मन्त्रसिद्धिमवाप्नोति पुरश्चरणतः प्रिये ।
सर्वान्कामानवाप्नोति स्नात्वा खनिबलौ नरः ॥३८॥

तिलानपि खनौ दत्वा ह्यक्षयं फलमाप्नुयात् ॥३९॥

---

३८ खः ब पुनः चरणत पुरश्चरणतः

इदं पुंसवनं क्षेत्रमिदमायुष्प्रवर्धनम् ।
इदं सुपुण्यदं क्षेत्रं सपन्नार्तिहरं परम् ॥४०॥

किं बहूक्तेन देवेशि स्नात्वा खनिबलौ नरः ।
पुण्यमाप्नोति चानन्तमश्वमेधादियागजम् ॥४१॥

इति श्रीमद्वितस्तायाः सङ्गतायाः खनौ महत् ।
माहात्म्यं कथितं गुह्यमेतत्कलियुगे परम् ॥४२॥

इत्येष पटलो गुह्यो न प्रकाश्यः कदाचन ।
खनेः प्रादुर्भवोऽयं तु गोपनीयः कलौ सदा ॥४३॥

कुसभासु न वक्तव्यो विघ्नदः परिकीर्तितः ॥४४॥

इति श्रीखनिबलिसङ्गमादिनाम पञ्चमः पटलः ॥५॥

# अथ षष्ठः पटलः

श्रीभैरव्युवाच

स्मारं स्मारं महादेव वितस्तायाः परं महत् ।
खन्या च मिलिता या तु कृतार्थास्मि न संशयः ।।१।।

इदानीं श्रोतुमिच्छामि वितस्ताख्यामहानदीम् ।
अनन्ताख्येन नागेन मिलितां लोकपावनीम् ।।२।।

श्रीभैरव उवाच

शृणु सुन्दरि वक्ष्येऽहं वितस्तां पापनाशिनीम् ।
अनन्ताख्येन नागेन मिलितां पापनाशिनीम् ।।३।।

पुरा पिशोरके ग्रामे गौतमो दुस्चरंतपः ।
चचार परमेशानि दिव्यं वर्षसहस्रकम् ।।४।।

अहल्याः शापाद्वै तस्य गौतमस्य महात्मनः ।
बभूव सहजा भार्या धर्माणां सहचारिणी ।।५।।

शक्रो गौतममालक्ष्य तपस्थं परमं गुरुम् ।
समाधिस्थं गौतमं तु दृष्ट्वा शक्रः पुरस्थया ।।६।।

अहल्याकृतालापः कामार्तः प्रबभूव ह ।
मिलितस्तु तया साकं गौतमेन महात्मनः ।।७।।

शप्तः सहस्रभगवान्भवेति सुरपूजिते ।
सहस्रभगवान्निन्द्रो निस्तेजः समजायत ॥८॥

ततः सरो नलिन्याख्ये ग्रामे परमपावने ।
सरोवरे नलिन्यां वै लीनोऽभूत्सुरसुन्दरि ॥९॥

ततस्तु देवतास्सर्वे शक्रान्वेषणतत्पराः ।
बभुवुः संपरिभ्रान्ता ददृशुर्नलिनीं तटे ॥१०॥

लीनं सहस्रभगवन्तं शक्रं दृष्ट्वा सुदुःखिताः ।
प्रोचुः परस्परं तत्र किं भूत्वा कुशलं भवेत् ॥११॥

बृहस्पतिः प्रत्युवाचाप्यत्रैवानन्तक्षेत्रके ।
स्नापयित्वा देवराजे सहस्राक्षफलप्रदे ॥१२॥

इति कृत्वा मतिं देवाः शक्रमुद्धृत्य पङ्कजात् ।
संस्नाप्यानन्तके तीर्थे दिव्यदेहमकारयत् ॥१३॥

सहस्राक्षस्ततः शक्रो बभूव सुररूपधृत् ।
ततः प्रोक्तं सुरैः सर्वैर्तीर्थं परमपावनम् ॥१४॥

अनेकाक्षाभिधमिदं भवत्यतिप्रसिद्धतः ।
यतः शक्रोऽप्यनेकाक्षः स्नानमात्राद्बभूव ह ॥१५॥

---

१४ कः ब सहस्राक्षः—सहस्राक्षः

ततस्तत्प्रोक्तं तन्त्रज्ञैर्ह्यनेकाक्षाभिधं परम् ।
अनेकाक्षाभिधं तीर्थं विषयो यत्र तिष्ठति ॥१६॥

ततः सविषयः प्रोक्तो ह्यनेकाक्षाभिधं पुरम् ।
मालिन्यं स्वं स्वं चालक्ष्य तीर्थं तन्मलिनं प्रिये ॥१७॥

लम्बोदर्या महानद्या वितस्तायां समाप तत् ।
अनेकाक्षेन नागेन मिलिता यत्र पावनी ॥१८॥

वितस्ता हरते पापं शतजन्मान्तरोद्भवम् ।
तत्र स्नाता पीता च स्पृष्टा च महानदीम् ॥१९॥

पूजिता वन्दिता जप्ता सर्वाघविनिवर्तिनी ।
स्नात्वा जप्त्वार्चयित्वा ह्यत्रैव च महानदीम् ॥२०॥

अक्षयं लभते पुण्यं श्राद्धं कृत्वा विशेषतः ।
ततो वितस्ता हरते कोटिजन्माघसञ्चयम् ॥२१॥

ततस्तु विजये क्षेत्रे वितस्ता भुक्तिमुक्तिदा ।
वनप्रोषे महाग्रामे हरिश्चन्द्रो वसेत्पुरा ॥२२॥

ततस्तु विजये क्षेत्रे स्नात्वा गच्छति तत्र वै ।
कपालिकगृहे तत्र श्मशाने दाहयन्शवान् ॥२३॥

आहरिश्चन्द्रक्षेत्रात्तु आचक्रेशं महेश्वरि ।
वितस्ता हरते पापं कोटिजन्मोद्भवं नृणाम् ॥२४॥

पुरा शप्ता सरस्वती ब्रह्मणः सन्निधौ प्रिये ।
दुर्वाससा तु मुनिना क्रोधेन च महात्मना ॥२५॥

शप्ता सरस्वतीत्यत्र ब्रह्मलोकावतारिता ।
महाघानक्षयं कर्तुं ततान दुश्चरंतपः ॥२६॥

दिव्यं वर्षशतं देवि निर्मला सा बभूव ह ॥२७॥

वाग्रूपा रसरूपा च भुविस्था समपद्यत ।
वाग्रूपा सर्वदेशेषु पातालाद्रसरूपिणी ॥२८॥

सरस्वत्या कृतं यत्र तपः परमदुर्लभम् ।
स एव प्रथितो ग्रामः परो वागाश्रमः प्रिये ॥२९॥

वाण्याश्रमः कृतो यत्र तपः शतं महेश्वरि ।
प्रथितस्तु ततो ग्रामः परो वागाश्रमाख्यया ॥३०॥

वितस्ता हरते पापं वावतीर्थेन च सङ्गता ।
कोटिजन्मान्तरकृतं महदण्वपि सुन्दरि ॥३१॥

चक्रेशसङ्गता चापि वितस्ता सुमहार्थदा ।
कोटिजन्मभयं पापं हरते चापि तत्क्षणात् ॥३२॥

पुरा तु मृडवा नाम तापसी दुश्चरंतपः ।
चचार सुमहाचारा दिव्यं वर्षशतं प्रिये ॥३३॥

निराहारा बभूवात्र शिवार्चनरता सदा ।
एकदास्या महत्कर्म दृष्ट्वा प्रीतोऽभवच्छिवः ॥३४॥

वरं वरय सुश्रोणि दुर्लभं ते ददाम्यहम् ।
श्रुत्वा तु वचनं तस्य शिवस्य च महात्मनः ॥३५॥

त्वद्दर्शनात्परं देव न वरं प्रार्थयाम्यहम् ।
इति श्रुत्वा वचस्तस्यास्तापस्याः स शिवः प्रभुः ॥३६॥

महाश्वेताभिधाना च मत्पार्श्वे तिष्ठ सर्वदा ॥३७॥

त्रिशूलेन तु तत्क्षेत्रं कृत्वा तु मृडवाश्रमे ।
तव नाम्नाभवत्क्षेत्रं प्रथितं भुवि दुर्लभम् ॥३८॥

वितस्ता हरते पापं मृडवाख्येन सङ्गता ।
तीर्थेन परमेशानि शतजन्मान्तरोद्भवम् ॥३९॥

इति दिव्यं वरं लब्ध्वा मृडवा नाम तापसी ।
दिव्यं विमानमारुह्य शिवलोकं जगाम सा ॥४०॥

कृतं मृडवया यत्र तापस्या तप उत्तमम् ।
ततः स ग्रामः प्रथितो मृडवाश्रमनामकः ॥४१॥

---

३९ खः ब मडवारण्येव — मृडवाख्येन

४० खः ब मडवा—मृडवा

मृडवाश्रमसमीपे तु वितस्ता पापनाशिनी ।
सर्वसिद्धिप्रदा प्रोक्ता शीघ्रसिद्धिप्रदा कलौ ॥४२॥

सर्वार्थदायिनी चैव सर्वसंपद्विवर्धिनी ।
सर्वविद्याप्रदा प्रोक्ता सर्वारिष्टनिवारिणी ॥४३॥

ज्ञानदा धनदा प्रोक्ता मानदा पुण्यवर्धिनी ।
पुत्रपौत्रप्रदा प्रोक्ता पशुपुत्रादिसम्भवा ॥४४॥

मृडवा तीर्थमिलिता मृडवाश्रमसमीपतः ।
स्नाता पीता च स्पृष्टा च जन्मान्तरशतोद्भवम् ॥४५॥

हरते पापसंघास्तु वितस्ता सुमहार्थदा ।
येनैव सङ्गता देवी वितस्ता ननु पुण्यदा ॥४६॥

इत्येष महिमा प्रोक्तो मृडवाश्रमसङ्गता ।
वितस्ताया महापुण्या सर्वपापहरा कलौ ॥४७॥

वितस्ता हरते पापं सङ्गता ऋषिकुल्यया ।
अथ भ्रूणहनं मासान्महापातकिनामपि ॥४८॥

घोरेशसङ्गता देवी नदी परमपावनी ।
वितस्ता हरते पापं जन्मान्तरकृतं नृणाम् ॥४९॥

---

४३ ख: ब सर्वादिष्ट—सर्वारिष्ट

देवा: पूजापरा आसन्दैत्याश्च वरवर्णिनि ।
उल्लोलविषये पुण्ये नाग उल्लोलनामनि ॥५०॥

ज्येष्ठाषाढभवैः पुण्यैः शम्भोर्भगवतः समैः ।
उल्लोलाद्द्धुर्भवा या वै नदी परमपावनी ॥५१॥

ज्येष्ठाषाढेति नामास्याः कथितं तु पुरातनैः ॥५२॥

तयैव मिलिता पुण्या जन्मोद्वयननामके ।
वितस्ता हरते पापं जन्मान्तरशतोद्भवम् ॥५३॥

पुरा दैत्या दानवाश्च कश्यपे तु प्रजापतिम् ।
पातालाद्दुत्थिता तत्र कश्यपं तु ययाचिरे ॥५४॥

इयममृतपूर्णासीद्घर्घरी सूरपूजिता ।
एतां तां पूरय मुने वितस्तायाः जलैः शुभैः ॥५५॥

महर्षे त्वं बलिं यामो मनोरथप्रपूरणैः ।
एवमस्त्विति तान्दैत्यानाह ब्रह्मर्षिसत्तमान् ॥५६॥

श्रुत्वैतद्वचनं देवि कश्यपस्य महात्मनः ।
प्रापूरयंस्तदा दैत्या घर्घरीं सुरपूजिते ॥५७॥

पूरयन्घर्घरीं तत्र वितस्तांतर्धिमागता ॥५८॥

तत्रान्तर्ध्यानमालोक्य वितस्ताया महामुनिः ।
जगाम शरणं तत्र भवं रुद्रं पिनाकिनम् ॥५९॥

दृष्ट्वा तु कश्यपं देवं चिन्तायानं शिवस्तदा ।
शूलं प्रहृत्य तरसा पातालमगमद्भवः ॥६०॥

दृष्ट्वा नीतां तु पाताले वितस्तापापनाशिनीम् ।
शूलेन दैत्यानुन्मूल्य प्रस्फोट घर्घरीं तदा ॥६१॥

वितस्तां मोचयामास प्रससार ततः पुनः ।
रुद्धं जलं तु पाताले दैत्यानासीन्महेश्वरि ॥६२॥

वितस्ताया महानद्याः शूलेन चालितं ततः ।
तदेव मिलितं पुण्ये तीर्थे वै जलरोधके ॥६३॥

बलिश्च दत्तस्तत्रैव शिवस्य परमात्मनः ।
वितस्ता च हृता दैत्यो घर्घरीं याच तोयतः ॥६४॥

ततः स प्रोक्तो देशो वै घर्घरीबलिसंज्ञितः ॥६५॥

यो घर्घरीबलौ स्नानं दानं जप्यमथार्चनम् ।
यज्ञमपि महेशानि ह्यनन्तफलमाप्नुयात् ॥६६॥

गिरितीर्थोद्भवजलैस्तथा भूग्रामसम्भवैः ।
विशेषतो महानागसम्भवैश्च जलैर्युता ॥६७॥

वितस्ता हरते पापं कोटिजन्मशतोद्भवम् ।।६८।।

तत्र स्नात्वा च दत्वा च कृत्वा च विधिवदर्चनम् ।
होमं पाठं तथा जप्यं ह्यनन्तफलमाप्नुयात् ।।६९।।

मुनयस्तु महापुण्ये तपो तपस्यत दुश्चरम् ।
दिव्यं वर्षशतं देवि कुवेरस्य तपोवने ।।७०।।

वितस्तायास्तटे पुण्ये शिवयोर्ध्यानतत्पराः ।
ततः प्रसन्नो भगवांस्तेभ्यो दर्शनमाययौ ।।७१।।

दृष्ट्वा ततो तदा देवमीश्वरं वरदां प्रिये ।
ववन्दुश्चरणौ तस्य तत्रैव शम्भुमैडयन् ।।७२।।

मुनयः

नमः शिवाय पुण्याय पुण्याणां पुण्यदाशुवे ।
योगिगम्याय योगाय योगानां पतये नमः ।।७३।।

ज्ञानाय ज्ञानिनां ज्ञानदाशुषे परमात्मने ।
मीढुष्टमाय शिवाधीशपशुपाशविमोचिने ।।७४।।

दीक्षिताय दीक्षितानां दीक्षाफलविधायिने ।
दानाच्च कर्मसंघानामघानां क्षयतस्ततः ।।७५।।

दीक्षेति नाम्ने शर्वाय परमार्थाय ते नमः ।
शिवात्मकाय महते वायुतत्त्वाय वै नमः ।।७६।।

यत्स्वरूपाय देवाय तत्तदात्मानुसारिणे ।
विद्यातत्त्वाय महते शान्तितत्त्वाय वै नमः ॥७७॥

शोधकाय बोधकाय बोधसत्त्वाय वै नमः ।
विस्तृताय विरूपाय विरुपाक्षाय ते नमः ॥७८॥

विश्वरूपाय विश्वेशविश्वज्ञानाय ते नमः ।
दिवाभूमिस्वरूपाप बाहुतीशाय वै नमः ॥७९॥

द्युचराय द्युवासाय युक्तपाय च ते नमः ।
शमाय शान्तिरूपाय शान्ताय शमिने नमः ॥८०॥

शम्भवे शंविदधते श्रमिनां ते नमो नमः ।
कालाय कालगम्याय कालज्ञानप्रमोदिने ॥८१॥

कालाकालाय देवाय महाकालाय ते नमः ॥८२॥

भैरव उवाच

इति स्तुत्वा महादेवमृषयः प्रणताः स्थिताः ।
दण्डवत्पुरतो देवि महाकालं परार्थदम् ॥८३॥

प्रणतांस्तु मुनीन्दृष्ट्वा महाकालः प्रभुः प्रिये ।
प्रच्छन्दयामास तदा वरेण वरदः प्रभुः ॥८४॥

वृणध्वं मुनयो यं वो वरं मनसि वाञ्छितम् ।
दुर्लभं वोपदास्यामि योगिनामपि सर्वदा ॥८५॥

श्रुत्वा विभो वचः सौम्यं प्रत्यूचुर्मुनयः प्रभुम् ।
योगसिद्धिं प्रशम्यामो वरदा तु महर्थदम् ॥८६॥

मुनीनां वचनं श्रुत्वा तथेत्युक्त्वा महेश्वरः ।
प्रोवाच च पुनर्देवि मुनींस्तान्भावितात्मनः ॥८७॥

यूयं सिद्धास्ते मुनयो मत्प्रसादाद्भविष्यथ ।
इदं तु क्षेत्रं नद्यां वै त्वन्नाम्नैव भविष्यथ ॥८८॥

यः कश्चिदत्र परमो योगमास्थाय तिष्ठति ।
नारी वा पुरुषो वापि सोऽपि सिद्धो भविष्यति ॥८९॥

इति दत्वा वरं तेषामुनीनां भावितात्मनाम् ।
पश्यतां चैव सर्वेषां तत्रैवान्तर्धिमागतः ॥९०॥

यत्र ते मुनयो देवि जग्मुः सिद्धिमभीप्सिताम् ।
ततः प्रभृति सिद्धेति तत्क्षेत्रं प्रथितं भुवि ॥९१॥

सिद्धक्षेत्रे नरः स्नात्वा कृता यज्ञादिकाः क्रियाः ।
अतिरात्रस्य यज्ञस्य फलमाप्नोत्यनन्तकम् ॥९२॥

भूयो भूयो किमुक्तेन कलौ घोरे सुदुस्तरे ।
सिद्धक्षेत्रसमं क्षेत्रं दिव्यभूम्यन्तरिक्षगम् ॥९३॥

वितस्तायास्तटे पुण्ये न भूतं न भविष्यति ॥९४॥

इत्येतत्कथितं पुण्यं वितस्तायाः फलं महत् ।
सिद्धक्षेत्रेण युक्तायाः कलौ मलविमोचनम् ॥६५॥

इत्येष पटलो गुह्यो महापुण्यफलप्रदः ।
यत्र तत्र न वक्तव्यो ह्यन्यथा विघ्नदो भवेत् ॥६६॥

इति श्रीवितस्तामाहात्म्ये सिद्धक्षेत्रादिवर्णनं
नाम षष्ठः पटलः ॥६॥

---

६६ कः व गुह्यं— गुह्यो

## अथ सप्तमः पटलः

भैरव्युवाच

स्मारं स्मारं महादेव वितस्तास्नानजं फलम् ।
सिद्धक्षेत्रे महापुण्ये कृतार्थास्मि न संशयः ॥१॥

इदानीं श्रोतुमिच्छामि तत्तोयञ्चैव किं फलम् ।
वितस्ताया महानद्याः स्नानदानजपादिभिः ॥२॥

भैरव उवाच

शृणु देवि प्रवक्ष्यामि वितस्तास्नानजं फलम् ।
यच्छ्रुत्वा मुच्यते जन्तुः कोटिजन्मभवैरघैः ॥३॥

सुस्नाता तु यवांन्या वै वितस्ता च महानदी ।
अश्वमेधादियज्ञोऽर्थं फलं दास्यत्यनुत्तमम् ॥४॥

ततष्टंकवने पुण्ये तुष्टक्षेत्रेण सङ्गता ।
वितस्ता हरते पापं शतजन्मोद्भवं नृणाम् ॥५॥

अस्मिन्वने पुरा देवि त्वष्टा सूर्यः प्रतापवान् ।
च निस्तेजाष्टंकेनोल्लिखितः प्रिये ॥६॥

---

२ खः ब तत्तोयश्चैव—तत्तोयञ्चैव

ततः प्रसिद्धिमगमद्ग्रामाष्टंकवनाभिधः ॥७॥

टङ्केनोत्थितमेतत्तु क्षेत्रं परमपावनम् ।
तत्तोयसङ्गता देवी वितस्ता पातकोपहा ॥८॥

वारेशाद्रुद्रगङ्गायां जलेन सह सङ्गता ।
वितस्ता हरते पापं जन्मान्तरशतोद्भवम् ॥९॥

पारेशक्षीरराष्ट्रोत्थतोयैश्च सह संगता ।
वितस्ता हरते पापं पुण्यं दास्यत्यनुत्तमम् ॥१०॥

आकाशपूरात्सिक्तारिमारवेन च सङ्गता ।
वितस्ता दहते पापं स्नानदानजपार्चनैः ॥११॥

मारवेन यथा क्षुद्रा दैत्याः पातुं महानदीम् ।
आगता मोहिता तेन शम्भुना च महात्मना ॥१२॥

क्षुद्राः प्रमोहिता यत्र वितस्ताविघ्नकारिणः ।
मोहिता मायया शम्भोस्ततः प्रख्यातिमागतः ॥१३॥

ग्रामस्तु क्षुद्रमोहाख्यो महापातकनोदनः ।
आक्षुद्रमोहाद्वेशि पाक्तं शोकहृतायुधः ॥१४॥

वितस्ता हरते पापं यत्र तत्रावगाहता ॥१५॥

ततो लजावने पुण्ये तु तुङ्गे च महानदी ।
यावज्जलोन्मितीर्थं वै पुण्यपापापनोदनम् ॥१६॥

ददाति पुण्यं देवेशि यत्र तत्रावगाहिता ।
अश्वमेधादियागोऽर्थं चान्द्रायणशतोद्भवम् ॥१७॥

शप्तानां पार्षदानां वै देव्या परमक्रुद्धया ।
स्नानार्थं - - वितस्ताया वाञ्छिता पार्षदाभवन् ॥१८॥

वाञ्छितान्पार्षदांदृष्ट्वा शिवः परमक्रोधनः ।
शूलेन रुद्धा देव्यत्र जलोर्मिरभवत्प्रिये ॥१९॥

द्वितीयधारया देवि त्रिशूलस्य वरानने ।
घातेन नालोक्यभवद्वितस्ताजलपूरिताः ॥२०॥

तदेव ह्यभवद्दिव्यं सरः पुण्यफलप्रदम् ।
तदेव पुण्यं देवेशि वितस्तानालसंज्ञितम् ॥२१॥

महापापहरं देवि किन्नराश्रमसन्निधौ ।
स वै पुण्या नदी दिव्या वितस्तानालसङ्गता ॥२२॥

पापं हरते पुण्यं वै वर्धते वै महानदी ।
वितस्तानालयुक्ता च स्नानदानजपादिभिः ॥२३॥

वितस्तानालयुक्तायां वितास्तायां महेश्वरि ।
स्नात्वा दत्वा च विधिवत्पुण्यमाप्नोति पुष्करम् ॥२४॥

वितस्तानालयुक्तायां नद्यां यः स्नाति मानवः ।
स याति ब्रह्मभवनं यत्र गत्वा न शोचते ॥२५॥

संक्रान्तौ रविवारे च द्वादश्यां च विशेषत: ।
अमायां पूर्णिमायां च स्नानदानजपार्चनै: ॥२६॥

तप: स्वाध्यायपठनैर्श्राद्धैरपि महेश्वरि ।
वितस्तानालयुक्ता च वितस्ता सुमहानदी ॥२७॥

ददाति विपुलां सिद्धिं यश: कीर्तिमनुत्तमम् ।
अन्ते सायुज्यमाप्नोति तद्विष्णो: परमं पदम् ॥२८॥

शिवलोकमवाप्नोति सत्यं सत्यं वरानने ॥२९॥

भैरव्युवाच

कस्मिन्काले महेशान प्रभुना प्रकटीकृता ।
वितस्ता सुमहाभागा जन्तूनां हितकाम्यया ॥३०॥

कदा कुत्र च स्नातापि विशेषफलदायिनी ।
महाफलप्रदा प्रोक्ता वितस्ता पापनाशिनी ॥३१॥

वद मे कृपया देव निश्चितं परमेश्वर ॥३२॥

भैरव उवाच

श्रृणु देवि प्रवक्ष्यामि वितस्तास्नानजं फलम् ।
यस्य श्रवणमात्रेण वाजपेयफलं लभेत ॥३३॥

पुरा भाद्रपदे मासि सिंहसंस्थे दिवाकरे ।
पातालाच्छ्रीभगवता वितस्ता प्रकटीकृता ॥३४॥

त्रयोदश्यां शुक्लपक्षे विशेषात्फलदायिनी ।
द्वादश्यां श्रीवामनेन तथा क्रमसरो वरात् ॥३५॥

विसृष्टा जगदीशानि विशोका शोकनाशिनी ।
भाद्रशुक्लत्रयोदश्यां स्नाता पुण्यफलप्रदा ॥३६॥

श्रावणीं तु समारभ्य यावत्प्रौष्ठपदीं नर: ।
गोमयेन वितस्तायां स्नात्वाग्निष्टोमावाप्नुयात् ॥३७॥

इमं समांगं वरदं वितस्ताख्यं महेश्वरि ।
दृष्ट्वा स्नात्वा च विधिवन्मुच्यते ब्रह्महत्यया ॥३८॥

स्नात्वा भाद्रपदे मासि विजयेश्वरसन्निधौ ।
अश्वमेधसहस्रस्य प्राप्नोत्यविकलं फलम् ॥३९॥

विजयेशे महेशानि वितस्तोत्तरवाहिनी ।
तत्र स्नात्वा च दृष्ट्वा च प्रीता च वरमुक्तिदा ॥४०॥

विना ज्ञानं विना ध्यानं विना दानं महेश्वरि ।
विना समाधिं देवेशि मनसाराधनं विना ॥४१॥

त्र्यहं स्नात्वा महेशानि विजयेशसमीपत: ।
हरिश्चंद्रस्य तीर्थे वै मोक्षमाप्नोति मानव: ॥४२॥

---

३७ घ: ब अग्निष्टोसमाप्नुयात्—अग्निष्टोमावाप्नुयात्

ब्रह्महत्या मातृहत्या गोहत्या च विशेषत: ।
हरिश्चंद्रस्य तीर्थे च स्नातानां वै विनश्यति ॥४३॥

अत्र स्नात्वा महेशानि पुरा ह्यैल: पुरूरव: ।
स्त्रीत्वशापाद्विनिर्मुक्तोऽभूदिति सत्यं वदाम्यहम् ॥४४॥

तस्मान्नरै: पातकिभिर्विजयेश्वरसन्निधौ ।
हरिश्चन्द्राख्यतीर्थे वै स्नातव्यमविशङ्कया ॥४५॥

स्तेयजात्पातकाद्देवि तथा च गुरुतल्पजात् ।
हरिश्चद्रे वितस्तायां स्नात्वा मुच्येदसंशयम् ॥४६॥

बन्धनान्मुच्यते बद्धो मुच्येदापन्न आपद: ।
सङ्कटी सङ्कटान्मुच्येत्स्नानात्तीर्थे न संशय: ॥४७॥

प्रयागे नैमिषारण्ये गोष्पदे च महेश्वरि ।
कुरुक्षेत्रे गवां कोटिदानाद्यल्लभते नर: ॥४८॥

तत्फलं समवाप्नोति हरिश्चन्द्रस्य स्नानत: ।
चान्द्रायणसहस्रैश्च वाजपेयशतैश्च किम् ॥४९॥

यदि भाद्रपदे मासि सेविता वै महानदी ।
विशेषेण हरिश्चन्द्रे विजयेशसमीपत: ॥५०॥

तपोभिरुग्रैर्विविधैश्च योगैः
पुण्यैस्तथा कृच्छ्रपराकसञ्ज्ञैः ।
फलं यदुक्तं विविधाप्रयुक्तैः
स्नानात्तदाप्नोति हि चन्द्रतीर्थे ॥५१॥

कलौ पापविनाशाय महेशेन विनिर्मितम् ।
हरिश्चंद्राख्यमेतद्धि स्नातानां पुण्यदं फलम् ॥५२॥

हरिश्चन्द्रे महातीर्थे म्रियते यश्च मानवः ।
तस्य वै दक्षिणे काले तारकं प्रवदेच्छिवः ॥५३॥

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
मृतस्तीर्थे हरिश्चन्द्रे मोक्षमाप्नोत्यसंशयम् ॥५४॥

ब्राह्मणः क्षत्रियो वापि वैश्यः शूद्रस्तथैव च ।
स्त्रियोऽप्यत्र मृता देवि मुच्यते नात्र संशयः ॥५५॥

मुक्तिक्षेत्रमिदं देवि सिद्धक्षेत्रमनुत्तमम् ।
बुद्धिक्षेत्रमिदं देवि वृद्धिक्षोत्रमिदं महत् ॥५६॥

हरिश्चन्द्रस्य राजर्षे मोक्षदं परमं प्रिये ।
अत्र स्नात्वा च दत्वा च श्राद्धं कृत्वा विधानतः ॥५७॥

मुच्यते पातकैर्घोरैस्तथा मोक्षमवाप्नुयात् ॥५८॥

स्नाता वितस्ताविजयेशसन्निधौ
तीर्थे हरिश्चन्द्रमुनेर्महेशि ।
ददाति पुण्यं विपुलां च कीर्ति
मृतस्य जन्तोर्भवबन्धमोक्षम् ॥५६॥

हरते पातकं घोरं चन्द्रमश्च तमश्च यत् ।
तस्माद्वै हरिचन्द्राख्यं प्रथितं भुवनत्रये ॥६०॥

हरिश्चन्द्रस्य तीर्थस्य माहात्म्यममरोत्तमे ।
श्रुत्वा पठित्वा मुच्यते महापातकसञ्चयात् ॥६१॥

पुनः स्नातव्यं महेशानि लम्बोदर्याश्च सङ्गमे ।
मुच्यते पातकैर्घोरैर्महापातकसञ्चयैः ॥६२॥

गवां कोटिप्रदानाच्च विधिना वेदपारगे ।
यत्फलं च कुरुक्षेत्रे राहुग्रस्ते दिवाकरे ॥६३॥

तत्फलं समवाप्नोति स्नात्वा लम्बोदरीजले ।
किं पुनः सङ्गमे देवि वितस्ताया विशेषतः ॥६४॥

आधिं हरते व्याधिं च विघ्नांश्चैव विशेषतः ।
लम्बोदरीजलं देवि वितस्ताजलसङ्गतम् ॥६५॥

विशेषेण पुनः स्नायात्तीर्थं देवकनिर्मितम् ।
स्नानकाले देवकेन मुनिना जाह्नवी स्मृता ॥६६॥

वितस्ताया जले पुण्ये जाह्नवी मुनिना स्मृता ।
वितस्ताया जले पुण्ये जाह्नवीं समुदर्चयत् ॥६७॥

उवाच च मुनिं देवी वृणीष्वेति मुहुर्मुहुः ।
प्रत्युवाच मुनिस्तांच सन्निधिं कुरु सुव्रते ॥६८॥

अस्मिन्वितस्तातीर्थे वै सर्वपापहरे शुभे ।
एवमस्त्विति वोवाच गङ्गा तमृषिमुत्तमम् ॥६९॥

सन्निधास्याम्यहं पुत्र वितस्ता जल उत्तमे ।
लोकान्समुद्धरिष्यामि दुस्तराद्भवसागरात् ॥७०॥

पितृहनं गोहनं च मातृहनं विशेषतः ।
अन्यान्पातकिनश्चैव मोक्षयिष्यामि मा शुचः ॥७१॥

इत्युक्तं देवकं देवी तत्रैवान्तरधीयत ।
तस्मात्सर्वप्रयत्नेन स्नातव्यममरोत्तमे ॥७२॥

देवकस्य मुनेस्तीर्थे परं मोक्षमवाप्सुभिः ।
घोरे कलौ महादेवि विजयेशसमीपतः ॥७३॥

देवकस्य मुनेस्तीर्थं वितस्तामध्यगं शुभम् ।
सर्वपापहरं प्रोक्तं सर्वारिष्टनिवारितम् ॥७४॥

सर्वदुष्टप्रशमनं सर्वाशुभविनाशनम् ।
इत्थं तीर्थं देवकस्य मुनेः परमपावनम् ॥७५॥

स्वर्गदं स्वर्गकामानां मोक्षदं मोक्षकामिनाम् ।
कामानां कामदं नित्यं पुत्रिणां पुत्रदं परम् ॥७६॥

स्वर्गापवर्गयोर्द्वारं तीर्थं देवकसंज्ञकम् ।
श्रुत्वा माहात्म्यमेतस्य मुच्यते ब्रह्महत्यया ॥७७॥

इति श्रीवितस्तामाहात्म्ये विजयेश्वरादितीर्थवर्णनं
नाम सप्तमः पटलः ॥७॥

## अथ अष्टमः पटलः

भैरव्युवाच

श्रुत्वा वितस्तामाहात्म्यं विजयेशसमीपतः ।
कृतार्थास्मि कृतार्थास्मि क्रीतास्मि जगदीश्वर ॥१॥

विस्तारेण पुनर्ब्रूहि कुत्र कुत्र महानदी ।
विशेषफलदा प्रोक्ता स्नातानां जगदीश्वर ॥२॥

भैरव उवाच

शृणु देवि परं गुह्यं वितस्तास्नानजं फलम् ।
यस्य श्रवणमात्रेण चान्द्रायणफलं लभेत् ॥३॥

पुरा नारायणो देवि विजयेशसमीपतः ।
स्वयंभू शम्भुमाश्रित्य पूजयामास भक्तितः ॥४॥

कमलानां सहस्रेण पूजयन्भक्तितः शिवम् ।
तथा पूजयतस्तस्य कमलानां सहस्रकम् ॥५॥

एकोनमकरोत्तस्य पश्यन्भक्तिशिवः स्वयम् ।
दृष्ट्वैकोनं सहस्रं तु कमलानां जनार्दनः ॥६॥

स तापमकरोद्देवि खण्डितार्चो विभोस्ततः ।
पुनर्मनसि निश्चित्य देवदेवो जनार्दनः ॥७॥

स्वेनैव नेत्रपद्मेन पूजयामि भवं विभुम् ।
इति तं पूजयामास स भवानीपतिमुत्तमम् ॥८॥

स्वेनैव नेत्रपद्मेन तेन तुष्टः शिवः स्वयम् ।
उवाच वचनं देवं वृणीष्वेति वरं मुहुः ॥९॥

स प्रत्युवाच तं देवं विजयेशं शिवं तदा ।
दृष्टं तव पदाम्भोजमस्मात्को वर उत्तमः ॥१०॥

यस्मिंस्तव पदाम्भोजे भूयान्मे भक्तिरुत्तमा ।
इत्येव वादिनं विष्णुं प्रोवाच जगदीश्वरः ॥११॥

एवमस्त्विति देवेश वरं दास्ये तथापि ते ।
इत्युक्त्वा भगवान्विष्णुश्चचालासनात्ततः ॥१२॥

आविष्णुर्महेशानि ज्वालाचक्रमशेषतः ।
तदेव चक्रमभवद्दैत्यान्तकरणं महत् ॥१३॥

---

७ अयं पाठः 'ब' मातृकातः सम्पादितः

११ ब: मा जगदेश्वर,—जगदीश्वर:

तज्ज्वालाकुलिता: सर्वे जना देव्यभवन्पुर: ।
तुष्टवुस्ते महादेवं वाग्भिस्तथ्याभिरीश्वरि ॥१४॥

तेषां स्तुत्या प्रसन्नोऽभून्महेशो जगदम्बिके ।
ज्वालाचक्रे वितस्ताया साक्षिपज्जगदीश्वर: ॥१५॥

तत्रैव च महेशेन चक्रे नारायणेऽर्पितम् ।
आयुधं दानवानाञ्च दैत्यानाञ्च विशेषत: ॥१६॥

उद्घातादभवद्देवि वितस्ताजल उत्तमे ।
तीर्थं चक्राख्यमेतद्धि वितस्तामध्यगं प्रिये ॥१७॥

तस्मात्स्नायाद्वितस्तायां चक्रतीर्थे विशेषत: ।
ब्रह्महत्यादिपापानां प्रायश्चित्तं यदीच्छसि ॥१८॥

वाराणस्यां कल्पवासाद्यत्बलं लभते नर: ।
तत्फलं समवाप्नोति चक्रतीर्थे विशेषत: ॥१९॥

चक्रतीर्थसमीपे तु पातकांश्चाप्यनेकश: ।
वितस्ता दहते नित्यं शुष्केन्धनमिवानल: ॥२०॥

---

१४ क: मा तज्ञाला—तज्ज्वाला

ग: तुष्टव—तुष्टवु:

२० क: मा सममीपे—समीपे

अन्यतीर्थे कृतं पापं चक्रतीर्थे प्रणश्यति ।
चक्रतीर्थे कृतं पापं न तत्र प्रणश्यति ॥२१॥

अकामो वा सकामो वा स्नायाच्चक्रेश्वरे प्रिये ।
ज्ञानं प्राप्य महेशानि परं ब्रह्माधिगच्छति ॥२२॥

चान्द्रायणसहस्रैस्तु पारणैः कोटिभिः प्रिये ।
यत्फलं लभते मर्त्यो विद्यादानात्तथैव च ॥२३॥

वितस्ताचक्रयोगे च स्नात्वा तत्फलमाप्नुयात् ।
मुक्तिकामो मोक्षमेति स्नात्वा चक्रेशसन्निधौ ॥२४॥

कुष्ठी ह्यत्र वितस्तायां चक्रतीर्थे विशेषतः ।
रोगाद्विमुच्यते जन्तुर्नात्र कार्या विचारणा ॥२५॥

मातृगामी स्वसृगामी गुरुतल्पग एव च ।
सम्पूज्य विधिवत्मासे देवदेवं महेश्वरम् ॥२६॥

तस्मात्पापात्प्रमुच्येत इति सत्यं वदाम्यहम् ॥२७॥

---

२१ गः मा चक्रतीर्थं—चक्रतीर्थे

२३ खः मा पारार्कैः—पारणैः

कोटिकोटिसहस्रं तु पातकं जगदम्बिके ।
वितस्ताचक्रतीर्थे च स्नानं दहति तत्क्षणात् ॥२८॥

गोहत्यां मातृहत्यां च पितृहत्यां वरानने ।
दहेत्स्नात्वा चक्रतीर्थे तूलराशिमिवानिल: ॥२९॥

चक्रतीर्थं समं तीर्थं न भूतं न भविष्यति ।
कृपया परमेशेन कलौ घोरे महेश्वरि ।३०॥

भूतानां पुण्यहीनानां हिताय प्रकटीकृतम् ।
यथा चक्रस्य पुरत: सर्वतो दैत्यदानवा: ॥३१॥

विनश्यन्ति महेशानि तथा पापान्यनेकश: ।
चक्रस्नानात्क्षयं यान्ति विद्रवन्ति दिशो दश ॥३२॥

यथा विष्णो: परं नास्ति ह्यायुधं च प्रिये करे ।
तथा चक्रेशसदृशं तीर्थं नास्ति च भूतले ॥३३॥

तिलमात्रं ह्यत्र दत्वा मेरुतुल्यफलं लभेत् ।
शाकैरपि महेशानि श्राद्धं कृत्वा विधानत: ॥३४॥

चक्रतीर्थस्य पितरो वसेयुश्च चिरं दिवि ।
क्षीरखण्डाज्यभोज्यैश्च गोप्रदानैर्महेश्वरि ॥३५॥

---

३२ ग: मा चक्रस्नात्—चक्रस्नानात्
३४ ख: मा मेडतुल्य—मेरुतुल्य

ब्राह्मणस्तर्पयेद्भक्त्या यथोक्तं फलमाप्नुयात् ॥३६॥

श्राद्धं मनसि यः कृत्वा प्रयाति स्वगृहाद्यदि ।
आस्फोटयन्ति नृत्यन्ति प्रीतास्तस्य पितामहाः ॥३७॥

पुत्रकामा पुरा ह्यत्र पार्वती जगदीश्वरी ।
पूजयित्वालभत्पुत्रं कुमारममितद्युतिम् ॥३८॥

शची ह्यत्र पुरा सस्नौ चक्रेश्वरसमागमे ।
जयन्तं नाम पुत्रं सा लेभे शत्रुनिसूदनम् ॥३९॥

व्यासोऽप्यत्र पुरा स्नात्वा ह्यत्र चक्रेशे वारिणि ।
शुकं नामालभत्पुत्रं सज्ञं ब्रह्मरूपिणम् ॥४०॥

अकामो वा सकामो वा स्नातव्यममरेश्वरि ।
इच्छद्भिः परमां सिद्धिं तथा मोक्षमभीप्सुभिः ॥४१॥

---

३९ घ: मा लभे—लेभे

शत्र—शत्रु

४० क: मा व्यासोत्य—व्यासोऽप्यत्र

ख: चक्रेशि—चक्रेशे

ग: अलभेत्—अलभत्

४१ घ. मा अभीपसुभि:—अभीप्सुभिः

दुर्लभं मानुषं जन्म द्विजत्वं तत्र मानुषम् ।
तत्रापि भारतं क्षेत्रं तत्रापि सतीसरः ॥४२॥

तत्रापि च जगदीशानि वितस्ता च महानदी ।
तत्रापि दुर्लभो देवि वितस्ताचक्रसङ्गमः ॥४३॥

देवा अपि हि काङ्क्षन्ते वितस्ताचक्रसङ्गमे ।
अस्मिन्हि भारते वर्षे नृणां पातकिनां कलौ ॥४४॥

मोहवंशात्तेषां बुद्धिर्यतो नरकगामिनः ।
वितस्ताचक्रसङ्गमे च भुवि तिष्ठन्ति सर्वदा ॥४५॥

तथापि मनुजा नित्यं नराः निरयगामिनः ।
त्रैलोक्ये यानि तीर्थाणि तानि चक्रेशसङ्गमे ॥४६॥

मलं प्रक्षालयन्त्यत्र महापातकिसम्भवम् ।
इदं तीर्थं परं गोप्यं दुर्लभमकृतात्मनाम् ॥४७॥

रक्षितं पार्षदैर्देवि मम नित्यमसंशयम् ।
भक्तिहीनं नरं देवि पार्षदा विघ्नयन्ति तम् ॥४८॥

तस्माच्छुद्धेन मनसा स्नातव्यमविशङ्कया ।
भूयो भूयः किमुक्तेन कृतं देवेन शम्भुना ॥४९॥

कथितं परमं पथ्यं संसारज्वरनाशनम् ।
इति ते कथितं सर्वं विजयेशसमीपतः ॥५०॥

वितस्ताचक्रयोर्योगं गोपनीयं महेश्वरि ॥५१॥

इदं पठित्वा पटलं श्रुत्वा भक्तिसमीपतः ।
चक्रेशस्नानजं पुण्यं फलं सर्वमवाप्नुयात् ॥५२॥

इति श्रीभृङ्गीशसंहितायां श्रीवितस्तामाहात्म्यवर्णने
चक्रेशमहिमावर्णनं नाम पटलः ॥८॥

## अथ नवमः पटलः

श्रीदेव्युवाच

स्मारं स्मारं महादेव त्वन्मुखांबुजनिस्सृतम् ।
चक्रतीर्थस्य माहात्म्यं कृतार्थास्मि न संशयः ॥१॥

चक्रतीर्थसमं तीर्थं न भूतं न भविष्यति ॥२॥

सोमतीर्थे च यः स्नात्वा कुर्याद्धि पितृतर्पणम् ।
गच्छन्ति पितरस्तस्य देवेशि परमां गतिम् ॥३॥

राजयक्ष्मयुतो रोगी यः कुर्यात् सोमदर्शनम् ।
सद्यः स रोगनिर्मुक्तः प्राप्नोति परमं पदम् ॥४॥

यः पुमान्विधिवत्स्नात्वा कृत्वा सन्ध्यां तथेश्वरि ।
कुर्याच्छ्राद्धविधानेन ह्यत्र देवि सुरेश्वरि ॥५॥

पितरस्तस्य देवेशि महापापयुता अपि ।
गच्छन्ति परमं स्थानं यत्र न स्यात्पुनर्भवः ॥६॥

---

१ खः मा त्वमुखां—त्वन्मुखां

२ गः मा श्लोके पाठोऽधिकः

४ घः मा परमां—परमं

ततो वितस्तां दृष्ट्वा तु विवृद्धो रक्षसांगण: ।
विशीर्णां कर्तुमुद्युक्तस्तत्र चैवाजगाम ह ॥७॥

दृष्ट्वा घोरं समायान्तं राक्षसानां गणं तदा ।
वितस्ताया महानद्याः कलरूपोऽभवच्छिव: ॥८॥

श्यामापि तत्र दृष्ट्वैव महाकालं महेश्वर: ।
आलिलिङ्ग महेशानी वितस्तायास्तटेऽनुत्तमे ॥९॥

विशीर्णां कर्तुमुद्युक्तं रक्षसांगणमीक्ष्य व ।
जज्वाल चाग्निवत्तत्र महाकालो महेश्वरि ॥१०॥

ज्वालामालाकुलं दृष्ट्वा रक्षसांगण उत्तम: ।
भस्मीभूतस्तु तद्दृष्ट्वा पपात विधिना हत: ॥११॥

महाकालस्वरूपोऽभूद्यत्र दग्धो महेश्वर: ॥१२॥

रक्षसांश्च तत: प्रोक्तो महाकालो महेश्वरि ।
महाकाले नर: स्नात्वा मुच्यते घोरपातकै: ॥१३॥

---

८ घ: मा रूपोभविच्चिव—रूपोऽभवच्छिव:

९ घ: मा वितस्तातट—वितस्तायास्तटेऽनुत्तमे

१० ग: मा जडाल—जज्वाल

वितस्तायां नरः स्नात्वा महाकालस्य सन्निधौ ।
न लिम्पते महापापैर्ब्रह्महत्यादिकैरपि ॥१४॥

ततः सस्नौ महाकालो पुण्ये गङ्गाखने जले ।
श्यामाभवत्सापि तत्र प्रेक्ष्यात्र चिन्तमिश्वरम् ॥१५॥

ज्वालाकुलितमीशानं शिवक्रोधसमन्वितम् ।
प्रोवाच देवीं गङ्गां तां शमयैनं विचक्षणे ॥१६॥

श्रुत्वा देव्या वचो देव्या नागेन महिमा प्रिये ।
अर्न्तहिताभवत्सद्यो सहन्ती क्रोधमीशितुः ॥१७॥

नागेन सहतां गङ्गां रत्नचूडेन वै प्रिये ।
मिलितां वीक्ष्य तत्रैवाशपत्क्रुद्धा महेश्वरी ॥१८॥

यस्मादनाधृत्य वचो समनागेन सङ्गता ।
तस्मादनेन नागेन सह शीर्णा भविष्यसि ॥१९॥

---

१५ खः मा गगाखने—गङ्गाखने

१७ खः मा महमा—महिमा

१८ खः मा शुडेब—चूडेन
गः बीक्ष—वीक्ष्य

उपास्य च महाकाली महाकालस्य सन्निधौ ।
धनमायुस्तथा पुत्रा पशूंश्च जगदम्बिके ॥२०॥

प्राप्नोति परमं पुण्यं ह्यन्ते सायुज्यमेव च ।
त्रयस्त्रिंशत्कोटयश्च देवानामितो जगाम ॥२१॥

कालमर्चितुमायान्ति सर्गयोरुभयोरपि ।
नमस्करोति देवेशि तत्र काली समाहिता ॥२२॥

सा प्रसन्नाभवत्काली इति सुष्टु वदामि ते ॥२३॥

कालेशमन्त्रं सम्पूज्य विधिना प्रयतो नरः ।
भैरवं रूपमासाद्य परमानन्दनिर्वृतः ॥२४॥

देवतघ्नो कुविधिना यः कालेशं समर्चयेत् ।
स याति भैरवं रूपं यत्र नास्ति कृताकृतम् ॥२५॥

श्रुत्वा शापं तदा देवी नागेन सह सङ्गता ।
सस्नौ तत्र वितस्तायां देवीशापापनुत्तये ॥२६॥

---

२१ ध: मा जसाक – जगाम

२३ ध: मा सुष्ट वदासिते – सुष्टु वदामि ते

२६ ध: मा अपरत्तये – अपनुत्तये

येन मार्गेण सा देवी नागेन सह सङ्गता ।
गङ्गाखनिरिति ख्यातो देश: परमपावन: ॥२७॥

गङ्गाखनिसमीपे तु वितस्ताया: जले शुभे ।
स्नात्वा पुण्यमवाप्नोति ज्योतिष्टोमादिजागजम् ॥२८॥

गङ्गाखनौ कृतं पुण्यं मेरुतुल्यं भवेत्प्रिये ।
पापमपि महेशानि सत्यं सत्यं वरानने ॥२९॥

रत्नचूडोऽपि नागेशो वितस्ताजलसङ्गमे ।
सस्नौ पुन: पुनर्देव्या: शापपापापनुत्तये ॥३०॥

गङ्गां नागौ तत: स्नानाद्भूत्वा तौ निर्मलौ प्रिये ।
मिलितौ तौ महादेवि महाकालेन वै तदा ॥३१॥

तदा प्रभृति वै देवि ख्यातं रत्नसरो भुवि ।
अशुचितं परं प्राप्तं स्थानं नागस्य तस्य हि ॥३२॥

तस्माद्रत्नसरोदेशे तथा गङ्गाखनौ प्रिये ।
स्नानं दानं तपो होम: स्वाध्यायश्च जपस्तथा ॥३३॥

अक्षयं च भवेत्पुण्यं सत्यं सत्यं वरानने ।
महाकालात्समपतियावल्लक्ष्मीक्षयं नर: ॥३४॥

---

३२ क: मा प्रत्यति—प्रभृति

३३ क: मा रत्नशरी—रत्नसरी

स्नानाद्दानाज्जपाद्धोमात्स्वाध्यायात्पितृतर्पणात् ।
मुच्यते च नरः सद्यो महापातककोटिभिः ॥३५॥

इति ते कथितं देवि महाकालाभिधं परम् ।
वितस्तायाः जले पुण्ये तीर्थं परमपावनम् ॥३६॥

श्रुत्वा पठित्वा मुच्येत ब्रह्महत्यादिकोटिभिः ॥३७॥

इति श्रीवितस्तामाहात्म्ये महाकालवर्णनं
नाम पटलः ॥९॥

## अथ दशमः पटलः

ॐ श्रीभैरव्युवाच

स्मारं स्मारं महादेव त्वन्मुखाम्बुजनिस्सृतम् ।
चक्रतीर्थस्य माहात्म्यं कृतार्थास्मि न संशयः ॥१॥

चक्रतीर्थस्य माहात्म्यं कृतार्थास्मि न संशयः ।
चक्रतीर्थसमं तीर्थं नास्ति भूमौ तथा दिवि ॥२॥

क्रीतास्मि जगदीशान माहात्म्यकथनेन च ।
चक्रेश्वरस्य तीर्थस्य विजयेशसमीपतः ॥३॥

काश्याः शतगुणं प्रोक्तं विजयेशे महेश्वर ।
त्वयेव कथितं देवस्नानदानजपार्चनैः ॥४॥

इदं गुह्यं गुह्यतमं श्रुतं त्वन्मुखपङ्कजात् ॥५॥

इदानीं श्रोतुमिच्छामि वितस्ताया फलं महत् ।
विस्तारेण पुनर्ब्रूहि कृपया परमेश्वर ॥६॥

भैरव उवाच

वक्ष्ये पुनर्वितस्ताया महिमानमनुत्तमम् ।
गम्भीरसङ्गमे देवि वितस्ता फलदायिनी ॥७॥

प्रोक्ता विशेषतो देवि मोक्षदा तन्त्रपारगैः ।
गम्यते भीरतिमोक्षं स्नातानां ह्यत्र सुन्दरि ॥८॥

महाराज्यप्रदं प्रोक्तं तस्माद्गम्भीरसङ्गतम् ।
गम्यते भव भीर्यत्र रमेशासङ्गमे प्रिये ॥९॥

स्नातानां कथितं देवि तस्माद्गम्भीरसङ्गतम् ।
यत्र स्नात्वा गतभया मोक्षार्हाश्च भवन्ति हि ॥१०॥

तस्मादुक्तं पुराविद्भिर्जलैर्गम्भीरसङ्गतम् ।
ज्ञानाद्भयसीरयन्ति महासंसारसागरात् ॥११॥

तन्त्रज्ञैः कथितं तस्मात्पुण्यं गम्भीरसङ्गतम् ॥१२॥

मातृहत्यां पुरा कृत्वा भार्गवो जमदग्निजः ।
तुङ्गे हिमगिरे पुण्ये चचार सुमहत्तपः ॥१३॥

त्रिःसप्तकृत्वा वसुधां ददौ यो विप्रसत्तमान् ।
विजित्य क्षत्रियान्देवि महाबलपराक्रमान् ॥१४॥

तच्छोणितैः मातृगण स्तर्पयित्वा महेश्वरि ।
श्यामाराधनसंयुक्तो बभूव जगदीश्वरि ॥१५॥

सम्यगाराधिता देवि सुप्रसन्ना बभूव ह ।
दर्शयामास स्वं तस्मै देवि श्यामा महेश्वरि ॥१६॥

श्यामां सरोजवदनामदविह्वलाङ्गीं
कुम्भस्तनीं श्लथकाश्यमरुणात्रिनेत्राम् ।
पाशाङ्कुशाभयवरैरपि युक्तबाहुं
गङ्गाधरीं शशिकलामपि बिभ्रतीं च ॥१७॥

इतीदृशीं महादेवीं दृष्ट्वा भृगुपतिर्मुनिः ।
ननाम दण्डवद्भूमौ श्यामां तां जगदीश्वरि ॥१८॥

स्तुत्वा तां स्तुतिभिः सम्यग्देवीं भूयो न सद्भुवि ।
उत्थाप्य च जगद्धात्री श्यामा राममुवाच ह ॥१९॥

वरं वृणीष्व पुत्रेति श्यामा भार्गवपुङ्गवम् ।
श्रुत्वा देव्या वचो देवि भार्गवः प्रत्युवाच ताम् ॥२०॥

भगवत्या दर्शनेन कृतार्थास्मि न संशयः ।
मातृहत्यापातकाच्च विभेमि सुतरामहम् ॥२१॥

इदानीं देवदेवेशि प्रायश्चित्तं वदस्व मे ।
मुक्तो स्याम्येन देवेशि पापान्मातृवधोत्थितम् ॥२२॥

श्रुत्वा देवी वचस्तस्य भार्गवस्य महात्मनः ।
अवदच्छ्लक्ष्णया वाचा श्यामा भृगुपतिं तदा ॥२३॥

मोक्षयिष्यामि त्वां मातृहत्यापापाच्च मा शुचः ।
इत्युक्तो देवदेवेशी करे कृत्वा च तं तदा ॥२४॥

पीतयित्वापतद्गङ्गासम्मुखं भार्गवस्य हि ।
रामे दत्वा महागङ्गा तत्रैवान्तरधीयत ॥२५॥

गङ्गां दृष्ट्वा तदा रामो ननाम च कृताञ्जलिः ।
स्नात्वा तत्र च गङ्गायां मुक्तो मातृवधादपि ॥२६॥

यतः केशान्निपीड्येवं ददौ रामाय सुन्दरि ।
गङ्गामातृवधार्थं च तस्माद्रामेश्वरी मता ॥२७॥

रामेश्वर्या वितस्तायाः सङ्गे गम्भीरकाभिधे ।
स्नानान्मुक्तिमवाप्नोति सत्यं सत्यं वरानने ॥२८॥

गोष्पदे नैमिषारण्ये सूर्यक्षेत्रे विशेषतः ।
यत्फलं लभते मर्त्यः स्नानदानजपार्चनैः ॥२९॥

तत्फलं लभते देवि स्नात्वा गम्भीरसङ्गमे ।
वाराणस्यां प्रयागे च कुरुक्षेत्रे महेश्वरि ॥३०॥

तुलापुरुषदानाद्यैर्ग्रहणे सूर्यचन्द्रयोः ।
पुरश्चर्यामवाप्नोति जप्त्वा गम्भीरसङ्गमे ॥३१॥

होमं कृत्वा महेशानि पुण्ये गम्भीरसङ्गमे ।
अश्वमेधमवाप्नोति वाजपेयफलं लभेत् ॥३२॥

तिलमात्रमपीशानि शुभे गम्भीरसङ्गमे ।
पात्रेऽर्पयित्वा प्राप्नोति मेरुतुल्यफलं तथा ॥३३॥

विष्णुपूजनमप्यत्र कृत्वा पूजाफलं लभेत् ॥३४॥

पञ्चायतनपूजां यः करोत्यत्र विधानतः ।
यमस्तस्य करोत्याशु नरस्य लिपिमार्जनम् ॥३५॥

गोघ्नो वापि कृतघ्नो वा परनिन्दारतोऽपि वा ।
न स दुर्गतिमाप्नोति स्नात्वा गम्भीरसङ्गमे ॥३६॥

अश्वमेधसहस्रेण वाजपेयशतेन च ।
यत्फलं समवाप्नोति स्नात्वा तु तीर्थ उत्तमे ॥३७॥

गम्भीरकाभिधे देवि प्राप्नोति विकलं फलम् ।
चान्द्रायणसहस्रैश्च कृच्छ्रैः संतपनैस्तथा ॥३८॥

जलकृच्छ्रैर्महादेवि प्राजापत्यैस्तथैव च ।
सम्यक्चीर्णैर्महेशानि यत्फलं प्राप्नुयान्नरः ॥३९॥

तत्फलं समवाप्नोति स्नात्वा गम्भीरसङ्गमे ।
वाराणस्यां कल्पवासात्प्रयागे कोटिवासतः ॥४०॥

यत्फलं लभते मर्त्यो गंगायाः स्नानलक्षतः ।
तत्फलं लभते देवि स्नात्वा गम्भीरसङ्गमे ॥४१॥

न सङ्गमं समं तीर्थं न सङ्गमसमा गतिः ।
न सङ्गमं समं पुण्यं पावनं जगदम्बिके ॥४२॥

सङ्गमे च महादेवि कीटकोऽपि मृतो यदि ।
तस्य कर्णे स्वयं देवो जपेत्तारकमुत्तमम् ॥४३॥

विना ध्यानं विना ज्ञानं विना चेन्द्रियनिग्रहम् ।
यदृच्छया मृतो ह्यत्र मोक्षमाप्नोत्यसंशयम् ॥४४॥

गम्भीरसङ्गमे देवि विधिना म्रियते तु यः ।
तस्यैव दक्षिणे कर्णे तारकं जपते शिवः ॥४५॥

मृतो मोक्षमवाप्नोति न शोचति कृताकृते ॥४६॥

श्वा चापि म्रियते ह्यत्र पुण्ये गम्भीरसङ्गमे ।
सोऽपि वैकुण्ठमाप्नोति नात्र कार्या विचारणा ॥४७॥

गम्भीरसङ्गमसमं तीर्थं परमपावनम् ।
दिवि भूमौ तथाकाशे न भूतं न भविष्यति ॥४८॥

गम्भीरसङ्गमे श्राद्धं ये कुर्वन्ति नरोत्तमाः ।
कल्पं तावद्देवि दिवि मोदन्ते तत्पितामहाः ॥४९॥

गम्भीरसङ्गमे दानं दत्तं लक्षगुणं भवेत् ।
गम्भीरसङ्गमे यज्ञं कृत्वा देवि विधानतः ॥५०॥

वाराणस्याः शतगुणं भवत्येव न संशयः ।
इदं पुषस्यमायुष्यं पुण्यं पापप्रणाशनम् ॥५१॥

गम्भीरसङ्गमाख्यातं तीर्थं परमपावनम् ।
वेण्याः शतगुणं पुण्यं स्नात्वा प्राप्नोति सुन्दरि ॥५२॥

इति ते कथितं तीर्थं गम्भीराख्यं महेश्वरि ।
वितस्तामध्यगं देवि महापुण्यप्रदं नृणाम् ॥५३॥

श्रुत्वैतत्पटलं सम्यक्पुण्यदं पाठकस्य च ॥५४॥

इदं तीर्थवरं देवि तव प्रीत्या प्रकाशितम्
गोपनीयं गोपनीयं कलौ सर्वजनेष्वपि ॥५५॥

इति श्रीभृङ्गीशसंहितायां वितस्तामाहात्म्ये गम्भीरसङ्गमवर्णनं
नाम दशमः पटलः ॥१०॥

# अथैकादशः पटलः

भैरव्युवाच

श्रुत्वा गम्भीरकाख्यस्य तीर्थस्य परमेश्वर ।
माहात्म्यं पुण्यदं नृणां कृतार्थास्मि न संशयः ॥१॥

क्रीतास्मि जगदीशान माहात्म्यं कथनेन हि ।
गम्भीरसङ्गमाख्यस्य तीर्थस्य परमेश्वर ॥२॥

कलौ घोरे त्वया देव पुण्यं तीर्थं प्रकाशितम् ।
स्मारं स्मारं महादेव निर्वृत्तास्मि महार्णवात् ॥३॥

पुनर्ब्रूहि वितस्ताया महिमानमनुत्तमम् ।
श्रुत्वापीमां सरिच्छ्रेष्ठां न तृप्तिर्जायते मम ॥४॥

कृपया परया देव लोकानां हितकाम्यया ॥५॥

भैरव उवाच

शृणु देवि पुनर्वक्ष्ये वितस्तास्नानजं फलम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥६॥

पुनस्स्नायान्महादेवि जलोड्डयनके तथा ।
वाजपेयमवाप्नोति तीर्थे परमपावने ॥७॥

पुण्ये जलोड्डयनके मिलिता च महानदी ।
तल्लोलिन्या महानद्याः ज्येष्ठाषाढाख्यया पुनः ॥८॥

स्नाता पीता च दृष्ट्वा च महापातकध्वंसिनी ।
रामेश्वरी वितस्ता च विशोका च महानदी ॥९॥

समेत्य ननृतुर्यत्र तत्रैवोड्डीयते जलम् ।
जलोड्डयनके तीर्थं स्पृष्ट्वा च जगदम्बिके ॥१०॥

नरस्तु मुच्यते पापैर्ब्रह्महत्यादिकैरपि ।
अन्योऽन्यनर्तनार्तासां जलमुड्डीयते यद्गतम् ॥११॥

तस्मात्तीर्थमिदं प्रोक्तं जलोड्डयनकं परम् ।
जलोड्डयनके तीर्थे स्नात्वा मुच्येत सङ्कटात् ॥१२॥

यत्र नर्तनतस्तासां जलमुड्डीय वै गतम् ।
तस्मात्प्रथितो ग्रामो जलोड्डयनकः परः ॥१३॥

जलोड्डयनकं देवि तीर्थं परमपावनम् ।
गव्यूति मात्रं साग्रं वै सिद्धक्षेत्रं परं स्मृतम् ॥१४॥

सिद्धक्षेत्रे नरः स्नात्वा दृष्ट्वा वा जलमन्ततः ।
मुच्यते पातकैर्जन्तुर्महापातकैरपि ॥१५॥

ब्रह्महत्यां भ्रूणहत्यां गोहत्यां जगदम्बिके ।
गुरुतल्पगजं पापं सिद्धक्षेत्रं व्यपोहति ॥१६॥

जलोड्डयनकं दृष्ट्वा मुच्यते ब्रह्महत्यया ।
तदादिरामलक्ष्म्यं ते तीर्थं परमपावनम् ॥१७॥

वितस्ता वरदा प्रोक्ता सिद्धिदापि महेश्वरि ।
पुरा दाशरथिरामस्तीर्थकामश्चचार ह ॥१८॥

पुण्ये हिमवतस्तुङ्गे तस्य श्रीः स्वमदर्शयत् ।
दृष्ट्वा तु तां स्वयं देवि मुमुहे रघुनन्दनः ॥१९॥

श्रीश्चापि सस्वजे रामं प्रीत्या दाशरथिं तदा ।
रसे मग्नो दाशरथिर्विस्मयं परमं गतः ॥२०॥

किं स्विद्रसे निमग्नोऽहं श्रीवाचालिङ्गजश्चिरम् ।
ब्रह्मचर्यात्परिभ्रष्टो भविष्यामीत्यचिन्तयत् ॥२१॥

तस्माद्गच्छेति गच्छेति न च चालयतः पुनः ।
तदा तपस्वी रामस्तां शशाप चिरमुत्सुकाम् ॥२२॥

यस्माद्रसे निमग्नोऽहं तव दर्शनमात्रतः ।
तस्माद्रसस्वरूपा त्वं भविष्यसि महानदी ॥२३॥

इति शप्त्वा तदा तेन रामेण श्रीर्ययौ तदा ।
नदी भूत्वा प्रादुद्राव रामाश्रमसमीपतः ॥२४॥

दृष्ट्वा रामो नदीं ताञ्च गच्छन्तीं त्वरितं तदा ।
अन्वगच्छत्तथा यान्तीं क्रोधादासन्नवीक्षताम् ॥२५॥

अथैकादश: पटल:

तथान्वयायिनीं देवीं रामो दृष्ट्वा सरिद्वरा ।
व्यामोहमसृजन्निद्रां रामो वै भृगुनन्दने ॥२६॥

यस्माद्विमोहितो राम: सरिता सुरसुन्दरि ।
ग्राम: स राममोहाख्य: पुरा प्रोक्तं मनीषिभि: ॥२७॥

तस्माद्रामश्रियो देवि सङ्गमे प्रपतन्नर: ।
स्नात्वा मुक्तिमवाप्नोति नात्र कार्या विचारणा ॥२८॥

रामश्रीसङ्गमे देवि पूजनीय: प्रयत्नत: ।
शिवस्तु शिवया युक्तो महापुण्यफलप्रद: ॥२९॥

इति श्रीवितस्तामाहात्म्ये रामश्रीवितस्तासङ्गमनामैकादश:
पटल: ॥११॥

## अथ द्वादशः पटलः

भैरव उवाच

रामश्रियो वितस्तायां सङ्गमे जगदम्बिके ।
ब्रह्महत्यां मातृहत्यां गुरुहत्यां व्यपोहति ॥१॥

पुरा जयन्तो देवक्या: स्तनौ काको व्यदारयत् ।
दृष्ट्वा तु तं तथोन्मत्यं जयन्तं रघुनन्दनः ॥२॥

कुशं संमन्त्र्य देवेशि तस्मै काकाय चाक्षिपत् ।
रामास्त्रदग्धो काकस्तु शरणं नालभच्छिवे ॥३॥

भ्रान्ताद्देशमनीकं स रामः श्रीसङ्गमं पुनः ।
प्राप्तोऽपि नाप्तवांशर्मरामास्त्राभिहतः खलु ॥४॥

विलुपित्वा मुहुर्देवि गन्तुकामः पुर्नदिवम् ।
तस्मात्तीर्थात्काकवरा उत्तस्थूलजगदम्बिके ॥५॥

ऐन्द्रं ते कुशलं देवि पप्रच्छुर्विनयान्विताः ।
स तानुवाच बलिभुगपराधात्कृतो मया ॥६॥

जानक्याः स्तनसंस्पर्शो लोकद्वयविनाशनः ।
मलं क्षयालितं शीघ्रमुपायं वदतानघाः ॥७॥

श्रुत्वा वचो जयन्तस्य काका ऊचुः परस्परम् ।
काकजातेर्महानर्थः सम्भूतः शर्मनाशनः ॥८॥

इत्युक्त्वान्योऽन्यमूचुस्तं किमर्थं पातं कृतम् ।
अत्र स्नाहि वितस्तायाः रामलक्ष्याश्च सङ्गमे ॥९॥

विधिना त्रिदिनं मित्र क्षीणपापो गमिष्यसि ।
क्षीणपापस्ततो याहि शरणं रघुनन्दनम् ॥१०॥

स कृपालुस्ततोऽस्मांहि रक्षत्येव न संशयः ।
इत्युक्तास्ते काकवरा वरुणा ऐन्द्रिणा सह ॥११॥

स्नात्वा तीर्थवरे पुण्ये क्षीणपापस्ततोऽभवन् ।
ऐन्द्रियैः रमयामासुर्भोगैः नानाविधैर्प्रिये ॥१२॥

रामश्रियो वितस्तायाः सङ्गः परमपावनः ।
काकानपालयत्पूर्वं पापाद्देवापराधतः ॥१३॥

काकपूरे वितस्तायास्तीर्थे परमपावने ।
स्नात्वा दत्वा च जप्त्वा च श्राद्धं कृत्वा विधानतः ॥१४॥

धर्ममर्थञ्च कामञ्च मोक्षमाप्नोत्यसंशयम् ॥१५॥

काकपूरात्समारभ्य यत्र क्वापि सरिद्वरा ।
यावज्जलेश्वरं तीर्थं महापुण्यप्रदा हि सा ॥१६॥

विख्यातं काकपूरस्य माहात्म्यं वरवर्णिनि ।
इदानीं शृणु देवेशि तीर्थं परमपावनम् ॥१७॥

जलेश्वराभिधं देवि वितस्तामध्यगं शुभम् ।
येन श्रवणमात्रेण वाजपेयफलं लभेत् ॥१८॥

गर्जमानाः पुरा देवि मिलित्वा च परस्परम् ।
वितस्ताया महानद्याः प्लावयन्त्यः सतीसरः ॥१९॥

गच्छन्त्यो ददृशुस्तत्र मातृगामिनमव्रतः ।
दृष्ट्वा तत्रैव पातालं जग्मुस्ताः सममेकधा ॥२०॥

प्रजापतिस्तदा दृष्ट्वा ह्यन्तर्भूतां महानदीम् ।
मनसा भावशुद्धेन प्रययौ शरणं शिवम् ॥२१॥

निराहारो महादेवि शिवमराधयन्तदा ।
वर्षात्प्रसन्नो भगवान्प्रजापतिमुवाच ह ॥२२॥

वरं वृणीष्व भद्रं ते ददाम्येव न संशयः ।
कश्यपस्तु उवाचेदं श्रुत्वा देववचः प्रिये ॥२३॥

वितस्ता जगदीशान नदीभिः सहिता पुनः ।
अन्तर्धानं गता देव पुनस्तां दातुमर्हसि ॥२४॥

श्रुत्वा प्रजापतिवचः पुनः प्रोवाच तं शिवः ।
महापातकिनं दृष्ट्वा नदी याता तलातलम् ॥२५॥

नदीभि: सहिता यावदुद्धरिष्ये सरिद्वराम् ।
इहैव रन्ध्रे स्थास्येऽहं जलमिश्रं स्वयं तत: ॥२६॥

ततो वै जलरुद्धाख्यं तीर्थमेतद्भविष्यति ।
तत: शिव:समुद्धृत्य नदीभि: सहिताञ्च ताम् ॥२७॥

पुनस्तेनैव रन्ध्रेण गता पातालमेव सा ।
शिवेन सानीता देवी नदीभि: सहिता शुभा ॥२८॥

तमुवाच सरिच्छ्रेष्टा भगवन्तमनामयम् ।
केन यास्याम्यहं देव पथा वद महेश्वर ॥२९॥

महापातकिसंसर्गाद्विभेम्यहमनुत्तमम् ।
संश्रुत्य वाक्यं देव्यास्तु शिव: प्रोवाच तां पुन: ॥३०॥

सारवेण पथा गच्छ वितस्ते स्वयमोजसा ।
पुनर्दृष्ट्वा पातकिनं पुनर्याता तत: शिवम् ॥३१॥

शिव: प्रत्यवदद्देवीमनेनैव पथा व्रज ।
रुद्ध्वा जलमत्र स्थास्ये तव पुण्यं सरिद्वरे ॥३२॥

नदीभिस्सहिता याहि पावयन्ती सतीसर: ॥३३॥

यस्मादत्र जलं रुद्ध्वा ह्यतिष्ठदभगवांशिव: ।
वितस्ताया महानद्यास्तस्माद्वै जलरुद्धकम् ॥३४॥

जलरुद्धे नर: स्नात्वा मुच्येत्पातककोटिभि: ।
ब्रह्महापि विमुच्यते नात्र कार्या विचारणा ॥३५॥

मेरुतुल्यकृतैः पापैः स्नात्वा वै जलरुद्धके ।
मुच्यते ब्रह्महत्याद्यैरिति सत्यं वदामि ते ॥३६॥

किं पुनर्बहुनोक्तेन नरः पातकवान्कलौ ।
विशेषतः प्रमुच्येत जलरुद्धस्य दर्शनात् ॥३७॥

समीपे मेरुदेशस्य पुण्ये तीर्थवरे प्रिये ।
जलरुद्धाभिधे स्नात्वा मुच्यते ब्रह्महत्यया ॥३८॥

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
स्नात्वा मुक्तिमवाप्नोति पुण्ये वै जलरुद्धके ॥३९॥

जलरुद्धे नरः स्नात्वा महापातककोटिभिः ।
दर्शनादपि मुच्येत ह्युपपातककोटिभिः ॥४०॥

देवा भाद्रत्रयोदश्यां शुक्लपक्षस्य वै प्रिये ।
स्नातुमायान्ति ते सर्वे कलौ प्रच्छन्नरूपिणः ॥४१॥

तस्मात्सेव्यं महेशानि तीर्थं वै जलरुद्धकम् ॥४२॥

अकामो वा सकामो वा स्नात्वा वै जलरुद्धके ।
मुक्तिमाप्नोति मनुजः सत्यं सत्यं वदामि ते ॥४३॥

इति श्रीभृङ्गीशसंहितायां भैरवीभैरवसम्वादे काकपुरजलरुद्धवर्णनं
नाम द्वादशः पटलः ॥१२॥

## अथ त्रयोदशः पटलः

भैरव उवाच

शृणु देवि वितस्ताया महिमानमनुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥१॥

विहारविषये पुण्ये समाजः सुमहानभूत् ।
पुरा सिद्धमहर्षीणां ध्यायतां परमं महः ॥२॥

कश्यपस्य ततो वीर्यं दृष्ट्वा तु तां नदीम् ।
ते सिद्धाः शोकसंयुक्ताः शिवाराधनतत्पराः ॥३॥

तुष्टुवुश्चापि मन्त्रैश्च तां नदीं पापनाशिनीम् ।
सिद्धानां स्तुतिभिश्चापि कश्यपाराधनेन च ॥४॥

समुद्धरंस्तत्र धरां प्रसन्नः परमेश्वरः ।
नदीभिः सहिता तत्र वितस्ता पापनाशिनी ॥५॥

सुप्रसन्नाभवत्तेषां सिद्धानां जगदीश्वरि ।
उवाच तां नदीं देवीं प्रसन्नास्मि चिरं हि वः ॥६॥

वरं वृणुत दास्यामि देवानामपि दुर्लभम् ।
श्रुत्वा नद्या वचः सिद्धाः प्रत्यूचुस्तां महानदीम् ॥७॥

त्वद्दर्शनादृतेऽस्माकं वद कोऽन्यो वर उत्तमः ।
यस्या संदर्शनादेव जन्तुर्मुच्येत पातकात् ॥८॥

किं पुनः स्पर्शनैः स्नानैर्जपैर्होमैस्तथार्चनैः ।
तथाप्ययं वरो देवि भव त्वं पूर्ववाहिनी ॥९॥

अस्माकमाश्रमात्पुण्यात्याचयन्ती प्रयाहीतः ।
यस्मात्ते पूर्ववाहिन्याः पुण्यं कोटिगुणं महत् ॥१०॥

तस्मादाश्रमतोऽस्माकं भव त्वं पूर्ववाहिनी ।
इति तेषां वचः श्रुत्वा तथेत्युक्ता महानदी ॥११॥

सारवेण पथा देवि भूता वै पूर्ववाहिनी ।
नदीभिस्सहिता तत्र सिद्धानन्तसमारसा ॥१२॥

तदा प्रभृति देवेशि सिद्धाश्रमसमीपतः ।
पुण्यप्रदा वितस्ता सा ह्यभवत्पूर्ववाहिनी ॥१३॥

दृष्ट्वा वहन्ती पूर्वस्यां दिशि सिद्धा महेश्वरि ।
बभुवुर्हर्षसंयुक्ताः स्नानदानक्रियारताः ॥१४॥

तस्मात्स्नायात्प्रयत्नेन प्राग्वाहिन्याः जले शिवे ।
मुच्यते पातकैः सर्वैर्ब्रह्महत्यादिकैरपि ॥१५॥

सेन्द्राः सुरासुरा देवि वितस्ता पूर्ववाहिनीम् ।
स्नातुमायान्ति सकला गन्धर्वाप्सरसांगणाः ॥१६॥

सर्वे देवगणास्तत्र भैरवं जलरोधकम् ।
सौवर्णैः कमलैर्देवि ह्यानर्चुर्भक्तिभाविताः ॥१७॥

निर्माल्य कमलैर्देवि सिद्धाश्रमसमीपतः ।
सम्पूर्णा ह्यभवत्तत्र नदी परमपावनी ॥१८॥

पद्मैः प्रपूरितैर्यस्मात्सिद्धानामाश्रमोऽभवत् ।
तस्माद्वै पद्मपूराख्यो ग्रामो ख्यातिमुपागतः ॥१९॥

पद्मपुरे महातीर्थे नरः स्नात्वा महेश्वरि ।
मुच्यते पातकैर्घोरैर्गुरुहत्यादिकैरपि ॥२०॥

सिद्धक्षेत्रे महादेवि स्नात्वा मुच्येत सङ्कटात् ॥२१॥

कुरुक्षेत्राच्छतगुणं वेण्याः पञ्चाधिकं शतम् ।
सहस्रगुणितं देवि काश्यां वासात्स्मृतं बुधैः ॥२२॥

सिद्धक्षेत्रे वितस्तायाः प्राग्वाहिन्या महेश्वरि ।
स्नानं दानं तपो होमो जपः स्वाध्याय एव च ॥२३॥

इति च पूर्ववाहिन्या माहात्म्यं कथितं तव ।
श्रुत्वा पठित्वा मुच्येत घोरैः पातकसञ्चयैः ॥२४॥

इति श्रीभृङ्गीशसंहितायां वितस्तामाहात्म्ये पद्मपुरसिद्धक्षेत्र-
महिमावर्णनं नाम त्रयोदशः पटलः ॥१३॥

## अथ चतुर्दशः पटलः

भैरव उवाच

पुनश्चलन्ती चारुह्य पातालाद्वृद्धरक्षसा ।
नदीभिः सहिता पीता वितस्तापापनाशिनी ॥१॥

पद्मस्थिताञ्च चामुण्डां प्रणम्य विधिवद्बुधाः ।
ऊचुश्च तां महादेवीं रक्ष सा रक्ष सा नदी ॥२॥

रक्ष रक्ष वितस्तां त्वं घोराद्वै वृद्धरक्षसः ।
इति श्रुत्वा देववचश्चामुण्डा पापनाशिनीम् ॥३॥

मुद्गरशूलपरशूंश्च सृणिं चादाय सुन्दरि ।
जगाम तरसा तत्र यत्र प्रीता महानदी ॥४॥

प्रणाशितां तत्र दृष्ट्वा घोररूपेण रक्षसा ।
क्रोधमाहारयाञ्चक्रे चामुण्डा रक्षसां प्रति ॥५॥

क्रोधरक्तेक्षणं दृष्ट्वा राक्षसः परमेश्वरीम् ।
उज्जगार नदीं तत्र दुद्राव च तप्तो सरः ॥६॥

प्रदवन्तं ततो दृष्ट्वा राक्षसं परमेश्वरी ।
प्रतिदुद्राव तं क्रूरं राक्षसं रक्तलोलुपा: ।।७।।

गणै: सार्धं महादेवी चामुण्डा मुण्डनाशिनी ।
दृष्ट्वा पतन्तीं देवेशीं राक्षस: पापनिश्चय: ।।८।।

शक्त्या जघान चामुण्डा भिद्यते हृदयं तत: ।
तत: क्रुद्धा जगन्माता चामुण्डा जगदम्बिके ।।९।।

पृष्टे जघान देवेशी राक्षसं मुद्गरेण सा ।
मुद्गरेण हतो दैत्य: संशयं परमं गत: ।।१०।।

ततश्चकार मायां तामासुरीं जगदीश्वरि ।
अयुध्यच्च तया सार्धं रूपं कृत्वा तु दन्तिन: ।।११।।

ततस्तं सृणिना देवी जघान परमेश्वरी ।
सृणिना निहतो दैत्य: पपात पृथिवीतले ।।१२।।

मूर्च्छितं पतितं देवी खडगेन निरकृन्तत ।
शिर: प्रतिभयाकारं गजरूपस्य रक्षस: ।।१३।।

जग्मुस्तां ततो देवीं स्व गणा एव सुन्दरि ।
दृष्ट्वा तांहसतो देवी गणाद्वा जगदम्बिके ।।१४।।

गणां षोडशसाहस्रां शशाप क्रोधमूर्च्छिता ।
यस्मान्मे परिहासं वै कुर्वन्तो गर्वमानिन: ।।१५।।

तस्माद्वै राक्षसा क्रूरा भविष्यथ न संशयः ।
इति शप्ता महादेव्या गणास्तेजो विना कृताः ॥१६॥

प्रत्यूचुस्ताञ्च चामुण्डां क्षमस्वेति मुहुर्मुहुः ।
शापार्णवनिमग्नात्र उद्धरस्व महेश्वरि ॥१७॥

अनुनीता पुनर्देवी गजस्तान्प्रत्युवाच सा ।
नोद्धरामि गणान्युष्मान्मदान्धान्क्रूरनिश्चयान् ॥१८॥

इत्युक्त्वा शिर आदाय गजरूपस्य रक्षसः ।
उद्धमज्जद्यतो रक्षस्तस्मिन्राष्ट्रे समाक्षिपत् ॥१६॥

ततः प्रभृति देवेशि तीर्थं परमपावनम् ।
वितस्तायामभूत्पूर्वं नाम्ना वै हस्तिमुण्डकम् ॥२०॥

यस्माद्देव्याः शिरच्छित्वा गजरूपस्य रक्षसः ।
समाक्षिपन्समादाय रन्ध्रे राक्षसनिर्मिते ॥२१॥

तस्मात्प्रोक्तं हि तन्त्रज्ञैस्त्वर्थं वै हस्तिमुण्डकम् ॥२२॥

हस्तिमुण्डे नरः स्नात्वा स्पृष्ट्वा वा जलमन्ततः ।
नरो मुक्तिमवाप्नोति सत्यं सत्यं वरानने ॥२३॥

इति कृत्वा महादेवी तीर्थं वै हस्तिमुण्डकम् ।
जगाम स्वं महास्थानं पर्वते पाददृष्टिके ॥२४॥

इति ते कथितं देवि वितस्तातीर्थसञ्चयम् ।
श्रुत्वा पठित्वापि नरो वाजपेयफलं लभेत् ।।२५।।

इत्येतत्पटलं गुह्यं महापातकनाशनम् ।
पठित्वाप्यश्वमेधस्य प्राप्नोत्यविकलं फलम् ।।२६।।

इति श्रीवितस्तामाहात्म्ये हस्तिमुण्ड(क) वर्णनं
नाम चतुर्दशः पटलः ।।१४।।

## अथ पञ्चदशः पटलः

भैरव उवाच

श्रृणु वक्ष्यामि देवेशि तीर्थं सीमाप्रपूरकम् ।
यच्छृन्वन्नपि वै जन्तुर्वितस्तास्नानपुण्यभाक् ॥१॥

पुरा जिववने पुण्ये तक्षको नाम नागराट् ।
सर्पकोटिपरिवृत: क्षयञ्चक्रे मनोहरम् ॥२॥

प्रसार महानागो योजनायामविस्तृतम् ।
भूमिभागं समावृत्य वृतो नागैर्महावृषैः ॥३॥

सर्पैः प्रदूषितां दृष्ट्वा वितस्तां तां महानदीम् ।
प्रशोचं ह्यवदत्तस्मै तक्षकं नागमुत्तमम् ॥४॥

यस्मात्प्रदूषिता दुष्ट तव नागैर्महानदी ।
फलं प्राप्स्यसि तस्मात्त्वं नागदुष्टस्वभावजम् ॥५॥

एतच्छ्रुत्वा वचस्तस्य कश्यपस्य महात्मनः
उवाच श्लक्ष्णया वाचा कश्यपं नरपुङ्गवम् ॥६॥

---

६ घ: ब नरपुं वतकधरः—नरपुङ्गवम्

धरमुनेः सीमां नियम्यैतां वासं पूरयतः ।
प्रभो ! पारं गताः सर्पा निर्विषा हि भवन्त्युत ॥७॥

क्रोधमायच्छ ब्रह्मर्षे क्षमस्वानुग्रहं कुरु ॥८॥

इति वचस्तथ्यं तक्षकस्याथ कश्यपः ।
सीमां प्रापूरयत्तत्र दृषद्भिस्तक्षकस्य सः ॥९॥

तदा प्रभृति देवेशि सीमां पारे परं गता ।
वितस्तामध्यगाः सर्पा निर्विषा हि भवन्त्युत ॥१०॥

सीमा प्रपूरिता ह्यत्र कश्यपेन महात्मना ।
तक्षकस्य पुरेशानि तस्मात्सीमाप्रपूरकम् ॥११॥

सीमापूरे नरः स्नात्वा महापातकवान्कलौ ।
गोवधादपि मुच्येत नात्र कार्या विचारणा ॥१२॥

इति ते कथितं देवि तीर्थं वै परमाद्भुतम् ।
सीमाप्रपूरकाख्यं हि महापातकनाशनम् ॥१३॥

भैरव उवाच

इदानीं शृणु देवेशि तीर्थमर्थावचायनम् ।
यच्छृण्वन्प्रपठन्मुच्येज्जन्मान्तरभवैरघैः ॥१४॥

———————————

१२ खः ब महापातवान्—महापातकवान्

पुरा चतुर्मुखं देवि ब्रह्माणं कमलोद्भवम् ।
ब्रह्मर्षिदेवर्षिगणसिद्धविद्याधरोरगैः ॥१५॥

सावित्र्या चाथ गायत्र्या सरस्वत्या च सेवितम् ।
हिमालयगिरिश्रृङ्गे वसन्तं पावनो मुनिः ॥१६॥

चतुर्वेदार्थतत्त्वं हि बुभूषुर्व्यास आययौ ।
दृष्ट्वा चतुर्मुखं तत्र प्रसन्नवदनाम्बुजम् ॥१७॥

चिन्वन्वेदार्थतत्त्वं हि व्यासो वाक्यमथाब्रवीत् ।
परमार्थं हि वेदानां भगवन्वद विस्तरात् ॥१८॥

श्रुत्वैतद्वचनं ब्रह्मा व्यासस्याद्भुतकर्मणः ।
उवाच परमार्थं हि वेदानां तु विशेषतः ॥१९॥

व्याचिनोच्च मुखात्तस्य ब्रह्मणः परमात्मनः ।
वेदार्थतत्त्वं परमं महर्षिर्व्यास उत्तमः ॥२०॥

श्रुत्वा वेदार्थतत्त्वार्थञ्चतुर्मुखमुखात्ततः ।
बभूव परमप्रीतः समाध्युपरतो मुनिः ॥२१॥

बद्धपद्मासनस्तत्र वितस्तातीर उत्तमे ।
शिवध्यानपरो भूत्वा विषयेभ्य उपारमत् ॥२२॥

यस्माद्वेदार्थविचयः कृतो व्यासेन धीमता ।
चतुर्मुखाद्देवि वितस्तातीर उत्तमे ॥२३॥

तस्मात्प्रोक्तं पुरा देवि तीर्थमर्थावचायनम् २४।।

व्याचिनोदसंघातमवश्यमपि वै मुनिः ।
तीर्थमर्थावचयमिति तस्मात्प्रोक्तं पुरातनैः ।।२५।।

अर्थावचायने तीर्थे व्यासासनसमीपतः ।
यः स्नाति मानुषो नित्यं तस्य पुण्यफलं शृणु ।।२६।।

गवां कोटिसहस्रस्य सम्यग्दत्तस्य यत्फलम् ।
कुरुक्षेत्रे सुपात्राय ग्रहणे चन्द्रसूर्ययोः ।।२७।।

तत्फलं लभते मर्त्यः स्नात्वा त्वर्थावचायने ।
वाराणस्यां प्रयागे च गङ्गासागरसङ्गमे ।।२८।।

कल्पवर्षं महादेवि यत्फलं लभते नरः ।
तत्फलं समवाप्नोति स्नात्वा त्वर्थावचायने ।।२९।।

गोष्पदे नैमिषारण्ये प्रयागे मकरे रवौ ।
स्नात्वा यत्फलमाप्नोति तत्फलमत्र स्नानतः ।।३०।।

---

२५ कः ब व्यादिनीत — व्याचिनोत्

गः तीर्थमर्थावाच्यं — तीर्थमर्थावचयं

२९ घः ब त्वर्थावचाते — त्वर्थावचायने

प्राप्नुयाद्यः कुरुक्षेत्रे ग्रहणे चन्द्रसूर्ययोः ।
स्नात्वा तत्फलमाप्नोति तीर्थे ह्यर्थावचायने ॥३१॥

चान्द्रायणेऽनयत्पुण्यं कृच्छ्रैः सांतपनैस्तथा ।
अश्वमेधाद्वाजपेयाज्ज्योतिष्टोमादिभिर्मखैः ॥३२॥

यत्फलं लभते मर्त्यः स्नात्वा ह्यर्थावचायने ।
भूयो भूयः किमुक्तेन नरः पातकवान्कलौ ॥३३॥

सम्यगर्थावचायिन्यां स्नात्वा मुक्तिमवाप्नुयात् ।
किं तस्य बहुभिस्तीर्थैर्वाजपेयादिभिर्मखैः ॥३४॥

यः स्नाति च वितस्तायां चतुर्मुखसमीपतः ।
इत्थं तीर्थं महादेवि तीर्थं यत्परमं महत् ॥३५॥

माहात्म्यं परमं गुह्यं तव स्नेहात्प्रकाशितम् ।
श्रुत्वैतत्पटलं गुह्यं महापातकनाशनम् ॥३६॥

स्मरन्पठन्नवाप्नोति वाजपेयफलं नरः ॥३७॥

इति श्रीवितस्तामाहात्म्ये सोमाप्रपूरकार्थावचायन-
महिमा नाम पञ्चदशः पटलः ॥१५॥

## अथ षोडशः पटलः

*भैरव उवाच

श्रृणु देवि पुनर्वक्ष्ये वितस्तास्नानजं फलम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातकजैः फलैः ॥१॥

ततः स्नायान्महेशानि कुरुक्षेत्रादिसङ्गमे ॥२॥

सीमापूरात्समारभ्य यावत्पाददृष्टिके शिवे ।
वितस्ता हरते पापं जन्मान्तरकृतं नृणाम् ॥३॥

भैरव्युवाच

अनन्तो महिमा देव निस्सृतस्त्वन्मुखाम्बुजात् ।
श्रुतो मया वितस्ताया महाफलप्रदायकः ॥४॥

सिद्धक्षेत्रात्समारभ्य यावद्वै हस्तिमुण्डकम् ।
श्रुत्वा तीर्थं वितस्तायां कृतार्थास्मि न संशयः ॥५॥

त्वन्मुखाम्बुधिसम्भूतं पीत्वा पुण्यामृतं महत् ।
वितस्ताया महानद्या निर्वृत्तास्मि भयार्णवात् ॥६॥

वितस्ताख्यं महातीर्थं श्रुत्वा स्मृत्वा महेश्वरि ।
न च यामि महेशान ह्यपि ब्रह्माण्डगोलके ॥७॥

---

*भीरवा उवाच—भैरव उवाच

वितस्ताख्यं महातीर्थं त्रैलोक्यामपि सुन्दरि ।
महाफलप्रदं श्रुत्वा सुप्रसन्नास्मि शङ्कर ॥८॥

त्वया ह्यनुग्रहीतास्मि क्रीतास्मि जगदीश्वर ।
यतः सतीसरोदेशे वितस्ता ह्यवतारिता ॥६॥

पीत्वा पीत्वापि माहात्म्यामृतमस्या महेश्वर ।
सर्वयागादिफलदं न तृप्तिर्जायते मम ॥१०॥

पुनर्वद वितस्ताया महिमानमनुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥११॥

गणाः षोडशसाहस्राः रक्षो भूत्वा महेश्वर ।
कथं ते मोचिता देव देवीशापार्णवास्त्वया ॥१२॥

वद सत्यं महादेव जगतां हितकाम्यया ॥१३॥

भैरव उवाच

पुनर्वक्ष्यामि देवेशि वितस्तास्नानजं फलम् ।
यच्छ्रुत्वा प्राप्नुयाद्देवि पुण्यं यागादिसम्भवम् ॥१४॥

गणाः षोडशसाहस्रा रक्षो भूत्वा महेश्वरि ।
ऋषिर्देवगणांश्चापि बाधयाञ्चक्रुरोजसा ॥१५॥

बाधितास्तेजसा तेषामृषयः परमेश्वरि ।
विष्णुना ब्रह्मणा सार्धं शिवं शरणमन्वयुः ॥१६॥

दृष्ट्वा शिवं महादेवि भैरवं परभैरवम् ।
महाकालं सुरेशानं वाग्भिरर्थ्याभिरीडिरे ॥१७॥

ऋषय:

जय देवचिदानन्दचित्स्वरूपजगत्पते ।
सदासद्भावनासङ्गत्रैलोक्यानन्तविश्रुते ॥१८॥

नमश्चिच्चन्द्रविश्वस्तमोहध्वान्ताय शम्भवे ।
नाथाय परमेशाय जगदार्तिविनाशिने ॥१९॥

नमो विमर्शबोधार्कहृद्गुह्यात्तमनाशिने ।
प्रकाशितमहानन्दपरभैरवरूपिणे ॥२०॥

नमोऽमृताय देवाय नमोऽमृतवपुर्द्धृते ।
अमाकलातृतीयाय चतुर्भागजुषे नम: ॥२१॥

नम: शिवाय देवाय मृत्युञ्जयकलाभृते ।
परमामृतसाराय परमामृतरूपिणे ॥२२॥

नमो ज्योति:स्वरूपाय क्रमैर्विरहिताय च ।
अनन्तक्रमरूपाय परमार्थाय ते नम: ॥२३॥

नमो भवाय देवाय नमो धीचोदकाय ते ।
महाज्योति:स्वरूपाय ह्यनन्तार्थप्रबोधिने ॥२४॥

नमः प्रथपरालोकशोकविध्वंसनाय ते ।
प्रकाशितमहानन्दसन्दोहामृतधारिणे ॥२५॥

नमः परपराकान्तिशान्तमोहाय ते नमः ।
प्रादुष्कृतविमर्शाख्यचित्रमित्राय ते नमः ॥२६॥

नमः स्वपरविज्ञानप्रकाशितजगत्त्रये ।
शिवाद्वयमहाज्ञानजगदार्तिविनाशिने ॥२७॥

नमो हरिविरिञ्चेशपशुपाशविमोचिने ।
नमश्चिच्चन्द्रिकाख्यात महाविभवभैरव ॥२८॥

नमो घोराय घोराय घोरघोरतराय च ।
शर्वाय सर्वरूपाय नमो मन्त्रमयाय च ॥२९॥

नमस्त्र्यज्ञाय त्रीशाय त्रिवासाय त्र्यधीशिने ।
त्र्यम्बकाय त्रिदेवाय त्रिपुरघ्नाय ते नमः ॥३०॥

ॐ नमस्त्रिपुरेशाय तरुणीशाय ते नमः ।
वृद्धेशाह महेशाय बालेशाय च ते नमः ॥३१॥

नमो मन्त्रस्वरूपाय द्वात्रिंशद्वर्णधारिणे ।
प्रकाशितार्णभेदाय महाभैरवरूपिणे ॥३२॥

नमः प्रकाशितानेकवर्णभेदाय शम्भवे ।
कृतवर्णविभेदाय मोचितानन्तवर्णिने ॥३३॥

ॐ नमः मोचितानेकवर्णाय भाववेदिने ।
परमार्थप्रकाशाय परारूपाय ते नमः ॥३४॥

ॐ नमः समयादीक्षादीक्षितानन्तमूर्तये ।
दीक्षारूपाय देवाय कृतपाशाय ते नमः ॥३५॥

नमो यागस्वरूपाय यागदेवस्वरूपिणे ।
यागकृत्कृतभेदाय यागमोहविधायिने ॥३६॥

नमो यागार्चने तुभ्यं यागार्चाविधिदर्शिने ।
यागयोगविधानाय कलारूपाय ते नमः ॥३७॥

नमो यज्ञकृते तुभ्यं यज्ञागाय नमो नमः ।
यज्ञकृत्फलदात्रे च दक्षयज्ञविनाशिने ॥३८॥

नमो दीक्षास्वरूपाय दीक्षितानां फलात्मने ।
दीक्षाकर्मविधिज्ञाय तुभ्यं परशिवात्मने ॥३९॥

नम आचार्यरूपाय शिववह्निस्वरूपिणे ।
मलत्रयविनाशाय शिवदाय नमो नमः ॥४०॥

नमश्चिच्चक्ररूपाय चित्स्वरूपाय ते नमः ।
षड्चक्रभेदिने तुभ्यं भूतवासाय ते नमः ॥४१॥

---

३४ खः ब वामवेदिने—भाववेदिने

नमः कामारये तुभ्यं कामानां बलदायिने ।
कामकामाय देवाय जगद्रतिविधायिने ॥४२॥

नम आदिस्वरूपाय यज्ञाय च नमो नमः ।
शब्दब्रह्मस्वरूपाय ज्ञप्तिरूपाय ते नमः ॥४३॥

ॐ नमः शिवशक्त्यादिरूपाय परमात्मने ।
शिवशक्त्येकविज्ञानदायिने परमार्थिने ॥४४॥

नमो वागर्थभेदाय वागर्थज्ञानवेदिने ।
वागर्थज्ञानपाराप्तपरमार्थस्वरूपिणे नमः ॥४५॥

स्थूलाय सूक्ष्माय स्थूलसूक्ष्मविधायिने ।
सूक्ष्मदर्शिहृदावासप्राप्तानन्दाय ते नमः ॥४६॥

नमः सूर्येन्दुनेत्राय वह्निनेत्राय वै नमः ।
भूतिभूषितदेवाय कृत्तिवासाय ते नमः ॥४७॥

नमो मन्त्रार्थरूपाय सर्वमन्त्रमयाय च ।
मन्त्रार्थदर्शिने मन्त्रिवरदाय नमो नमः ॥४८॥

नमो वेदस्वरूपाय वेदागमविधायिने ।
वेदागमसदाचारकारिणे ब्रह्मदायिने ॥४९॥

---

४८ क: ब मन्तार्थ—मन्त्रार्थ

नमो वेदागमाचारकारित्राणविदायिने ।
वेदागमार्थविज्ञानपरतत्त्वविदे नम: ॥५०॥

ॐ नम: परतत्त्वाय सर्वतत्त्वनिवासिने ।
सर्वार्थदर्शिने तुभ्यं महातत्त्वाय ते नम: ॥५१॥

नमो वेदान्तवेद्याय नमो वेदमहात्मने ।
महेशाय महार्थाय महादेवाय ते नम: ॥५२॥

नमो गुरुस्वरूपाय परमाचार्यरूपिणे ।
सम्प्रदायविदे तुभ्यमाचार्याय नमो नम: ॥५३॥

नमस्त्रिमलविध्वंसकारिणेऽलिनाशिने ।
नाथाय स्थाणवेऽण्वादिशोधकाय नमो नम: ॥५४॥

नमस्त्रिशिवरूपाय लङ्घिने चित्स्वरूपिणे ।
त्रिपुरघ्नाय देवाय चिदानन्दाय ते नम: ॥५५॥

नमस्त्रितनवे तुभ्यं पशुपाशविधायिने ।
कालाग्निरुद्ररूपाय महासङ्कर्षणाय ते ॥५६॥

---

५० क: ब मेदगम—वेदागम

५२ ग: ब महेशाव—महेशाय

नमस्त्रिधामसङ्क्रान्तभूतभ्रान्तिविनाशिने ।
त्र्यधीशाय त्रिलोकविनाशकर्त्रे नमो नमः ॥५७॥

नमो भक्तजनानन्दकारिणे भक्तिदायिने ।
भक्तभक्तिस्वरूपाय भक्तहृद्वासिने नमः ॥५८॥

नमो भवाय देवाय शर्वाय सर्वरूपिणे ।
विरूपाक्षाय देवाय भीमभैरवरूपिणे ॥५९॥

ॐ नमो महते तुभ्यं बृहणं ते स्वरूपिणे ।
लघुरूपाय देवाय गुरुरूपाय ते नमः ॥६०॥

ॐ नमः स्थावरायापि जङ्गमाय च ते नमः ।
नमो ह्रस्वाय दीर्घाय ह्रस्वदीर्घतराय च ॥६१॥

नमः कृष्णाय शुक्लाय लोहिताय कपर्दिने ।
धूम्राय पीतवर्णाय धूम्रकेशाय वै नमः ॥६२॥

नमः कृष्णाय पीताय नीललोहितरूपिणे ।
विरूपाक्षाय देवाय मुञ्जमेखलिने नमः ॥६३॥

नमः सहस्रनेत्राय सर्वरूपाय ते नमः ।
नमः सर्वाय शर्वाय श्यामलिङ्गितमूर्तये ॥६४॥

---

६३ घः ब मुंच—मुञ्ज

श्यामाराधितप्रादाय महाकालाय वै नमः ।
नमो बालाग्निसंदिग्धकामाय जगदात्मने ॥६५॥

कालाग्निरुद्रसंदिग्धपशुपाशविमोचिने ।
नमः सर्वाधिवासाय सर्वैश्वर्यप्रदायिने ॥६६॥

भवाय सर्वरूपाय भूयो भूयो नमो नमः ॥६७॥

भैरव उवाच

इति स्तुत्वा महादेवं भैरवभैरवश्चिरम् ।
प्रपन्नाः स्मः प्रपन्नाः स्मः शरणं ते पदाम्बुजम् ॥६८॥

इत्येवं वादिनो देवा ऋषयश्च महेश्वरि ।
प्रणेमुर्दण्डवद्भूमौ वाष्पक्लिन्नदृशोऽभवत् ॥६९॥

प्रसन्नवदनं देवं दृष्ट्वा ते प्रेमविह्वलाः ।
नेमुः पुनः पुनश्चैव ऋषयः पतिताः क्षितौ ॥७०॥

पाहि पाहि महादेव त्रस्तानां राक्षसाद्भयात् ।
मुनीन्देवांप्रपन्नांस्ते शरणं शरणाम्बुजम् ॥७१॥

इत्येवं तु वचस्तेषामृषीणां भवितात्मनाम् ।
श्रुत्वा देवो महादेवो भैरवः परभैरवः ॥७२॥

---

७० ग: ब चैन—चैव

अवदत्तानृषीन्वाक्यं सुसृष्टमधुराक्षरम् ॥७३॥

भैरव उवाच

नैते वा राक्षसा देवा योनयो मानवो ज्वर: ।
मत्पार्श्वदगणो नूनं देव्या शापेन यन्त्रित: ॥७४॥

गण: षोडशसाहस्रो राक्षसत्वमवाप्नुयात् ।
तस्माद्बवाधे वै देवा ऐश्वर्यमदगर्विता: ॥७५॥

मा शोचध्वमृषिवरा गच्छध्वं स्वं स्वमालयम् ।
गण: षोडशसाहस्र: शापदुष्ट: स्वरूपत: ॥७६॥

राक्षसीं योनिमाश्रित्य लोकान्संबाधते भृशम् ।
अधुना त्वत्प्रसादेन मोक्ष्यते च न संशय: ॥७७॥

वरमन्यवृणध्वं सङ्गणेशस्यापि दुर्लभम् ।
दास्याम्येव न सन्देहो भवतस्तोत्रेण तोषित: ॥७८॥

भवत्कृतमिदं स्तोत्रं य: पठेत्प्रयत: शुचि ।
स याति शिवसायुज्यं यत्र गत्वा न शोचते ॥७९॥

---

७४ ख: ग योतव्यो—योनयो

७५ क: ब गणे—गण:

७६ घ: ब शपद्रष्ठ:—शापदुष्ट:

७७ ग: ब अध्वना—अधुना

इदं स्तोत्रं पठन्धीरो ब्रह्महत्यां व्यपोहति ।
इदं रहस्यं परमं नाख्येयं यस्य कस्यचित् ॥८०॥

अभक्तायापि शिष्याय दीक्षाविरहिताय च ।
पुत्रायापि न दातव्यमवक्तव्यं विशेषत: ॥८१॥

गुरुभक्तिविहीनाय गुरुनिन्दारतात्मने ।
तथा वेदागमाचारनिन्दकाय मुनीश्वरा: ॥८२॥

न देयमेतत्स्तोत्रं वै सर्वमन्त्रमयं यत: ।
इतीदं परमं गुह्यं गोपनीयं प्रयत्नत: ॥८३॥

अपुत्र: प्राप्नुयात्पुत्रं निर्धनो धनवान्भवेत् ।
रोगात्प्रमुच्यते रोगी बद्धो मुच्येत बन्धनात् ॥८४॥

पठन्स्तोत्रवरं पुण्यं मुच्येदापन्न आपद: ।
श्रुतिमाप्नोति बधिरो मूको वाक्पटुतां लभेत् ॥८५॥

तस्मात्सर्वप्रयत्नेन प्रायश्चित्तमभीप्सुना ।
तन्त्रमाराध्यमेतद्धि स्तोत्रं परमपावनम् ॥८६॥

---

८१ ग: ब पुत्रऽपि—पुत्रायापि

८२ घ: ब मनीश्वरा:—मुनीश्वरा:

प्रकाशितं कलावेतद्भवद्भिः सर्वदर्शिभिः ॥८७॥

तस्मात्स्तोत्रं परं गुह्यं भैरवस्य महात्मनः ।
पठित्वा शोधयेद्देवं गुरुभावं प्रयेत्ततः ॥८८॥

ततो दीक्षां समादाय कलाशोधनपूर्विकाम् ।
समन्त्रां सरहस्याञ्च समयाचारनिष्ठिताम् ॥८९॥

नूनं कलौ भवेत्साक्षात्स एव परभैरवः ।
अदीक्षितो दीक्षितो वा भवेदर्चितोऽर्चितः ॥९०॥

सर्वमन्त्रमयं स्तोत्रं तन्त्रसाराख्यमेव च ।
यः प्रातरुत्थितो विद्वान्नित्यपूजां विधाय च ॥९१॥

समाप्य मन्त्रराजस्य जप्यञ्च विधिवन्नरः ।
भक्त्या पठेत्स्तोत्रवरं विचरेच्छिववत्सदा ॥९२॥

शिवदीक्षा विहीना ये कलौ ते पशवः स्मृताः ।
मुक्ता भवेयुस्ते चापि स्तोत्रस्यास्यानुकीर्तनात् ॥९३॥

---

९१ ८: ब त–ते

भूयो भूयः किमुक्तेन नरः पातकवान्कलौ ।
दीक्षितः शुद्धिमाप्नोति सत्यं सत्यं ब्रवीमि वः ॥९४॥

तस्मात्सर्वप्रयत्नेन तन्त्रसाराख्यमुत्तमम् ।
शुचि भूत्वा पठेद्भक्त्या दीक्षतो वै भवेन्नरः ॥९५॥

तस्माद्वेदविदो देवा गच्छध्वं स्वं स्वमालयम् ।
भवत्प्रसादान्मुच्येत रक्षसांगण उत्तमः ॥९६॥

इति श्रुत्वा वचस्तस्य भैरवस्य महात्मनः ।
मुनयो देवगन्धर्वाः जग्मुस्ते स्वं तदालयम् ॥९७॥

तस्मिन्काले गणास्तत्र दृष्ट्वा वै भैरवः स्वयम् ।
प्रोवाच तान्गणान्देवो देव्या मुखमुद्वीक्ष्य च ॥९८॥

समेत्य स्नाता वै सर्वे वितस्ताजल उत्तमे ।
मोचयिष्यन्ति वः सर्वान्नियं देव्यपराधतः ॥९९॥

प्रायश्चित्तानि सर्वाणि शास्त्रेषु मुनिभिः गणाः ।
तानि सुशोधयिष्यन्ति सत्यं देव्यपराधनम् ॥१००॥

---

९८ घः ब मुखमवेक्ष्य—मुखमुद्वीक्ष्य

९९ कः ब स्नात—स्नाता

१०० गः ब शुशोधयिष्यन्ति—सुशोधयिष्यन्ति

तस्मादिदं वितस्तायाः जलं पापहरं कलौ ।
प्रायश्चित्तं परं गुह्यं मयैव प्रकटीकृतम् ॥१०१॥

तस्मात्प्रयात शीघ्रं वै वितस्ताजल उत्तमे ।
दृष्ट्वा शीघ्रगतींदेवांश्चामुण्डा मुण्डनाशिनी ॥१०२॥

क्रुद्धाब्रवीद्वितस्तां तां नदीं रक्तान्तलोचना ।
देव्यपराधिनो देवा रक्षोभूता महानदी ॥१०३॥

स्नानतः कामाः समायान्ति भ्रामणीयाः प्रयत्नतः ।
न प्राप्नुवन्ति स्वांल्लोकान्पतिता भ्रामितास्त्वया ॥१०४॥

इति श्रुत्वा वचो देव्या वितस्तापापनाशिनी ।
भ्रामयन्ती तु तान्देवान्सर्पवत्कुटिलाभवत् ॥१०५॥

भ्रान्तास्ततः पुनर्देव्या भृशमुद्वेलितास्तया ।
भवानीपतिमुग्रं वै भवं शरणमन्वयुः ॥१०६॥

दृष्ट्वा देवीं तथाभूतां भ्रामितां जगदम्बिके ।
शिवः शूलं समुद्धृत्य नदी तां स जघान ह ॥१०७॥

---

१०३ घः ब महानदि—महानदी

१०७ कः ब देवां—देवीं

खः सा—स

शूलपातात्समुद्भूतो जलोर्मिर्जगदीश्वरि ।
जलोर्मितीर्थाद्देवेशी बभूव सरला ततः ॥१०८॥

शिवेन च भ्रमो नद्या वितस्ताया विनाशितः ॥१०९॥

तस्माज्जलोर्मितीर्थे वै स्नातव्यमविशङ्कया ।
इच्छद्भिः परमां सिद्धिं प्रायश्चित्तमभीप्सुभिः ॥११०॥

मज्जतां भ्रान्तिजलधौ गणानां जगदम्बिके ।
शिवः परोऽभवद्यस्माच्छिवपारस्ततः स्मृतः ॥१११॥

शिवेन पारितो यत्र भ्रामितो रक्षसांगणः ।
तस्मात्प्रोक्तं पुराविद्भिः शिवपारो महेश्वरि ॥११२॥

शिवेन पालितो यस्मात्क्रूराद्राक्षसयोनितः ।
गणः षोडशसाहस्रः शिवपारस्ततः स्मृतः ॥११३॥

शिवपारे नरः स्नात्वा कृत्वा वै पितृतर्पणम् ।
नरो मुक्तिमवाप्नोति सत्यं सत्यं ब्रवीमि ते ॥११४॥

शिवपारे महादेवि विदीक्षां गृह्णाति चेन्नरः ।
शिव एव भवेत्साक्षादिति सत्यं वरानने ॥११५॥

शिवपारे पुरश्चर्यां करोति यदि मानवः ।
निर्विघ्नां सिद्धिमाप्नोति मन्त्रस्य जगदम्बिके ॥११६॥

शिवपारे महातीर्थे पूजां कृत्वा विधानतः ।
भैरवस्य हरेर्वापि फलं शतगुणं भवेत् ॥११७॥

शिवपारे जलं पीत्वा जलोर्मौ च विशेषतः ।
मच्छूलनिर्मिते तीर्थे चान्द्रायणफलं लभेत् ॥११८॥

अन्तकाले महादेवि शिवतीर्थे जलं हि यः ।
पीत्वा म्रियेत चेन्मर्त्यः चन्द्रचूडो भवेत्तु सः ॥११९॥

शिवपारसमं तीर्थं न भूतं न भविष्यति ॥१२०॥

तस्मात्स्नायात्प्रयत्नेन शिवतीर्थे महेश्वरि ।
निश्चितं मुक्तिमाप्नोति इति सत्येन ते शपे ॥१२१॥

इति प्रोक्तो वितस्ताया महिमा शैवपारिकः ।
सर्वपाठकश्रोतॄणां महापातकहा कलौ ॥१२२॥

इत्येनं पटलं श्रुत्वा पठित्वा वा विशेषतः ।
नरो मुक्तिमवाप्नोति महापातकसञ्चयात् ॥१२३॥

---

११९ घः ब भवेत्तमः—भवेत्तु सः

१२३ घः ब सञ्चयं—सञ्चयात्

अदीक्षितो दीक्षितः स्यात्पूजितः स्यादपुजितः ।
समयाचारहीनोऽपि मुक्तिभागी भवेन्नरः ॥१२४॥

विचार्यैतं विशेषेण गुह्यं पटलमुत्तमम् ।
परमं पदमाप्नोति यत्र गत्वा न शोचते ॥१२५॥

गुह्यातिगुह्यः पटलो मया प्रोक्तस्तवानघ ।
यस्य कस्य न दातव्य इत्याज्ञा पारमेश्वरी ॥१२३॥

इति श्रीवितस्तामाहात्म्ये शिवपारवर्णनं नाम षोडशः पटलः ॥१६॥

---

१२४ गः समयाच — समयाचार

## अथ सप्तदशः पटलः

भैरव्युवाच

शिवपारस्य महिमा ह्यपारः परमेश्वर ।
श्रुतो भवत्प्रसादेन देवानामपि दुर्लभः ॥१॥

अहो मोहस्य महिमा गहनो ह्यतिदारुणः ।
शिवपारे महातीर्थे भूमिस्थेऽपि सति प्रभोः ॥२॥

तथाप्ययं जनो देव पुरो भ्रमति संसृतौ ।
शिवपारस्य माहात्म्यं स्मारं स्मारं महेश्वर ॥३॥

धारं धारं हृदि सदा निवृत्तास्मि भवार्णवात् ।
नैतच्चित्रं भगवति सर्वैश्वर्यमयैर्विभोः ॥४॥

यन्मोचितास्मि सन्देहगहनाद्भृशदारुणात् ।
क्रीतास्म्यनुग्रहीतास्मि कृतार्थास्मि न संशयः ॥५॥

धन्यास्मि पाविता ह्यस्मि तारितास्मि भवाम्बुधेः ।
भवकर्म मम ग्राहमुद्धृतास्मि त्वया प्रभो ॥६॥

यत्पीतं त्वन्मुखाम्बुधिच्युतं नद्याः फलामृतम् ।
देवदेव महादेव गिरीशशशिशेखर ॥७॥

हरगङ्गाधरेशान सर्वज्ञ परभैरव ।
जय रुद्र जयेशान जय त्रिपुरमर्दक ॥८॥

जयो माहृतसर्वाङ्ग जय ब्रह्मादिदंवतम् ।
जय श्री वै पुटीवासि जय ज्ञानमहोदधे ॥९॥

जय ध्यानामृतास्वादासक्तसञ्जनषट्पद ।
जय भक्तजनानन्दसन्दोहामृतनिवृत ॥१०॥

जय श्यामोपजुष्टाङ्ग महाकाल नमोऽस्तु ते ॥११॥

पुनर्वद वितस्ताया महिमानमनुत्तमम् ।
यच्छ्रुत्वापि विमुच्येत नरः पातकसञ्चयैः ॥१२॥

कलुर्बिभेति देवेश नरः पातकवानलम् ।
विशेषान्मुच्यते यस्याः स्नानदर्शनमात्रतः ॥१३॥

ततस्तस्या महानद्या महिमामृतमुत्तमम् ।
पिबन्नपि मुहुस्तत्र कस्तृप्येदं पतञ्जुषत् ॥१४॥

धन्यास्म्यनुगृहीतास्मि कृतार्थास्मि जगद्विभो ।
यच्छ्रुतं त्वन्मुखाद्देव तीर्थयोरुभयोर्फलम् ॥१५॥

---

८ कः व हररगङ्गा—हरगङ्गा

पुनर्वद वितस्तायाः कीदृशो महिमा स्मृतः ॥१६॥

गणः षोडशसाहस्रः कां गतिं गतवान्पुनः ।
ब्रूहि मे कृपया शम्भो सर्वज्ञ परमेश्वर ॥१७॥

भैरव उवाच

शृणु वक्ष्यामि सुश्रोणि महिमानमनुत्तमम् ।
वितस्ताया महानद्याः सद्यो वै फलदं नृणाम् ॥१८॥

गणः षोडशसाहस्रो रक्षो भूतो महेश्वरि ।
स्नात्वा नदीजले शुद्धे मुक्तो राक्षसयोनितः ॥१९॥

चन्द्रचूडोऽभवत्सद्यो जटामुकुटमण्डितः ।
त्रिनेत्रधारी गङ्गस्वशिरः कर्पटमण्डितः ॥२०॥

त्रिशूलखट्वाङ्गधरो नरमालास्थिभूषणः ।
भस्माङ्गरागो देवेशि व्याघ्रचर्मा तुरीयकः ॥२१॥

गणः षोडशसाहस्रः स्नात्वा वैतस्तिके जले ।
रक्षोजातिविनिर्मुक्तः सद्यस्तत्सदृशोऽभवत् ॥२२॥

यस्मात्षोडशसाहस्रो गणो मुक्तो महापदः ।
सारूप्यं प्राप्तवांस्तस्य भैरवस्य महात्मनः ॥२३॥

---

१७ कः ब गजः—गणः
१८ कः ब मश्रोणि – सुश्रोणि

तस्मात्प्रोक्तं पुराविद्भि: षोडशक्षेत्रमुत्तमम् ॥२४॥

स्नात्वा वै षोडशे क्षेत्रे नरो भक्तिसमन्वित: ।
याति विष्णो: परं स्थानं देवानामपि दुर्लभम् ॥२५॥

वर्षमात्रं महेशानि य: स्नाति प्रयतो नर: ।
स याति ब्रह्मसायुज्यं यत्र गत्वा न शोचते ॥२६॥

द्विवर्षं जगदीशानि हविष्यन्नभुजश्च ये ।
ते विमुक्ताश्च विज्ञेया: कलौ सिद्धिकरा: नृणाम् ॥२७॥

मासमात्रं नियमवान्षोडशक्षेत्र उत्तमे ।
स्नात्वा यातीन्द्रसायुज्यमिति सत्येन ते शपे ॥२८॥

मेषार्के मकरार्के वा मिथुनार्के महेश्वरि ।
विशेषतस्तुलार्के वा स्नात्वा मुच्येदसंशयम् ॥२९॥

कुरुक्षेत्रे प्रयागे च मायापुर्यां विशेषत: ।
गयायां वा पिण्डदानाद्यत्फलं लभते नर: ॥३०॥

तत्फलं समवाप्नोति स्नात्वा तीर्थे च षोडशे ॥३१॥

श्राद्धं तु विधिना यो वै ह्यत्र कुर्यान्महेश्वरि ।
कल्पं पितृगणा यान्ति तृप्ता: प्रीता: परं पदम् ॥३२॥

बहुधात्र किमुक्तेन भूयो भूयो महेश्वरि ।
संसारतापतप्तानां नराणां हितकाम्यया ॥३३॥

मयैव तत्तापहारिक्षेत्रवारिप्रकाशितम् ॥३४॥
श्रुत्वैतत्क्षेत्रमाहात्म्यं पठित्वा वा समाहितम् ।

तीर्थकर्तुः फलं सम्यक्प्राप्नोत्येव न संशयः ॥३५॥

इति श्रीवितस्तामाहात्म्ये षोडशक्षेत्रमाहात्म्य
नाम सप्तदशः पटलः ॥१७॥

# अथाष्टादशः पटलः

श्रीभैरव्युवाच

श्रुतः षोडशक्षेत्रस्य महिमा गहनः परः ।
मयैव जगदीशान भवन्मुखविनिस्सृतः ॥१॥

तस्मात्कलौ वितस्ताख्या नदी परमपावनी ।
त्वया प्रकटिता देव जगदानन्ददायिनी ॥२॥

यदा षोडशसाहस्रो गणः सारूप्यमाप्तवान् ।
तदा किमकरोत्तत्र पुनर्वद महेश्वर ॥३॥

न तृप्यामि महादेव श्रुत्वापि क्षेत्रजं फलम् ।
अद्भुतामृतवद्देव त्वन्मुखाम्बुधिनिर्गतम् ॥४॥

भैरव उवाच

पुनर्वक्ष्ये महेशानि वितस्तातीर्थसञ्चयम् ।
श्रवणात्पठनाद्वापि महापातकनाशनम् ॥५॥

गणं सारूप्यमापन्नं दृष्ट्वा प्रीतोऽभवद्भवः ।
परमानन्दसम्पूर्णो ननर्तुः परभैरवः ॥६॥

---

२ खः ब परमपावना — परमपावनी

दृष्ट्वा देवञ्च नृत्यन्तं गणैः सह महेश्वरि ।
तदा मुमुदिरे विप्राः कालेदारण्यवासिनः ॥७॥

पुरा कल्पान्तरे देवि विप्राः कौला बभूविरे ।
कुलशास्त्रप्रवीणाश्च कुलाचारप्रवर्तकाः ॥८॥

अरण्यमाश्रितास्तेऽत्र तपो तस्य सुदुष्करम् ।
दृष्ट्वा तथा नृत्यमाणमानन्देश्वरमन्ततः ॥९॥

गणैः सार्धं महादेवि तुष्टुवुश्च तथा भवम् ॥१०॥

कौलाः

नमो घोराय घोराय चोग्राय उग्ररूपिणे ।
आनन्देशाय देवाय जगदानन्ददायिने ॥११॥

नमो भक्तजनानन्ददायिने विश्वभाविने ।
विश्वेशाय महेशाय विश्वरूपाय वै नमः ॥१२॥

नमः शर्वाय सर्वाय शवराय चिदात्मने ।
अज्ञाय त्रिनिवासाय नमस्त्रिपुरवासिने ॥१३॥

त्रिपुरेशाय देवाय भैरवाय महात्मने ।
अचिन्त्याय चितिज्ञानाय नमश्चैतन्यरूपिणे ॥१४॥

नमः शिवाय चर्च्याय दर्शनीयाय ते नमः ।
आपदुद्धरणायापि भैरवाय नमो नमः ॥१५॥

जगदानन्दकन्दाय सर्ववन्द्याय ते नमः ।
नमो चिन्त्यस्वरूपाय महाभैरवरूपिणे ॥१६॥

नमो महद्ग्रीवेशाय बृहतीपरमार्थिने ।
परमानन्दरूपाय चिदानन्दाय ते नमः ॥१७॥

गुरवे लघुवे तुभ्यं गिरीशाय कपर्दिने ।
नम आपद्विनाशाय भूयो भूयो नमो नमः ॥१८॥

भैरव उवाच

इति श्रुत्वा तदा तेषां नुतिं परमपावनीम् ।
स्वगणैः सह देवेशि पुनरेव ननर्त सः ॥१९॥

दृष्ट्वा नुतिपरान्कौलानानन्दभैरवः ।
प्रोवाच च वरं मत्तो वृणीध्वं कौलसत्तमाः ॥२०॥

इति श्रुत्वा वचस्तस्य भैरवस्य महात्मनः ।
प्रोचुः प्राञ्चलयः सर्वे विस्मितास्ते गणास्तदा ॥२१॥

त्वद्दर्शनादृते देव वद कश्चापरो वरः ।
तथापि मायासीमान्ते द्रष्टुमिच्छा प्रवर्तते ॥२२॥

श्रुत्वा तेषां वचः सौम्यमानन्देशः परो भवः ।
तेषामाश्चर्यरूपां स्वां मायासीमां स दर्शयत् ॥२३॥

दिव्यदृष्टां तु तां दृष्ट्वा मायासीमां महेशितुः ।
आनन्दरूपां देवेशि बभूवुर्विस्मिताश्च ते ॥२४॥

कौलांस्तु विस्मितां दृष्ट्वानन्देशः परमेश्वरि ।
दर्शयित्वा तदा मायां तेषां तत्रालयमगात् ॥२५॥

यत्रेच्छाभूद्भैरवस्य द्रष्टुं मायां महात्मनः ।
तत्र प्रोक्तं पुराविद्भिः कौलेच्छाख्यमुत्तमम् ॥२६॥

यतो दृष्टे महारण्ये स्वेच्छया परभैरवः ।
कौलैस्तत्र तदा प्रोक्तं कौलेच्छाख्यकाभिधम् ॥२७॥

स्नात्वा नरः प्रमुच्येत कौलेच्छाख्यसन्निधौ ।
वितस्ताया महानद्या जले पुण्यप्रदे कलौ ॥२८॥

कायिकैर्वाचिकैश्चापि मानसैश्चैव नित्यशः ।
स्नात्वा प्रमुच्यते देवि जन्मातरकृतैरघैः ॥२९॥

यतो दृष्ट्वा महादेवि मायामीमां महेशितुः ।
आगमज्ञैस्ततः प्रोक्ता मायासीमा महेश्वरि ॥३०॥

दर्शयित्वा महामायां लीन आनन्दभैरवः ।
कौलानां तत्र वै प्रोक्त आनन्देशो महेश्वरि ॥३१॥

आनन्देशे महेशानि मायायामपि सुन्दरि ।
स्नानैर्दानैस्तथा होमैर्जपनैरर्चनैरपि ॥३२॥

वितस्ताया जले शुभे मुच्यते सर्वकिल्विषैः ।
इति ते कथितो देवि महिमानन्दसंज्ञकः ॥३३॥

कौलेच्छावनगश्चापि मायासीमान्तगोऽपि च ।
श्रुत्वैतत्पटलं गुह्यं महापातकनाशनम् ॥३४॥

श्रुत्वा पठित्वा मुच्येत प्रसिद्धश्च भवेन्नरः ॥३५॥

इति श्रीवितस्तामाहात्म्ये कौलेच्छावनमायासीमानन्देश्वर-
माहात्म्यं नाम अष्टादशः पटलः ॥१८॥

# *अथैकोनविंशः पटलः

भैरव उवाच

अथ वक्ष्ये महादेवि ह्यानन्देशमहाफलम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥१॥

कौलैर्दत्तो महेशानि द्विजा विभज्य वै बलिः ।
आनन्देशगणेभ्यश्च सर्वसिद्धिकरः परः ॥२॥

यत्र दत्तो महेशानि विभज्य बलिरुत्तमः ।
कौलैः प्रोक्तस्तदा देवि विभज्यबलिसंज्ञकः ॥३॥

स्नानं कृत्वा महादेवि विभज्य बलिसंज्ञके ।
मुच्यते पातकैर्घोरैर्जन्मान्तरकृतैरपि ॥४॥

मारीवितस्तयोः सङ्गे स्नानं कृत्वा विधानतः ।
नरो मुक्तिमवाप्नोति मुच्यते सर्वकिल्बिषैः ॥५॥

दर्शे च सोमयुक्ते वा यः स्नात्यत्र महेश्वरि ।
श्राद्धं च विधिवत्कुर्यात्स याति परमां गतिम् ॥६॥

---

*अयं पटलः 'व' मातृकातः सम्पादितः

सूर्यवारे ग्रहोपेते यः स्नात्यत्र च मानवः ।
स याति ब्रह्मभवनं यत्र गत्वा न शोचति ॥७॥

ततः प्रचलिता सम्यङ्मार्या सह महेश्वरि ।
ततो गणपतिस्तां वै पपौ मायां सहैव हि ॥८॥

ततः शुशोच तां देवि कश्यपः पुनरेव हि ।
श्रुत्वा तं तु वचस्तस्य कश्यपस्य महात्मनः ॥९॥

ईशानः कष्टमगमत्सतां स्नेहोऽतिदुस्सहः ।
ततस्तं कश्यपं देवि सान्त्वयामास यत्नतः ॥१०॥

दृष्ट्वा त्वसान्त्वितां देवि महेशेन प्रजापतिम् ।
नारायण उवाचेदं कश्यपं वचनं तदा ॥११॥

शृणु कश्यप वक्ष्यामि वितस्तापूरणं महत् ।
पदपादोदकपूरेण वितस्ता वृद्धिमेष्यति ॥१२॥

इति श्रुत्वा वचस्तस्य विष्णोरमिततेजसः ।
ईश्वरः सर्वभूतानां विघ्नेशं तमभर्त्सयत् ॥१३॥

विष्णुस्तां तु तदा देवि प्रापूर्यत जलेन वै ।
स्वपादोत्थेन च तदा ववर्ध च महानदी ॥१४॥

तदा गणपतिश्चापि व्रीडितस्तामचोदयत् ।
जलौघपूरिता देवि नदी परमपावनी ॥१५॥

चचाल च पुनस्तत्र नदीभ्यां परिवारिता ।
यस्मादुक्तः स्वयं तेन विष्णुना सुमहद्वलिः ॥१६॥

स्वपादाम्बुजनिर्मुक्तो नद्यंर्जलमयः पुनः ।
तस्मात्प्रोक्तं पुराविद्भिर्बलितीर्थं प्रचक्षते ॥१७॥

बलितीर्थे नरः स्नात्वा कृत्वा वा पितृतर्पणम् ।
पुण्यं प्राप्नोति विपुलमश्वमेधादियागजम् ॥१८॥

यस्मात्प्रमोचिता ह्यत्र वितस्ता च महानदी ।
गणेशेन ततः प्रोक्तं क्षेत्रं गणपति महत् ॥१९॥

विनायकचतुर्थ्याञ्च वितस्ताञ्च महेश्वरि ।
विनायकञ्च सम्पूज्य न स विघ्नैर्प्रबाध्यते ॥२०॥

अत्र स्नात्वा महेशानि कृत्वा च पितृतर्पणम् ।
पुण्यमाप्नोति मनुजो ज्योतिष्टोमादियागजम् ॥२१॥

अपुत्रः पुत्रमाप्नोति निर्धनो धनमाप्नुयात् ।
कन्यास्वरूपां शीलाढ्यां लभते गुणसंयुताम् ॥२२॥

काकवन्ध्या च बन्ध्या च वर्षं तावन्महेश्वरि ।
विधिवद्गणं सम्पूज्य स्नात्वा हविष्यभोजनम् ॥२३॥

पुत्रानवाप्नुयात्सात्र गुणाढ्यान्रूपसंयुतान् ॥२४॥

विद्याकाम: पुरा ह्यत्र यवको मुनिसत्तम: ।
गणेशं पूजयित्वा च विद्यां पुण्यामवाप्तवान् ॥२५॥

तस्माद्गणपतेस्तीर्थसमं तीर्थं न भूतले ।
नान्तरिक्षे न पाताले न भूतं न भविष्यति ॥२६॥

भूयो भूय: किमुक्तेन नर: सङ्कटवान्कलौ ।
स्नात्वा गणपतेस्तीर्थे सङ्कटैर्नाभिभूयते ॥२७॥

तत: स्नायान्महेशानि वर्धमानेश्वराभिधे ।
तीर्थे परमपुण्याख्ये सर्वपापहरे परे ॥२८॥

विवृद्धिञ्च गता ह्यत्र वितस्ता परमेश्वरि ।
सदा तत्र ववर्धेशे वर्धमानेश्वर: स्मृत: ॥२९॥

गणपत्पादयोर्भागे वर्धमानाख्य उत्तमे ।
तीर्थे स्नायान्महेशानि महापापापनुत्तये ॥३०॥

गणपत्पात्समारभ्य यावद्वैश्वरमात्रकम् ।
बुधैस्तु तत्तदा प्रोक्तं वर्धमानाख्यमुत्तमम् ॥३१॥

वर्धमाने नर: स्नात्वा मुच्यते सर्वकिल्बिषै: ॥३२॥

शोचन्तं कश्यपं दृष्ट्वा कष्टे लीनो यत: शिव: ।
तत: प्रोक्त: पुराविद्भिर्देश: कष्टेलसंज्ञित: ॥३३॥

कष्टेलतीर्थे देवेशि स्नात्वा मुच्येत सङ्कटात् ।
कष्टेले च नरः स्नात्वा कृत्वा वा पितृतर्पणम् ॥३४॥

न नरो लिप्यते पापैः पद्मपत्रमिवाम्भसा ।
कष्टेलदेशे संस्नात्वा दृष्ट्वा कष्टेश्वरं ततः ॥३५॥

सम्पूज्य विधिना चैव मुच्यते ब्रह्महत्यया ।
दृष्ट्वा महेशं कष्टेलं कष्टे लीनापि पार्वती ॥३६॥

कष्टेलेशी ततः प्रोक्ता सापि यत्र पुरातनैः ।
कष्टेलेशीं पुमान्दृष्ट्वा मुच्यते ब्रह्महत्यया ॥३७॥

कष्टेन देवदेवेशी श्यामाभूद्यत्र पार्वती ।
ततः प्रवाहिनीं दृष्ट्वा वितस्ताख्यमहानदीम् ॥३८॥

कष्टान्निवृत्तो देवेशि मुकुटं सोमनायकम् ।
त्यक्तुं पुरा दधारेशः पुनः संहृष्टमानसः ॥३९॥

यस्मात्प्रोक्तं पुराविद्भिः सोमतीर्थं शुभप्रदम् ।
तस्मात्सोमेश्वरश्चैव तस्मिन्स्यान्मुक्तिदम् ॥४०॥

सोमतीर्थे नरः स्नात्वा कृत्वा सोमेशदर्शनम् ।
स याति परमं स्थानं यत्र गत्वा न शोचते ॥४१॥

---

३५ गः ब संस्नात्वा पाठः

३८ कः ब देवोशी—देवेशी

राजयक्ष्मयुतो रोगी य: कुर्यात्सोमदर्शनम् ।
सद्य: स रोगनिर्मुक्त: प्राप्नोति परमां गतिम् ।।४२।।

यस्तत्रविधिवत्स्नायात्कृत्वा सन्ध्यां तथेश्वरि ।
कुर्याच्छ्राद्धं विधानेन ह्यत्र देवे महेश्वरि ।।४३।।

पितरस्तस्य देवेशि महापापयुता अपि ।
गच्छन्ति परमं स्थानं यत्र न स्यात्पुनर्भव: ।४४।।

ततो वितस्तां दृष्ट्वा तु विवृद्धरक्षसांगण: ।
विशीर्णां कर्तुमुद्युक्तस्तत्र चैवाजगाम ह ।।४५।।

दृष्ट्वा घोरं समायान्तं राक्षसानां गणं तदा ।
वितस्ताया महानद्या: कालरूपोऽभवच्छिव: ।।४६।।

---

४५ क: ब बरापक्ष्मयुजो—राजयक्ष्मयुतो

घ: परां गति—परमां गतिम्

४६ ख: ब संध्यां—सन्ध्यां

तहेश्वरि—तथेश्वरि

४७ क: ब मितरतस्य—पितरस्तस्य

घ: पुर्नयत्र—पुनर्भव:

श्यामापि तत्र दृष्ट्वैव महाकालं महेश्वरि ।
आलिलिङ्ग महेशानि वितस्तातीर्थ उत्तमे ॥४७॥

विशीर्णां कर्तुमुद्युक्तं रक्षसां गणमीक्ष्य वै ।
जज्वाल चाग्निवत्तत्र महाकालो महेश्वरि ॥४८॥

ज्वालामालाकुलं दृष्ट्वा रक्षसांगण उत्तमः ।
भस्मीभूतस्तु तद्दृष्ट्वा पपात विधिना हतः ॥४९॥

महाकालस्वरूपोऽभूद्यत्र यत्र दग्धो महेश्वरः ।
राक्षसांश्च ततः प्रोक्तः महाकालो महेश्वरि ॥५०॥

महाकाले नरः स्नात्वा मुच्यते घोरपातकैः ॥५१॥

वितस्तायां नरः स्नात्वा महाकालस्य सन्निधौ ।
न लिप्यते महापापैर्ब्रह्महत्यादिकैरपि ॥५२॥

ततः सस्नौ महाकाली पुण्ये गङ्गाखने जले ।
श्यामाभवत्सापि तत्र प्रेक्ष्य क्रुध्यन्तमीश्वरम् ॥५३॥

ज्वालाकुलितमीशानं शिवक्रोधसमन्वितम् ।
प्रोवाच देवीं गङ्गां तां शमये न विचक्षणे ॥५४॥

---

५० गः व महेशानी—महेशानि

श्रुत्वा देव्या वचो गङ्गा नागेन सह सा प्रिये ।
अन्तर्हिताभवत्सद्यो सहन्ती क्रोधमीशितुः ॥५५॥

नागेन सह तां गङ्गां रत्नचूडेन वै प्रिये ।
मिलितां वीक्ष्य तत्रैवाशपत्क्रुद्धा महेश्वरि ॥५६॥

यस्मादनादृत्य वचः समनागेन सङ्गता ।
तस्मादनेन नागेन सह शीर्णा भविष्यति ॥५७॥

उपास्य च महाकालीं महाकालस्य सन्निधौ ।
धनमायुस्तथा पुत्रान्पशूंश्च जगदम्बिके ॥५८॥

प्राप्नोति परमं पुण्यं ह्यन्ते सायुज्यमेव च ॥५९॥

त्रयस्त्रिंशत्कोटयश्च देवानामामितोजसाम् ।
कालमर्चितुमायान्ति मार्गयोरुभयोरपि ॥६०॥

नमस्करोति देवेशि योऽत्र कालीसमाहितः ।
प्रसन्ना च भवेत्काली इति सुष्टु वदामि ते ॥६१॥

कालीशमत्र सम्पूज्य विधिना प्रयतो नरः ।
भैरवं रूपमायाति परमानन्दनिर्वृतः ॥६२॥

---

६० ख: ब देवानासमितोजसा—देवानामामितोजसाम्

६१ घ: ब सुष्ट—सुष्टु

वेदतन्त्रोक्तविधिना यः कालीशं समर्चयेत् ।
स याति भैरवं रूपं यत्र नास्ति कृताकृतम् ॥६३॥

श्रुत्वा शापं तदा देव्या नागेन सुमहानदी ।
सस्नौ तत्र वितस्तायां देवीशापापनुत्तये ॥६४॥

गङ्गां नागौ ततः स्नात्वा भूत्वा तौ निर्मलौ प्रिये ।
मिलितौ तौ महादेवि महाकालेन वै तदा ॥६५॥

तदा प्रभृति देवेशि ख्यातं रत्नसरो भुवि ।
अशुचित्वं परं प्राप्तं स्नानं नागस्य तस्य हि ॥६६॥

तस्माद्रत्नसरोदेशे तथा गङ्गाखनौ प्रिये ।
स्नानं दानं तपो होमः स्वाध्यायञ्च तपस्तथा ॥६७॥

अक्षयञ्च भवेत्पुण्यं सत्यं सत्यं वरानने ।
महाकालात्समारभ्य यावल्लक्ष्मीक्षयं नरः ॥६८॥

स्नानाद्दानाज्जपाद्धोमात्स्वाध्यात्पितृतर्पणात् ।
मुच्यते च नरः सद्यो महापातककोटिभिः ॥६९॥

---

६४ घः ब दीवी—देवी

६६ कः ब देवशि—देवेशि

अथैकोनविंश: पटल:

इति ते कथितं देवि महाकालाभिधं परम् ।
वितस्ताया जले पुण्ये तीर्थं परमपावनम् ।।७०।।

श्रुत्वा पठित्वा मुच्येत ब्रह्महत्यादिकोटिभिः ।
प्राप्नोति च वितस्तायां स्नानजं फलमुत्तमम् ।।७१।।

इति श्रीवितस्तामाहात्म्ये महाकाल [कष्टेलसोमतीर्थं]
वर्णनं नाम एकोनविंश: पटल: ।।१९।।

७० क: व तो कथितो—ते कथितं

## अथ विंशः पटलः

भैरव्युवाच

त्वत्तः श्रुतं महादेव महाकालाभिधं परम् ।
कलौ सिद्धिप्रदं क्षेत्रं पुण्यं परमपावनम् ॥१॥

श्रावं श्रावं महादेव कृतार्थास्मि न संशयः ॥२॥

अधुना श्रोतुमिच्छामि क्षेत्रं परमपावनम् ।
महालक्ष्म्या परं स्थानं सिद्धिदं सर्वदा कलौ ॥३॥

भैरव उवाच

शृणु देवि प्रवक्ष्यामि लक्ष्मीतीर्थं परं महत् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातकसञ्चयैः ॥४॥

पुरा वह्निमुखाज्जातो महासेनो महेश्वरि ।
मम तेजोंऽशसम्भूतः षण्मुखः शक्तिपाणिकः ॥५॥

दृष्ट्वा जातं तदा तत्र देवा मुनिगणैः सह ।
सिद्धा महर्षयश्चैव गन्धर्वाप्सरसांगणाः ॥६॥

---

२ 'मा' मातृकायां २/३ श्लोकौ न स्तः

५ गः मा तेजोशभूत— तेजोंऽशसम्भूतः

प्रणेमुः परया स्तुत्या तत्र तं वै प्रतुष्टुवुः ।
इन्द्राद्या लोकपालाश्च ब्रह्माद्या मातरस्तथा ॥७॥

सेनापत्येऽभिषिषिचुर्ब्रह्मा च विष्णुना सह ।
ज्ञात्वा देवी तदा तत्र जातं पुत्रं महोदयम् ॥८॥

नुनोद च भवं भक्त्या कुरु पुत्रस्य संस्कृतिम् ।
श्रुत्वा देव्या वचस्तेन भैरवेण महात्मना ॥९॥

संस्कृतिं कर्तुमारेभे कलाशोधनपूर्विकाम् ।
तस्मै दत्ता च प्रथमं ब्राह्मी दीक्षा स्वयम्भुवा ॥१०॥

ततो दत्ता महेशेन तान्त्री दीक्षा महेश्वरि ॥११॥

शोधितास्तत्र वै पञ्चकलास्तत्र महेश्वरि ।
तस्मात्प्रोक्तं पुरा स्थानं कलामूलाभिधं बुधैः ॥१२॥

यत्राभिषिक्तो देवेन कुमारो विष्णुना स्वयम् ।
पुण्यगङ्गाजलैर्दीक्षां गृहीत्वा परमेशितुः ॥१३॥

---

८ घः मा पुत्रं जातं — जातं पुत्रं

९ खः मा सत्कृतिं — संस्कृतिं

१० गः मा पाठः त्रुटितः

१२ मा मातृकायां १० श्लोकतः २९ श्लोकं यावत्पाठो नास्ति ।

महासेनं स्वयं देवी महालक्ष्मीर्महेश्वरी ।
दीक्षितं तमवभृथं स्नानपुण्येन वारिणा ॥१४॥

भृशं मुमोद दत्तस्तत्र उभे देव्यौ महेश्वरि ।
महालक्ष्मीश्च तां देवीं प्रोवाच च पुनः पुनः ॥१५॥

दृष्ट्वा कुमारं सुस्नातं वर्धस्व च मुहुर्मुहुः ।
श्रुत्वा वचो लक्ष्म्या देवी च मुमुदे भृशम् ॥१६॥

आशीभिर्वर्धयामास कुमारममितोजसम् ।
अवदत्पार्वती तत्र महालक्ष्मी महेश्वरि ॥१७॥

यस्मात्प्रसन्ना संप्रेक्ष्य कुमारं दीक्षितं मम ।
तस्मात्तव भवेत्स्थानं वितस्तायास्तटे शुभे ॥१८॥

इयं गङ्गापि देवेशि कलामूलाद्विनिर्गता ।
तव पादतले लग्नांल्लोकान्वै पावयिष्यति ॥१९॥

इति दत्वा वरं तस्यै महालक्ष्म्यै महेश्वरि ।
तत्रैवान्तर्हिता सद्यो देवाः स्वं स्वं लयं ययुः ॥२०॥

तदा प्रभृति देवेशि वितस्तायास्तटे शुभे ।
महालक्ष्म्याः परं स्थानं प्रथितं भुवि सर्वदा ॥२१॥

---

१४ गः व दक्षितं—दीक्षितं

महालक्ष्म्याः समीपे तु स्नात्वा वैतस्तिके जले ।
प्रमुच्यते नरः सद्यः कोटिजन्मभवैरघैः ॥२२॥

लक्ष्मीस्थानादधोभागे विष्णुना शम्भुनापि च ।
स्थानं चक्रे तदा पुण्यदेवैरपि सवासवैः ॥२३॥

भवान्यनुज्ञया यत्र तत्स्थानं प्रथितं भुवि ।
भवानीक्षेत्रमित्याख्यं पुण्यं परमपावनम् ॥२४॥

लक्ष्मीक्षेत्रात्समारभ्य भवानीक्षेत्रमन्ततः ।
कीटकोऽपिमृतो याति वैकुण्ठभवनं शुभम् ॥२५॥

दुष्टे कलियुगे प्राप्ते महालक्ष्म्याश्च सन्निधौ ।
स्नायादतन्द्रितो नित्यं पुण्ये वैतस्तवारिणि ॥२६॥

लोकारिणा च सङ्गम्य वितस्ता जगदम्बिके ।
स्नाता स्पृष्टा च दृष्टा च पीता चाप्यवगाहिता ॥२७॥

कोटिजन्मोत्थितं पापं हन्ति सद्यः कलौ युगे ।
तस्माल्लोकारिणा यत्र वितस्ता सह सङ्गता ॥२८॥

---

२४ खः ब प्रथितो—प्रथितं

२७ कः ब लोकारिण्यां—लोकारिणा

संगत्य—सङ्गम्य

२८ कः मा कोटिजन्माङ्कितं—कोटिजन्मोत्थितं

स्नातव्यं परमेशानि घोरं हन्ति च किल्बिषम् ॥२९॥

इत्येतत्कथितं देवि लक्ष्म्याः क्षेत्रमनुत्तमम् ।
भवान्याश्च समाप्नोति श्रवणात्स्नानजं फलम् ॥३०॥

इत्येष पटलो गुह्यः कथितस्ते महेश्वरि ।
श्रुत्वा पठित्वा मुच्येत जन्मान्तरभवैरघैः ॥३१॥

इति श्रीवितस्तामाहात्म्ये महालक्ष्मीभवानीक्षेत्रवर्णनं
नाम त्रिंशः पटलः ॥३०॥

---

३० घः मा स्नानं सुफले-स्नानजं फलम्

## अथैकत्रिंशः पटलः

श्रीभैरव्युवाच

स्मारं स्मारं महादेव क्षेत्रं परमपावनम् ।
महालक्ष्म्या भवान्याश्च कृतार्थाऽस्मि न संशयः ॥१॥

धन्यास्म्यनुगृहीतास्मि तारितास्मि भवाम्बुधेः ।
यच्छ्रुतं परमं गुह्यं तीर्थजं फलमुत्तमम् ॥२॥

इदानीं श्रोतुमिच्छामि क्षेत्रं लोकारिसंज्ञितम् ।
यत्सर्वज्ञेन चैवेश वितस्तायां प्रकाशितम् ॥३॥

श्रीभैरव उवाच

शृणु वक्ष्ये महेशानि तीर्थं लोकारिसंज्ञितम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥४॥

पुराकाले यदा नाम दानवा घोररूपिणः ।
कालावहाश्च मौर्ख्याश्च लोकेशाभवंस्तदा ॥५॥

---

२ घः ब तीर्थयोः—तीर्थजं

३ गः ब सर्वज्ञानदेवे – सर्वज्ञेन चैवेश

५ गः मा कालखण्डाश्च— कालावहाश्च

लोकेशास्ते तदा देवि यज्ञविध्वंसकारिण: ।
अज्ञानान्धाश्च हिंस्राश्च विप्रभक्ष्याश्च तेऽभवन् ॥६॥

तदा ते दैत्यलोकेशा वितस्तातटवासिन: ।
ब्राह्मणान्भक्षयामासुर्घोरविघ्नौघकारिण: ॥७॥

नि:स्वाध्यायवषट्कारास्तदा ते ब्राह्मणा भवन् ।
मिलित्वा च तदा देवि शरणान्तिशरणकम् ॥८॥

भैरवस्य महेशानि प्राप्ता परमपावन: ।
तुष्टुवु: परया स्तुत्या प्रणेमुर्दण्डवन्मुहु: ॥९॥

*ऋषय ऊचु:

महेश्वर महादेव क्वासि क्वासि महाप्रभो ।
भक्तांस्तु शरणे लग्नान्पाहि न: शरणागतान् ॥१०॥

---

६ क: ब लोकेशाश्च—लोकेशास्ते

८ ग: ब सर्वे—देवि

घ: शरणं चरणान्तिक—शरणान्तिशरणकम्

९ घ: मा प्रलेमु:—प्रणेमु:

*'मा' मातृकायां ऋष्युवाच—ऋषय ऊचु:

१० ग: ब भक्तांस्त्वच्छरणे लीनान्—भक्तांस्तु शरणे लीनान्

सर्वज्ञशम्भो देवेश मृडचन्द्रार्धशेखर ।
गङ्गाधर कपर्देश पाहि नः सर्वतो भयात् ॥११॥

नीलकण्ठ शिवेशान भुवभस्माङ्गभूषण ।
रक्षोलोकभयात्त्राहि प्राप्तांस्तु शरणान्तिकम् ॥१२॥

इति श्रुत्वा तदा तेषां वचो दीनं महेश्वरः ।
उदमज्ज जलात्तस्माज्ज्वालामालाकुलो हरः ॥१३॥

तलातलान्महादेवि हाटकेश्वरसंज्ञके ।
महाकालाग्निरुद्रोत्थज्वालाव्याप्तदिगन्तरः ॥१४॥

ते दृष्ट्वा तत्र मुनयो हाटकेश्वरसंज्ञकम् ।
नयनानि निमिल्यैव तस्थुस्तत्रैव सुन्दरि ॥१५॥

कालिकाः कालवहाञ्च लोकेशाः सुरसुन्दरि ।
भस्मीभूतास्तदा ये तु हाटकेशस्य ज्वालया ॥१६॥

---

११ कः मा देवंश—देवेश

ग: कर्पदेश—कपर्देश

१२ घः ब प्राप्तांस्त्वच्छरणान्तिकं – प्राप्तांस्तु शरणान्तिकम्

१४ क: ब तदातलात्—तलातलात्

१६ क। ब कालवहाश्च—कालखण्डाश्च

उन्मील्य नयनान्युच्चैः प्रेक्षन्त मुनयो भवम् ।
तुष्टुवुः परया प्रीत्या दण्डवत्पतिताः क्षितौ ॥१७॥

संप्रेक्ष्य तत्र तं देवं प्रसन्नवदनाम्बुजम् ।
त्रिशूलखट्वाङ्गधरं मुण्डमालाविभूषितम् ॥१८॥

श्यामार्धाहितवामाङ्गं भूतिभूषितविग्रहम् ।
चन्द्रार्धशेखरं देवं प्रणेमुर्दण्डवन्मुहुः ॥१९॥

देवः प्रोवाच तान्देवि दण्डवत्पतिता क्षितौ ।
उत्तिष्ठत महाभागा दैत्यलोकान्मुहुर्मुहुः ॥२०॥

भस्मीभूतान्पश्य ते मां मायालोकारिणा पुनः ।
यज्ञविघ्नकरा ह्येते मयैव विनिपातिताः ॥२१॥

---

१७ कः व तन्मील्य—उन्मील्य

१८ गः मा गङ्गागधरं—खट्वाङ्गधरं

१९ गः मा चन्द्रार्थ—चन्द्रार्ध

घा प्रणेमण्डलवन्मुहुः—प्रणेमुर्दण्डवन्मुहुः

२० कः वः भव—देवः

२१ खः व लोकारितान्महान्—लोकारिणा पुनः

गः यबविनकरा—यज्ञविघ्नकरा

घः निपातिता—विनिपातिताः

तस्माल्लोकारिरित्याख्यं तीर्थं चैतद्भविष्यति ॥२२॥

मोहान्धकारं नश्येत्तु यस्य दर्शनमात्रतः ।
तस्मात्प्रोक्तं पुराविद्भिः तीर्थं लोकारिसंज्ञितम् ॥२३॥

कुरुक्षेत्राच्छतगुणं प्रयागाच्च महेश्वरि ।
वाराणस्या दशगुणं फलं स्यात्स्नानमात्रतः ॥२४॥

गवां कोटिसहस्रस्य स्वर्णकोटिप्रदानतः ।
विद्याकोटिसहस्राच्च फलदं तीर्थमुत्तमम् ॥२५॥

हरद्वारे प्रयागे च गङ्गासागरसङ्गमे ।
यत्फलं लभते मर्त्यः तदत्र समवाप्नुयात् ॥२६॥

भाद्रशुक्लत्रयोदश्यां यस्मादत्रोत्थितः शिवः ।
द्वादश्यामपि ज्वाला च उदमज्ज जलान्तरे ॥२७॥

तस्मादत्र विशेषेण स्नातव्यमविशङ्कया ।
स्नानाद्दशगुणं पुण्यं दानाच्छतगुणं स्मृतम् ॥२८॥

---

२२ 'ख' मातृकायां २३-२४ श्लोकौ न स्तः

२४ घः मा स्यात्स्यात्—स्यात्

२६ घः मा दतत्र—तदत्र

२७ घः मा उदसज्ज—उदमज्ज

श्राद्धात्सहस्रगुणितमनन्तं जपतस्स्मृतम् ।
अत्रैव च पुरा शक्रः स्नात्वा शक्रत्वमाप्तवान् ॥२९॥

अत्र स्नात्वा पुरा स्रष्टा सृष्टिविद्यामवाप ह ।
अत्र नारायणः स्नात्वा ररक्ष जगदात्मवान् ॥३०॥

चान्द्रायणैस्तथाकृच्छ्रैः सान्तपनैर्यत्फलं लभते नरः ।
तत्फलं समवाप्नोति इह स्नानान्न संशयः ॥३१॥

अश्वमेधादिभिर्यागैर्वाजपेयादिभिरपि ।
यत्फलं समवाप्नोति तत्प्राप्नोत्यत्र पानतः ॥३२॥

ज्योतिष्टोमादिभिर्यागैः कृतैर्वा भूरिदक्षिणैः ।
यत्फलं लभते मर्त्यः तदाप्नोत्यत्र दानतः ॥३३॥

पितरो सर्वतो देवि नृत्यन्ति च मुहुर्मुहुः ।
अत्र लोकारिके तीर्थे दायादाः सलिलादिभिः ॥३४॥

तर्पयिष्यन्ति नियतं पितृलोकगता अपि ।
श्राद्धमपि च क्षौद्रेण मिश्रं ब्राह्मणतर्पणम् ॥३५॥

---

२९ घ मा गस – शक्र

ब मातृकायां ३० श्लोकतः— ३३ श्लोकं यावत्पाठो नास्ति ।

३५ कः मा तर्पयष्यन्ति – तर्पयिष्यन्ति

करिष्यन्ति न सन्देह: प्रीणन्ति पितरस्सदा ॥३६॥

न लोकारिसमं तीर्थं दिवि वा भूतलेऽपि वा ।
अन्तरिक्षेऽपि देवेशि न भूतं न भविष्यति ॥३७॥

द्विधाभवत्तदा तत्र ज्वाला तस्य महात्मन: ।
एका लग्ना परे पारे आविर्भूता हरेस्तथा ॥३८॥

तस्मादत्र महादेवि स्नातव्यमविशङ्कया ।
तत्र स्नात्वा च पीत्वा च मुच्यते ब्रह्महत्यया ॥३९॥

तिलमात्रमपोशानि ह्यत्र मेरुसमं भवेत् ।
अज्ञानाज्ज्ञानतो वापि भस्मीकर्म शुभाशुभम् ॥४०॥

बहुनात्र किमुक्तेन भूयो भूयो वरानने ।
न लोकारिसमं तीर्थं न भूतं न भविष्यति ॥४१॥

---

३६ क: मा रसन्देह:—न सन्देह:

३८ घ: ब हरेस्तत:—हरेस्तथा

४० घ: ब कर्तंकर्म –भस्मीकर्म

४१ क: ब लोकारिणा–न लोकारि

इति ते कथितं देवि तीर्थं लोकारिसंज्ञितम् ।
पठनाच्छ्रवणाद्वापि महापातकनाशनम् ॥४२॥

इत्येव पटलो गुह्यो महापातकनाशनः ।
श्रुत्वा पठित्वा देवेशि फलमाप्नोति याागजम् ॥४३॥

*इति लोकारिदर्शनं नाम पटलः ॥२१॥

---

४३ ब मातृकातः सम्पादितः

*'ब' मातृकायाम्—इति श्रीवितस्तामाहात्म्ये लोकारितीर्थ-वर्णनं नाम एकविंश पटलः ॥२१॥

## अथ द्वाविंशः पटलः

*भैरव्युवाच

श्रुतं लोकारितीर्थस्य माहात्म्यममरोत्तम ॥१॥

इदानीं श्रोतुमिच्छामि वितस्ताशैलगङ्गयोः ।
सङ्गमस्य च माहात्म्यं पुण्यं पापापनोदनम् ॥२॥

भैरव उवाच

पुरा दोहदनी भूत्वा सङ्गता त्रिपुरारिणा ।
हिमालयसुता देवि सम्पूर्णनवयौवना ॥३॥

दृष्ट्वा दोहदनीं तत्र पार्वती मातरस्तथा ।
मुमुदुर्दैवतैः सार्धं मुनिभिश्च पुरातनैः ॥४॥

यक्षगन्धर्वरक्षोभिर्विद्याधरमहोरगैः ।
किन्नरैरप्सरोभिश्च समं च ननृतुस्तदा ॥५॥

---

*ब भैरवी—भैरव्युवाच

१ खः मा महिमानमनुत्तमम्—माहात्म्यममरोत्तम

२ खः मा सङ्गमशैलगङ्गयोः—वितस्ताशैलगङ्गयोः

२ 'मा' मातृकायां २ श्लोकतः १७ श्लोकपर्यन्तं पाठो नास्ति ।

ब्राह्म्याद्या मातरस्तत्र दृष्ट्वा देवीं तथाविधाम् ।
कर्तुमारेभिरे तस्याः क्रियाः पुंसवनादिकाः ॥६॥

ब्राह्म्याद्या मातरस्तत्र शैलोद्देशे तु शोभने ।
चक्रुः पुंसवनं देव्याः पार्वत्या जगदम्बिके ॥७॥

संतर्पितास्तत्र तत्र पुण्ये पुंसवने शुभे ।
मुनयश्च सुराश्चापि ब्राह्म्याद्याभिश्च मातृभिः ॥८॥

आशीभिर्वर्धयामासुर्ब्राह्म्याद्या जगदम्बिकाम् ।
ततो ब्राह्मी स्तनं तस्याः दुदोहादर्शमण्डले ॥९॥

प्रससर्प च तत्पृष्ठे क्षीरं पुंस्त्वसूचनम् ।
स्तनपीडनसम्भूता क्षीरधारा महेश्वरि ॥१०॥

प्रससार पुनस्तत्र शैलोद्देशे तु शोभने ।
सैव क्षीरनदी पुण्या श्वेतगङ्गाभिधाभवत् ॥११॥

सङ्गमे च वितस्ताया गङ्गाया अपि सुन्दरि ।
स्नात्वा दत्त्वा च मुच्येत महापातककोटिभिः ॥१२॥

चूडामणौ नरो यस्तु स्नात्यत्र सङ्गमे यदा ।
तदा मुच्येत देवेशि कोटिजन्मभवैरघैः ॥१३॥

---

८ गः ब पुराश्चापि – सुराश्चापि

यः स्नाति नित्यं मनुजो हि देवि
योगे वितस्ताचलगङ्गयो प्रिये ।
स याति पुण्यञ्च सादाशिवं पुरं
योगेश्वराणामपि दुर्लभं परम् ॥१४॥

गङ्गावितस्तयोसङ्गे स्नानाद्दानान्महेश्वरि ।
अक्षयं फलमाप्नोति देवानामपि दुर्लभम् ॥१५॥

श्वेतावितस्तयोः सङ्गः पुनाति भुवनत्रयम् ।
स्नानदानजपैर्होमैर्यज्ञैश्च भूरिदक्षिणैः ॥१६॥

सङ्गमाद्वा महादेवे स्विन्नारिं यावदन्ततः ।
वितस्ता हरते पापं कोटिजन्मशतोद्भवम् ॥१७॥

स्विन्नारिक्षेत्रे देवेशि स्नात्वा मुच्येत सङ्कटात् ॥१८॥

पुरा ह्यर्चाबलौ देवि गयो नाम स दानवः ।
तपस्तपन्स विपुलं शिवपूजापरायणः ॥१९॥

तदन्तरे महादेवि वितस्ता प्रचचाल ह ।
पूजोपकरणं तस्य ह्युदमज्जजलान्तरे ॥२०॥

दृष्ट्वा पूजोपकरणमयं वै दैत्यपुङ्गवः ।
क्रोधात्पञ्चाङ्गुलीभिस्तामनयच्छीर्णतां नदीम् ॥२१॥

---

२० घः मा दमज्ज—ह्युदमज्ज
२१ खः भयं—मयं

मार्गमुल्लङ्घ्य देवेशि नदी परमपावनी ।
प्राचलत्पङ्कनालेन विशीर्णा ह्यभवत्ततः ॥२२॥

दृष्ट्वा तां कश्यपस्थूणं विशीर्णाञ्च महानदीम् ।
स्तुवन्हरिहरौ प्रायः शुशोच प्ररुरोद ह ॥२३॥

शोकान्वितं हरिः प्रेक्ष्य कश्यपं सुरसुन्दरि ।
स तु चक्रं समादाय प्राद्रवद्राक्षसं प्रति ॥२४॥

सचक्रं तु हरिं प्रेक्ष्य ततो राक्षसपुङ्गवः ।
प्रादुद्राव ततस्तत्र मार्गमुल्लङ्घ्य सुन्दरि ॥२५॥

प्रद्रवन्तं हरिं दृष्ट्वा राक्षसं क्रोधसंयुतः ।
चक्रेण प्राहरत्तत्र हरिस्विन्नो ह्यभूत्पुरा ॥२६॥

स्वेदधारा हरेस्तत्र मिलिता च वितस्तया ।
ततस्तत्क्षेत्रमभवत्स्विन्नार्याख्यं महेश्वरि ॥२७॥

---

२३ कः मा स्थूर्ण—स्थूण

स्वत— स्तुवन्

२४ ब श्लोकस्य द्वितीया पंक्तिद्रिक्ता वर्तते ।

मा मातृकायां २३–२४ श्लोकौ न स्तः

२७ गः मा यतः—ततः

अरिं दृष्ट्वा ततो देवि स्विन्नोऽभून्मधुसूदन: ।
तत: स्विन्नारिरित्याख्यामलभत्क्षेत्रमुत्तमम् ॥२८॥

स्विन्नारिदेशे देवेशि स्नात्वा मुच्येत सङ्कटात् ।
स्विन्नारौ च वितस्तायां स्नानाद्दानाज्जपात्तथा ॥२९॥

तर्पणाच्च तथा होमान्मुच्येतापि हि बन्धनात् ।
यत्र वै पञ्चधा भूत्वा प्रचचाल महानदी ॥३०॥

प्रणालै: पञ्चभिर्देवि पञ्चनालमिति स्मृतम् ।
पञ्चनालसमीपे तु स्नात्वा मुच्येत सङ्कटात् ॥३१॥

चक्रप्रान्तेन च तदा हरिणा ह्युद्धृता स्वयम् ।
वितस्ता च स्वमार्गेण प्रससार तत: परम् ॥३२॥

अस्विन्नारेर्महादेवि ह्यर्चाबलसमन्तत: ।
स्विन्नारिक्षेत्रं प्रोक्तं वै भुक्तिमुक्तिफलप्रदम् ॥३३॥

अर्चाबलात्समारभ्य यावदासिन्धुसङ्गमम् ।
क्षेत्रं प्रोक्तं महेशानि पञ्चनालाभिधं परम् ॥३४॥

पञ्चाले नर: स्नात्वा कोटिजन्मभवैरघै: ।
मुच्यते जगदीशानि इति सत्यं वदामि ते ॥३५॥

---

३१ क: मा प्रणालैर्देवदेवेशि—प्रणालै: पञ्चभिर्देवि

पञ्चनाले नरः श्राद्धं कृत्वा तत्र विधानतः ।
पितरस्तृप्तिमायान्ति यावत्कल्पं महेश्वरि ॥३६॥

इति ते कथितं देवि तीर्थं परमपावनम् ।
स्विन्नारिपञ्चनालाख्यं वितस्तायाश्च सङ्गतम् ॥३७॥

इति गुह्यः समाख्यातः पटलस्ते मयानघे ।
श्रवणात्पठनाच्चैव महापातकनाशनः ॥३८॥

इति श्रीवितस्तामाहात्म्ये *श्वेतसङ्गमस्विन्नारिपञ्च-
नालाख्यं वर्णनं नाम पटलः ॥२९॥

---

३६ गः मा तृप्ताः प्रीता भवन्त्यत्र — पितरस्तृप्तिमायान्ति

३७ घः मा सङ्गगः —सङ्गतम

*स्पन्नारि — स्विन्नारि

## अथ त्रयोविंशः पटलः

*श्रीभैव्युवाच

श्रावं श्रावं महादेव वितस्ताया परं महत् ।
पञ्चनालस्य माहात्म्यं निर्वृत्तास्मि भवार्णवात् ॥१॥

अधुना श्रोतुमिच्छामि शारदं पुरमुत्तमम् ।
शारीभूता यत्र नदी वितस्ता सिन्धुना सह ॥२॥

मार्यां सह महादेव महापातकनाशिनी ।
वेणीक्षेत्रं समाचक्षुः वितस्तायां परं महत् ॥३॥

यदि ह्यहमनुग्राह्या प्रिया तेऽस्मि महेश्वर ।
शारदाख्ये पुरे देव वेणीक्षेत्रं तदा वद ॥४॥

---

*मा श्रीदेव्युवाच- श्रीभैरव्युवाच

१ खः व पुरं—परं

२ खः मा शारदापुरसत्तम – शारदं पुरमुत्तमं

३ कः मा मय्या —मार्यां

४ खः मा प्रया—प्रिया
गः देवे—देव
घः वह—वद

*भैरव उवाच

श्रृणु देवि प्रवक्ष्यामि वितस्तासिन्धुजं फलम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥५॥

प्रत्याख्यातो यदा तत्र हरिणा लोकधारिणा ।
गयासुरस्तत्र तत्र शिवपूजापरोऽभवत् ॥६॥

पुरा कैलासशिखरे देवदेवी महेश्वरी ।
गङ्गाक्रोधपरीताङ्गी पश्यति स्म महेश्वरि ॥७॥

गङ्गापि स्पर्धया देव्या क्रोधरक्तान्तलोचना ।
पश्यति स्म पुरः शम्भोर्गणा विस्मयमाययुः ॥८॥

स्पर्धां दृष्ट्वा तयोर्देव्योः शम्भुः परमविस्मितः ।
देवीमेकान्तमानीय श्लक्ष्णं वचनमब्रवीत् ॥९॥

त्वमेव मम प्राणेशी जीवितादधिका प्रिया ।
किमतेया महादेवि स्पर्धसे जडरूपया ॥१०॥

---

*मा श्रीभैरव उवाच—भैरव उवाच

६ गः मा सुरस्तस्तत्र—सुरस्तत्र तत्र

७ गः मा परीतास्मि - परीताङ्गी

घ हि—स्म

१० खः मा दयिता—अधिका प्रिये

शंभोर्वचनमाकर्ण्य देवी स्पर्धां जहौ तया ।
चिक्रीड शम्भुना सार्धं कैलासोपवने तदा ॥११॥

एकदा शिवयोर्देवि कैलासाख्ये गिरौ वने ।
ग्रीष्मे गङ्गाम्भसि स्नातुमभिलाषाभवत्तयो: ॥१२॥

ममज्जतुस्ततस्तौ तु गङ्गायां जगदम्बिके ।
स्नानाभिलषिणौ देवौ परमानन्दनिवृत्तौ ॥१३॥

क्रीडन्तं तु शिवं दृष्ट्वा तया सार्धम्महेश्वरि ।
गङ्गा तद्वस्त्रयुगलं जहार परमेश्वरि ॥१४॥

कृत्वा नग्नां ततो देवीं प्रजहास वियन्नदी ।
हसन्ती तत्र तां दृष्ट्वा गङ्गां देवीं महेश्वरीम् ॥१५॥

आज्ञापयत्तत: सिंहं देवी गङ्गा जिहीर्षया ।
आज्ञाप्तस्तु ततो देव्या क्रुद्धो वाहनकेसरी ॥१६॥

---

११ क: मा शम्भोर्वच: समाकर्ण्य—शम्भोर्वचनमाकर्ण्य

ख: कैलासे पर्वते—कैलासोपवने

१२ ग: मा गंगांभुसि—गङ्गाम्भसि

ध: अभिलाषो—अभिलाषा

मुखं प्रसार्य तां गङ्गां प्राद्रवद्ग्रसितं तदा ।
दृष्ट्वा सिंहं तदायान्तं क्रोधरक्तान्तलोचनम् ॥१७॥

वेपमाना ध्वनियुता प्रादुद्राव ततो नदी ॥१८॥

सिंहं दृष्ट्वा वेपमाना ध्वनती च नदी यतः ।
ततः पुरातनैः प्रोक्ता सिंधुर्नाम महेश्वरि ॥१९॥

सिंहं दृष्ट्वैव पापानि ध्वनन्ति जगदम्बिके ।
एतयोर्दर्शनादेव ततः सिन्धुः प्रकीर्तिता ॥२०॥

पुरा तारकनाशार्थं देवाः शक्रपुरोगमाः ।
वाग्भिरर्थ्याभिर्स्रष्टारमीडिरे जगदम्बिके ॥२१॥

तेषां श्रुत्वा वचः सम्यग्ब्रह्मा लोकपितामहः ।
उवाच श्लक्ष्णया वाचा देवानिन्द्रपुरोगमान् ॥२२॥

*ब्रह्मोवाच

श्रृणुध्वं वै देवगणा वचनं वः श्रुतं मया ।
वरदानेन दृप्तोऽयं तारको नाम दानवः ॥२३॥

---

१७ खः मा प्राद्रवद्ग्रसितं—प्राद्रवद्ग्रसितं

१८ कः मा ध्वनिगुप्ता—ध्वनियुता

*ब्रह्मा् वाच—ब्रह्मोवाच

२३ गः मा वाग्दानेन—वरदानेन

न मया विष्णुना वापि हन्तुं शक्य: कदाचन ।
ऋते रुद्रांशसम्भूता तेजस: सुरसत्तमा: ॥२४॥

हिमाद्रौ च समाधिस्थो देव: परमयत्नवान् ।
पार्वत्यपि च सेवायां तस्य नित्यमतन्द्रिता ॥२५॥

तस्माद्यतध्वं देवेशास्तस्यां भावेन येन स: ।
अंशमुत्पादयेद्देव इति सत्यं ब्रवीमि व: ॥२६॥

श्रुत्वा तु वचनं तस्य ब्रह्मणोऽव्यक्तजन्मन: ।
तत आगत्य ते देवा: कामगेहं ययु: पुन: ॥२७॥

कामो दृष्ट्वा तु संप्राप्तान्देवाञ्शक्रपुरोगमान् ।
प्रत्युक्तानाभिवादेन पूजयामास तान्प्रिये ॥२८॥

कामोऽब्रवीत्तान्देवेशान्ब्रूतागमनकारणम् ।
प्रतिजाने हरस्यापि धैर्याभ्र शङ्करोम्यहम् ॥२९॥

श्रुत्वानङ्गवच: सौम्यमादरेण दिवौकस: ।
प्रोचु: कामं वच: सौम्यं शक्राद्या: सुरसुन्दरि ॥३०॥

---

२४ ख: मा शक्र:—शक्य:

२५ घ: मा यस्य—तस्य

२८ ख: ब चक्रपुरोगमान्—शक्रपुरोगमान्

२९ ख: ब ब्रूतागमनतारण—ब्रूतागमनकारणम्

वयं विप्रकृतानङ्गतारकाख्येन वैरिणा ।
दानवेनोग्रतपसा लब्धाभिमतदर्पिणा ॥३१॥

ऋते रुद्रांशतो नैव जातु नश्येत्स दानवः ।
रुद्रांशोत्पादने तस्माद्यतेतागमकारणम् ॥३२॥

श्रुत्वा देववचः कामोऽब्रवीद्देवान्समाहितान् ।
गच्छध्वमालयान्स्वान्स्वान्कृतं जानीत सत्तमाः ॥३३॥

एषोऽहमृतुराजेन समं गच्छामि तत्र वै ।
स्थाण्वाश्रमे हैमवते समाधेश्चालयामि तम् ॥३४॥

देवाः श्रुत्वा वचस्तस्य प्रययुः स्वं स्वमालयम् ।
कामोऽपि च धनुर्गृह्य वसन्तेन समं तदा ॥३५॥

---

३१ कः मा कथं—वयं

खः मारकाख्येन—तारकाख्येन

घः अभिलषित—अभिमत

३२ गः व रुद्रांशे—रुद्रांशो

३४ कः व ऋतुराजन—ऋतुराजेन

खः मा ह्—वै

गः हैमवत्ये—हैमवते

३५ खः मा प्रतयुः—प्रययुः

प्रतस्थे हिमवच्छृङ्गं सिद्धचारणसेवितम् ।
नानापुष्पफलाढ्यं च नानापुष्पसमाकुलम् ॥३६॥

मत्तभ्रमरसंघुष्टं देवगन्धर्वराजितम् ।
स्थानं चकार सुमहद्वसन्तसहितोऽनघे ॥३७॥

सुरेश्वरी गिरौ पादे पुण्ये दलसरस्तटे ।
प्राकरोत्तत्र वै शालां मारेण सुरसुन्दरि ॥३८॥

तदा प्रभृति तत्स्थानं मारशालेति कथ्यते ॥३९॥

मारशालासमीपे तु स्नात्वा दलसरोवरे ।
मुच्येन्नरो महापापैर्ब्रह्महत्यादिकैरपि ॥४०॥

ततःस गत्वा देवेशं यत्र स्थाणुस्तपोऽचरत् ॥४१॥

गत्वा स्थाणुसमीपे तु कामः कमललोचने ।
धनुस्सज्यं ततः कृत्वा विससर्ज शरं पुरः ॥४२॥

---

३६ घः मा नानापक्षिसमाकुलं—नानापुष्पसमाकुलम्

३९ घः मा कृष्यते—कथ्यते

४१ खः मा तेदेशं—देवेशं

'मा' मातृकायामयमधिकः श्लोकः
तस्माद्व मारशालायाः समीपे सुरसुन्दरि ।
स्नानाद्दानाज्जपाद्धोमादक्षयं फलमाप्नुयात् ॥

वसन्तश्चापि धनुषः श्रुत्वा स्वनमनुत्तमम् ।
प्रससार वने तस्मिन्प्रफुल्लवनपादपः ॥४३॥

अकाले च प्रसरन्तं तु वसन्तं प्रेक्ष्य सुन्दरि ।
नन्दीवनं समुद्वीक्ष्य शशास गणसत्तमान् ॥४४॥

ततो रुद्रो महादेवि कुसमेषु शराहतः ।
समाधेश्चलितो देव्यां प्रेमदृष्टा ह्यलोकयत् ॥४५॥

पुनर्ददर्श भगवांश्चतुर्दिक्षुसमन्ततः ॥४६॥

स च कर्षन्तमालोक्य पुष्पेषु भ्रमरार्चिके ।
क्रोधमहारयाञ्चक्रे महाप्रलयजं महत् ॥४७॥

समुत्पाद्य ततो वह्निं भालनेत्रान्महेश्वरि ।
तेनैव वह्निना कामं भस्मसादकरोत्क्षणात् ॥४८॥

दृष्ट्वा क्रोधपरीताक्ष्यं शिवं देवी पुरः स्थिता ।
भीता रुरोद नगजा परिमाणमुखाम्बुजा ॥४९॥

ताराश्रुभिर्देवदेव्याः सरो दिव्यं बभूव ह ।
इन्द्रजालभूतं तत्रैव कामं रतिरवाक्षिपत् ॥५०॥

---

४४ क: मा अकाले च प्रसवतं — अकाले प्रसरन्तं

४८ ख: ब बालनेत्रात् — भालनेत्रात्

तत्क्षेपेण महेशानि सरस्तत्तु द्विधाभवत् ।
तत्क्षेपघातजादोघान्नदीं परमपावनीम् ॥५१॥

प्रससार ततः पुण्या मारीनामेति विश्रुता ॥५२॥

यत्तु ताराश्रुभिर्भूतं सरः पुण्यं महेश्वरि ।
ताराख्यं च बभूवात्र प्रसिद्धं जगदम्बिके ॥५३॥

यत्तु मारस्य देहेन द्विधा भूतं सरोवरम् ।
तन्माराख्यमिति प्रोक्तमागमज्ञैः पुरातनैः ॥५४॥

देवेन सान्त्विताया्स्तु देव्यास्तत्र प्रसादजा ।
ज्योत्स्ना भवतु तेऽस्मिञ्ज्योत्स्ना देवीति विश्रुता ॥५५॥

दर्शनात्स्पर्शनाच्चैव स्नानाच्च सरसोर्द्वयोः ।
नरो मुक्तिमवाप्नोति सत्यं सत्यं वरानने ॥५६॥

ज्योत्स्नाया दर्शनात्तत्र ज्ञानमाप्नोति मानवः ।
ज्ञानाद्युक्तो भवत्येव नात्र कार्या विचारणा ॥५७॥

---

५४ गः ब तन्माराक्षं—तन्माराख्यं

५५ खः मा देव्यास्नेत्र—देव्यास्तत्र

५६ खः मा सरसोर्तयोः—सरसोर्द्वयोः

५७ गः मा ज्ञानान्मुक्त—ज्ञानाद्युक्तः

यस्माच्च निर्गता तत्र मारक्षेपान्महेश्वरि ।
तस्मान्मारीति कथिता नदी परमपावनी ।।५८।।

रातिलक्ष्मीं महादेवि मोक्षलक्ष्मीमपि प्रिये ।
तस्मान्मारीति कथिता मन्त्रतन्त्रविशारदैः ।।५९।।

मारी समागता यत्र नदीभ्यां परमेश्वरि ।
शबलत्वं ददौ तत्र जलपूरो यतः स्वयम् ।।६०।।

ततः प्रख्यातिमगमच्छारदं पुरमुत्तमम् ।।६१।।

श्रद्धया पूरिता यत्र जलौघैः पितृदेवताः ।
मनुजैरपि चेशानि श्राद्धपुराभिधं महत् ।।६२।।

कश्यपः श्राद्धपुराख्ये दानवं तपसि स्थितम् ।
स शुशोच ततो विष्णुविज्ञप्तिमकरोत्तदा ।।६३।।

शोचन्तं कश्यपं दृष्ट्वा सान्त्वयामास तं तदा ।
मा भैः प्रजापते ह्यस्माद्राक्षसापशदान्मुने ।।६४।।

रक्षः शिरः पितृबलिं करोम्येव न संशयः ।।६५।।

---

६२ गः मा वेशानि—चेशानि

६४ खः मा मात्रया—सान्त्वया

शृणु कश्यप वक्ष्येऽहं वेणीक्षेत्रससम्भवम् ।
महिमानं श्राद्धपुरे देवानामपि दुर्लभम् ॥६६॥

निष्कलं परमं दिव्यं क्षेत्रमेतत्प्रकीर्तितम् ।
मारीसिन्धुवितस्ताख्यं त्रिजलं त्रिगुणात्मकम् ॥६७॥

तस्मादत्र च यो नित्यं स्नाति सोमार्यमादिने ।
स याति चन्द्रमालोक्यमिति सत्यं वदामि ते ॥६८॥

मां ब्राह्मणं शिवं चापि प्रोचुः पुत्रगणाः पुरा ।
पिण्डं दत्तञ्च दायादैरक्षयं याति यत्नतः ॥६९॥

तीर्थं कुरुध्वं तद्देवा भीतानां च कलौ पुनः ।
ततः कृतं तीर्थमिदं वितस्तासिन्धुसङ्गमम् ॥७०॥

प्रकर्षेण कृतो यागो ब्रह्मणा याग उत्तमः ।
ततः प्रोक्तं प्रयागाख्यं सर्वपापहरं कलौ ॥७१॥

---

६६ कः मा कश्य—कश्यप

खः समुद्भवम्—ससम्भवम्

६७ खः मा प्रकाशितम्—प्रकीर्तितम्

घः त्रिगुणान्वित—त्रिगुणात्मकं

६८ गः मा सायुज्यं- आलोक्यं

७१ खः मा सुरपूजिते—याग उत्तमः

प्रकर्षेण प्रापयति ज्ञानं परमकं यतः ।
ततः प्रोक्तं प्रयागाख्यं तीर्थं परमपावनम् ॥७२॥

यत्र नित्यं महेशानि ज्योतिसङ्कर्षणात्पुरा ।
अक्षयाख्यो वटः सोऽयं पितृदेवर्षितृप्तिदः ॥७३॥

यत्र स्नानं जपो होमस्तपस्स्वाध्याय एव च ।
दानं दमञ्च धर्मञ्च कृतोऽप्यक्षय्यतां व्रजेत् ॥७४॥

यत्सन्निधाने देवानां पितृणां च महेश्वरि ।
दत्तमक्षय्यतां याति मुनीनां च सदा कलौ ॥७५॥

यद्दर्शनाद्भवेत्पुण्यं यज्ञकोटिसमुद्भवम् ॥७६॥
तीर्थराजे प्रयागाख्ये वितस्ता सिन्धुजे प्रिये ।

स्नात्वा मुक्तिमवाप्नोति नरो भक्तिसमन्वितः ॥७७॥

तीर्थराजेऽक्षयवटसन्निधौ यो महेश्वरि ।
श्राद्धं कुर्यात्तस्य पुण्यफलं शेषोऽपि वक्ति नु ॥७८॥

पितृनुद्दिश्य यो दद्यात्सक्तुपिण्डं महेश्वरि ।
सक्तौ सक्तौ लभेत्पुण्यं कपिलाकोटिदानजम् ॥७९॥

---

७९ गः मा भवेत्—लभेत्

इति ते कथितं देवि शारदाख्ये पुरे महत् ।
वितस्तासिंधुजतीर्थं महापातकहं कलौ ॥८०॥

इति श्रीवितस्तामाहात्म्ये शारदापुरमहिमा- नाम त्रयोविंशः पटलः ॥२३॥

---

८० मा मातृकायामयं श्लोकः नास्ति ।
इति श्रीपटलो गुह्यो वितस्तासिन्धुसङ्गमः ।
श्रोतव्यो पठितव्यश्च कोटिहत्यापनुत्तये ॥

# अथ चतुर्विंशः पटलः

*भैरव्युवाच

स्मारं स्मारं प्रयागस्य वितस्तासिन्धुजस्य वै ।
माहात्म्यममरेशान निर्वृत्तास्मि भवाम्बुधेः ॥१॥

पुण्ये श्राद्धपुरे देवि वितस्तासिन्धुसङ्गमे ।
योऽक्षयवट इत्युक्तस्त्वयैव जगदीश्वर ॥२॥

कथं साङ्कर्षणी ज्वाला किमर्थं प्रथिता प्रभो ।
कथं सा वृक्षरूपेण परिणाममुपागता ॥३॥

तत्सर्वं श्रोतुमिच्छामि कृपया वद मे प्रिय ॥४॥

भैरव उवाच

शृणु सुश्रोणि वक्ष्यामि वटोत्पत्ति महेश्वरि ।
यद्विज्ञानादवाप्नोति गोसहस्रफलं नरः ॥५॥

---

*मा श्रीभैरव्युवाच—भैरव्युवाच

२ खः व सिन्धुजस्य वै गमं – सिन्धुसङ्गमे वै

खः त्वया व – त्वयैव

गयासुर: श्राद्धपूरे ब्राह्मणान्समभक्षयत् ।
विघ्नान्कृत्वा जगामाशु पातालाच्च तलातलम् ॥६॥

पुन: पुनर्विघ्नराशिं कृत्वा तीर्थवरे शुभे ।
तलातलं जगामाशु रक्षोकुलसमावृत: ॥७॥

दृष्ट्वा तु मुनय: सर्वे राक्षसस्य प्रबाधनम् ।
प्रभविष्णुं महाविष्णुं सूक्तैरीशानमीडिरे ॥८॥

श्रुत्वा तु वचनं तेषां मुनीनां भावितात्मनाम् ।
प्रोवाच वचनं तेषां सान्त्वयन्शुभया गिरा ॥९॥

*श्रीभगवान्

शृणुध्वं मुनय: सर्वे वचनं मम सुव्रता: ।
मच्चक्रपातजाद्घाताद्राक्षसपशद: स्वयम् ॥१०॥

प्राणान्हास्यति सन्तृप्त इति सत्यं वदामि व: ॥११॥

---

*मा श्रीभगवानुवाच—श्रीभगवान्

६ ग: मा विघ्नं—विघ्नान्

१० ग: मा संजाताघात—जात्घातात्

घ: पशद:—पशद: स्वयम्

११ ग: मा संदृप्त:—संतृप्त:

व्यथध्वं मा मुनिगणा त्यक्तव्यो मानसो ज्वरः ।
शिरो गयासुरस्यास्य पितॄणां बलिमाहरम् ॥१२॥

इति श्रुत्वा वचस्तस्य विष्णोरमिततेजसः ।
जग्मुर्यथागतं देवि मुनयस्तुष्टमानसाः ॥१३॥

भगवानपि स्वं चक्रं गृहीत्वा जगदीश्वरि ।
जगाम शीघ्रं तत्रैव वितस्तासिन्धुसङ्गमे ॥१४॥

राक्षसागमनं तत्र प्रतीक्षंस्तस्थिवांश्चिरम् ।
तस्मिन्नवसरे तत्र राक्षसः पुनरागतः ॥१५॥

विघ्नं प्रकुर्वंस्तत्रस्थमुनीनां भावितात्मनाम् ।
तं दृष्ट्वा राक्षसं घोरं विनिघ्नंतं तपस्विनाम् ॥१६

जघान तं तदा विष्णुश्चक्रेणारिमारिणा ।
चक्रप्रहाराभिहतो दुद्राव रुधिरं वमन् ॥१७॥

---

१२ कः मा वृषध्वं—व्यथध्वं
खः व्योतव्यो—त्यक्तव्यो
मानुसोजुरः—मानसो ज्वर
१३ खः मा विष्णुरोमिततेजसः—विष्णोरमिततेजसः
१४ कः मा चक्रं स्वं—स्वं चक्रं
१७ घः मा वसन्—वमन्

अन्वधावच्च तद्रक्षोदेवदेवो जनार्दन: ।
गदया चापि तं जघ्ने राक्षसं भगवान्हरि: ॥१८॥

अनुद्रवत्पुनस्तञ्च यावद्दै पात्रमूलकम् ।
तत्रैव रक्ष: पातालं प्रदुद्राव महेश्वरि ॥१९॥

तत्रोद्भूता महागङ्गा पातालाज्जगदीश्वरि ।
तत्र स्नात्वा नरो देवि मुक्तिभागी न संशय: ॥२०॥

यत्र यत्रापतत्तस्य रुधिरं राक्षसस्य वै ।
तत्र तत्रैव पितर: प्रीतास्तृप्तिमवाप्नुवन् ॥२१॥

स्नानं दानं तथा श्राद्धं बालुकाभिरपीश्वरि ।
कृत्वा प्राप्नोति मनुज: पुण्यं गोकोटिसम्भवम् ॥२२॥
भगवानपि तेनैव मार्गेणानुप्रधाव्यन्तम् ।
प्रहारैरर्दयामास चक्रखड्गसमुद्भवै: ॥२३॥

चक्रप्रहारैर्बहुभिरर्दितो राक्षसाधम: ।
सङ्कर्षणशिरोदेशे पपात व्याकुलेन्द्रिय: ॥२४॥

---

२० ग: मा महादेवि—नरो देवि

२३ घ: मा चक्रगदा—चक्रखड्ग-

२४ मा मातृकायामियं पंक्तिरधिका—
तत: संकर्षणोऽस्यासीत्क्रोधज्वालाकुलेन्द्रिय: ।

तज्ज्वालाकुलितः सोऽपि समुत्तस्थौ पुनस्ततः ॥२५॥

वितस्तासिन्धुजादोघाद्राक्षसः श्यामरूपधृत् ।
न शशास ततो ज्वाला प्रिये सङ्कर्षणस्य सा ॥२६॥

दृष्ट्वा साङ्कर्षणीं ज्वालां पितृदेवर्षिसत्तमाः ।
समाजग्मुस्तीर्थवरं भीता परमविस्मिताः ॥२७॥

भगवन्तं महाविष्णुं वाग्भिरर्थ्याभिरस्तुवन् ॥२८॥

श्रुत्वा देवनुतिं देवो राक्षसं प्राद्रवत्पुनः ।
पुण्ये श्राद्धपुरे देवि चक्रेणास्य शिरोऽहरत् ॥२९॥

शिरो यद्राक्षसस्तस्य तदभूत्तीर्थमुत्तमम् ।
गयाशिलाभिधं देवि पितॄणां तृप्तिकारकम् ॥३०॥

रुधिरस्य च यत्कुण्डं तीर्थभूतं गयाभिधम् ।
श्राद्धं तत्र च यो दद्याच्छाकैरपि सुरेश्वरि ॥३१॥

पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ।
पुनश्चाप्यायियौ तत्र ज्वाला साङ्कर्षणी यतः ॥३२॥

---

२६ खः व यामरूपधृत्—श्यामरूपधृत्

३२ खः मा शतशल्यं—शतकल्पं

महाविष्णुर्महादेवि देवांस्तत्र समागतान् ।
प्राह प्रसन्नवदनो मेघगम्भीरया गिरा ॥३३॥

अयं गयासुरो घोरो राक्षसापशदो मया ।
हतोऽन्यत्कार्यमीशानाः कर्तुमिच्छथ सत्तमाः ॥३४॥

श्रुत्वात्र ते तदा देवि महाविष्णोर्वचः शुभम् ।
ऊचुस्तं देवदेवेशं कृपां कुरु जनार्दन ॥३५॥

देवांस्तानाह भगवान्मा व्यथध्वं सुरर्षयः ।
इयं साङ्कर्षणी ज्वाला न शाम्यति कदाचन ॥३६॥

चक्रेण स्पृष्ट्वा ज्वालां भगवांस्तां जनार्दनः ।
सँवाक्षयाभवद्देवि वृक्षरूपा महेश्वरि ॥३७॥

तस्मादत्र प्रयागे तु वितस्तासिन्धुसङ्गमे ।
स्नानं दानं तपो होमः स्वाध्यायः पितृतर्पणम् ॥३८॥

अक्षयञ्च भवेच्छ्राद्धमक्षयवटसन्निधौ ।
इत्थं वरं तत्र दत्वा देवर्षिगणसंवृतः ॥३९॥

महाविष्णुः जगामाशु वैकुण्ठं जगदम्बिके ।
ततः शूली महेशानः शूलं वै दत्तवान्स्वयम् ॥४०॥

---

३४ गः मा हृतन्योत्कार्यं—हृतोऽन्यत्कार्यं

रुद्राक्षस्य गणेशस्य तीर्थरक्षां कुरु स्वयम् ।
ततः शूली गणः सोऽपि तीर्थरक्षाञ्चकार ह ॥४१॥

तत्सन्निधौ महेशानि रुद्राक्षो नाम वै गणः ।
स ग्रामः कथितो देवि शूलवान्नामनामतः ॥४२॥

स्नात्वा प्रयागतीर्थे वै शूलवत्सन्निधौ नरः ।
पुण्यमाप्नोति कपिलादानजं सुरसुन्दरि ॥४३॥

स्नानं दानं तपो होमः स्वाध्यायश्च शिवार्चनम् ।
श्राद्धमक्षयतामेति शूलवत्सन्निधौ प्रिये ॥४४॥

सर्वदेशाः सर्वग्रामास्तीर्थानि सकलान्यपि ।
माहात्म्यं तीर्थराजस्य कलां नार्हन्ति षोडशीम् ॥४५॥

---

४२ ख: मा रुद्राक्ष्यो—रुद्राक्षो

ग: प्रथितो—कथितो

घ: शील—शूल

'मा' मातृकायामधिकः पाठः

शूलं गृहीत्वा तीर्थं तद्रक्ष जगदीश्वरि ।

यथारक्षत्तीर्थवरं शूलं नाम वै गणः ॥

४५ घ: ब नार्चन्ति—नार्हन्ति

इति ते कथितं देवि तीर्थराजफलं महत् ।
शारदाख्ये पुरे रम्ये तथाक्षयवटस्य ते ॥४६॥

इत्येष पटलो गुह्यो मया देवि प्रकाशित: ।
श्रुत्वा पठित्वा प्राप्नोति फलं सिन्धुप्रयागजम् ॥४७॥

इति श्रीवितस्तामाहात्म्ये गयाशिला अक्षयवटवर्णनं नाम
चतुर्विंश: पटल: ॥२४॥

## अथ पञ्चविंशः पटलः

*भैरव्युवाच

श्रुतो भवन्मुखादेव वितस्तासिन्धुसङ्गमः ।
अधुना श्रोतुमिच्छामि फलमस्य महेश्वर ॥१॥

भैरव उवाच

शृणु देवि प्रवक्ष्यामि वितस्तासिन्धुजं फलम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातकसञ्चयैः ॥२॥

सोमेन चैव युक्तायाममायां सुरपूजिते ।
यः स्नाति मानवस्तत्र तस्य पुण्यफलं शृणु ॥३॥

गवां कोटिसहस्रस्य विधिदत्तस्य यत्फलम् ।
तत्फलं समवाप्नोति स्नानमात्रान्नरो भुवि ॥४॥

श्राद्धं वै सक्तुभिश्चापि बालुकाभिरपीश्वरि ।
शाकैरपि च यः कुर्यात्तत्पुण्यं स्यादनन्तकम् ॥५॥

---

*मा श्रीदेव्युवाच—भैरव्युवाच

१ घः मा महेश्वरः—महेश्वर

३ घः मा तव – तस्य

५ गः, घः मा कुर्यात्स्यात् – कुर्यात्

गोदानं स्वर्णदानञ्च वस्त्रमश्वादिकं यो ददेत् ।
तत्फलं कोटिगुणितं भवेदक्षयसन्निधौ ॥६॥

क्षीरखण्डाज्यभोज्यैश्च भक्ष्यैर्वा मधुसंमितैः ।
पितॄनुद्दिश्य यो विप्रांस्तर्पयेज्जगदम्बिके ॥७॥

पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ॥८॥

कृच्छ्रमेकं तु यः कुर्याच्चातुर्मासं तु यो नरः ।
स याति ब्रह्मसायुज्यं यत्र गत्वा न शोचते ॥९॥

महासान्तपनमत्र कुर्याद्वै मकरे रवौ ।
स याति परमं स्थानं यत्र गत्वा न शोचते ॥१०॥

तुलार्के च महेशानि मेषार्के मिथुने रवौ ।
यः स्नाति विधिवद्देवि स याति परमां गतिम् ॥११॥

---

७ खः मा संस्थितैः—संमितैः

९ घः मा शोचति—शोचते

१० कः मा सान्तपनं यत्र—महासान्तपनमत्र

खः ब कुर्याद्वा—कुर्याद्वै

मा मातृकायामधिकः पाठः

तत्र यः स्नाति मकरे रवौ देवि विशेषतः ।

स याति ब्रह्मभवनं पुनरावृत्तिदुर्लभम् ॥

गयापिण्डसहस्त्रैः किं पितृणां परितुष्टये ।
यस्तर्पयेत्पितृन्देवान्विप्रान्सिन्धुसङ्गमे ॥१२॥

दद्याद्यो वालुकं पिण्डं तस्य पुण्यं तु तत्समम् ।
घोरे कलियुगे प्राप्ते स्त्रीनरे बुद्धिविवर्जिते ॥१३॥

जने च सकले देवि महापापरतात्मनि ।
भक्तिहीने कुचैले च च्छिद्रवञ्चनचेतसि ॥१४॥

परस्त्रीपरद्रव्यादिलम्पटे परमेश्वरि ।
परापवादनिरते परकृत्यविघातिनि ॥१५॥

सर्वपापरते देवि सर्वश्रेयो विवर्जिते ।
पितृनिन्दारते देवि भ्रातृविद्वेषकारिणि ॥१६॥

पितृस्वसृमातृस्वसृभ्रातृजायाभिगामिनि ।
स्वार्थमापूपकृसरपायसैर्लोचिकादिभिः ॥१७॥

देवान्पितृनुद्दिश्य प्रच्छन्नकृतभोजने ।
दैत्यप्राये वृथायासलम्पटे धर्मवर्जिते ॥१८॥

---

१३ कः मा वालुकापिण्डं—वालुकं पिण्डं

१६ कः मा महापापरते —सर्वपापरते

गः चैव—देवि

'मा' मातृकायां २०-२१ श्लोकौ न स्तः

स्वकर्मत्यागनिरते परधर्माभिगामिनि ।
देवस्थलीत्यागरते प्रेद्भूतपूजिते तथा ॥१९॥

सन्ध्यास्नानजपासक्तसाधुनिन्दाप्रवर्तके ।
दानधर्मविहीने च तेजोभाग्यादिवर्जिते ॥२०॥

क्षीणेन्द्रिबले देवि क्षीणपुण्यायुषि प्रिये ।
सर्वतो मित्ररहिते भार्यामिते तथैव च ॥२१॥

विद्यावेदविहीने च शिश्नोदररते सदा ।
गायत्रीजपहीने च म्लेच्छविद्याभिशंसिनि ॥२२॥

नरकाग्नौ प्रदीप्ते च ज्वालमानसमंततः ।
निरयाग्निप्रदीप्तस्य प्रतीकारो मया पुनः ॥२३॥

गमने देव देवेशि वितस्तासिन्धुसङ्गमः ।
दर्शितः कृपया तस्मात्स्नातव्यमविशङ्कया ॥२४॥

घोरे कलियुगे प्राप्ते जनानां पापकर्मणाम् ।
प्रायश्चित्तविहीनानां नरकाग्निरनन्तकः ॥२५॥

तस्मात्सर्वजनानां तु प्रायश्चित्तं परं महत् ।
वितस्तासिन्धुजं वारि पापहारि मम प्रिये ॥२६॥

---

२४ घः मा सर्वदा जनैः—अविशङ्कया
२६ खः मा मतं—महत्

विधिदृष्टानि सर्वाणि प्रत्यश्चित्तानि सुन्दरि ।
न सम्भवति गिरिजे नृणां क्षीणायुषां कलौ ॥२७॥

तस्मात्सर्वप्रयत्नेन प्रायश्चित्तमभीप्सुभिः ।
स्नातव्यं सोमयुक्तायाममायां सुरपूजिते ॥२८॥

सर्वपापविनिर्मुक्तो याति ब्रह्मसनातनम् ।
नरकाग्निर्महाघोरो वायुरत्र कलिः स्वयम् ॥२९॥

इन्धनं दुरितं यस्य वदायं केन शाम्यति ।
महासाङ्कर्षणीज्वाला यस्योत्सङ्गे प्रकाशिता ॥३०॥

तद्वारिपूरः शमयेन्निरयाग्निं समन्ततः ।
कलिकर्मसमुद्भूतगहनं चछेत्तुमर्हसि ॥३१॥

तदाश्रयस्व देवेशि सिन्धुवारिसुवारिकाम् ।
यत्र स्नात्वा नरो याति मुक्तिमेव न संशयः ॥३२॥

---

२७ कः मा विद्धिदृष्टानि —विधिदृष्टानि

३० खः मा शाम्मिति— शाम्यति

३१ घः मा चछेत् मिच्छसि —चछेत् मर्हसि

३२ खः मा कुमारिकां —सुवारिकाम्

भूमिस्थमपि तत्तीर्थं नरै: किं नहि सेव्यते ।
यत्र दत्तास्तिलाश्चापि मेरुतुल्या भवन्ति हि ॥३३॥

अक्षयं दानपुण्यञ्च लभेदेव न संशय: ॥३४॥

वितस्तासिन्धुजं वारि पापहारि हि चेन्नरै: ।
न सेवितं परं शक्त्या ते नरा दैववञ्चिता: ॥३५॥

मोहग्राहेण सततं ग्रस्तमेतज्जगत्प्रिये ।
परं ब्रह्मात्मकं तेजो द्रवीभूतं न सेव्यते ॥३६॥

योऽन्त:काले महेशानि त्यजेदत्र कलेवरम् ।
तारकं वक्ति वै कर्णे शूलवन्नाम वा गण: ॥३७॥

स याति भैरवं रूपं यत्र नास्ति कृताकृतम् ॥३८॥

भैरव्युवाच

देव देव महादेव श्रीशम्भो शशिशेखर ।
क्रीतास्म्यनुग्रहीतास्मि मोचितास्मि भवार्णवात् ॥३९॥

---

३३ ख: मा हि न—नहि

सेवते—सेव्यते

३७ ग: मा तत्कर्णे – वै कर्णे

यच्छ्रुतं तीर्थराजस्य वितस्तासिन्धुजस्य ह ।
प्रयागस्य महेशान माहात्म्यं त्वन्मुखाम्बुजात् ॥४०॥

तत आरभ्य तस्यास्त्वं वद माहात्म्यमुत्तमम् ॥४१॥

भैरव उवाच

शृणु देवि परं गुह्यं वितस्तायाः फलं महत् ।
यच्छ्रुत्वा मुच्यते मर्त्यो भवपाशैरसंशयम् ॥४२॥

वितस्ता सन्धिुना साकं प्रससर्प ततः प्रिये ।
कश्यपोऽप्यनुधावंस्तां प्रचकाराश्रमन्ततः ॥४३॥

विश्रम्याश्रममुत्कृष्टो मुनिभिः सह कश्यपः ।
स्तुत्वा प्रयागं तीर्थं वै विस्मयं परमं ययौ ॥४४॥

दृष्ट्वाद्भुतं प्रयागस्य वितस्तासिन्धुजस्य वै ।
प्रशशासाश्रमस्थांस्तानृषीन्देवि प्रजापतिः ॥४५॥

---

४२ गः मा जन्तुः—मर्त्यो

४३ कः मा कार्स —साक

खः तदा प्रिय — ततः प्रिये

गः अनुकावेतौ—अनुधावंस्तान्

४४ कः मा विश्राश्रम उत्कृष्टे — विश्रम्याश्रममुत्कृष्टो

४५ गः मा प्रशममाश्रमस्थान्—प्रशशासाश्रमस्थान्

प्रभजध्वं प्रयागं वै त्यक्त्वा कार्यसहस्रकम् ।
यस्मादेतत्तीर्थसमं न भूतं न भविष्यति ॥४६॥

तत: प्रयात्पुनस्तत्र वितस्तां द्रष्टुमुत्सुक: ।
स्मरन्प्रयागमाहात्म्यं वितस्तां दर्शयन्मुहु: ॥४७॥

इति प्रशाम्य तान्देवि ह्याश्रमस्थान्मुनीन्स्वयम् ।
यस्मिंस्ते मुनय: शास्ता: कश्यपेन महात्मना ॥४८॥

स एव प्रथितो देवि ग्रामो ह्याश्रमसंज्ञित: ॥४९॥

यत्रान्तरे शूलवतो ह्यायुधस्य महेश्वरि ।
कोटिर्लग्ना महेशस्य ग्रामस्य जगदीश्वरि ॥५०॥

तत: प्रोक्तो ग्रामराजोऽप्यन्त: कोटिभिध: पर: ।
आश्रमाच्च परेपारे ग्रामोऽप्यन्तरकोटिक: ॥५१॥

प्रयागस्य यत्र सीमा कश्यपेन कृता भुवि ।
बलिश्च दत्तस्तत्रैव मुनिभि: सह पार्वति ॥५२॥

---

४८ ख: मा मुनि। स्वयं — मुनीन्स्वयम्

५० क: मा यत्रान्तरा — यत्रान्तरे

५२ क: मा यत्र सीमा प्रयागस्य — प्रयागस्य यत्र सीमा

ग: बलिर्दत्तश्च — बलिश्च दत्त:

सीमाबलिस्ततः प्रोक्तो देशः परमपावनः ॥५३॥

सीमाबलौ कृतं स्नानं श्राद्धं दानं महेश्वरि ।
फलं ददाति द्विगुणं गवां कोटिसहस्रकम् ॥५४॥

पुरा कैलासकुञ्जेषु क्रीडन्नाम महेश्वरः ।
देव्या सह महादेवो गणा द्रष्टुमुपागताः ॥५५॥

दृष्ट्वा तत्रागतान्देवांगणांश्च जगदम्बिके ।
नोवाच किञ्चिद्भगवांसात्विकं भावमाश्रितः ॥५६॥

प्रस्विन्नश्च महादेवो सुस्नात इति वा विभो ।
द्रवीभूतं मनस्तस्य प्रस्विन्नश्च बलिस्तदा ॥५७॥

कण्ठस्थो वासुकिस्तत्र स्वेदं हृदय आचमत् ।
देवैः स्तुतो महादेवो देवान्नोवाच किञ्चन ॥५८॥

---

५४ खः दानमपीश्वरि—दानं महेश्वरि
घः सहस्रजम्—सहस्रकम्

५६ कः मा सीमाबलं कृतो—सीमाबलौ कृतं

५७ खः ब वाबभो—वा विभो
घः प्रस्वितः—प्रस्विन्नः

५८ गः ब देवे—देवैः

चेष्टां ज्ञात्वास्य विबुधाः प्रययुः स्वं स्वमालयम् ।
दृष्ट्वा वमन्तं स्वेदं तु वासुकिं भगवान्भवः ।।५९।।

गृहीत्वा वासुकिं तत्र प्राक्षिपद्भुवि सुन्दरि ।
अन्वेषमाणः स्वं हारं वासुकिं नाम सुप्रिये ।।६०।।

क्षिप्तस्तु मूर्च्छितो देवि वासुकिः प्रययौ ततः ।
सर्पैः परिवृतो दिव्यैः वैतस्तं तटमागमत् ।।६१।।

क्रीडित्वा च भवः साकं पार्वत्या सुरसुन्दरि ।
देव्या सह तदा प्राप गिरिं लहरिकं प्रिये ।।६२।।

गिरिपृष्टे तदा दृष्ट्वा वैतस्तं तटमाश्रितम् ।
वासुकिं तत्र भगवान्ह्याक्रोशत्परया गिरा ।।६३।।

श्रुत्वा भवस्य तां वाचं मेघगम्भीरनिस्स्वनाम् ।
विव्यथे वासुकिस्तत्र प्राद्रवत्परितो दिशम् ।।६४।।

---

५९ खः मा आश्रमं—आलयम्

६० मा मातृकायां द्वितीया पंक्तिर्नास्ति परं ६४ श्लोकेनास्या अन्वयोऽस्ति

६३ घः मा प्राक्रोशत—ह्याक्रोशत्

६४ खः मा निस्स्वनम् – निस्स्वनाम्

गः विवृषे – विव्यथे

भ्रमित्वा तत्र तत्स्विन्नं द्रवीभूतमनश्च यत् ।
भवस्य पीतमासीद्यदवमत्तत्क्षणात्प्रिये ॥६५॥

तत्र जग्मुर्महासर्पा नागाश्च सुरसुन्दरि ।
लेलिहाना द्रवीभूतं शम्भोर्हृदयमन्ततः ॥६६॥

वातं नागेन यत्स्विन्नं द्रवीभूतं मनो भुवि ।
शम्भोस्तदेव सञ्जातं मानसाख्यं महत्सरः ॥६७॥

मायां नाशयते सम्यक्स्नातानामत्र सुन्दरि ।
ततः प्रोक्तं पुराविद्भिः मानसाख्यं महत्सरः ॥६८॥

मानं सम्यग्वर्धयते स्नातानाञ्च महेश्वरि ।
भैरवे च परां भक्तिं तस्मात्तु मानसं सरः ॥६९॥

सर्पैरापूरितो यत्र लेलिहानैर्मनोऽद्रवत् ।
शम्भोः स देशः परमः सर्पपुराख्यनामतः ॥७०॥

सर्पापूरे महानागो मानसाख्ये सरोवरे ।
दर्शनात्स्पर्शनान्मुच्येत कोटिजन्मभवैरघैः ॥७१॥

---

६८ ख मा महेश्वरि—सुन्दरि

७० घ: मा महापुराख्यया मतः—सर्पपुराख्यनामतः

७१ घ: मानसौख्ये —मानसाख्ये

ग: स्मरणात्—स्पर्शनात्

सर्पापुरे महानागं दृष्ट्वा वै मानसाभिधम् ।
मुच्येत्सद्यो महादेवि कोटिहत्यादिकैरघैः ॥७२॥

स्नानाद्दानाज्जपाद्देवि श्राद्धाद्धोमाच्च तर्पणात् ।
अनन्तपुण्यमाप्नोति मानसे नाग उत्तमे ॥७३॥

वितस्ता हरते पापं जन्मान्तरशतोद्भवम् ।
मिलिता नागराजेन मानसाख्येन सुन्दरि ॥७४॥

सङ्गमे नागराजस्य वितस्ता पुण्यदायिनी ।
दानाच्छतगुणं पुण्यं सङ्गे नागवितस्तयोः ॥७५॥

लभते मनुजो देवि इति सत्यं वदामि ते ॥७६॥

नृणां महापातकिनां कलिकल्मषहारिणी ।
वितस्ता हरते पापं कोटिहत्यादिजं प्रिये ॥७७॥

---

७५ मा मातृकायामयं पाठोऽधिकः

कपिलाकोटिदानस्य विधिदत्तस्य वै प्रिये ॥
सङ्गे मानसनागस्य कोटिजन्मशतोदभवम् ।
पातकं हरते देवि वितस्तास्नानमात्रतः ॥

७३ मा मातृकायामयं पाठोऽधिकः

अनन्तं फलमाप्नोति स्नानाद्दानाज्जपात्तथा ।
तपसो ध्यानयोगाच्च श्राद्धाद्धोमाच्च तर्पणात् ।
व्रताच्च विधिना मर्त्यः सङ्गे नागवितस्तयो ॥

इति ते कथितो देवि मानसाख्यवितस्तयोः ।
सङ्गमः परमोदारो महापातकनाशनः ॥७८॥

इति गुह्यः समाख्यातः पटलः परमः प्रिये ।
श्रुतोऽनुध्यातः पठितो महापापहरः कलौ ॥७९॥

*इति श्रीवितस्तामाहात्म्येऽक्षयवटमहिमा नाम मानसवितस्तासङ्ग-
वर्णनं नाम पञ्चविंशः पटलः ॥२५॥

---

*'मा' मातृकायामक्षयवटमानसवितस्तयोर्मध्ये श्राद्धपुरवर्णनं नाम पटलोऽप्यस्ति तदंशस्तु माहात्म्यावसाने दत्तः ।

## अथ षड्विंशः पटलः

*भैरव्युवाच

तत: परं प्रसर्पन्त्या वितस्ताया महेश्वर ।
सर्वपापहरं देव वद माहात्म्यमुत्तमम् ॥१॥

*भैरव उवाच

शृणु देवि प्रवक्ष्यामि वितस्ताया फलं महत् ।
यच्छ्रुत्वा चापि मुच्येत नरो घोरैश्च पातकैः ॥२॥

प्रससर्प तदा देवी वितस्ता पापनाशिनी ।
दर्शनात्स्पर्शनाच्चापि महापातकनाशिनी ॥३॥

प्रसर्पन्तीं तदा दृष्ट्वा कश्यपो वरवर्णिनि ।
उवाच तां तदा देवीं कश्यपः सुरसुन्दरि ॥४॥

---

*मा श्रीभैरवी उवाच—भैरव्युवाच

*मा श्रीभैरव उवाच —भैरव उवाच

२ कः मा दे—देवि

गः यच्छ्रुत्वापि प्रमुच्येत— यच्छ्रुत्वा चापि मुच्येत

३ कः मा प्रसर्पत्तदा —प्रससर्प तदा

व्रजत्वञ्च प्रणालेन मा प्रसर्प वितस्तिके ।
इत्युक्त्वा सा तदा देवी प्रससर्प पुनस्तदा ॥५॥

समुद्रकोटिसम्भूतजलपूरेण सङ्गता ।
वितस्ता हरते पापं जन्मकोटिसहस्रकम् ॥६॥

नृणां महापातकिनां कलिकल्मषनाशिनी ।
समुद्रवत्कोटयश्च यत्र नागाश्च सङ्गताः ॥७॥

पद्माभिधेन सरसा पुण्येन जगदम्बिके ।
स एव कथितो ग्रामः समुद्रकोटिकाख्यया ॥८॥

पुनः प्रोवाच तां देवीं कश्यपो मुनिसत्तमः ।
मा प्रसर्प परं शक्त्या व्रज साधुप्रणालिकैः ॥९॥

---

७ कः मा महाकिनां — महापातकिनां

घः नागसङ्घाश्च सङ्गता — यत्र नागाश्च सङ्गताः

८ कः मा सहसा — सरसा

गः प्रथितो — कथितो

मा मातृकायामधिकः श्लोक

वितस्ता हरते पापं जन्मान्तरशतोद्भवम् ।
समुद्रकोटिसम्भूतजलपूरेण सङ्गता ॥

प्राव्रजच्च ततः पुण्यप्रणालेनैव साधुना ।
ततः स देशः कथितो नाम्ना साधुप्रणालिकः ॥१०॥

साधुप्रणाले देवेशि हरते पापसञ्चयम् ।
नराणां क्षीणपुण्यानां स्नानमात्रान्न संशयः ॥११॥

मुनयः कश्यपं प्रोचुर्देवी साधुप्रणालिकैः ।
अजस्रं विचरन्तीव दृश्यते मुनिसत्तम ॥१२॥

इति श्रुत्वा मुनीनां तु वाक्यञ्च मुनिसत्तमः ।
प्रोवाच च पुनर्देवीं वितस्तां कश्यपः प्रिये ॥१३॥

अजस्रं साधुनानेन प्रणालेन च मा व्रज ।
भवन्ति चैव संदिग्धा मुनयश्च परं त्वयि ॥१४॥

इति श्रुत्वा मुनयस्तस्य कश्यपस्य महात्मनः ।
अजस्रं प्राव्रजन्तेन साधुनालेन सुन्दरि ॥१५॥

यत्राजस्रं गता देवी साधुनालेन वै नदी ।
स देशः प्रथितो लोकेऽजस्राख्यः पापहारकः ॥१६॥

---

१० खः मा सङ्गता — साधुना

गः प्रथितो — कथितो

घः प्रणालकः — प्रणालिकः

अजस्राख्ये महादेवि जलपूरेण सङ्गता ।
वितस्ता वर्धते पुण्यं ज्योतिष्टोमादियागजम् ॥१७॥

पुनर्मुनिहवाचैनां नदीं परमपावनीम् ।
अजस्रं साधुनालेन मा व्रज त्वं वितस्तिके ॥१८॥

अलं ते साधुनालेन व्रज त्वं मम वाक्यतः ।
श्रुत्वा देवी वचस्तस्य पद्मनागेन सङ्गता ॥१९॥

प्रजापतेरलंवाक्यैर्महापातकनाशिनी ।
यत्रालंवाक्यतस्तस्य पद्मनागेन सङ्गता ॥२०॥

ततः स ख्यातिमगद्ग्रामोऽलंनालसंज्ञितः ॥२१॥

अलंनाले महादेवि स्नानदानजपादिभिः ।
अनन्तं फलमाप्नोति नरः पातकवान्कलौ ॥२२॥

कश्यपस्य कुले जातः पुरा कपटवामनः ।
पृथिव्याः पदमात्रं तु देहि दानवसत्तम: ॥२३॥

---

१८ मा घः भागो नास्ति

१९ मा कः भागो नास्ति

२० मा कः/खः भागो नास्ति

२१ खः मा संज्ञकः—संज्ञितः

२३ कः मा बलिगतोभिक्षितुं वा—कश्यपस्य कुले जातः

इत्थं पुन: पुनरपि याच्यमानश्च तं बलि: ।
प्रोवाच वचनं देवि तदा कपटवामनम् ॥२४॥

कियन्मात्रं पदं ब्रह्मन्दीयते हि मया तव ।
पदं दर्शय मे विप्र प्रहसन्पुनराहतम् ॥२५॥

स्वं पदं हि मिमानेन वामनेन महात्मना ।
दर्शनार्थं बलेस्तस्य सरो वै प्रकटीकृतम् ॥२६॥

पदं मिमानेन यतो दर्शयानेन वै बलिम् ।
महत्सरो यदभवत्तेन पद्माभिधं स्मृतम् ॥२७॥

ज्ञानं यत्रैव मिमीते स्नातानां सुरसुन्दरि ।
आगमज्ञैस्तत: प्रोक्तं सर: पद्माभिधं प्रिये ॥२८॥

पद्मैश्छन्नं यतस्तस्य तोयं केसरगन्धितम् ।
तन्त्रज्ञैस्तत्प्रोक्तं सर: पद्माभिधं महत् ॥२९॥

---

२४ ग: मा प्रहसन्देवि—वचनं देवि

२५ ख: मा दीयतां—दीयते

२७ ग: सुतं—महत्

घ: मतम्—स्मृतं

२८ मा मातृकायां २८/२९ श्लोकौ न स्त: ।

गवां कोटिसहस्रस्य विधिदत्तस्य यत्फलम् ।
तत्फलं लभते मर्त्यः स्नानात्पद्मसरोवरे ॥३०॥

प्रयागे नैमिषारण्ये गङ्गासागरसङ्गमे ।
आकल्पं स्नानतो देवि यत्फलं प्राप्नुयान्नरः ॥३१॥

वितस्तापद्मसङ्गे च स्नानात्तत्फलमाप्नुयात् ॥३२॥

अजस्रादावेकान्ते वै शिलाग्रामात्समुद्भवैः ।
कुलेशार्येशसम्भूतैर्जलैः परमपावनैः ॥३३॥

मिलिता यत्र च नदी महापातकहारिणी ।
रत्नचूडञ्च नागेशं वितस्ता प्रावदत्तदा ॥३४॥

इहैवास्तु च भद्रं ते सह द्वारिकयानया ।
कलिकल्मषसंघातं क्षालयंश्च नृणां कलौ ॥३५॥

रत्नचूडोऽपि नागेशः श्रुत्वा देव्याः परं वचः ।
शूर्येशग्रामे तस्थौ च पद्मनागेन सङ्गतः ॥३६॥

---

३३ खः मा शलाग्रामात् — शिलाग्रामात्

३५ कः मा इतैव स्व च भद्रं ते — इहैवास्तु च भद्रं ते

३६ खः मा नद्याः — देव्याः

गः आर्येशग्रामे — शूर्येशग्रामे

यत: शेषो विष्णुपादकमलं मूर्ध्निधारयन् ।
उत्थितो बलिना तेन दृष्टस्तस्मात्सरोवरात् ॥३७॥

तत: पुरातनै: प्रोक्तं सर: पद्माभिधं प्रिये ।
वितस्तापद्मसरसा मिलिता यत्र सुन्दरि ॥३८॥

तत्र तत्र ददात्येव फलं यागादिसम्भवम् ॥३९॥

इति ते कथितं देवि वितस्तास्नानजं फलम् ।
यच्छ्रुत्वा हि नरो मुच्येद्घोरैर्जन्मभवैरघै: ॥४०॥

इत्येष पटलो गुह्य उक्त: परमपावन: ।
पठितोऽपि ददात्येव वितस्तास्नानजं फलम् ॥४१॥

इति श्रीवितस्तामाहात्म्ये पद्मसरोवर्णन नाम
षड्विंश: पटल: ॥२६॥

---

३८ ख: मा मिश्रिता—मिलिता

## अथ सप्तविंशः पटलः

*श्रीभैरव्युवाच

श्रावं श्रावं महत्पुण्यं पुण्ये पद्मसरोवरे ।
त्वन्मुखाम्बुजनिर्मुक्तं न तृप्यामि महेश्वर ॥१॥

इदानीं श्रोतुमिच्छामि निगिलाख्यं तटं महत् ॥२॥

*श्रीभैरव उवाच

शृणु देवि प्रवक्ष्यामि निगिलाताख्ये तटे महत् ।
पुण्यस्य पद्मसरसः फलं वै परमाद्भुतम् ॥३॥

श्यामं पदं वामनस्य क्रमतः पृथिवीं पुरा ।
नौबन्धनगिरेः पार्श्वे न्यगिलद्दैत्यपुङ्गवः ॥४॥

दैत्येन सह देवेशि पादमुत्थापयद्धरिः ।
निर्मातुं क्रमतस्तस्य लम्बमानं महेश्वरि ॥५॥

---

*मा भैरव्युवाच —श्रीभैरव्युवाच
२ ख: मा निमराख्यं —निगिलाख्यं
*ब मातृकायामय पाठः नास्ति
४ ख: मा क्रामतः— क्रमतः
घ: न्यगिरत् —न्यगिलत्
५ ग: मा विधातुं —निर्मातुं

पादे दानवमालोक्य देवाः सर्वे विसिस्मिरे ।
विक्रमन्तं वियद्विष्णुं तदा प्रोचुर्वियच्चराः ॥६॥

त्वत्पादकमले कोऽयं लम्बमानः प्रदृश्यते ।
वदनो देवदेवेश संशयश्च मनोऽश्नुते ॥७॥

इति श्रुत्वा वचस्तेषां देवानां सुरसुन्दरि ।
प्रोवाच तान्हरिर्देवान्व्यथध्वं मा सुरेश्वराः ॥८॥

निगीर्णोऽनेन मे पादो दैत्येन क्रामतो महीम् ।
अयं स दैत्यापशदो लम्बमानश्च मत्पदम् ॥९॥

अनेन सीमां बध्नामि पुण्ये पद्मसरस्तटे ।
इत्युक्त्वा च सुरान्विष्णुः प्राक्षिपद्दैत्यपुङ्गवम् ॥१०॥

पुण्यस्य पद्मसरसः सीमार्थममरोत्तमे ।
मत्पादतलनिघृष्टदैत्यसीमाकृतं नदे ॥११॥

यत्तटमभवत्तेन प्रख्यातं निगिलाख्यया ॥१२॥

यतो निगीर्णवान्पादं वामनस्य महेश्वरि ।
ततः स निगिलाख्योऽयं दानवः प्रथितो भुवि ॥१३॥

---

१० गः मा सुरान्देवि—सुरान्विष्णुः

निगिलाख्येन दंत्येन सीमार्थञ्च कृतं तटम् ।
ततः प्रभृति सञ्जातं तीर्थं वै निगिलाख्यया ॥१४॥

निगिलाख्ये तटे पुण्ये स्नात्वा पद्मसरोवरे ।
पुण्यमाप्नोति मनुजो यागजं सुरसुन्दरि ॥१५॥

आश्रमे तत्र यत्पुण्यं स्नात्वा दत्वा सुरेश्वरि ।
वर्षं तावदवाप्नोति तदत्र स्नानतः प्रिये ॥१६॥

एकाह्ना स्नानमात्रेण दानेन च जपेन च ।
तपसा च परं पुण्यं निगिलाख्ये नरोऽश्नुते ॥१७॥

पृथिवीप्रक्रमणाद्यच्च पुण्यमाप्नोति मानवः ।
निगिलाख्ये तदाप्नोति स्नानमात्रा न संशयः ॥१८॥

रत्नचूडात्समारभ्य यावन्निगिलमन्ततः ।
तत्क्षेत्रं द्वारिका प्रोक्ता पुरी मुक्तिप्रदायिनी ॥१९॥

---

६ मा मातृकायायां प्रथमा पङ्क्तिर्नास्ति

घः मा स्नानतोऽश्नुते—स्नानतः प्रिये

१८ गः मा गिनिलाख्ये— निगिलाख्ये

१९ घः मा पुरे—पुरी

द्वारिकादर्शनाद्देवि महापातकसञ्चय: ।
सद्यो विलयमाप्नोति जन्मान्तरभवैरपि ॥२०॥

द्वारिकादर्शनाद्देवि स्नानाद्दानाज्जपादपि ।
मुक्तिमाप्नोति मनुज इति सत्यं वदामि ते ॥२१॥

य: कश्चिन्म्रियतेऽत्रैव द्वारिकाया: समन्तत: ।
जयाख्य: पार्षदस्तस्य कर्णे जपति तारकम् ॥२२॥

निगिले मरणं प्रोक्तमपुनर्भूतये प्रिये ।
निगिलाख्ये भवेत्सङ्ग: कोटिजन्मार्जितैर्व्रतै: ॥२३॥

आक्रम्य च वियद्विष्णु: कृत्वा नक्षत्रमण्डलम् ।
बलिं बद्ध्वा च निक्षिप्य पाताले जगदम्बिके ॥२४॥

नक्षत्रमण्डलं सर्वं समेत्य जगदीश्वरि ।
प्रतिबिम्बितमत्रैव पुण्ये पद्मसरोवरे ॥२५॥

नक्षत्रानां प्रतिच्छाया यत्र भूता महेश्वरि ।
तत्क्षेत्रमभवद्देवि नक्षत्रभवनाभिधम् ॥२६॥

---

२० घ: मा जन्मान्तरो भवोऽपि च—जन्मान्तरभवैरपि

२१ घ: मा मनुष—मनुज

२२ क: मा कश्चाद्रियते—कश्चिन्म्रियते

तत्र—अत्रैव

नक्षत्रभवने स्नात्वा पुण्ये पद्मसरोवरे ।
प्रयाति यजनैर्देवि पुण्यं नक्षत्रमण्डलम् ॥२७॥

ताराणां प्रतिबिम्बोऽभूत्ताराद्वीपमभूत्तदा ॥२८॥

ताराद्वीपे नरः स्नात्वा पुण्ये नक्षत्रमण्डले ।
स याति ब्रह्मभवनं यत्र गत्वा न शोचते ॥२९॥

नक्षत्रभवने देवि पुण्ये पद्मसरोवरे ।
स्नात्वा पुण्यमवाप्नोति वाजपेयादियागजम् ॥३०॥

ताराद्वीपे तथा देवि नक्षत्रभवनेऽपि च ।
स्नात्वा दत्वा च विधिवन्न शोचति कृताकृते ॥३१॥

पुण्ये नक्षत्रभवने स्नात्वा पद्मसरोवरे ।
निगिलाख्ये तटे देवि मुच्यते घोरपातकैः ॥३२॥

---

२७ गः मा जननैर्देवि—यजनैर्देवि
३० कः मा नक्षत्रभवनाद्देवि—नक्षत्रभवने देवि
३२ मा मातृकायामत्राधिकः पाठः—
पुण्ये वै तत्र भवने श्राद्धं कृत्वा महेश्वरि ।
पितरस्तृप्तिमायान्ति कल्पानां शतमन्ततः ॥
ताराद्वीपे नरः स्नात्वा कृत्वा वा श्राद्धमन्ततः ।
स भवेज्जगदीशानि तारातपश्चिरं दिवि ॥
नक्षत्रभवने पुण्यं कृतं मेरुसमं भवेत् ।
तत्र स्नात्वा सदा देवि वाजपेयफलं लभेत् ॥

पुण्ये नक्षत्रभवने श्राद्धं कृत्वा महेश्वरि ।
पितरस्तृप्तिमायान्ति कल्पान्ताशनमन्ततः ॥३३॥

नक्षत्रभवने दत्वा तिलमात्रमपीश्वरि ।
मेरुतुल्यं भवेत्तच्च इति सत्यं वदामि ते ॥३४॥

एवं ते कथितं देवि फलं पद्मसरोवरे ।
निगिलाख्ये महातीर्थे नक्षत्रभवनं तथा ॥३५॥

इति गुह्यतमः ख्यातः पटलः सुरसुन्दरि ।
पठितश्च स्मृतो ध्यातो वाजपेयं लभेत्सदा ॥३६॥

इति श्रीवितस्तामाहात्म्ये निगिलतीर्थमहिमावर्णनं
नाम सप्तविंशः पटलः ॥२७॥

---

३६ घ। ब वाजिपेयं —वाजपेयं

# अथाष्टविंशः पटलः

*भैरव्युवाच

श्रुतं निखिलतीर्थं वै त्वत्प्रसादान्महेश्वरि ॥१॥

अधुना श्रोतुमिच्छामि सुरेज्यापुरमुत्तमम् ।
यत्र स्नात्वा च दत्वा च ज्योतिष्टोमफलं लभेत् ॥२॥

भैरव उवाच

शृणु सुन्दरि वक्ष्येऽहं सुरेज्यापुरमुत्तमम् ।
तीर्थं तीर्थफलञ्चैव सर्वकामफलप्रदम् ॥३॥

ययौ तेनैव मार्गेण वितस्ता नादयन्त्युत ॥४॥

यान्तीं दृष्ट्वा नदीं देवि चन्द्राख्यो नाम नागराट् ।
अप्रसह्विषसंतप्त आशीविषगणैर्युतः ॥५॥

---

*मा श्रीभैरव्युवाच—भैरव्युवाच

१ कः मा तीर्थञ्च—तीर्थं वै

२ खः मा पुरसत्तमं—पुरमुत्तमम्

३ खः ब सुरेज्यापुरं—सुरेज्यापुर

४ खः मा नादयन्तुरा—नादयन्त्युत

५ कः मा महादेवि—नदीं देवि

ग्रस्तां दृष्ट्वा कश्यपोऽत्र वितस्तां च महानदीम् ।
स्वात्मानं निन्दितं ज्ञात्वा शुशोच मुनिसत्तमः ॥६॥

शोचन्तं कश्यपं दृष्ट्वा सुरगन्धर्वचारणाः ।
सिद्धाः साध्याः समाजग्मुर्विष्णुना सह सुन्दरि ॥७॥

प्रजापतिं सान्त्वयानः इदमूचुर्मुहुर्मुहुः ।
अत्रैवेष्टव्य ईशानो गणैरनुचरैः सह ॥८॥

स एव ना ापशदाद्वितस्तां मोक्षयिष्यति ।
इत्युक्त्वा कश्यपं देवा ईजुरीश्वरमव्ययम् ॥९॥

वैदिकैस्तान्त्रिकैश्चापि सूक्तैः परमपावनैः ।
भृग्वादिभिर्मुनिवरैर्यज्जयक्रुद्धमुत्तमम् ॥१०॥

दत्वा पूर्णाहुतिं सम्यक्क्रुद्धो दर्शनमीयिवान् ॥११॥

रुद्रं दृष्ट्वा पुरः सर्वे वह्निज्वालासमुत्थितम् ।
प्रणेमुस्तुष्टुवुश्चैनं स्तोत्रैः परमपावनैः ॥१२॥

प्रोवाच च महाविष्णुं रुद्रो देवः सनातनः ।
श्रुतो नागो मया विष्णोः ग्रस्ता येन वितस्तिका ॥१३॥

दण्डयित्वा महानागं मोक्षयिष्यामि मा शुचः ।
इत्युक्त्वा च महादेवः पातालं रन्ध्रतोऽगमत् ॥१४॥

सम्प्राप्तस्तस्य नागस्य भवनं सुरसुन्दरि ।
शम्भुर्दृष्ट्वा तु ते नागं दिव्ये स्वभवने स्थितम् ॥१५॥

बद्ध्वा चानीतवांस्तत्र यत्र देवा: पुर: स्थिता: ।
निष्पीड्य नागं पाणिभ्यां वितस्तां मोक्षयन्बलात् ॥१६॥

प्रोवाच च पुन: शम्भुर्देवा दूरेण तिष्ठत ।
अस्पृश्यञ्च विषञ्चास्य नागस्य सुरसत्तमा: ॥१७॥

प्रचचाल ततो देवि वितस्ता पुनरेव हि ।
यत: सुरै: पुरा शम्भुरत्रेष्ट: परमेश्वरी ॥१८॥

तत: प्रोक्त: सुरेज्याख्यो ग्रामो जगति सुन्दरि ।
स पीडितो महानागो मूर्च्छितो निपपात ह ॥१९॥

मूर्च्छितं नागराजं तु दृष्ट्वा शम्भुकृपान्वित: ।
शिरैश्चन्द्रकरैरस्य जीवयामास सुन्दरि ॥२०॥

---

१५ घ: मा दिव्यस्वभवे—दिव्ये स्वभवने

१६ ग: मा निष्पीत्य—निष्पीड्य

१७ ग: मा अस्पर्शञ्च—अस्पृश्यञ्च
विषञ्चापि—विषञ्चास्य

२० ख: मा कृतान्वित:—कृपान्वित:
ग: चन्द्रकरेर्नैनं—चन्द्रकरैरस्य

अवाप्य चेतनां नाग: प्रोवाच परमेश्वरम् ।
ममापराधं देवेश क्षमस्वेति मुहुर्मुहु: ॥२१॥

पादौ स्पृशन्मे दण्डस्य स्थानं देह्यमरेश्वर ।
शम्भुस्तमवदद्देवि नागराजं दयान्वित: ॥२२॥

स्थातव्यमत्र नागेश वितस्ताजल उत्तमे ।
मत्पाणिस्पर्शतो नूनं विषं ते नाशमेष्यति ॥२३॥

यस्माच्चन्द्रकरैरत्र मूर्च्छा नष्टा तवानघ ।
तस्मादेतत्तव स्थानं चन्द्रतीर्थं भविष्यति ॥२४॥

इत्युक्त्वा नागराजं तं स्थानं दत्वा च सुन्दरि ।
सान्त्वयित्वा सुरान्सर्वान्स्वं धामपरमं ययौ ॥२५॥

सुरा अपि महेशानि सान्त्वयित्वा प्रजापतिम् ।
प्रहृष्टा विष्णुना साकं जग्मुर्देवालयं प्रिये ॥२६॥

---

२१ क: मा चेतो नाग:—चेतनां नाग:
ख: परमेश्वरि—परमेश्वरम्
ग: मयापराद्धं—ममापराधं

२३ घ: मा विशं—विषं

२५ घ: व सर्वाङ्ग—सर्वान्स्वं
घ: वं धाम—स्वं धाम

यस्माच्च नन्दिता देवाः शम्भुनात्र महेश्वरि ।
तस्मात्प्रथितमेतद्धि चन्द्राख्यं तीर्थमुत्तमम् ॥२७॥

सुरैरिज्या कृता यस्मात्कश्यपस्य हिताय वै ।
तस्मादत्र प्रसिद्धोऽभूत्सुरेज्यापुरनामकः ॥२८॥

ज्योतिष्टोमादिफलदो ग्रामः परमपावनः ॥२९॥

स्नात्वा दत्वा च जप्त्वा च सुरेज्यापुरनामके ।
ग्रामे देवि वितस्तायामग्निष्टोममवाप्नुयात् ॥३०॥

नरश्चन्द्राख्यतीर्थे च स्नानात्पुण्यमनन्तकम् ।
दत्वा च विधिवद्देवि लभते सुरपूजिते ॥३१॥

नरो मुक्तिमवाप्नोति स्नानाद्दानाज्जपादपि ।
वितस्तायां चन्द्रक्षेत्रे सुरेज्यापुरमन्ततः ॥३२॥

सुरेज्यायाः समारभ्यताराद्वीपान्तमन्ततः ।
चन्द्रक्षेत्रं प्रोक्तमेतदागमज्ञैर्महेश्वरि ॥३३॥

---

२८ कः मा सुरैरिज्यकृता—सुरैरिज्या कृता

३० मा मातृकायामत्राधिकः पाठः

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
स्नात्वा मुक्तिमवाप्नोति चन्द्रक्षेत्रे न संशयः ॥

ततो वितस्ता प्रययौ प्रहारेण च सङ्गता ।
दर्शनात्स्पर्शनाद्वापि महापातकनाशिनी ॥३४॥

तत्र स्नात्वा महेशानि पुण्यमाप्नोति पुष्कलम् ॥३५॥

इति ते कथितं पुण्यं चन्द्राख्यं तीर्थमुत्तमम् ।
वितस्तायां महाग्रामे सुरेज्यापुरसंज्ञके ॥३६॥

इत्येष पटलो गुह्यो महापातकहा कलौ ।
श्रोतव्य: पठितव्यश्च महापुण्यप्रद: स्मृत: ॥३७॥

इति श्रीवितस्तामाहात्म्ये सुरेज्यापुरवर्णनं
नामाष्टाविंश: पटल: ॥२८॥

---

३५ ग: मा महादेवि—महेशानि
३६ घ: मा नामके—संज्ञके

# अथैकोनत्रिंशः पटलः

*भैरव्युवाच

श्रुतं तव महेशान मुखपद्मविनिस्सृतम् ।
माहात्म्यं चन्द्रतीर्थस्य सुरेज्यापुरसंज्ञके ॥१॥

इदानीं श्रोतुमिच्छामि प्रहारेण च सङ्गताम् ।
वितस्तां जगदीशान महापातकनाशिनीम् ॥२॥

प्रहारतीर्थं देवेश कथं प्रथितमुत्तमम् ।
प्रहाराख्यं कथमभूत्तीर्थं परमपावनम् ॥३॥

*भैरव उवाच

शृणु वक्ष्ये महादेवि प्रहारतीर्थमुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्जन्मकोटिभवैरघैः ॥४॥

पुराञ्जनगिरौ देवावायतौ स्वनिवासतः ।
प्रीतौ प्रक्रीडमानौ तु स्नातौ गङ्गाजलैःशुभैः ॥५॥

---

*मा श्री भैरव्युवाच—भैरव्युवाच

*मा श्रीभैरव उवाच—भैरव उवाच

५ कः ब गिरा—गिरौ

गः मा मा तौ—तु

घः जले शुभे—जलैः शुभैः

तथा कज्जलनेत्रेण तर्जयामास भैरवम् ।
प्रेक्षन्ती भावसंयुक्ता गिरिजा गिरिशं प्रभुम् ॥६॥

दृष्ट्वा कज्जलहीनं तु नगजानेत्रमुत्तमम् ।
प्रोवाच रुद्रो देवेशीं नेत्रयोः कज्जलं कुरु ॥७॥

सधवा याङ्गभूषादिरहिता सुरसुन्दरि ।
भर्तृघ्ना सा बुधैः प्रोक्ता तथोभयच्युता प्रिये ॥८॥

या स्व भर्तारमुत्सृज्य परं पतिमुपाव्रजेत् ।
सा शुनी गृहगोधा वा गोधा वा द्विमुखी भवेत् ॥९॥

यस्या उद्विजते भर्ता सर्पाद्वेश्मगतादिव ।
सा याति नरकं घोरं यावदाभूमिसंप्लवम् ॥१०॥

या भर्तृसेवामुत्सृज्य नियमव्रतमानसा ।
साप्यायुः हरते भर्तुः पशून्वित्तं तथा प्रिये ॥११॥

---

६ खः मा वैभवं—भैरवं

गः भावयुक्ता सा—भावसंयुक्ता

११ कः मा सा भर्तृसेवां—या भर्तृसेवां

या भर्तारं परित्यज्य व्रतेषु रक्तमानसा ।
सा ज्ञेया ह्युभयभ्रष्टा नारीवर्गेषु शोकदा ॥१२॥

सा याति नरकं घोरं कालसूत्रमनन्तकम् ।
निरयात्परिमुक्ता सा शुनी गोधाथवा भवेत् ॥१३॥

सदा हास्यपरा देवि वस्त्राभरणसंयुता ।
सुगन्धस्त्रवपरिमला लालयेत स्वकं पतिम् ॥१४॥

प्रजापालनसक्ता च पशुभृत्यादिपालनी ।
भर्तुः प्रियंवदा या च सा देवि दिवि तारका ॥१५॥

स्वभर्तृपद्यजं वारि पापहारि विहाय या ।
काङ्क्षन्ती तीर्थजं वारि तीर्थघ्नीति मता च सा ॥१६॥

---

१२ गः मा उभयभ्रष्टा—ह्युभयभ्रष्टा

मा मातृकायामत्राधिकः पाठः—

या स्व भर्तारमुत्सृज्य देवपूजापरा भवेत् ।
तस्याः सङ्गोऽपि देवेशि वर्जनीयः प्रयत्नतः ॥
उपवास परा या तु नारी भर्तृसमन्विता ।
आयुष्यञ्च पशूञ्चापि धान्यं भर्तुः हरेच्च सा ॥
हरेत्क्षेत्रं कलत्रञ्च कीर्ति चैव यशश्च ह ।
भर्तृघ्न्यपि मता देवि सत्यं सत्यं वदाम्यहम् ॥

१६ कः मा स्वभर्तृपादजं—स्वभर्तृपद्यजं

तस्मात्सर्वप्रयत्नेन पत्युः सेवारता भवेत् ।
नारीह सुखमाप्नोति परलोके परां गतिम् ॥१७॥

तस्मादाशुञ्चनेनैव स्वनेत्रे परिभूषय ।
इति श्रुत्वा वचो देवी गिरिशं तमुवाच ह ॥१८॥

कुरु मे कज्जलं देव नेत्रयोः स्वयमेव हि ॥१९॥

श्रुत्वा देव्या वचो देवः प्राहरद्बलवत्ततः ।
त्रिशूलेनाञ्जनं रूपं दधार स महीधरः ॥२०॥

तदञ्जनशिलोद्भूतकज्जलेन महेश्वरः ।
अभूषयत्स्वयं तस्याः पार्वत्याः नेत्रगोलके ॥२१॥

शूलप्रहारसम्भूता नदी परमपावनी ।
मिलिता च महानद्या महापातकनाशिनी ॥२२॥

यस्माच्छूलप्रहारेण समुद्भूता नदी शुभा ।
तस्मात्प्रोक्ता महेशानि प्रहाराख्या पुरातनैः ॥२३॥

प्रहारेण ततो देवी मिलिता सा वितस्तिका ।
तत्र स्नात्वा च दत्वा च मुक्तो वै सर्वकिल्विषात् ॥२४॥

---

१८ ख: मा ह्यनेत्रे – स्वनेत्रे

२० घ: मा महीधरम—महीधरः

२१ घ: मा पार्वती – पार्वत्याः

गङ्गायां भास्करे क्षेत्रे प्रयागे नैमिषे प्रिये ।
स्नानाद्यत्फलमाप्नोति तल्लभेत्प्रहरे प्रिये ॥२५॥
प्रकर्षेण हरो यत्र मुदितः परमेश्वरि ।
समन्ताच्च ततः प्रोक्तः प्रहरः सुरसुन्दरि ॥२६॥
प्रहरे च नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ।
मुक्तिमेव लभेद्देवि स्नात्वा प्रहरसङ्गमे ॥२७॥

---

२७ श मातृकायामत्राधिक पाठः—

महापातकयुक्तो वा युक्तो वा ह्युपपातकैः ।
प्रहरासङ्गमे स्नात्वा मुच्यते देव्यसंशयम् ॥
प्रहरासङ्गमे देवि श्राद्धं कृत्वा विधानतः ।
पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ॥
तिलदानञ्च गोदानं पृथिवीसंकल्पमेव च ।
यः करोति नरो भक्त्या ह्यनन्तफलमाप्नुयात् ॥
अश्वांश्च विधिना भूम्यां यो विप्राय ददेत्प्रिये ।
तत्फलं नैव नश्येत कल्पान्तमपि सुन्दरि ॥
पृथिवींससागरां देवि सशैलवनकाननम् ।
दत्वा विप्राय विधिवद्ग्रहणे चन्द्रसूर्ययोः ।
कुरुक्षेत्रे च यत्पुण्यं लभते मनुजोत्तमः ।
तत्फलं समवाप्नोति स्नात्वा प्रहरसङ्गमे ॥
प्रहरासङ्गमे देवि यः स्नायात्प्रत्यहमेव तु ।
स याति परमं लोकं शिवस्य परमेष्ठिनः ॥
प्रहरासङ्गमे दानात्पुण्यमक्षयमाप्नुयात् ।
होमाद्यज्ञात्तथा दानाज्जपाद्देवार्चनादपि ॥
नरो विमुच्यते देवि जन्मान्तरशतैरघैः ।

तस्मात्सर्वप्रयत्नेन स्नातव्यमविशङ्कया ।
प्रहारसङ्गमे देवि परं पदमभीप्सुभि: ॥२८॥

इति ते कथितोऽनन्तो महिमा पापनाशन: ।
वितस्ताप्रहारयोगोद्भवो वै देवदुर्लभ: ॥२९॥

*इति श्रीवितस्तामाहात्म्ये प्रहारसङ्गममहिमा वर्णनं नाम
एकोनत्रिंश: पटल: ॥२९॥

---

२९ मा मातृकायामत्राधिक: पाठ:—
धर्मदं धनदं कामपुष्टिदञ्च महेश्वरि ।
वितस्तायां तीर्थं परमायुष्यञ्च स्मृतं बुधै: ॥

*मा मातृकायां प्रहरसङ्गमानन्तमाहात्म्यमेकस्मिन्पटले प्रदत्तम्
तत्रस्थपाठोऽग्रिमे पटले तुलयित्वा दीयते ।

# अथ त्रिंशः पटलः

भैरव्युवाच

श्रुतो वितस्ताप्रहरयोगस्य महिमा परः ।
सर्वपापहरो देव भवन्मुखविनिस्सृतः ॥१॥

पुनर्वद वितस्तायाः महिमानमनुत्तमम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥२॥

भैरव उवाच

ततः प्रयाता देवेशि नदी परमपावनी ।
पातालमगमद्देवि ह्यदर्शनमगात्पुनः ॥३॥

शुशोच कश्यपस्तत्र ह्यदृष्ट्वा तां महानदीम् ।
स्मरन्वै पादयुग्मञ्च शिवयोश्च महेश्वरि ॥४॥

शिवोऽपि दर्शयामास चात्मानमपराजिते ।
उवाच तं मुनिं प्रीत्या मा शुच त्वं मुनीश्वर ॥५॥

नागेनानन्तकाख्येन हृता देवी वितस्तिका ।
आनयिष्ये मोक्षयित्वा तस्मान्नागान्महामुने ॥६॥

इत्युक्त्वा तं मुनिं देवि ययौ पातालमीश्वरः ।
अनन्तं दण्डयित्वा तु नदीं प्रत्यानयच्छिवः ॥७॥

प्रत्याहृत्य नदीं तत्र कश्यपं वाक्यमब्रवीत् ।
मया प्रतिहृता देवी वितस्ता पापनाशिनी ॥८॥

प्रयाता शनिकोटचाख्यं तीर्थं परमपावनम् ।
इत्युक्त्वा कश्यपं देवो हरोऽन्तर्धानमाययौ ॥९॥

यस्मादनन्तेन हृता नदी परमपावनी ।
तस्मात्प्रोक्तं पुराविद्भिरनन्तं तीर्थमुत्तमम् ॥१०॥

स्नातानामत्र पुण्यस्य अन्तो यस्मात्तु विद्यते ।
तस्मादनन्तकाख्यञ्च तीर्थमुक्तं मनीषिभिः ॥११॥

अनन्ततीर्थे देवेशि स्नात्वा पुण्यमवाप्नुयात् ।
अनन्ताख्ये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥१२॥

---

६ गः ब आनयित्वा—आनयिष्ये

धर्मदं धनदं कामपुष्टिदञ्च महेश्वरि ।
वितस्तायास्तीर्थवरमायुष्यञ्च मतं बुधैः ॥१३॥

भूयो भूयः किमुक्तेन नरः पातकवान्कलौ ।
स्नात्वा मुक्तिमवाप्नोति वितस्तायामनन्तके ॥१४॥

इति श्रीवितस्तामाहात्म्येऽनन्ततीर्थमहिमा नाम
त्रिंशः पटलः ॥३०॥

---

१३ मा मातृकायामधिकः पाठः

महापातकजाद्घोरात्स्नात्वा मुच्येत किल्बिषात् ॥
कपिलानां सहस्रस्य सम्यग्दत्तस्य यत्फलम् ।
तत्फलं समवाप्नोति स्नात्वा तीर्थेऽप्यनन्तके ॥
अश्वमेधसहस्रस्य वाजपेयशतस्य च ।
फलमाप्नोति मनुजस्स्नात्वा तीर्थेऽप्यनन्तके ॥
ज्योतिष्टोमादियागानां फलदं सुरसुन्दरि ।
अनन्ततीर्थे संस्नात्वा द्व्यहं त्र्यहमथापि वा ।
एकाहमपि मुच्येत महापातकसञ्चयात् ॥
श्राद्धं कृत्वाप्यनन्ताख्ये तीर्थे परमपावने ।
पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ॥
तिलानपि च दत्वा श्रद्धया परया शिवे ।
अनन्तफलमाप्नोति मनुजः सर्वतो भृशम् ॥
अश्वं दत्वात्र विधिना विमानमधिरोहति ।
अप्सरोभिर्नीयमानः स्वर्गं चानन्तमश्नुते ॥
गां दत्वात्र महादेवि विधिनानेन सुन्दरि ।
अनन्तं स्वर्गमाप्नोति सत्यं सत्यं वनानने ॥
अनन्तं पुण्यमाप्नोति स्नात्वा तीर्थेऽप्यनन्तके ।

## अथैकत्रिंशः पटलः

*भैरव्युवाच

श्रुत्वाप्यनन्तनागस्य महिमानमनुत्तमम् ।
वितस्ताया महादेव कृतार्थास्मि न संशयः ॥१॥

अधुना श्रोतुमिच्छामि पुण्यं वाराहमूलकम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातकपञ्जरात् ॥२॥

कथं वाराहमूलस्य नामाभूत्सुरसुन्दर ।
वाराहशिखरस्यापि माहात्म्यमपि मे वद ॥३॥

कोटितीर्थस्य माहात्म्यं गोष्पदस्य तथैव च ।
अनुग्राह्या प्रिया ते चेत्तदा मे कृपया वद ॥४॥

*भैरव उवाच

शृणु भद्रे प्रवक्ष्यामि पुण्यं वाराहमूलकम् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥५॥

---

*मा श्रीभैरव्युवाच—भैरव्युवाच

१ कः मा श्रृण्वनन्तनागस्य—श्रुत्वाप्यनन्तनागस्य

खः महिमानमनन्तकं—महिमानमनुत्तमम्

*मा श्रीभैरव उवाच— भैरव उवाच

५ कः मा देवि—जन्तुः

पुरा दैत्यो हिरण्याक्षो देवीं पृथिवीमुपाहरत् ।
विष्णुर्वाराहरूपेण पृथिवीमुद्धारयत्प्रिये ॥६॥

स एव धर्मो देवेशि भूमेर्धर्मानुवाच ह ।
उक्त्वा भूमेः परान्धर्मान्विष्णुः वाराहरूपधृत् ॥७॥

तस्थावत्र चिरंकालं पुण्ये सत्याः सरोवरे ।
यज्ञञ्चकार विधिवत्पुण्यवर्षसहस्रकम् ॥८॥

तस्य यज्ञवराहस्य हव्यं यदभवत्किल ।
तदेव तत्र सञ्जातं शृङ्गं वाराहनामकम् ॥९॥

आमूलाद्धव्यशिखरं यत्र यज्ञश्चकार ह ।
पुण्य वाराहः प्रथितं तस्माद्वाराहमूलकम् ॥१०॥

वरां हत्वा दैत्यगणानामूलाच्च यतः प्रिये ।
ततः प्रोक्तं पुराविद्भिस्तीर्थंवाराहमूलकम् ॥११॥

वराहमूले स्नात्वा च पुण्यमाप्नोति दानजम् ॥१२॥

---

७ कः मा यज्ञो—धर्मो

११ मा मातृकायामयं श्लोको नास्ति

१२ मा श्लोकावसाने—इति श्रीवितस्तामाहात्म्ये वराहमूलवर्णनं
नाम पटलः ।

श्रीभैरव्युवाच

वितस्ताया महापुण्यं माहात्म्यमरोत्तम ।
श्रावं श्रावं कृतार्थास्मि कृतार्थास्मि न संशयः ॥१३॥

अधुना श्रोतुमिच्छामि शिलादेव्याः फलं महत् ।
यच्छ्रुत्वा मुच्यते जन्तुर्महापातककोटिभिः ॥१४॥

*भैरवः

शृणु देवि प्रवक्ष्यामि शैलजाफलमुत्तमम् ।
यच्छ्रुत्वा मनुजस्याशु सिद्धिर्भवति वाञ्छिता ॥१५॥

पुरा हिमालये पुण्ये शैलोद्देशेऽति शोभने ।
सतोविरहसंतप्तोऽप्यतपत्तु परं सरः ॥१६॥

समाधिस्थो महादेवो दिव्यं वर्षसहस्रकम् ।
समाधिस्थं हरं दृष्ट्वा नगः परमपावनः ॥१७॥

पार्वतीं स्वां दुहितरं भवसेवार्थमादिशत् ॥१८॥

---

*मा श्री भैरव उवाच—भैरवः
१५ गः मा मनुजस्यापि—मनुजस्याशु
१६ खः मा शैलदेशे—शैलोद्देशे
गः स ते—सती
घः परश्वरः—परं सरः

उमा सेवापरा तत्र भवं सर्वोपचारकैः ।
उपाचरदनन्येन मनसा व्यग्रया धिया ॥१९॥

समाधिस्थं भवं प्रेक्ष्य देवानां भयमाविशत् ।
कुमारजननार्थञ्च कामो देवैश्च प्रेषितः ॥२०॥

चुकोप भगवाञ्छम्भुः कामं प्रेक्ष्य पुरः स्थितम् ।
क्रोधाग्निना ह्यनङ्गं तं कृत्वा क्षोभयाञ्जगत् ॥२१॥

प्रेक्ष्य क्षोभं गिरीशस्य नगः परमविस्मितः ।
ऊचे स्वां तां दुहितरं शिला भव हि पुत्रिके ॥२२॥

पितुः श्रुत्वा परं वाक्यं गत्वा दूरं महेश्वरि ।
शिला रूपा बभूवात्र पश्चिमे शृङ्ग उत्तमे ॥२३॥

प्रलये सौकरं रूपं दधार भगवान्हरिः ।
हिरण्याक्षवधार्थञ्च भूम्युद्धरणहेतवे ॥२४॥

हिरण्याक्षवधं श्रुत्वा शेषा दैत्यगणा प्रिये ।
पुण्ये सतीसरोदेशे तस्थुर्निर्भयमच्युत ॥२५॥

---

१९ कः मा सेवापुरा—सेवापरा

२० खः मा देवैश्च सृष्टवान—देवैश्च प्रेषितः

२२ कः मा क्षोभं तु गिरिशो —क्षोभं गिरीशस्य

२४ गः मा हिरण्यक— हिरण्याक्ष

ज्ञात्वा वराहो देवेशि दैत्याञ्च्छन्नान्सरोवरे ।
ततो निस्सारयन्देवि ह्यतिष्ठद्यज्ञसूकर: ।।२६।।

स तृप्तांस्तान्दैत्यगणान्प्रेक्ष्य निस्सारयञ्जलम् ।
चक्रेण शतधारेण चिच्छेद शिखरं हरि: ।।२७।।

चक्रप्रहारजा ज्वाला ह्याकाशं समुपागता ।
सैव दृष्ट्वा पुनर्देवि शिलायां समुपस्थिता ।।२८।।

सिंहासनां बाणचापपाशाङ्कुशलसत्कराम् ।
रक्ताम्बरां रक्तपुष्पां रक्तमालानुलेपनाम् ।।२९।।

चंद्रार्धशेखरां ध्यायेत्त्रिनेत्रां चारुहासिनीम् ।
केयूरमुक्ताभरणां हारकङ्कणनूपुराम् ।।३०।।

शिलापृष्ठङ्गतां देवीं भक्ताभयवरप्रदाम् ।
विघ्नशिला बभूवात्र तोयनिस्सारणे तत: ।।३१।।

ततो वराहो दृष्ट्वा तां विघ्नभूतां महाशिलाम् ।
स्तुत्वा नुत्वा च विधिवच्छिलामुत्सार्य बाहुना ।।३२।।

समुद्धता शिलां दृष्ट्वा पार्षदा वीर्यमादधु: ।
उद्धतान्पार्षदान्वीक्ष्य शिलां देवीं विशेषत: ।।३३।।

असिं प्रगृह्य तरसा देवीं प्रति ययौ हरिः ।
शिलां देवीं महाविष्णुः प्राहरदसिणा पुनः ॥३४॥

कुण्ठीभवत्तदा चक्रं तदद्भुतमिवाभवत् ।
चक्रं तु कुण्ठितं दृष्ट्वा विस्मयं परमं गतः ॥३५॥

स्तुत्वा देवीं भगवतीं तस्थावग्रे पुनर्हरिः ।
दृष्ट्वोवाच पुनर्मायां मार्गं देहि शुचि स्मिते ॥३६॥

जलनिस्सारणे देवि बलिं तुभ्यं ददाम्यहम् ।
श्रुत्वैतद्वचनं सौम्यं हरेस्तस्य महात्मनः ॥३७॥

उवाच विष्णुं देवेशी गणेभ्यो मह्यमेव च ।
स्थानं तावत्प्रदेह्याशु खादनार्थं बलिं ततः ॥३८॥

वचः संश्रुत्य देवेश्याः शैलजायाः स्वयं हरिः ।
उवाच स्थानं दास्यामि तुभ्यं गणेभ्य एव च ॥३९॥

---

३४ घः मा प्रहाराशिणा—प्राहरदसिणा
३५ कः मा कुण्ठी—कुण्ठी
३६ कः मा देवं—देवीं
खः हरेः पुनः—पुनर्हरिः
गः हरिर्मायां—पुनर्मायां
३९ खः मा स च हरि—स्वयं हरिः
गः दास्यापि—दास्यामि

पुण्ये वितस्तातीरे वै तव स्थानं भविष्यति ।
त्वदधश्च गणानां ते स्थानमत्र चिरं भुवि ॥४०॥

खादनार्थं तवाहारं दापयामि न संशय: ।
इत्युक्त्वा शैलजां विष्णु: पार्ष्णिना ताडयन्तत: ॥४१॥

वितस्ताया महानद्या गङ्गा समभवत्तत: ।
तदधश्च गणा देवि तस्य तीर्थंरिरक्षया ॥४२॥

जलेन सह निर्यान्ति राक्षसापशदाश्च ये ।
ते दत्ता: खादनाहारं देवै: पार्षद्भ्य एव च ॥४३॥

इति सूकरश्चालक्ष्य बाहुना सहसा शिलाम् ।
उत्थाप्य शिरसि तत्र तटे निक्षिप्य तस्थिवान् ॥४४॥

ये गणास्तु शिलारूपास्तेऽपि तस्थुस्तटे शुभे ।
पुण्या तु सरसो देवि निस्ससार जलं तत: ॥४५॥

निस्सरन्तं जलं दृष्ट्वा प्रसन्नोऽभवदच्युत: ।
वर्धयामास च तत: शिलां तान्पार्षदान्वरै: ॥४६॥

---

४० ख: मा स्थानमात्र—स्थानमत्र

४३ ख: मा रक्षसापशदाश्च — राक्षसापशदाश्च

४४ क: मा सूकर आलक्ष्य—सूकरश्चालक्ष्य

ततः प्रभृति यः कश्चिच्छिलायां खादनं हरेत् ।
आपन्न आपदं मुच्येद्बद्धो मुच्येत बन्धनात् ॥४७॥

पुत्रदारधनैर्धान्यैः पशुमित्रकलत्रकैः ।
समृद्धः स सुखी पुत्री विजयी च भविष्यति ॥४८॥

मोक्षेच्छुर्मोक्षमाप्नोति पुत्रेच्छुः पुत्रमाप्नुयात् ।
कामानावाप्नोति कामी च शिलां देवीं समर्चयन् ॥४६॥

गणां समर्च्य तत्रैव विविधैरुपचारकैः ।
कामान्समस्तानाप्नोति इति सत्यं वदामि ते ॥५०॥

तीर्थं रक्षन्समातिष्ठ पुण्यक्षेत्रे वराहके ।
गणैः सह महादेवि यावदद्भुतसंप्लवम् ॥५१॥

इत्युक्त्वा सूकरो देवीं ततो ह्यन्तर्धिमागतः ॥५२॥

*भैरव उवाच

तदा प्रभृति देवेशि तस्यास्तट उत्तमे ।
शिलादेवीति विख्याता विष्णुनात्र प्रतिष्ठिता ॥५३॥

---

५१ घः मा यावदाहूत—यावदद्भुत

*मा श्रीभैरव उवाच—भैरव उवाच

५३ घः मा विष्णुना सुप्रतिष्ठता—विष्णुनात्र प्रतिष्ठिता

गणाश्च शतशस्तत्र तीर्थविघ्नापहारिणः ।
बलिं गृह्णन्ति लोकेभ्य आशीभिर्वर्धयन्ति तान् ॥५४॥

तस्मात्सर्वप्रयत्नेन पूजयेच्छैलजातटे ।
वितस्ताया महानद्याः सर्वकामवरप्रदाम् ॥५५॥

स्नाता तु शैलजासङ्गे वितस्ता तु महानदी ।
फलं ददाति विपुलं ज्योतिष्टोमादियागजम् ॥५६॥

शिलां प्रगृह्य तत्पीडा जाता तीर्थात्सरित्तटे ।
विष्णोस्तदेव तीर्थस्य दर्शनात्पापहारिणः ॥५७॥

बभूव सहसा यत्तत्पापहारणमुच्यते ।
तत्र स्नात्वा च पीत्वा च कृत्वा श्राद्धमपीश्वरि ॥५८॥

महापातकनिर्मुक्ता भविष्यन्ति सदा नराः ।
तृप्ताः प्रीतास्तु पितरः शतकल्पं न संशयः ॥५९॥

तस्माद्वराहक्षेत्रं वै तीर्थं पापहरं श्रियेत् ।
महापापविनिर्मुक्ता यान्ति ब्रह्मसनातनम् ॥६०॥

---

५५ घः मा सर्वकामफलप्रदां—सर्वकामवरप्रदां

५७ कः मा मत्पीडा—तत्पीडा

५८ खः मा पापहरणं—पापहारणं

६० गः/घः का निर्मुक्तो याति—निर्मुक्ता यान्ति

खादनार्थं गणानाञ्चाप्याहारो राक्षसाः कृताः ।
विष्णुनापि ततः सिद्धं खादनाहारसंज्ञितम् ॥६१॥

स्नात्वा तु खादनाहारे स्पृष्टा पीता च सुन्दरि ।
महापापहरा प्रोक्ता वितस्ता सर्वसिद्धिदा ॥६२॥

पुराचीने तटेऽप्यर्वाचीने चापि विशेषतः ।
स्नाता पीता च स्पृष्टा च वितस्ता पापनाशिनी ॥६३॥

वाराणस्या दशगुणा प्रयागाच्च शतोत्तरा ।
कुरुक्षेत्राल्लक्षगुणा निमिषाच्च शतोत्तरा ॥६४॥

वितस्ता कथिता देवि खादनाहारसङ्गता ।
इन्द्राभिषेके देवेशि तीर्थानां कोटयः परम् ॥६५॥

पुण्ये वाराहके क्षेत्रे मिलितास्तत्र सुन्दरि ।
वितस्ता कथिता पुण्या कोटितीर्थेन सङ्गता ॥६६॥

कोटितीर्थे महादेवि स्नात्वा वैतस्तिके जले ।
खादने पापहरणे मुच्यते पापकोटिभिः ॥६७॥

वितस्ता हरते पापं यत्र तत्रावगाहिता ।
विशेषतो वराहे च तीर्थानां कोटिभिः श्रिता ।६८॥

---

६४ खः मा शतेतरा - शतोत्तरा

६५ गः मा इन्द्राभिषेको—इन्द्राभिषेके

तस्मात्सर्वप्रयत्नेन स्नायाद्वैतस्तिके जले ।
विशेषात्तु वराहे च कोटितीर्थेश्च सङ्गते ॥६९॥

स्नायाच्च सुरभीतीर्थे कुर्याश्श्राद्धमपीश्वरि ।
सर्वपापविनिर्मुक्तो याति ब्रह्मसनातनम् ॥७०॥

घोरं पापं दहन्ती वै वितस्ता संस्थिता नदी ।
मिश्रिता देवदेवेशि सोमसूर्याग्निधामभिः ॥७१॥

त्रितेजो मिश्रिता यत्र त्रयी समभवन्नदी ।
त्रिमलं त्रिगुणांश्चापि दहत्येव न संशयः ॥७२॥

गोदावरी यत्र पुण्या पुण्यं केदारकं महत् ।
हरिपादं महाक्षेत्रं पुष्करं क्षेत्रमेव च ॥७३॥

त्रिलोकतीर्थानि तथा मिलितानि वितस्तया ।
स्नात्वा पीत्वा च विधिवद्धन्ति पापं पुराकृतम् ॥७४॥

देवा अपि च काङ्क्षन्ति मानुष्ये मण्डले जन्म ।
अपि मानुष्यकं जन्म भवेदस्माकमीदृशम् ॥७५॥

---

६९ खः मा स्नानाद्वैतस्तिके—स्नायाद्वैतस्तिके

घः कोटितीर्थञ्च—कोटितीर्थेश्च

७३ गः मा महाच्छत्रं—महाक्षेत्रं

७५ गः मा मानुषकं—मानुष्यकं

अस्मिन्वै भारते खण्डे मर्त्यलोके विशेषतः ।
स्नास्यामो देवजुष्टां तां वितस्तां परमां नदीम् ॥७६॥

कलिकालक्षतान्याशु ब्रह्महत्यादिकानि च ।
वितस्ता हरते पापं यत्र तत्रावगाहिता ॥७७॥

विशेषतो वराहे च मिलिता तीर्थकोटिभिः ।
इति काङ्क्षति देवेशि दिवि देवा ह्यहर्निशम् ॥७८॥

वितस्तास्नेहार्थाः किं पुनर्मानुषाः प्रिये ।
अयमेव महामोहोऽप्यविद्यापीयमेव च ॥७९॥

भूमिस्थेऽपि महातीर्थे वितस्ताख्ये महेश्वरि ।
न स्नास्यन्ति यत्र नरास्तद्विघ्नैर्बहुलीकृताः ॥८०॥

तस्मात्सर्वप्रयत्नेन वितस्तां शरणं श्रयेत् ।
पापं हरति सद्यो वै पुण्यं वर्धयते क्षणात् ॥८१॥

मुच्येत्पातकजाद्घोराद्वितस्तास्नानतः प्रिये ।
न वितस्तासमं तीर्थं त्रैलोक्यामपि सुन्दरि ॥८२॥

---

७६ ग: मा स्नास्यामि — स्नास्यामो
७७ क. मा कृतान्याशु — क्षतान्याशु
७९ मा मातृकायामयं श्लोकः नास्ति
८२/८३ मा मातृकायां श्लोकाविमौ न स्तः

महापुण्यप्रदं प्रोक्तं घोरपापविनाशनम् ।
पुरा च सुरभिर्धेनुरिन्द्रेण सह चागता ॥८३॥

तीर्थानां कोटयश्चैव सर्वे देवाः समागताः ।
किन्नराः सिद्धगन्धर्वाः पन्नगोरगराक्षसाः ॥८४॥

सरिताः सागराश्चापि विश्वेऽपि समरुद्गणाः ।
नागा मातृगणाश्चापि शक्रमेवाभिषेचिरे ॥८५॥

मुनयोऽप्सरसो चापि ननृतुश्च महेश्वरि ।
विद्याधराश्चारणाश्च यक्षाः कूष्माण्डकादयः ॥८६॥

शक्राभिषेके तत्रैव पुण्ये वाराहमूलके ।
शुक्लायां भाद्रद्वादश्यां सिषिचुः शक्रमूर्धनि ॥८७॥

सुरभिश्च गवां श्रेष्ठां ह्यमृतं सिषिचे प्रिये ।
पुण्यैस्तीर्थोदकैः स्नाप्य शक्रं सुरवरार्चिते ॥८८॥

---

८५ ख: मा विशेऽपि—विश्वेऽपि

८५/८६ मा मातृकायां श्लोकांशौ न स्तः

८७ क: मा चक्राभिषेके—शक्राभिषेके

घ: सिश्चुषि—सिषिचुः

८८ मा मातृकायां नास्ति श्लोकः

तीर्थानां कोटयश्चापि शक्रं सुरवरार्चिते ।
तीर्थानां कोटयश्चापि गताः स्वं स्वं तदालयम् ॥८९॥

स्थित्वा भद्रासने शक्रः प्राह देवाननुत्तमान् ।
अस्मिन्क्षेत्रे महापुण्ये सन्निदध्वमिहेश्वराः ॥९०॥

अथवा शुक्लद्वादश्यां कोटितीर्थे सुरेश्वराः ।
स्नात्वा प्रयात वै नाकं तेजसा वर्चसा युताः ॥९१॥

इन्द्राभिषेकं कृत्वा तु सुरभिर्हर्षसंयुता ।
स्खलिता च शिला या सा नाकमेवोज्जगाम ह ॥९२॥

सुरभेः स्खलितायास्तु पादमुद्रा च याभवत् ।
तत्क्षेत्रं कामधेन्वाख्यं भवद्गिरिजे शुभम् ॥९३॥

महापुण्यप्रदं धेन्वाः क्षेत्रं परमपावनम् ।
पुण्ये भाद्रपदे मासि चैकादश्यां विशेषतः ॥९४॥

स्खलिताया गलत्पादं शिलाया सुरसुन्दरि ।
तदेव सुरभीतीर्थं जातं परमपावनम् ॥९५॥

अन्यौत्सुक्येन गिरिजे स्खलिता सुरभिस्ततः ।
यत्र शक्राभिषेकार्थं धेनुतीर्थं प्रचक्षते ॥९६॥

धेनुतीर्थे नरः स्नात्वा कृत्वा श्राद्धमनुत्तमम् ।
सर्वपापविनिर्मुक्तो याति ब्रह्मसनातनम् ॥९७॥

एकादश्यां धेनुतीर्थे स्नात्वा वैतस्तिके जले ।
धेनुपादे ततः श्राद्धं कृत्वा तु विधिवन्नरः ॥९८॥

पितरस्तृप्तिमायान्ति शतकल्पं न संशयः ।
धेनुपादे महातीर्थे स्पृष्ट्वा वैतस्तिकं जलम् ॥९९॥

चान्द्रयणाधिकं पुण्यं भवत्येव न संशयः ।
सुरभेः पादमुद्रायां स्नात्वा मुच्येत बन्धनात् ॥१००॥

धेनुतीर्थसमं तीर्थं न भूतं न भविष्यति ॥१०१॥

अणुमात्रमपीशानि पादे पातकमाचरन् ।
वज्रलेपसमं ज्ञेयमनन्तञ्च महेश्वरि ॥१०२॥

तस्मात्सर्वप्रयत्नेन तीर्थे पापं विवर्जयेत् ।
पुण्यमेव श्रयेद्धीमाननन्तं फलमाप्नुयात् ॥१०३॥

आधेनुतीर्थाद्दूर्वाख्यतीर्थां तावन्महेश्वरि ।
वितस्ता हरते पापं जन्मान्तरकृतं नृणाम् ॥१०४॥

ततः परं तु सा मान्या वितस्ता परिकीर्तिता ।
सर्वपापहरा प्रोक्ता पुण्ये वाराहमूलके ॥१०५॥

महापुण्यप्रदा देवि स्नानदानजपार्चनैः ।
आवराहशिरस्तावद्बुधः करणमन्ततः ॥१०६॥

मीनोरसस्ततो देवि धेनुतीर्थान्तमीरिता ।
सीमा वराहक्षेत्रस्य सदृशी पुण्यपापयोः ॥१०७॥

अर्वाचीनपराचीनतटयोरुभयोरपि ।
अक्षयं फलमाप्नोति कृतयोरिष्टदुष्टयोः ॥१०८॥

वितस्ता हरते पापं मौर्वाश्रमसमीपतः ।
ब्रह्महत्यादिकं पापं सद्यो नश्यति स्नानतः ॥१०९॥

यः शृणोति महादेवि वितस्तास्नानजं फलम् ।
सर्वपापविर्मुक्तो याति ब्रह्मसनातनम् ॥११०॥

इत्येष पटलो गुह्यो महापातकहा कलौ ।
श्रुतश्च पठितो ध्यातो भुक्तिमुक्तिफलप्रदः ॥१११॥

इति श्रीभृङ्गीशसंहितायां भैरवीभैरवसम्वादे वितस्तामाहात्म्ये
वराहमूलादिवनमहारमाहात्म्यं नाम
एकत्रिंशः पटलः ॥३१॥
समाप्तञ्चेदं वितस्तामाहात्म्यं सम्पूर्णं शुभम् ।

## *अथ द्वात्रिंशः पटलः

*मानुष्यं दुर्लभं प्राप्य कलिं ज्ञात्वा च दुर्जयम् ।
स्वमायुश्चपलं ज्ञात्वा शीघ्रं सिन्धुं समाश्रयेत् ।।१।।

सर्वतीर्थाणि देवेशि गङ्गाद्या सरितस्तथा ।
इन्द्राद्या लोकपालाश्च ग्रहनक्षत्रसंयुताः ।।२।।

ब्राह्माद्या मातरश्चापि गणगन्धर्वराक्षसाः ।
यक्षोरगमहानागवेतालाः जम्बुकादयः ।।३।।

तीर्थराजे प्रयागेऽस्मिन्वितस्तासिन्धुसङ्गमे ।
स्नातुमायान्ति देवेशि मकरार्के न संशयः ।।४।।

त्रिविधोऽपि जगति प्रयागः प्रकटीकृतः ।
एको गङ्गायमुनयोः सङ्गमः परमेश्वरि ।।५।।

द्वितीश्च महेशानि श्रीगङ्गालकनन्दयोः ।
सङ्गमः कथितो देवि प्रयागाख्यो महेश्वरि ।।६।।

---

*अयं पटल मा मातृकातः सम्पादितः

*अत्र भैरवीभैरवसम्वादरूपप्रश्नोत्तरं नास्ति

१ गः मा स्वमायः – स्वमायुः

५ घः मा संग्रामः – सङ्गमः

तृतीयो हि प्रयागोऽयं वितस्तासिन्धुसङ्गमः ॥७॥

तस्मात्सोमार्यमायां तु मलं पातकिसम्भवम् ।
प्रक्षालयितुमायाता वेताश्चापि वरानने ॥८॥

एतेषु त्रिविधेषूक्तश्रेष्ठः पुण्यतमः परः ।
वितस्तासङ्गमो देवि प्रयागः पापहा कलौ ॥९॥

* - - - - - - - - देवेशि प्रयागस्य विशेषतः ।
वक्ष्यामि तं तु सत्येन फलं सिद्धिविवृद्धये ॥१०॥

स्नाने दाने जपे श्राद्धे होमे तपसि चा*— ।
पुण्यतरं तं सम्प्रोक्तं यावत्सीमाबलौ नरः ॥११॥

अर्वाचीने तटे पुण्ये वितस्तायां महेश्वरि ।
पुण्यं मुख्यं समायातं यावच्छूलवदन्ततः ॥१२॥

पुण्यं गौणं महाप्रोक्तं यावत्सीमाबलिं प्रिये ।
तस्मादेतत्तीर्थसमं दिव्यं भुव्यन्तरिक्षगम् ॥१३॥

वितस्तासिन्धुसम्भूतं न भूतं न भविष्यति ।
अक्षय्यं लभते पुण्यमक्षयवटसन्निधौ ॥१४॥

---

*त्रुटितः पाठः
*त्रुटितः पाठः

स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम् ।
तपः पूजाथवा श्राद्धं भक्तया फलदं स्मृतम् ॥१५॥

इति ते कथितं देवि तीर्थे श्राद्धपुरस्य च ।
* - - पुण्ये प्रयागाख्ये वितस्तासिन्धुसङ्गमे ॥१६॥

इत्येष पटलो गुह्यो महापातकहा कलौ ।
श्रुत्वा पठित्वा मुच्येत ब्रह्महत्यादिकोटिभिः ॥१७॥

श्रुत्वा माहात्म्यमेतस्य तीर्थस्य वरवर्णिनि ।
पुण्ये श्राद्धपुरे देवि वितस्तासिन्धुजस्य हि ॥१८॥

पठित्वापि प्रमुच्येत भक्त्या परमया मुदा ।
जन्मान्तरभवैः पापैरिति सत्यं वदामि ते ॥१९॥

पठञ्शृण्वन्स्मरन्मर्त्यो महिमानमनुत्तमम् ।
तीर्थराजप्रयागस्य वितस्तासिन्धुजस्य हि ॥२०॥

फलं प्राप्नोति विकलं वेदपारायणं कलौ ॥२१॥

इति श्रीवितस्तामाहात्म्ये भृङ्गीशसंहितायां श्राद्धपुरमाहात्म्यवर्णनं
नाम पटलः ॥३२॥

## [ अथ दानपूजाविधिः ]

भैरव्युवाच

वद मे कृपया देव यात्रासाफल्यवृद्धिदम् ।
दानञ्च पूजनञ्चैव वितस्ताया महेश्वर ॥१॥

भैरव उवाच

आदौ प्रपूजयेत्तत्र पाठकं परमेश्वरम् ।
वस्त्रैः विभूषणैश्चैव भोजनैः पूजनैस्तथा ॥२॥

ततस्तु पूजनं देव्याः वितस्ताया महेश्वरि ।
प्रकुर्यात्क्षीरसंमिश्रैः स्वर्णरौप्यविभूषणैः ॥३॥

वैदिकैस्तन्त्रसम्भूतैर्मन्त्रैः परमपावनैः ।
कांस्ये त्वन्नं समास्थाप्य तस्मिन्देवीं समर्पयेत् ॥४॥

अर्घैः पुष्पैस्तथा धूपैर्दीपैश्चन्दनवन्दनैः ।
दानमत्र प्रवक्ष्यामि यद्दत्वामृतमश्नुते ॥५॥

दानेन रहितं तीर्थस्नानं चैवाधमं स्मृतम् ।
मत्स्या अपि जले स्नान्ति नह्येते मोक्षभागिनः ॥६॥

वितस्तिपरिमाणं तु यवपिष्टेन कारयेत् ।
त्रिशूलमध्यारायां तु स्वर्णखण्डं प्रपुरयेत् ॥७॥

मध्याराविषये ताम्रमन्ते रौप्यं विनिक्षिपेत् ।
वस्त्रेणाच्छादनं कृत्वा ब्राह्मणाय निवेदयेत् ॥८॥

ब्रह्माविष्णुशिवात्मांस्त्वमिच्छाज्ञानक्रियात्मकम् ।
इदं दानं त्रिशूलस्य गृहाण मदनुग्रहात् ॥९॥

इति मन्त्रेण देवेशि दानं त्रैशूलमुत्तमम् ।
यात्रासाफल्यहेत्वर्थं पाठकाय निवेदयेत् ॥१०॥

इति ते कथितो देवि पूजाविधिरनुत्तम: ।
सर्वसौभाग्यजनन: सर्वसिद्धिप्रदायक: ॥११॥

इति श्रीवितस्तामाहात्म्यं समाप्तम् ।

# भृङ्गीशसंहिता

# होलिकामाहात्म्यम्

## ॐ श्रीगणेशाय नमः

श्रीभैरवी

श्रुत्वा भवत्प्रसादेन वसन्तदिनपञ्चमी ।
दीपाष्टम्यपि देवेशि श्रुता भवदनुग्रहात् ॥१॥

इदानीं श्रोतुमिच्छामि होलिकां परमेश्वर ॥२॥

होलिका होलिका चेति कथं च प्रथिता भुवि ।
होलिका सा च का प्रोक्ता विधिं तस्याश्च मे वद ॥३॥

श्रीभैरवः

शृणु वक्ष्ये महेशानि होलिकोत्सवमादितः ।
यं श्रुत्वा मुच्यते घोरैर्विघ्नैरनेकैरनेशः ॥४॥

पुरा वै तारको नाम दैत्यः परमदारुणः ।
त्रैलोक्यमात्मसात्कृत्वा बबाधे त्रिदशांस्तदा ॥५॥

भीतास्तु त्रिदशा देवि ब्रह्माणं शरणं ययुः ।
स्रष्टा चोवाच त्रिदशाञ्श्रृणुध्वं देवसत्तमाः ॥६॥

तन्नाशेन च मे शक्तिर्विष्णोरपि च सत्तमाः ।
ऋते महेश्वरोऽन्यश्च न स नाशमुपेष्यति ॥७॥

इति श्रुत्वा वचः सौम्यं ब्रह्मणोऽव्यक्तजन्मनः ।
ब्रह्मणा विष्णुना सार्धं देवाः कामेन संयुताः ॥८॥

तपस्यन्तं महादेवं हिमाद्रिशिखरे प्रिये ।
गतांस्तत्रैव देवेशि समाधिस्थं महेश्वरम् ॥९॥

कामेन विद्धः पार्वत्यां भवश्चक्रे महात्मनः ।
समाध्युपरतो देव्याः पाणिं जग्राह कौतुकात् ॥१०॥

जनयामास तस्या वै देव्या देवः सुकुमारकम् ।
पार्वती तं महद्बीजं नाशकद्धारितुं तदा ॥११॥

सपत्नो भवमाचिन्त्य गङ्गायाश्च जलेऽक्षिपत् ।
अथ गङ्गा च तं गर्भमसहन्ती च धारणे ॥१२॥

उत्ससर्ज गिरौ रम्ये हिमवत्येऽमरार्चिते ।
स तत्र ववृधे लोकानावृत्य ज्वलनात्मजः ॥१३॥

ददृशुर्जवनाकारं तं गर्भमथ कृत्यकाः ।
सरस्तंबे महात्मानं मलात्मजमयश्चिरम् ॥१४॥

ममायमिति ताः सर्वाः स्वतार्थिन्यो विचक्रमुः ।
तासां विधित्वा धावन्तं मातृणां भगवान्प्रभुः ॥१५॥

प्रस्नातानां पयः षड्भिर्वदनैरपि तत्तदा ।
तं प्रभावं समालोक्य तस्य बालकस्य कृत्तिकाः ॥१६॥

परं विस्मयमापन्ना देव्यो दिव्यवपुर्धराः ।
यत्रोत्सृष्टः स भगवान्गङ्गायां गिरिमूर्धनि ॥१७॥

सशैलः काञ्चनः सर्वं प्रबभौ च महेश्वरि ।
वर्धता चैव तं गर्भं पृथिवी तेन रञ्जिता ॥१८॥

ताराश्च सर्वे संवृत्ता गिरयः काञ्चनप्रभाः ।
कुमारश्च महावीर्यः कार्तिकेय इति स्मृतः ॥१९॥

ववर्धतीव देवेशि सोपायात्प्रियदर्शतः ।
एतस्मिन्काञ्चने दिव्ये वने रम्ये समाश्रितः ॥२०॥

स्तूयमानस्तदा शेते गन्धर्वैर्मुनिभिस्तथा ।
तथैनमन्वदृर्शत देवकन्याः सहस्रशः ॥२१॥

दिव्यवाद्यात्र नृत्तज्ञास्तुवन्ति प्रियदर्शनाः ।
ब्रह्मा स्वयंभुर्भगवान्सपुत्रः सह विष्णुना ॥२२॥

शक्रस्तथाभ्युपायाद्द्रष्टुं कुमारं मे वरमुत्तमम् ।
नारदप्रमुखाश्चापि देवगन्धर्वसत्तमाः ॥२३॥

देवर्षयश्च सिद्धाश्च बृहस्पतिपुरोगमाः ।
सर्वे तत्र समाजग्मुरद्‌भुतं बालमुत्तमम् ॥२४॥

स तु बालोऽपि भगवान्महायोगबलन्वितः ।
अभ्याजगाम देवेशं शूलपाणिपिनाकिनम् ॥२५॥

तमायान्तं समालोक्य मनोरथस्वरूपिणम् ।
जातमात्रं कुमारं तु मातरः पालने रताः ॥२६॥

यत्नञ्चक्रुर्महेशानि रात्रिंदिनमतन्द्रितः ।
श्रुत्वा कुमारं जातं तु तारको दैत्यसत्तमः ॥२७॥

मत्वात्मनाशं तन्नाशे सर्वदा यत्नमाचरत् ।
दृष्ट्वा दैत्यगुरुं तत्र कार्तिकेयस्य नाशने ॥२८॥

यत्नं कुरु महाब्रह्मन्कृत्यामुत्पादयत्स्वयम् ।
एवमुक्तस्तु दैत्येन काव्यो यत्नमथाकरोत् ॥२९॥

इष्टिं कृत्वा प्रजननीमाजुहाव महेश्वरि ।
अग्निं हुत्वा तु विधिवत्काव्यो दैत्यस्य सन्निधौ ॥३०॥

अथ समुत्थिता घोरा कृत्या बालविनाशिनी ।
रक्तकेशा कृष्णवर्णा काचरा श्वेतपक्ष्मिका ॥३१॥

वह्निर्दंत्ता बाह्यजिह्वा स्वरनासोर्ध्वरोमिका ।
दीर्घजङ्घा विरूपाक्षी श्वपुच्छा पृथुकुक्षिका ॥३२॥

स्थिता शुकस्य पुरतः प्राञ्जलिर्जगदम्बिके ।
अनुज्ञां देहि मे ब्रह्मन्करणीयं प्रति प्रभो ॥३३॥

श्रुत्वेति कृत्यावचनं दैत्यः प्रोवाच तां प्रिये ।
गत्वा हिमालयं तत्र कुमारं जातमात्रकम् ॥३४॥

क्षिप्रं नाशय भद्रं ते परमं कृत्यमेव नः ।
श्रुत्वेत्थं वचनं तस्य कृत्या प्रायाद्धिमालयम् ॥३५॥

पुण्ये देवशिरोराष्ट्रे मरीच्याश्रमसन्निधौ ।
प्राप्य पुण्यं महादेवि मातृणामङ्गनं शुभम् ॥३६॥

दृष्ट्वा कुमारं तत्रैव मातृभिः परिपालितम् ।
कृत्या स्वरूपिणी भूत्वास्त्रवत्पीनपयोधरा ॥३७॥

समीपमागता तत्र पाययन्ती स्तनौ शिशुम् ।
दृष्ट्वा तां मातरस्तत्र घोररूपानुसारिणी ॥३८॥

घोरांक्रियापचरितां धिक्कुर्युस्तामनन्दिते ।
होला होलेति शब्देन परिहासैरपीश्वरि ॥३९॥

पङ्कक्षेपैर्भस्मक्षेपैः पांसुक्षेपैस्तथैव च ।
गालिदानैस्तथातालैः सुगन्धैरक्तचन्दनैः ॥४०॥

चन्दनैः कुङ्कुमैर्भूरिद्रव्ययुवतैरनेकशः ।
तृणक्षेपैस्तथा गुल्मैर्होलिकाभिरनेकधा ॥४१॥

मुहुर्मुहुर्होलिनादैराक्रन्दनर्तनैरपि ।
परिक्षिप्ता ततः कृत्या मातृभिर्बलघातिनी ॥४२॥

निस्तेजा चाभवत्तत्र कृत्या दैत्यप्रचोदिता ।
कादिशीका ततो दीना मातृभिर्धिक्कृता ततः ॥४३॥

दीना प्रोवाच मातरस्ताः प्रश्रयावनतास्तथा ।
किं करोमि क्व गच्छामि क्व स्थास्यामि क्षुधार्दिता ॥४४॥

स्थानं दातुमिहेच्छामि भवतीभिः सनातनम् ।
अमोघं दर्शनं यस्मान्मातृणामिति निश्चितम् ॥४५॥

इत्युक्त्वा तत्र कृत्या तु विरराम महेश्वरि ।
श्रुत्वा दीनं वचस्तस्या मातृणां तु दयाविशत् ॥४६॥

ऊचुः कृत्यां ततस्तास्तु प्रश्रयावनतां प्रिये ।
यत्रैव परिहासश्च गालिदानानि चैव हि ॥४७॥

वाक्पारुष्यं तत्र वा सचिरं त्वं बालकान्ग्रस ।
गुरुनिन्दा श्रेष्ठनिन्दा विप्रनिन्दा च यत्र वै ॥४८॥

अलिप्तं यत्र वै गेहे तथा मार्जनवर्जितम् ।
असंस्कृतं हविर्यत्र चुल्ल्यामुपरिभक्षणम् ॥४९॥

पुत्राणां संकरो यत्र वर्णसंकर एव च ।
उदक्यः सूतिका दुष्टमन्नं भोक्ष्यन्ति यत्र वै ॥५०॥

यत्र कर्मणि क्रोधो वै वस तत्र निरन्तरम् ।
परस्परं होलिका च धूलिक्षेपस्तथैव च ॥५१॥

पानीयपांसुतैलानां प्रक्षेपपरिहासनम् ।
वृथाहासो वृथा वाचो वृथा गानञ्च नर्तनम् ॥५२॥

इत्येवमुक्त्वा कृत्यां तां विरेमुस्तत्र मातरः ।
होलाहोलेति होलेति नर्तयामासुरञ्जसा ॥५३॥

पुनर्वरं ददुस्तस्यै होलिकायै महेश्वरि ।
अस्मिन्वै भारते वर्षे खण्डे सर्वत्रैव विशेषतः ॥५४॥

महोत्सवं प्रकुर्युर्वै ब्राह्मणक्षत्रियादयः ।
ते सर्वे मम सन्निधि प्राप्नुवन्ति च सर्वशः ॥५५॥

भूयो भूयः किमुक्तेन होलिकायाः प्रभावजम् ।
फलं मर्त्येषु चानन्तमिति सत्येन ते शपे ॥५६॥

होलिकायाश्च कृत्यायाः पावनं हि महोत्सवम् ।
यथासुरस्य नाशञ्च कृसारोकारणो भवेत् ॥५७॥

तथा करोत्युत्सवोऽयं महापातकनाशनः ।
धनं धान्यं सुखं पुत्राञ्चानन्त्यसम्पदप्रदः ॥५८॥

महोत्सवो हि देवेशि चेत्याज्ञा परमेश्वरी ।
घोरे कलियुगे प्राप्ते जनाः वै पापकर्मिणः ॥५९॥

तेऽपि ज्योतिर्मयांल्लोकान्प्राप्नुयुरुत्सवेन वै ।
वेदपाठैः राजतन्त्रैः कर्मभिर्नर्तनादिभिः ॥६०॥

वाद्यैश्च गोमुखैर्भेर्यैर्हस्ताहस्तैश्च ताडनैः ।
राजद्वारे गृहे वापि विपण्याञ्च चतुष्पथे ॥६१॥

लोकाचारे स्वदेशे च करणीयं प्रयत्नतः ।
कर्तुस्तात्कालिकी सिद्धिः पशुभिर्बान्धवैः सह ॥६२॥

राजावश्यमवाप्नोति जनाश्चैव पदे पदे ।
रोगी रोगात्प्रमुच्यते होलिकोत्सवकारणात् ॥६३॥

पुरश्चैव महेशानि क्रीडिता च महर्षभिः ।
तस्मात्सर्वप्रयत्नेन होलिकोत्सवमादरात् ॥६४॥

कर्तव्या होलिका नृणां पूर्वैः पूर्वतरैः कृता ।
मोक्षदा भूतिदा यत्र परत्र होलिका भवेत् ॥६५॥

ये न कुर्वन्ति वै मोहात्तवोत्सवमशेषतः ।
बालग्रहा भविष्यन्ति तद्गृहे हूर्जहूजिका ॥६६॥

यद्राष्ट्रे नैव कुर्वन्ति तवोत्सवमनिन्दिते ।
तद्गृहे कालकर्णी च भविष्यति न संशयः ॥६७॥

तस्मात्सर्वप्रयत्नेन माघफाल्गुणमन्ततः ।
पूजयेत महाकृत्यां तारकेनोपपादिताम् ॥६८॥

इत्युक्त्वा मातरस्तां तु विक्षिप्तां परिहासकैः ।
धूल्युद्धूलनकैश्चापि निराकुर्युस्ततश्च ताम् ॥६९॥

निराकृता ततः कृत्यां तत्र दर्शनमाययौ ।
तदा प्रभृति देवेशि होलिकेति ममाग्रतः ॥७०॥

यस्मान्मातृभिरत्युच्चैः होलाहोलेति क्रन्दिते ।
तस्मान्नामाभवत्तस्याः होलेति तन्त्रशासने ॥७१॥

[ इति होलिकामाहात्म्यम् ]

## परिशिष्टम्—१

# हर्षेश्वरमाहात्म्यम्

### ॐ श्रीगणेशाय नमः

### ॐ नमो हर्षेश्वरायोम्

शौनकादय ऊचुः

ॐ हर्षेश्वरस्य माहात्म्यं मुनीनां कर्णपावनम् ।
कथयाद्य समेतानां भुक्तिमुक्तिप्रदायकम् ॥१॥

श्रीवेदव्यास उवाच

शृण्वन्तु ऋषयः सर्वे पुरा पद्मभवोदितम् ।
तीर्थराजं समाख्यातं धामतच्छशिमौलिनः ॥२॥

हर्षेश्वरेति विख्यातं त्रिषु लोकेषु संज्ञया ।
यं दृष्ट्वा लभते लोकं शाम्भवं भववर्जितम् ॥३॥

नरकार्णवयोग्योऽपि यं दृष्ट्वा स्वर्गमश्नुते ।
सुकृतीकृतिनां वर्यो राजते शाम्भवे पदे ॥४॥

ये लोका दानशीलानां ये लोका यज्ञयाजिनाम् ।
तपोनिष्ठानां लोकास्ते हर्षेश्वरदर्शिनाम् ॥५॥

सर्वलोकेश्वरो यत्र साक्षाद्देव उमापतिः ।
कर्ता च सर्वभूतानां तथा सर्वान्तकारकः ॥६॥

तदहं संप्रवक्ष्यामि लोकानां हितकाम्यया ।
हर्षेश्वरस्य माहात्म्यं प्रख्यातं धरणीतले ॥७॥

धनदाशागतः शैलो हिमवानिति विश्रुतः ।
योजनानां सहस्राणि बहूनाक्रम्य तिष्ठति ॥८॥

यस्यात्मजा पार्वतीति विख्याता तपसा हरम् ।
आराध्याः वापतद्देहे स्नेहेनार्धं तपोधनाः ॥९॥

माहात्म्यं तस्य के वक्तुं क्षमन्ते विश्वधारिणः ।
यत्रात्मानं महादेवो बहुधा करुणानिधिः ॥१०॥

अनादिनिधनं धृत्वा लोकान्रक्षति लीलया ।
तत्रैवं परमं स्थानं श्रूयते त्रिपुरद्विषः ॥११॥

हर्षेश्वरेति विख्यातं नाम्ना पापौघनाशनम् ।
यस्मिन्स्थाने हरिः साक्षादीश्वरं भक्तवत्सलम् ॥१२॥

नत्वा तदाज्ञयाधाक्षीत्तारकं दैत्यपुङ्गवम् ।
हर्षेश्वरेति तत्स्थानं वाराणस्यायवाधिकम् ॥१३॥

ऋषय ऊचुः

मुने सत्यवतीसूनो परं कौतूहलं हि नः ।
किमर्थं तारको दग्धो हरिणा लोकधारिणा ॥१४॥

श्रीवेदव्यासः

स तारको नाम पुरा सरोऽभूत्-
प्रचण्डवीर्यो विजितत्रिलोकः ।
शोकं ससर्जारिविलासिनीम्
मनःसु यो वारितसद्विवेकः ॥१५॥

स क्रूरबुद्धिर्मघवत्पदार्थी
वनं प्रयातो मृगया विहारी ।
ददर्श दूरेऽध्वनि नारदाख्यं
मुनिं महाकारुणिकं सुरारिः ॥१६॥

पप्रच्छ तं दैत्यपतिः स मार्गे
योगीश्वरं दानवसैन्यनाथः ।
प्रणम्य भक्त्या परया महात्मन्-
देवेषु को वै तपसाशुतोषः ॥१७॥

स नारदो योगिवरोऽब्रवीत्तं
निबोध दैत्येन्द्रवचो ममेदम् ।
साक्षान्महेशो भगवानशेष
विश्वेशरूपः कृतशेषहारः ॥१८॥

स पार्वतीशः शशिमौलिरेकः
सन्दृश्यतेऽसौ तपसाशुतोषः ।
इच्छास्ति वै दैत्यविभो विभूता-
राधयेशं वृषवाहनं तम् ॥१९॥

ततोऽभिधायाशु स योगिवर्य-
स्तिरोहितोऽभून्निजमायया च ।
दैत्योऽपि सर्वं निजराज्यभारं
विहाय केदारमगात्तपोऽर्थम् ॥२०॥

केदारतीर्थाश्रममाशु लिङ्गं
दृष्ट्वा च तत्रामृतमेव पीत्वा ।
प्रयाति नूनं मनुजोऽर्कबिम्बं
भित्वा शिवाख्यं परमं स्वधाम् ॥२१॥

तत्रैव सप्ताहमसौ सुरारिः
दुष्टात्मबुद्धिह्युपवासनिष्ठः ।
यदा न लेभे वरमाशु देवात्-
तदा शिरच्छेत्तुमुपाक्रमेत्स्वम् ॥२२॥

तत्साहसेनाशु दयानिधानो
देवो महेशः कृतनागभूषः ।
प्रादुर्बभूवास्य पुरो सुरस्य
दत्तं वरं तुष्टतमो मुनीन्द्राः ॥२३॥

तमाशु देवं पुरतो विलोक्य
प्रणम्य चास्मै निजसत्वयोगात् ।
बव्रे वरं दुष्टमतिः स दग्धुं
सर्वांश्च लोकांश्च तपसे—तेजः ॥२४॥

देवादिदेवेशभवत्प्रसन्नः
चेन्मे तदस्त्वद्य वरस्तवायम् ।
यं यं स्पृशाम्याशुकरणेन भस्मी-
भूतो भवत्वेष तव प्रसादात् ॥२५॥

तथेति देवो भगवान्दयालु-
र्महेश्वरः शैलसुतासमेतः ।
अङ्गीचकाराशु स कर्मसाक्षी
तत्कालकृत्कालपतिः क्लेशः ॥२६॥

स चासुरः शैलसुतः समेतं
दृष्ट्वा प्रलुब्धो धृतदुष्टबुद्धिः ।
वरेण शैवेन समिद्धतेजस्—
तां हर्तुममीशं समनुद्धतोऽभूत् ॥२७॥

तदेश्वरः स्वेन वरेण पूर्णं
तं दैत्यराजं नहि हन्तुमीशः ।
सुरक्षितं नैव निहन्ति साध्व
र्यद्यप्यसौ बाधितुमुद्यतः स्यात् ॥२८॥

ततः स देवः परमेश्वरस्तद्-
भयादिवेदश्चलितः सशक्तिः ।
पश्चात्स दुद्राव महासुरस्तं
ज्वलन्निवाग्निः सहसा मुनीद्राः ॥२६॥

स पार्वतीकोऽथ महेश्वरो द्राक्-
समाययौ भीत इवासुरेन्द्रात् ।
कश्मीरतीर्थस्थितशैलराज-
गुहां गुहाद्यैः सममेव सर्वैः ॥३०॥

तत्रात्मनो लिङ्गमशेष पूज्यं
निधातुकामः शशिमौलिरेशः ।
प्रभावमात्मीयमथ प्रकाशं
कर्तुञ्च हन्तुं निजभक्तपापम् ॥३१॥

तत्रैव शैलाग्रमहागुहायां
स्वं गोपितुं भूतपतिः स देवः ।
सार्धं स्वकीयैर्गणनाथमुख्यै-
र्लिङ्गात्ममूर्तिर्निजमाययाभूत् ॥३२॥

यावद्रुषा दैत्यपतिः स शैले
रुद्रं समन्वेष्टुं मनश्चचार ।
तावत्समग्रासुरदन्तिसिंहं
संस्मार शीघ्रं हरिमीश्वरोऽपि ॥३३॥

ततो मुरारिर्भगवत्समीप-
मागत्य शम्भोर्निजशक्तिरूपः ।
स प्राञ्जलिः प्राह गिरं प्रणम्य
विनीतवद्वाक्यविदेवमेकः ॥३४॥

श्रीविष्णुवाच

ॐ नमः शिवाय वेदान्तसिद्धान्तादिविवेचिने ।
प्राणरूपाय देवाय ज्ञानाधिपतये नमः ॥३५॥

किमर्थमहमद्यैव स्मृतो भगवता त्वया ।
विधेयं किं तवेशान शाधि नः किं करोम्यहम् ॥३६॥

श्रीवेदव्यास उवाच

इत्थं स्तवेन देवेशः स्तुतः शम्भुस्तपोधनाः ।
हरिणा योगिपूज्येन मायिना ह्यनपायिना ॥३७॥

उवाच वचनं शम्भुः स्वघोषस्ताविताक्षरम् ॥३८॥

श्रीशम्भुरुवाच

शृणु योगीश दैत्यारे मच्छक्तिस्त्वं जनार्दन ।
मद्भक्तो मन्मतिर्नित्यं मत्परायण एव च ॥३९॥

त्वया हताश्च ते वीरा दैत्येन्द्रा मधुसूदन ।
साम्प्रतं पश्य मायेश सदारो दृप्तमानसः ॥४०॥

मामेव हन्तुकामोऽसौ तारकाख्यो महासुरः ।
तद्गच्छ मायया विष्णो दैत्यं भस्मीकुरु क्षणात् ॥४१॥

इत्यादिष्टो भगवता हरिः शीघ्रं गुहामुखात् ।
निर्गत्य दैत्यराजं तं शैलपार्श्वे ददर्श ह ॥४२॥

तत्रैव भगवान्विष्णुः स्त्रीरूपं निजमायया ।
चकारोन्निद्रपद्मनाभं मुखं सुखकरं दृशाम् ॥४३॥

एवं विधं स भगवान्परिधाय वेशं
वासोचितं विहितवामगतिः समायः ।
कायं स्वकीयमथ तस्य महासुरस्य
शैलाग्रसंस्थितमदर्शयदेकवीरः ॥४४॥

तां वीक्ष्य सुन्दरनिजावयवानवद्यां
हृद्यामनङ्गशरतापितमानसोऽभूत् ।
दैत्यः स विस्मय इव क्षुण्णविस्मृतेति
कर्तव्य आस्त स्वतरां स विमूढचेतः ॥४५॥

पुष्पायुधेन नितरां परितप्तगात्रो
भ्रान्तिं भजंस्तुहिनभूधरराजपुत्र्याः ।
उष्मोष्मणिः श्वसितमो चकिताधरोष्ठः
कष्टं कथञ्चिदिदमेव हसञ्जगाद ॥४६॥

दैत्येश्वरोऽहमवनौ दिवि भूमि रन्ध्रे
वीर्यावधूतस्वरवर्यमहानुभाव: ।
मां वाविलोक्य कतमोऽस्त्यपरोऽभिलाष:
ससुन्दरीगणजनस्य च सारमेतत् ॥४७॥

इत्थं गिरं त्रिदशवैरिसमीरितां तां
श्रुत्वा विचिन्त्य वितनोरिषुतापितं तम्
वाणीं स्वधारसमयीं समये समायो
रम्याक्षरं समवदज्जगदेकनाथ: ॥४८॥

त्वां प्राप्य वल्लभमपास्तसमस्तदोषं
कोशञ्च यौवनधनस्य वपुर्मदीयम् ।
तप्तं शरैरविकलैर्वितनो: प्रयाति
सौख्यं परं किमपरं भवतो ह्यलभ्यम् ॥४९॥

इच्छामि दैत्यवर तेऽङ्कमुपैतुमद्य
विघ्नोनदीयदिनशैलभवाभविष्यत् ।
तुङ्गोर्मिभङ्गिविहितोपलनादबाधा
त्रस्तास्म्यहं कथमुपैमि भवंतमेका ॥५०॥

इत्यात्मनोऽभिलषितं ललनां वदन्तीं
दैत्याधिपस्तदधरामृतपानलुब्ध: ।
तां हुङ्कृतेन गिरिरन्ध्रभवां ससिन्धु-
मौर्वाग्निनेव समशोषयदुग्रदृष्टि: ॥५०॥

अथाब्रवीद्वाक्यमुदारतेजः
दैत्याधिपस्तां दयिते नदीयम् ।
संशोधिनाहुङ्कृतिवह्निना मे
तदेहि मत्पार्श्वमपास्तभीतिः ॥५१॥

ततोऽब्रवीत्सस्मितमात्ममायः
स्त्रीरूपधारी भगवान्स विष्णुः ।
भीतिः प्रणष्टा खलु मे नदीजा
जातापराहेस्तव मूर्ध्निलग्नात् ॥५२॥

कुत्रास्त्यहिः सुभ्रुशिरो गतो मे
यावत्स्वपाणिं शिरसि न्यधात्सः ।
तावन्महेशस्य वरानलोग्राम्-
भस्मावशेषं दितिजं चकार ॥५३॥

अथोद्भूद्व्योम्नि जयध्वनिः महान्-
पपात वर्षञ्च दिवोऽत्र वर्षणम् ॥५४॥

तत्रागतः शिवः साक्षात्स देवी सहितः प्रभुः ।
मोहिन्या दर्शनाज्जातो मोहः परमदुस्सहः ॥५५॥

नाम्ना खलीनमोहेति प्रथितोऽद्यापि भूतले ।
दृष्ट्वा तन्मोहिनीरूपं खलीनश्च पपात ह ॥५६॥

खलीनमोहसंज्ञोऽपि देशो भुवि च विश्रुतः ।
स्नानं दानं तपो यज्ञं स्वाध्यायञ्च जपस्तथा ॥५७॥

यः करोति नरो धीमान्नक्षय्यं फलमश्नुते ।
अथ दृष्ट्वा महेशानः कृतार्थं हरिमागतम् ॥५८॥

साधुवादेन महता सम्पूज्यो वाथ संस्मितम् ।
साधु साधु महाबाहो यत्कृतं कर्म दुष्करम् ॥५९॥

भस्मीकृतस्त्वया देव दानवोऽयं महाबलः ।
हृष्टोऽस्मि भवतानेन कर्मणा गरुडध्वज ॥६०॥

तस्मात्त्वं मम सान्निध्यं कुरुष्व मधुसूदन ॥६१॥

श्रीव्यास उवाच

हर्षेश्वरोऽतिविख्यातो वाराणस्यायवाधिकम् ॥६२॥

यो वै पश्यति सल्लिङ्गं मोहिन्या सहितं प्रभुम् ।
लभते विपुलान्भोगान्प्राप्नोति परमं पदम् ॥६३॥

अश्वमेधसहस्त्राणि वाजपेयशतानि च ।
दानं तपोभिर्यत्पुण्यं तद्धर्षेश्वरदर्शनात् ॥६४॥

ब्रह्महा भ्रूणहा वापि स्त्रीहत्यानिरतः सदा ।
गुरुतल्पगतश्चैव प्रमादान्मद्यपस्तथा ॥६५॥

लिङ्गं सम्पूज्य मन्त्रेण विष्णुञ्चापि तथाम्बिकाम् ।
सर्वपापविनिर्मुक्तो याति शैवं परं शुभम् ॥६६॥

ध्यायेद्दशभुजं देवं शशाङ्ककृतभूषणम् ।
गङ्गाधरं महेशानं सर्पगोनासमण्डितम् ॥६७॥

नीलकण्ठं महादेवं भस्मौघपरिपाण्डुरम् ।
वृषभासनमारूढं लोचनत्रयसुन्दरम् ॥६८॥

दक्षे त्रिशूलबाणासिवज्राञ्चाभयमेव च ।
वामे पाशं तथा शार्ङ्गं मुण्डं वीणां तथैव च ॥६९॥

वरं वहन्तमीशानं त्रिजगत्स्थितिकारकम् ।
चन्द्रकोटिप्रतीकाशं सूर्यकोटिसमप्रभम् ॥७०॥

ध्यायेदेदं सदा विष्णोर्लिङ्गं हर्षेश्वरं बुधः ।
रुद्ररूपो मनुष्योऽसौ जायते भुवि निश्चितम् ॥७१॥

हरिपादविनिर्यातगङ्गायां यो नरोत्तमः ।
स्नानं करोति तत्पुण्यं को वक्तुं क्षमते बुधः ॥७२॥

श्रीव्यासः

तस्मादेतन्महत्तीर्थं महत्स्थानं मुनीश्वराः ।
हर्षेश्वरेऽति विख्यातं त्रैलोक्ये सचराचरे ॥७३॥

यो भक्त्या मनुजोत्तमो भगवतो लिङ्गं परं पावनम् ।
विष्ण्वाद्यैः सहितं च दैवतगणैः पश्यत्यवश्यं गिरौ ॥७४॥

स प्राप्नोति समस्तदुर्गतिहरीं लक्ष्मीमिहामुत्र वा ।
मुक्तिं शाम्भवं लोकभोगविभवान्नित्यं च भावान्वितः ॥७५॥

यो वा पञ्चस्थलीं दृष्ट्वा पञ्चलिङ्गञ्च शाम्भवम् ।
संपूजयति पूतात्मा यात्यसौ वैश्वरं पदम् ॥७६॥

किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ।
पञ्चस्थलीकृतस्नातो यः पश्यति हि शङ्करम् ॥७७॥

ऋषय ऊचुः

पञ्चस्थली समाख्याता भवता नामतः किल ।
पञ्चस्थानानि कान्याहुस्तत्त्वतो वद साम्प्रतम् ॥७८॥

श्रीवेदव्यास

ज्यैष्ठायां प्रातः समुत्थाय नागराजञ्च तक्षकम् ।
गत्वा संपूज्य गन्धाद्यैः स्नात्वा तत्र यथाविधिः ॥७९॥

तक्षके नागराजे यः स्नाति भक्त्या समन्वितः ।
सर्वपापविनिर्मुक्तो मण्डलं याति भास्करम् ॥८०॥

लक्ष्मीरूपधरां तत्र देवीं सम्पूजयेद्बुधः ।
ततो यायाच्च पूर्वेण मार्गेणैव सुसंयुतः ॥८१॥

जनकस्याश्रमे रम्ये गङ्गा तुङ्गोर्मिलाञ्छितम् ।
यत्र जालन्धरं पीठं कथितं पूर्वसूरिभिः ॥८२॥

देवी वसति तत्रैव गणेशादिसमन्विता ।
देवीं संपूज्य तत्रैव गन्धाद्यैर्भक्तिसंयुतः ॥८३॥

जनकस्याश्रमे रम्ये गङ्गांभस्यतिनिर्मले ।
स्नात्वा सम्पूज्य देवीं च शिवं चैवान्यदेवताः ॥८४॥

प्राप्नोति विष्णुलोकञ्च विष्णुना सह मोदते ॥८५॥

ततोऽपि पूर्वमार्गेण यायात्सोमस्य कुण्डकम् ।
यत्र सोमोऽमृतं साक्षात्स्रवते दर्शचन्द्रयोः ॥८६॥

सङ्गमे तत्परं स्थानं सोमकं धामविश्रुतम् ।
तत्र स्नात्वा यथा भक्तिसोमं सम्पूज्य यत्नतः ॥८७॥

आमश्राद्धेन संतर्प्य पितॄंस्तत्र विधानतः ।
उद्धरेन्मानवस्तेन स्व कुलानेकविंशतिम् ॥८८॥

सोमधामशिवं यान्ति तदीयाः पितरः परम् ।
दिव्यान्यब्दसहस्राणि सुधाहाराः सुतर्पिताः ॥८९॥

ततोऽपि पूर्वमार्गेण भुवनेश्वरसन्निधौ ।
आश्रित्य पादगङ्गायां स्नात्वा माहेश्वरं जपत् ॥९०॥

पूजयेदीश्वरं तत्र नृत्तवाद्यमहोत्सवैः ॥९१॥

यो नरो हरिगङ्गायां ज्येष्ठायां स्नाति यथाविधिः ।
स याति पापनिर्मुक्तो पारं सादाशिवं शुभम् ॥९२॥

ततः पूर्वेणमार्गेण योजनार्धेन विश्रुतम् ।
आरुह्य शैलराजञ्च जपेन्मन्त्रञ्च शाश्वतम् ॥९३॥

शैलस्योर्ध्वप्रदेशं वै प्राप्य पश्चाद्विलोक्यते ।
गिरिपादतले दग्धमसुरं शैलता गतम् ॥९४॥

यत्रासौ तारको दग्धो हरिणा दैत्यपुङ्गवः ।
तत्स्थानं भस्मसङ्काशं जनैरद्यापि दृश्यते ॥९५॥

दग्धारिरिति तत्स्थानं लोकैरद्यापि कथ्यते ।
तत्स्थानं शैलतो दृष्ट्वा ब्रह्महत्यां व्यपोहति ॥९६॥

ततो गिरिपथान्तस्थां नदीं दैत्येन शोषिताम् ।
विलोकयेन्नरो धीमान्दृष्ट्वा याति हि सद्गतिम् ॥९७॥

ततः शैलोर्ध्वभागे वै पाञ्चालभैरवोत्तम् ।
सम्पूज्य गन्धपुष्पाद्यैर्यायादीशानगोचरः ॥९८॥

अधः पादगतां गङ्गां द्वितीयां हरदेवताम् ।
तत्र स्नात्वा पितृणां यस्तर्पणं कुरुते बुधः ॥९९॥

नरकात्पितृबृन्दञ्च समुद्धरति निश्चितम् ।
याति चैवेश्वरं स्थानं भूयो जन्म न विद्यते ॥१००॥

एषा पञ्चस्थली नाम कथिता पापनाशिनी ।
ततः पानीयमादाय स्वर्गङ्गाया मनोहरम् ॥१०१॥

विमलं पावनञ्चैव शैलमारोहयेद्बुधः ।
गिरेरूर्ध्वस्थलं प्राप्य कृत्वा चार्धप्रदक्षणम् ॥१०२॥

आसाद्य तत्गुहास्थानं साक्षाद्यत्र महेश्वरः ।
शिवं विष्णुं तथा देवीं कुमारं गणपं तथा ॥१०३॥

सप्ताश्वाञ्च तथैवान्यान्पूजयेद्यत्नमानसः ।
गन्धैः पुष्पैस्तथाधूपैर्दीपैर्वासोभिरेव च ॥१०४॥

नैवेद्यैर्दक्षिणाभिश्च पूजयेत विचक्षणः ।
कृत्वा नाट्यं विचित्रं च हर्षेश्वरसमीपतः ॥१०५॥

हर्षेश्वराङ्घ्रितलपूजनकृत्पुमान्यो
विष्ण्वार्चनं विधिवदत्र करोति मर्त्यः ।
प्राप्नोति रुद्रसततं च तथैव विष्णोर्-
ज्योतिर्मयं भवति तस्य वपुर्मुनीन्द्राः ॥१०६॥

यो नरो यौवने वापि वार्धके वापि भक्तितः ।
बाल्ये वा जपति व्यक्तं तद्धर्षेश्वरनाम वै ॥१०७॥

स जीवद्भुद्रतां याति चेत्याज्ञा पारमेश्वरी ।
एतत्तीर्थस्य माहात्म्यं कथितं वै मुनीश्वराः ॥१०८॥

श्रवणात्पठनाद्वापि शिवलोकं स गच्छति ॥१०९॥

श्रोष्यन्ति चैव ये भक्त्या माहात्म्यमीश्वरस्य वै ।
ते प्राप्नुवन्ति सम्पूर्णयात्रायाः फलमुत्तमम् ॥११०॥

(इति श्रीपद्मपुराणे व्यासमुनीन्द्रसम्वादे काश्मीरविषयहर्षेश्वर-
माहात्म्यं यात्रापूर्वकं समाप्तं ।
ॐ तत्सच्छिवो भद्रमोम्)

# अथ ध्यानेश्वरमाहात्म्यम्

## ॐ श्रीगणेशाय नमः

ॐ ऋषय ऊचुः

सच्चिदानन्दरूपेण भैरवेण कृतः पुरा ।
गुह्याश्रमः पुण्यतमोऽरण्याधिविषये शुभः ॥१॥

अस्माभिस्तु श्रुतं वै तद्ध्यानार्थं शङ्करेण हि ।
ध्यानेश्वरस्वरूपं तु प्रकटीकृतमद्भुतम् ॥२॥

विस्तरेण तु माहात्म्यं सूतत्वोक्तमर्हसि ॥३॥

सूत उवाच

उच्चैः शोर्णाश्रमे पुण्ये चायुधस्य विनायकः ।
ब्रह्महत्यां शङ्करीयामपसारित्वान्पुरा ॥४॥

वाराणस्यां पुरा सस्नौ विश्वेश्वरसमीपतः ।
पश्चाल्लग्ना ब्रह्महत्या नैव नष्टा तथापि च ॥५॥

कश्मीरमण्डलं प्राप्तो यदा देवो महेश्वरः ।
द्विग्रामे मोचितस्तेन कपालस्तु करे स्थितः ॥६॥

पुनरप्यागता सा तु ब्रह्महत्या शिवस्य च ।
दूरीकृतास्त्ररूपेण गणेशेन द्रुतं पुरा ॥७॥

शिवो निर्वेदमापन्नस्ततः प्रभृति शौनक ।
गृहीतुं शान्तताऽरूपमरण्यं स्मृतवानसौ ॥८॥

गृहीतं स्वात्मचित्तार्थं गुह्याश्रमवनं मुनेः ।
पुष्करिण्यां गताः सर्वे तत्रत्याः साधवः परे ॥९॥

निर्वेदं च शिवे दृष्ट्वा निर्विण्णाभूच्च पार्वती ।
मत्यागं कुरुते शम्भुर्यदि किं रचयेत्वहम् ॥१०॥

निर्विण्णहृदययाञ्चोद्दृष्ट्वा तेजसा बोद्ध्रुवम् ।
विश्वेश्वरि जगन्मातः प्रसीद परमेश्वरि ॥११॥

शक्तिं विना चेच्छूरोऽपि न ध्यानं कर्तुमर्हति ।
दरं मां कुरु देवेशि स्वत्यागेन हिता भव ॥१२॥

प्राप्त्यर्थं शान्ततायाञ्च शमस्थानमिहाचर ।
इत्युक्त्वा मुनिभिर्देवी शान्ता च सुस्मिताभवत् ॥१३॥

यत्र प्रदेशे तैरुक्तं दरं मा कुरु शाङ्करि ।
तत्र ग्रामे मादराख्या प्रथिता भुवनत्रये ॥१४॥

साधवो मिलिता यत्र महेश्वरपदार्थिनः ।
साधुपुष्करिणी ख्याता प्रसिद्धो तत्र जाह्नवी ॥१५॥

यत्र स्थाने भवशम्भुश्चेशानश्चोभया सह ।
उपविष्टो मुहुर्त्तंतश्शमस्थानं प्रकीर्तितम् ॥१६॥

ततोऽग्रे गमनं कृत्वा ध्यानचिन्तो महेश्वरः ।
अरण्यं रमणीयञ्च दृष्ट्वा ध्यानात्ममद्भुतम् ॥१७॥

गुहा कृता महेशेन शूलहस्तेन पाणिना ।
स्वयं तत्रोपविष्टश्च गणेशेन युतो विभुः ॥१८॥

विष्णुनार्यमवत्या च सर्वैर्देवैश्च संस्तुतः ।
ध्यानेश्वरवनं रम्यं गम्भीरं निर्जनं शुभम् ॥१९॥

शैवो वा वैष्णवो वापि शक्तिभाक्साधकोऽपि यः ।
गत्वा ध्यानं प्रकुर्वीत कलिकालभयाद्भुतम् ॥२०॥

पुत्रदारादिपाशैस्तु बद्धं यथा मन्दिरपञ्जरम् ।
विहाय बन्धुमित्रादीन्स्थिरान्बन्धकान्नरः ॥२१॥

ध्यानेश्वरं ध्यानगम्यं ध्यानास्पदमनुत्तरम् ।
आम्नायातीतमपरं परानन्दं परे विभुम् ॥२२॥

स्वात्मस्थं सर्वभूतस्थं विष्णुरूपं गणेश्वरम् ।
शक्तिरूपं जगत्सर्वध्यातामुच्ये - - - - शः ॥२३॥

ध्यान एव ममासक्ता ह्यनन्तस्य बोधनात् ।
सैव प्रोक्ता विष्णुपूज्या ह्यनन्ताख्या चतुर्दशी ॥२४॥

हररात्रित्रयोदश्यामन्वेष्टुं निर्ययौ हरिः ।
ज्वालालिङ्गं चित्प्रकाशमाद्यन्तौ नैव दृष्टवान् ॥२५॥

स विरिञ्चो महाविष्णुरनन्तस्य भावणात् ।
सत्यस्य कथनाच्चैवाप्यर्धं हारिहरं वपुः ॥२६॥

लब्धा शिववरेणाशु महाविष्णुशिवात्यधृत् ।
यत्र लब्धमनन्तत्वं चतुर्दश्यां तिथौ स्वयम् ॥२७॥

स्वचिद्रूपस्य च ततः सैवानन्तचतुर्दशी ।
पूज्यो हरिगिरौ तत्र ध्यानासक्तमनस्कतः ॥२८॥

ध्यानेश्वरो ध्यानहवि ध्यानसक्तो गणाधिपः ।
सर्वे देवो ध्यानसक्ताः पूजा ह्यनन्तचतुर्दशी ॥२९॥

दर्शनात्स्पर्शनात्स्नानाद्ध्यानाज्जपपरायणः ।
कर्पूरकुङ्कुमैश्चैव चन्दनैर्गन्धसंयुतैः ॥३०॥

पुष्पाक्षतैश्च नैवेद्यैः दक्षिणाभिरनेकशः ।
ध्यानेश्वरं पूजयेत नरः श्रद्धासमन्वितः ॥३१॥

रत्नदीपप्रकाशैश्च पूजयेत्परमेश्वरम् ।
विप्रद्वयं भोजयेत दक्षिणादानतः शुभम् ॥३२॥

एकं ध्यानेश्वरस्यार्थे ध्यानेश्वर्यर्थमेककम् ।
वस्त्रादिना पूजयेत मार्गदृष्टिविधायिनः ॥३३॥

ध्यानार्थं यदि चेच्छा स्यादन्यस्य कस्यचिदपि ।
गुह्याश्रमारण्यपार्श्वे तदा कुर्यान्निवासनम् ॥३४॥

भवपञ्जरपाशाद्विनिर्गमस्तु भविष्यति ।
जपं पूजां पुरश्चर्यां कुर्वन्भक्तिसमन्वितः ॥३५॥

गुह्याश्रमारण्यवासी तूर्णं सिद्ध्यति चिन्तनात् ।
तस्मादवश्यं गच्छेत्तु पापिष्ठोऽप्यथ वाधमः ॥३६॥

नरो वा यदि वा नारी साधुर्वा पुरुषोऽपि वा ।
ध्यानेश्वरं पूजयेत भवपाशाद्विमुच्यते ॥३७॥

य इमां शृणुयान्मर्त्यो ध्यानेश्वरकथां शुभाम् ।
पठयेद्वा स गच्छेच्च शैवं पदमनामयम् ॥३८॥

इति श्रीस्कन्दपुराणे श्रीसूतशौनकादिसम्वादे काश्मीरविषये
ध्यानेश्वरमाहात्म्यम । ॐ श्रीरस्तु नः ।

## (अथ पौराणिकं गङ्गामाहात्म्यं लिख्यते)

श्रीसनत्कुमार:

अथैशानदिशं प्राप्य त्यक्त्वा षट्क्रोशमात्रकम् ।
प्रकाशते महाक्षेत्रं हिमाचलगुहान्तरे ॥१॥

अस्मिन्क्षेत्रे पुरा नन्दी भगवन्तं वृषभध्वजम् ।
आराध्य भूतनाथत्वं प्राप्तो मृत्युं व्यतीत्य च ॥२॥

व्यास:

भगवञ्छ्रोतुमिच्छामि नन्दिक्षेत्रकथां शुभाम् ।
माहात्म्यं च समासेन नन्दिक्षेत्रस्य सर्वथा ॥३॥

केन कारणयोगेन भगवांनंदिकेश्वर: ।
प्राप्य मृत्युं कथां स तु कथं वा सिद्धिमागत: ॥४॥

सङ्क्षेपेण कथां दिव्यां क्षेत्रमाहात्म्यमुत्तमम् ।
कथयस्व प्रसादेन तृप्तिरस्त्यत्र मे प्रभो ॥५॥

सनत्कुमार:

पाराशर्यकथां पुण्यां नन्दिक्षेत्रसमुद्भवाम् ।
शृणु सम्यङ्नमस्कृत्य देवं त्रिपथगाधरम् ॥६॥

दक्षाध्वरे समा विप्र ध्वंसिते वै शिवाज्ञया ।
वीरभद्रेण विबुधैस्सा कालानलत्विषा ॥७॥

दक्षपुत्री सती देहं विहाय निजमक्षयम् ।
रुद्रपत्नी पुरा भूत्वा मन्युना पितुराश्रिता ॥८॥

दुहितृत्वं प्रपेदे सा देवी हिमवतः स्वयम् ।
ब्रूमेति सर्वजगतां मातृकारणयोगतः ॥९॥

प्राप्य सा जन्म भगवन्नचलेन्द्रादिमह्वयत् ।
आराधयामास तदा तपसा नीलकन्धरम् ॥१०॥

तस्मिन्हिमालये पुण्ये देवगन्धर्वसेविते ।
भगवान्नपि शैलेन्द्रे तस्मिन्नेव महेश्वरः ॥११॥

तपस्तेपे महद्युक्तः प्रमथैस्तान्नियोगतः ।
अथ कालेन बहुना भगवन्तं पिनाकिनम् ॥१२॥

पतिमासादयामास तपसा पर्वतात्मजा ।
निर्वतिते परिणये कदाचिच्चन्द्रशेखरः ॥१३॥

स्मित्वा श्यामेति तामाह रहसि प्रेतमानसः ।
तन्मन्युना तदा भूयश्चक्रे सा मन्दरे गिरौ ॥१४॥

तपो घोरं येन लेभे गौरीत्वं पदसम्भवात् ।
गच्छन्त्या तपसा सिद्धौ हरस्य परमात्मनः ॥१५॥

देव्यानन्दे मुदितया प्रोक्तश्चिन्ताकरो भृशम् ।
मात्रनन्दी सवनिता प्रवक्ष्येऽतिहरान्तिके ॥१६॥

कश्चिद्भूयो न गतास्मि यावत्कृत्वा तपो महत् ।
इत्युक्त्वा नन्दिनं देवी जगाम तपसे गिरिम् ॥१७॥

मन्दरं रत्नकनकमर्धोद्भासितकन्धरम् ।
एतस्मिन्नन्तरे कृत्वा देवीरूपं महास्वरः ॥१८॥

अजानन्हरमाहात्म्यं तज्जिगाघांसासमुत्सुकः ।
आधिर्नामासुरः कृत्वा देवीं रूपमुपागतः ॥१९॥

निसंधोऽथ विना देवीं देवो दृष्ट्वागतं रिपुम् ।
दृशैव ध्वंसयामास रोषानलविरूक्षया ॥२०॥

लब्धा पद्मोद्भवा देवी गौरीत्वमात्मनः ।
पुनः हरान्तिकमुपागज्ज्योत्स्नेव शिखरत्विषम् ॥२१॥

कालेन गच्छता देवी बुद्धा दग्धं महासुरम् ।
शम्भुना कुप्यति साकं नन्दिनं प्रति दुर्धरा ॥२२॥

उक्तस्नानावलेपेन मयि नन्दी स तिष्ठति ।
यदा तदा मर्त्यता त्वां गत्वा मृत्युमवाप्स्यसि ॥२३॥

प्रसादिताथ देवेन भूयः प्राथहा नन्दिनम् ।
गिरीन्द्रतनया प्रीत्या मातेव तनयं निजम् ॥२४॥

प्राप्तो मनुष्यतां वत्स त्वां मृत्यो हरमञ्जसा ।
देवेन सहिता भूयो मोक्षयिष्यामि सर्वथा ॥२५॥

सायुज्यतां विभुर्भूयो वीरक प्राप्स्यसि स्फुटम् ।
दृष्टमेतत्पुरा वत्स मासे मन्युं वृथा कृथाः ॥२६॥

आसाद्य वीरकश्चायं शिलादस्याथ पुत्रताम् ।
मुने नवं नन्दिगिरौ संस्मरञ्जन्म आत्मनः ॥२७॥

बाल एव स शैलादिजघान सुरकंटकान् ।
दानवान्विचरन्कृत्स्नां महीं सिद्धमुनिस्तुताम् ॥२८॥

अथ सिद्धैर्मुनिगणैः शिलादप्रमुखैर्वृतः ।
नौबन्धनं परित्यज्य नन्दिश्वेतगिरिं ययौ ॥२९॥

त्रिनेत्रं मुकुटान्तस्थं सरो वैडूर्यनिर्मलम् ।
आसाद्य वीरको दध्यौ शिवं परमं कारणम् ॥३०॥

अन्तर्जलमथाविश्य शिलां कृत्वा शिरस्यलम् ।
तस्मिन्सरसि नन्दीशो ध्यायञ्शिवमवस्थितः ॥३१॥

एतस्मिन्नन्तरे सर्वे वसिष्टप्रमुखास्ततः ।
तैर्परीति चिरं कालं तीर्थं वै चीरमोचने ॥३२॥

गिरिशं द्रष्टुकामास्ते पार्वत्या सहित चिरम् ।
चक्रुस्तपो वसिष्टस्य मुनेरायतने शुभे ॥३३॥

अथ कालप्राणहरो भूतानां वीरकांतिकम् ।
अभ्याजगाम तं देशं ग्रसितुं तु तमुत्सुकम् ॥३४॥

तदवेत्याथ भगवान्कपर्दी वृषमास्थितः ।
द्रष्टुं नन्दिनमभ्यागादन्तर्जलमुपस्थितः ॥३५॥

प्राणैरप्यधिकं शम्भुं पश्य नन्दिनं गणम् ।
चचार पृथिवीं सर्वां सह देव्या वृषध्वजः ॥३६॥

वीरकोऽपि परं ब्रह्मजपनं तज्जले तदा ।
अपश्यद्हृदयन्तस्थं देवदेवमुमापतिम् ॥३७॥

तदन्तरप्रेप्सुरथकालपाशमहायुधः ।
तस्मिन्नेव सुरस्यादौ तस्थौ हन्तुं तमेव हि ॥३८॥

अथारुह्य वृषं देवो नन्दिनंदनलालसः ।
बभ्राम जगतीं कृत्स्नां सशैलवनकाननाम् ॥३९॥

महेन्द्रमलयमारुह्य पारियात्रं च पर्वतम् ।
शुक्तिमन्तं दक्षमुखं विन्ध्यमन्दरमेव च ॥४०॥

सुमेरुं निषधं देवो हेमकूटमनन्तकम् ।
तीर्त्वा हिमगिरिं प्राप नन्दिदर्शनलालसः ॥४१॥

सलिलांतस्थितं मत्वा भगवान्नीललोहितः ।
उवाच वीरकं प्रीतो मृत्युं विद्राव्य दर्शनात् ॥४२॥

वत्स प्रीतोऽस्मि तपसा दुष्करणाध्वना तव ।
प्रयच्छ स्व वरान्वरं तान्प्रब्रूहि यथा सुखम् ॥४३॥

अथोत्थाय जलान्तस्थाद्वीरको वीरवन्दितः ।
अष्टाङ्गप्रणिपातेन तोषयामास शूलिनम् ॥४४॥

नन्दी

ॐ नमः शिवाय शर्वाय शङ्कराय हराय च ।
कपर्दिनीविरूपाय स्वरूपाय व्ययाय च ॥४५॥

अघोराय महोग्राय स्थाणवे पुरुषाय च ।
व्योमरूपाय सौम्याय त्रिपुरघ्नाय शूलिने ॥४६॥

नमो रुद्राय भीमाय भवाय भवभेदिने ।
तुभ्यं पशूनांपतये नीलग्रीवाय वेधसे ॥४७॥

महादेवाय दान्ताय यमिने ब्रह्मचारिणे ।
नमः सेनाधिपतये सर्वमन्त्रमयाय च ॥४८॥

प्रधानाय कनिष्ठाय नमः कालान्तकाय च ।
भस्मनिष्ठाय शान्ताय गङ्गाधौतजराय च ॥४९॥

जटिने खण्डिने तुभ्यं नमः सिद्धस्तुताय च ।
उग्राय प्रमथेशाय सर्पमालाधराय च ॥५०॥

ब्रह्मण्याय वसिष्टाय मीढुषेपञ्च मूर्तये ।
उमादेहाय शक्ताय नमस्ते दिव्यचक्षुषे ॥५१॥

संसारोन्नारमुक्ताय सत्वानुग्रहशालिने ।
नमोऽनन्तस्वरूपाय प्रणतानन्ददायिने ॥५२॥

त्र्यम्बकाय भवायाथ कुमारगुरवे नमः ।
विलोहिताय पिङ्गाय धूमरूपाय रोममे ॥५३॥

व्याधाय व्याप्तविश्वरूपाय योगिने ।
सर्वदेवनमस्याय सर्वदेहमयाय च ॥५४॥

अभावभावरूपाय भवातीताय ते नमः ।
वृषध्वजाय दीप्ताय प्रमथानन्दिताय च ॥५५॥

ब्रह्मवक्त्राय मुख्याय भगनेत्रहराय च ।
विशुद्धज्ञानदेहाय प्रजासंहारकारिणे ॥५६॥

नमो दक्षाध्वरध्वंसकारिणे टङ्कपाणये ।
प्रजापतीनांपतये जगतां प्रभवे नमः ॥५७॥

सलिले तप्यमानाय सेव्याय मुदिताय च ।
नमः कपालहस्ताय श्मशाननिलयाय च ॥५८॥

महास्थिमयमालाय व्यालयज्ञोपवीतिने ।
अम्बिकाशापदग्धं मां पाहि मन्मथसूदन ॥५९॥

नापराधं मया देव कदाचिदपि ते नमः ।
अन्येषां गतिरन्योऽस्ति त्वमेकं मे गतिः किल ॥६०॥

त्वद्विना देव रज्जामि न कुत्रचिदनामयम् ।
निशम्य भगवानेवं सह देव्या वृषध्वजः ॥६१॥

ददौ वरान्तु प्रतिमानंदिने लोकनन्दिने ।
अथोवाच महादेवं नन्दीलोकनमस्कृतः ॥६२॥

प्रणिपत्य लसच्चारुकुङ्कुमारुणविग्रहः ।
हिमवच्छिखरे पुण्ये यस्मिन्नाराधितो मया ॥६३॥

त्वं देवदेव तत्क्षेत्रं ख्यातिं व्रजतु शाश्वतीम् ।
एवमुक्तो हर प्राह नन्दिनं कश्मलापहम् ॥६४॥

स्मितज्योत्स्ना प्रभापूरैः शुक्लीकुर्वन्निदं जगत् ।
दृष्टमेतत्पुरा वत्स देवस्त्रैलोक्यवन्दितः ॥६५॥

भविष्यति न सन्देहो तपो यत्र त्वया कृतम् ॥६६॥

अस्य क्षेत्रस्य माहात्म्यं शृणु प्रयतमानसः ।
यद्दृष्टं पूर्वमेवेह पुराणेषु पृथक्पृथक् ॥६७॥

लोकद्वारात्समारभ्य यावत्कनकनन्दिनम् ।
तावन्महाक्षेत्रवरं भविष्यति न संशयः ॥६८॥

नन्दिक्षेत्रमिति ख्यातं वन्दितं विबुधेश्वरैः ।
पुण्यायतनगम्भीरं भविष्यति शिलादज ॥६९॥

अत्र तीर्थानि यावन्ति यानि चायतनान्यलम् ।
कथयिष्यामि तमीत्थं समाधिपरमं शृणु ॥७०॥

लोकद्वारं महत्क्षेत्रं प्रमथेश्वरमण्डितम् ।
पुण्यमायतनं पूर्वं सिन्धुतोयपरिप्लुतम् ॥७१॥

अत्र स्नातो नरो नूनं श्रद्धाभक्तिसमन्वितः ।
प्राप्नोति लोकञ्च शुभं गणेन्द्रस्य महात्मनः ॥७२॥

ततः पथेश्वरं यायाद्भूरताचलमुत्तमम् ।
नदी यत्र महापुण्या नामतीर्थविमिश्रिता ॥७३॥

तत्र गौर्याश्रमं पुण्यं यत्र गौरी स्वयं स्थिता ।
लोकानां तु हितार्थाय प्रथमेश्वरगोपिता ॥७४॥

पुण्ये भाद्रपदे मासि चतुर्थ्यां तत्र पूजयेत् ।
शुक्लपक्षे तु तां गौरीममरेन्द्रमुनिस्तुताम् ॥७५॥

भक्तानां चिन्तितान्कामान्सा प्रसन्ना प्रदास्यति ।
पूजिता दुन्दुभिरियं महिषासुरनन्दिनी ॥७६॥

पितृनुद्दिश्य यत्तत्र जलदानादिकल्पितम् ।
पुंभिस्तदक्षयगुणं प्राप्यते तैस्त्रिविष्टरे ॥७७॥

गौरीपूजां तु निर्वर्त्य पथेश्वरगिरौ ततः ।
आरुह्योत्पर्वतं धीमाञ्जिताहारक्रमेण तु ॥७८॥

नानौषधिलताजालैर्दिव्यपादपमण्डितम् ।
शुभप्रस्रवणोपेतं भरताचलसंज्ञितम् ॥७९॥

सम्यग्दत्तस्य नन्दीश गोसहस्रस्य यत्नतः ।
फलं प्राप्नोति भरतपर्वतारोहणान्नरः ॥८०॥

तत्पूर्वं हि ब्रह्मसुरस्मरः कनकपङ्कजम् ।
प्राकाशितो नरः स्नातो यत्र ब्रह्मपदं व्रजेत् ॥८१॥

कार्पण्यतीर्थं तत्रैव स्वल्पोदकपरिप्लुतम् ।
यत्रोपस्पृशन्विधिना गोदानं प्राप्नुयान्नरः ॥८२॥

अथ पूर्वां दिशि गत्वा दृश्यते शिखरोपरि ।
मायान्यस्तं शिलायास्तु चरणं सूक्ष्मरूपकम् ॥८३॥

तमभ्यर्च्य नरो याति दग्धं सारपञ्जरः ।
मदन्तिकप्रयत्नेन यत्सुरैरपि दुर्लभम् ॥८४॥

तदधो विद्यते वत्स तीर्थं कनकपङ्कजम् ।
नाम्ना कनकनन्दीति संसारभयमर्दनम् ॥८५॥

क्कूलनागैर्गोपितं तच्छुभ्रगतंप्रतिष्ठितम् ।
अलभ्यं त्रिदशाधीशं कृपाकारं स्वभैरवम् ॥८६॥

न तदासाद्यते देवैः किं पुनर्मानुषैरपि ।
रक्ष्यते किङ्करैर्घोरैस्तीक्ष्णदंष्ट्रैस्तथाहिभिः ॥८७॥

तत्प्राप्य सशरीरो वै नरो याति शिवालयम् ।
पाराशर्य न सन्देहस्तत्र सत्यं ब्रवीमि ते ॥८८॥

अनुक्तेष्वथ तीर्थेषु स्नात्वाधिगतकल्मषः ।
हंसद्वारेण यातव्यं कर्मणोत्तरं मानसम् ॥८९॥

हंसद्वारमुपारूढो नाम कीर्तिप्रकाशकः ।
अवश्यं त्रिदिवं याति नरः कालेन संयुतः ॥९०॥

तदतीत्य ततः पुण्यान्येकान्याप्लवेन्नरः ।
विबुधैः कल्पितैर्पुण्यैस्तेषु स्नातो दिवं व्रजेत् ॥९१॥

तत्र यातं च षण्डञ्च विमलं स्वर्गमेव च ।
अप्सुरतीर्थमतुलमृणमोचनमुत्तमम् ॥९२॥

कपिलातीर्थमन्यञ्च देवरामह्लदं तथा ।
गदाशार्ङ्गं तदा चक्रमापगाः सरितांवरः ॥९३॥

नन्दितीर्थं कालतोयं रम्यं गारिसरस्तथा ।
पृथूदकं प्रभासञ्च केदारं तुहिनाचलम् ॥९४॥

एतान्यन्यानि भूरीणि दत्वायतनमण्डले ।
तीर्थानि सन्ति नियतं येषु स्नातो दिवं व्रजेत् ॥९५॥

नन्दिकुण्डे नरः स्नात्वा तत्समीपं व्रजेन्नरम् ।
कालोदके कृत्वा स्नानं यान्ति वैवस्वतान्तिकम् ॥९६॥

नन्दितीर्थसमं नास्ति त्रैलोक्ये तीर्थमुत्तमम् ।
वसामि नियतं यत्र सह देव्या त्वदन्तिके ॥९७॥

पूर्वोक्तेषु च तीर्थेषु यो हि मज्जति मानवः ।
ब्रह्माच्युतमहेन्द्राणां याति सायुज्यमक्षयम् ॥९८॥

चतुर्थीतः समारभ्य तीर्थेष्वेतेषु मानवः ।
आप्लुतः सप्तमीं यावत्फलं प्राप्नोति पुष्कलम् ॥९९॥

अष्टम्यां तु ततो गच्छेत्पुण्यमुत्तरमानसम् ।
नीलोत्पलदलश्यामां सलिलौघपरिप्लुतम् ॥१००॥

यत्र भागीरथी देवी हरमौलिपथच्युता ।
मुक्तामालीति पतति हिमवच्छिखरात्स्थलम् ॥१०१॥

तत्तीर्थमासाद्य तदा गङ्गा हिमवतसुता ।
अन्तर्धानमुपातिष्ठ देवगन्धर्ववन्दिता ॥१०२॥

तस्मिंस्तीर्थवरे स्नातो गङ्गाजलपरिप्लुतः ।
ब्रह्मलोकं न सन्देहः प्राप्नोति पितृभिः सह ॥१०३॥

तज्जलेन दिवं यान्ति पितरकालमक्षयम् ।
देदीप्यमाना विबुधैर्वन्दिता संशयं विना ॥१०४॥

मृतानामस्थिनिचयं तस्मिंस्तीर्थे विनिक्षिपेत् ।
सुसंस्कृत्य यथान्याय्यं मनुष्यानां नरोत्तमः ॥१०५॥

जाह्नवीजलसंस्पर्शात्स्नानात्त्रिदेवमुत्तमम् ।
मृतास्ते यान्ति नियतं यावदाभूमिसंप्लवम् ॥१०६॥

जपितं प्रहुतं दत्तं तप्तं सुकृतमण्वपि ।
अक्षयञ्च सम्भवति तत्र ब्रह्मादिना विधिः ॥१०७॥

जलेन पूजयेद्देवतं तस्मादुत्तरमानसम् ।
शशाङ्कशेखरं मर्त्यः शिवलोकसमुत्सुकः ॥१०८॥

तत्र श्राद्धं पितृणां तु कृतमक्षयतां व्रजेत् ।
तदम्भस्तर्पिता यांति त्रिदिवं पितरः सदा ॥१०९॥

तत्रोष्य रजनीमेकां क्षपास्त्रिपञ्चसप्तवान् ।
ब्रह्मलोके नरः सम्यक्लभते त्रिदशैः समम् ॥११०॥

न पुण्यं शक्यते वक्तुं काले चोत्तरमानसे ।
वदनानानां सहस्रेण देवेन हरिणाप्यलम् ॥१११॥

नरः शिवपुरं गच्छेत्स्नातश्चोत्तरमानसे ।
परं ध्यानपरोऽक्षय्यं यदासाद्य न जायते ॥११२॥

तदतीत्य ततो यायादैरावणसरः शुभम् ।
यत्र स्नातो नरो याति दिवमिन्द्रादिपूजितः ॥११३॥

ततश्चन्द्रसरो गच्छेत्तारकासर एव च ।
घृतस्य च सरोऽत्रैव सरस्वत्यास्तथैव च ॥११४॥

ततो विष्णुसरो गच्छेत्कुमारासर एव च ।
ब्राह्मं सरच्छूलभेदं यत्र पञ्चाग्नयः सदा ॥११५॥

आप्लुतो यत्र तत्रैव प्राप्नोति सहजोत्तमः ।
कालीशका नदी पुण्या नाम्ना कनकवाहिनी ॥११६॥

निर्याति हेम्नःवहति या सदैवामलोदका ।
तस्यास्तीर्थसहस्राणि लक्ष्याण्यपि बहून्यपि ॥११७॥

वसन्ति यानि वै स्नातं पावयन्ति यथोदितम् ।
निर्गता सा पतत्युच्चैर्नदी कनकनन्दिनी ॥११८॥

मूर्ध्नि गाङ्गेव जगतां तत्र शम्भोर्मलापहा ।
कालोदकेति सा पूर्वं ततः कनकवाहिनी ॥११६॥

कथिता सर्वलोकेषु पुंसां पापप्रणोदिनी ॥१२०॥

तत्फलं शक्यते वक्तुममरैर्नैव कालजैः ।
किमु मर्त्यैरल्पबोधैर्महापुण्यैः समुद्भवम् ॥१२१॥

वृषभाचलमासाद्य पार्श्वे कनकनन्दितः ।
वसेत्तत्र नरो रात्रौ रुद्रलोकसमुत्सुकः ॥१२२॥

हेमनन्दिजलैस्नातस्तन्माहात्म्युपबृंहितः ।
रुद्रलोके नरो याति विधूय विपुलं तमः ॥१२३॥

स्नात्वा सप्तस्वरकुल्यां सलिले मानवोत्तमः ।
पुनाति निखिलं पापं सप्तकुलसम्भवम् ॥१२४॥

घटिलुषो - - - - - - - - - विबुधैरपिपूज्यते ।
दशाश्वमेधसवितः गच्छेत्सायुज्यमादरात् ॥१२५॥

चणकस्य मुने देवोभे शिवमव्ययम्

चीरमोचनमासाद्य रात्रिमांगतिम् ॥

तत्र ते मुनयश्श्रेष्ठा वसिष्ठप्रमुखावरा: ।

स्वर्गमार्गप्रदं प्रोक्तं तीर्थं चीरप्रमोचनम् ॥१२६॥

स्नात्वा तत्र दिवं याति योऽपि पापकृतो नर: ।

अद्यापि तत्र दृश्यते चीरराज्यसमुत्सुक: ॥१२७॥

तत्र ये तर्पयिष्यन्ति पितृंस्तु स मनुजोत्तम: ।

नित्यं सन्निहिता तस्मिंस्तीर्थमंत्रमहातनु: ॥१२८॥

नदीमध्यगतं गच्छेत्तमालपुर उत्तम: ।

आकर्ण्यते जनैस्सम्यग्पितृभ्यो दत्तमक्षयम् ॥१२९॥

श्राद्धं तिलोदकार्थे च भैरवे च महालये ।

आचम्य प्रियतो पुण्ये स्वयमस्मिंस्त्वया सह ॥१३०॥

तिष्ठामि ज्येष्ठान्तरे यावत्तीर्थान्यायतनानि च ।

ज्येष्ठनन्दिक्षेत्रमिति ख्यातं तत्क्षेत्रं सुरवन्दितम् ॥१३१॥

तत्र सन्निहितो वत्स भविष्यति मया सह ।

अत्र ज्येष्ठेश्वर: शम्भुरत्र नन्दीश्वरो विभु: ॥१३२॥

कासङ्गमनर: स्नातो ब्रह्महत्यां व्यपोहति ।

नरो विधूतक - - - चरकेश इति श्रुतम् ॥१३३॥

शिवमभ्यर्च्य मनुजो ददौ दर्शनमीश्वर: ॥१३४॥

भित्वा शिलां तत्र युक्तः शिलामेकां वसेत्तु यः ।
विधूय सर्वपापानि स याति परखश्चिरम् ॥१३५॥

कृत्वा तपो महासिद्धिं लेभिरेऽम्भो गतानि तु ।
उज्जितानि मुनीन्द्रैस्तु तु तद्दर्शनलीलादिभिः ॥१३६॥

तैः सार्धं शिवलोकं ते यास्यन्ति तीर्थे कनकवाहिने ।
गर्भस्थो भगवान्साक्षात्पञ्चयज्ञमनुत्तमम् ॥१३७॥

अद्यापि हि निशामुच्चैस्तद्दिव्यगीतरवस्तथा ।
तस्मिंस्तीर्थवरे पुण्ये विसृष्टमुपतिष्ठते ॥१३८॥

केदारे सोमतीर्थे च गाणपत्यमवाप्यते ।
वसिष्ठस्याश्रमे तत्र शब्दितोऽमरवन्दितः ॥१३९॥

ब्रह्माण्डपादे तिष्ठन्ति तानि नन्दीश्वरान्तिके ।
न भविष्यत्पुराणेषु दृश्यमेव पुरैव हि ॥१४०॥

नियतं सर्वगन्धर्वसुरासुरनमस्कृतः ।
नित्यं सन्निहितश्रीससुरवन्दितः ॥१४१॥

दर्शनाज्ज्येष्ठनाथस्य तत्र च प्रथितात्मना ।
ब्रह्महत्या शतं वत्स नश्यन्त्यत्र न संशयः ॥१४२॥

उत्तीर्य नन्दिकुण्डाख्यं स्वयं सत्सोदरे स्थिता ।
भूतेश्वर इति ख्यात कृत्स्नपापप्रणोदरः ॥१४३॥

स्वयमर्चां ग्रहीष्यामि भक्त्याहं प्रतिपादिताम् ।
भक्तमुत्सुकमेवाहं ग्रहीष्यामि न संशयः ॥१४४॥

देवदानवगन्धर्वसप्तर्षिमहोरगाः ।
इहार्चयन्ति मां नित्यं नित्यसन्निहितो द्विधा ॥१४५॥

मनुष्याणां महत्पापं महज्जन्म सहस्रकम् ।
क्षपयिष्यामि यत्नेन तम सूर्य इवोदितः ॥१४६॥

मदन्तिके महापुण्यं सुतीर्थमिति विश्रुतम् ।
सदावतिष्ठते तीर्थं सर्वपापप्रमोचनम् ॥१४७॥

अप्लुतो मनुजस्तस्मिन्सुतीर्थे लोकविश्रुते ।
पीत्वोदकं च तत्रैव स्नात्वा पुण्यं महच्छृणु ॥१४८॥

साग्रं कुलं शतं सम्यङ्नरकात्तारयिष्यति ।
स यज्ञयाजी सर्वज्ञः स गयां पुष्करं गतः ॥१४९॥

स सर्ववेदज्ञो दद्यात्पितॄणां सोदरं जलम् ।
अप्लुतः सोदरे मर्त्यः शिवगङ्गापरिप्लुते ॥१५०॥

कुलानां शतमुत्तार्य गाणपत्यमवाप्नुयात् ॥१५१॥

न समं सर्वलोकेषु सुतीर्थस्य द्विजोत्तम ।
विद्यते यज्जलैस्तृप्ताः पितरो यान्ति मत्पुरम् ॥१५२॥

ब्रह्माण्डाभ्यन्तरे यानि तीर्थान्यमरवन्दिते ।
तानि सन्निहितानीह सुतीर्थे सर्वदैव हि ॥१५३॥

सुतीर्थजलसंसिक्तः पक्षीपक्षात्तनोति यः ।
देशान्तरे चेद्देशोऽसौ पूतो भवति नान्यथा ॥१५४॥

फलाद्यैः सकलैर्वापि शालिश्यामकतण्डुलैः ।
श्राद्धं सुतीर्थे विदध्यात्तारयेत्स पितॄन्नरः ॥१५५॥

त्रैलोक्यं क्ष्मातरं पुण्यं तत्रापि तु हिमाचलः ।
सारं हिमवतस्तीर्थं सुतीर्थं लोकविश्रुतम् ॥१५६॥

न गङ्गा न कुरुक्षेत्रं प्रयागसिन्धुसागरः ।
नैमिषं पुष्करञ्चैव सादृश्यं सोदराम्भसः ॥१५७॥

सुतीर्थाच्च परं नास्ति ब्रह्माण्डे तीर्थमुत्तमम् ।
सुतीर्थे निवसन्नित्यं सुतीर्थं संस्मरन्सदा ॥१५८॥

सुतीर्थजलस्नातो दृष्ट्वा तीर्थं सुनन्दितम् ।
नरो याति परां सिद्धिं यामासाद्य न जायते ॥१५९॥

शर्वनन्दिमहाकालदेवीवदनमण्डितम् ।
भूतेश्वरं भूतपतिं दृष्ट्वा मर्त्यो विमुच्यते ॥१६०॥

पश्चिमे वदने वीर समवस्त्यसि वत्स हे ।
भूतेश्वरसर्वभूतशरीरान्तर्गतो विभुः ॥१६१॥

श्रीकण्ठः पूर्ववदने महाकालोऽथ दक्षिणे ।
पश्चिमे नन्दिरुद्रस्तु देवी सौम्ये प्रतिष्ठिता ॥१६२॥

भूतेश्वरस्य देवस्य नन्दिक्षेत्रे महाबले ।
दृश्यन्ते वदने श्वेते देवीपतिमहाशिवा ॥१६३॥

ये द्रक्षन्ति नराः सम्यग्देवं नन्दीश्वरं शिवम् ।
ज्येष्ठस्थाने ध्रुवं लोकं शम्भोर्यास्यन्ति तेऽचिरात् ॥१६४॥

ते लोचने करौ तु सकायोऽनुपमस्तथा ।
दृश्यते स्पृश्यते यैस्तु ज्येष्ठानाथः सनन्दिकः ॥१६५॥

अथ किं बहुनोक्तेन नन्दिक्षेत्रादनन्तरम् ।
स्नानं न विद्यते शम्भो सत्यमेतद्ब्रवीमि ते ॥१६६॥

स्नातः कनकवाहिन्यां दृष्ट्वा ज्येष्ठं सनन्दिनम् ।
नरः शिवपुरे श्रीमान्मोदते रुद्रवत्किल ॥१६७॥

यथाशक्ति नरो ज्येष्ठं योऽर्चयेन्नन्दिना सह ।
वितुष्टकं वर्जयित्वा सोऽन्ते रुद्रत्वमाप्नुयात् ॥१६८॥

यस्तु भाद्रपदाष्टम्यां ज्येष्ठमभ्यर्चयेन्नरः ।
शिवगङ्गाजलस्नातः स याति परमां गतिम् ॥१६९॥

सर्वसन्धिषु यो ज्येष्ठं विशेषविधिना यजेत् ।
तत्पुण्यं शक्यते वक्तुं न तु वर्षशतैरपि ॥१७०॥

सुतीर्थपुण्यगणना तथा वै चीरमोचने ।
नद्यां कनकवाहिन्यां चास्ति सत्यं ब्रवीमि ते ॥१७१॥

पश्चिमां दिशमासाद्य प्रख्यातां राजनर्मदाम् ।
ज्येष्ठस्याग्रे नदीं दृष्ट्वा ब्रह्मलोकमवाप्नुयात् ॥१७२॥

सङ्गमे हेमवाहिन्यां यत्र सा राजनर्मदा ।
पुण्यं प्रकाशते तत्र स्नातो मर्त्यो दिवं व्रजेत् ॥१७३॥

अग्नितीर्थे नरः स्नात्वा कृतश्राद्धविधिस्त्वलम् ।
वह्नेः सायुज्यमायान्ति नमस्कृत्य पिनाकिनम् ॥१७४॥

अनन्ते सलिले स्नातः कर्कोटकमहृनदे ।
नरो भगवतीं याति सर्वकामोपसेवितम् ॥१७५॥

अथ रुद्रेश्वरं गच्छेत्तीर्थं विबुधनन्दितम् ।
नदीञ्च श्रृणु तां वत्स पुण्यां कनकवाहिनीम् १७६॥

हेमनन्दिजलस्रावं मिश्रीकृत्य प्रयत्नतः ।
सुरर्षिगणगन्धर्वचारणाध्युषितं द्विज ॥१७७॥

तत्राप्लुतो नरः क्षिप्रं याति ब्रह्मसनातनम् ।
सर्वपापविशुद्धात्मा प्रसादादम्बिकापतेः ॥१७८॥

आत्माने प्रक्षिपेत्काले प्राप्ते यो नरसत्तमः ।
मुद्राप्रतिष्ठमभ्यर्च्य पादं मे सुरपूजितम् ॥१७९॥

शिवरात्र्यां निशावक्त्रे सत्त्वनिष्ठः स्वभावितः ।
अमुनैव शरीरेण याति रुद्रस्वरूपताम् ॥१८०॥

उत्तरं मानसं क्षेत्रं चीरमोचनमेव च ।
रुद्रेश्वरं समासाद्य काले देहं समुत्सृजेत् १८१॥

शिवसायुज्यतां याति नरः संशयं विना ।
विधूय निखिलं पापं प्रसादादम्बिकापतेः ॥१८२॥

सङ्गमहेमवाहिन्याः सिन्धोश्च नरपुङ्गवः ।
स्नातो रुद्रत्वमायान्ति मायाबंधबहिष्कृतः ॥१८३॥

तत्रैव द्वारपालेशं शिवमभ्यर्चयेत्ततः ।
भक्त्या परमया युक्तः सोऽन्ते रुद्रत्वमाप्नुयात् ॥१८४॥

यः स्नातः सिन्धुसलिले लोकद्वारस्य दक्षिणे ।
स विधूयाखिलं पापं मोदते दिवि देववत् ॥१८५॥

दक्षिणस्यां दिशि विभो पर्वताग्रं प्रकाशते ।
तीक्ष्णेश्वरस्वयम्भूर्वं यं दृष्ट्वा मुच्यते नरः ॥१८६॥

इति निखिलमनन्यं देवदेवस्य शम्भोः ।
चरितमुचितसिद्धस्थानतीर्थावतानम् ॥१८७॥

कथितममरबृन्दैर्वन्दितञ्च यत्सयुक्त्या ।
विषमनरकपातत्राणभूतं हि नराणाम् ॥१८८॥

इति श्रीशर्वावतारे नन्दिक्षेत्रप्रशंसा नाम षष्ठोऽध्यायः
समाप्तं गङ्गामाहात्म्यम् ।

# मार्तण्डमाहात्म्यम्

## ॐ श्रीगणेशाय नमः

## *ॐ श्रीमार्तण्डाय नमः

ॐ सूत उवाच

शौनकाद्या महात्मनो मुनयो ब्रह्मवादिनः ।
नैमिषाख्ये महारण्ये तपस्तेपुर्मुमुक्षवः ॥१॥

एकदा ते महात्मानः समाजं चक्रुरुत्तमाः ।
धर्मार्थकाममोक्षाणामुपायं ज्ञातुमिच्छवः ॥२॥

कानि क्षेत्राणि पुण्यानि कानि तीर्थाणि भूतले ।
कथम्वा भवति मुक्तिर्नृणां पातकिनां कलौ ॥३॥

---

*मार्ताण्डाय—मार्तण्डाय

१ घः मा तपस्तेमुमुक्षवः—तपस्तेपुर्मुमुक्षवः

२ कः मा एकधा—एकदा

खः चक्रुरुत्तमः—चक्रुरुत्तमाः

घः ज्ञातुच्छवः—ज्ञातुमिच्छवः

उपस्थितो दारुणो यः कलिकल्मषवृद्धये ।
क्षणं क्षणं क्षीणधर्मा पापिष्ठवृद्धिकृताश्च ॥४॥

पाखण्डा बहवो यत्र श्रुतिमार्गप्रलोपका: ।
प्रादूर्भूता मतिर्नृणां विपरीते च दृश्यते ॥५॥

न श्रद्धा श्रुतिधर्मेऽप्यभक्तिपरमेश्वरे ।
लोभप्रतिष्ठानिष्ठानामधर्मैकप्रवृत्तये ॥६॥

एवं विलुप्ते धर्मे सर्वे निरयगामिन: ।
एषामुद्धरणार्थाय क उपायस्तदुच्यताम् ॥७॥

इत्येवमुद्धतान्पृष्टं मुनिनां वेक्ष्य शौनक: ।
प्राह विष्णुं नमस्कृत्य विनयावनतो मुनि: ॥८॥

श्रीशौनक:

श्रृणुध्वमृषय: सर्वे प्रश्नमेतत्सुदुर्लभम् ।
मोक्षप्रदं मनुष्यानां कलौ कलुषचेतसाम् ॥९॥

सतामेव प्रवक्तव्यं गुह्याद्गुह्यमिदं यत: ।
त्यक्तकासादिदोषाणां विष्णुभक्तिरतात्मनाम् ॥१०॥

---

५ क: मा पाषण्डा—पाखण्डा

६ क/ख: मा धर्मेप्युनक्तिपरमेशरे—धर्मेऽप्यभक्तिपरमेश्वरे

९ क: मा प्रश्नमेव सुदुर्लभं—प्रश्नमेतत्सुदुर्लभम्

गुरुभक्तिरतानाञ्च वक्तव्यं मुक्तिसाधनम् ।
ब्रह्मद्वेषरतानां तु दम्भाचारहतात्मनाम् ॥११॥

लोकानां बलवृत्तानां न ब्रूयादिदमुत्तमाः ॥१२॥

क्षेत्राणामुत्तमं क्षेत्रमस्ति काश्मीरमण्डलम् ।
सिद्धपीठतया ख्यातं शिखरे हिमवद्गिरेः ॥१३॥

त्रैलोक्यभूतलं सारं तत्रापि हिमवद्गिरिः ।
तत्रापि मण्डितं तीर्थैः पुण्यं काश्मीरमण्डलम् ॥१४॥

चत्वारिंशच्च पञ्चाथ तत्र स्थानानि शूलिनः ।
षष्टिर्विष्णोस्तथा त्रीणि स्थानानि परमेष्ठिनः ॥१५॥

द्वाविंशतिश्च दुर्गायाः सपुण्यानि च तत्र वै ।
येषां दर्शनमात्रेण सद्यः पापक्षयो भवेत् ॥१६॥

सिद्धिधर्मार्थकामानां मोक्षस्य च यथेप्सिता ।
किम्वात्र बहुनोक्तेन मुनयः सिद्धिदायिनः ॥१७॥

---

१३ खः मा व्रीयादिदं—ब्रूयादिदम्

१४ कः मा त्रैलोकि – त्रैलोक्य

१६ घः मा भवत् – भवेत्

१७ घः मा सिद्धिदायिभिः—सिद्धिदायिनः

तीर्थैर्विगर्हितैः पुण्यैस्तिलांशोऽपि न यत्र वै ।
अस्ति तत्र महत्क्षेत्रं मार्तण्डं नाम भास्वतः ॥१८॥

यत्र पातकिनो यान्ति कृते श्राद्धे विमुक्तये ।
प्रथमं तस्य क्षेत्रस्य द्वारपालो व्यवस्थितः ॥१९॥

अनन्तनागनामाख्यो शय्याभूतो मुनीश्वराः ।
अनन्तस्याप्रमेयस्य विष्णोरमिततेजसः ॥२०॥

अनेकाक्षापुरे विप्राः शेषनागो महाबली ।
वसति स सदा लोकान्पावनार्थं द्विजर्षभाः ॥२१॥

तस्मात्सर्वप्रयत्नेन पूजनीयो हि नागराट् ।
तत्र स्नानं प्रकुर्वीत दत्वा दानं द्विजातये ॥२२॥

यत्स्नानमात्रामथवाप्यनेकाक्षो भवत्पुरा ।
तत्रापि दानं कर्तव्यं स्नानं होमं तथा जपम् ॥२३॥

उत्तरे हिमवत्कुक्षौ शुभे काश्मीरमण्डले ।
क्रोशत्रयं परिमाणं सूर्यक्षेत्रं विमुक्तिदम् ॥२४॥

---

१८ खः मा तिलांशोऽपि—तिलांशोऽपि

२० कः मा अनन्तनामनागाख्यो – अनन्तनागनामाख्यो

२३ घः मा जपः—जपम्

चक्रेश्वरात् समारभ्य यावद्गौतमसङ्गमम् ।
मार्तण्डं नाम तत्क्षेत्रं पितृणां मुक्तिकारणम् ॥२५॥

स्पर्शनाद्देवता यस्य हरन्त्यापातकान्नृणाम् ।
नद्या पश्चिमगामिन्याश्चाकाया: परिशोभितम् ॥२६॥

पूर्वाभिक्रमतो भर्गशिखादिभिरधिष्ठितम् ।
परितो रक्षितुं साक्षाद्देवीभि: परशक्तिभि: ॥२७॥

यस्तु वर्षशतं पूर्णं गयाश्राद्धं समीहते ।
दिनमेकं तु मार्तण्डे श्राद्धं पुण्यं तु तत्समम् ॥२८॥

द्विपञ्चाशति वर्षाणि गयाश्राद्धानि कुर्वत: ।
एकाहे तु रविक्षेत्रे पुण्यं तानि च तत्समम् ॥२९॥

सूर्यपादे वरिष्ठे तु य: श्राद्धं कुरुते पुमान् ।
पितरो मोक्षमायान्ति न स भूयोऽभिजायते ॥३०॥

सोमवारे त्वमावस्या रविवारे च सप्तमी ।
तत्र मलिम्लुचे मासि सूर्यक्षेत्रे पितॄन्यजेत् ॥३१॥

अक्षयं चाप्यनन्तञ्च श्राद्धे दानं जपं हुतम् ।
ब्राह्मणान्भोजयेत्तत्र श्राद्धकाले विशेषत: ॥३२॥

---

२४ ग: मा परीमाणं—परिमाणं

३२ क: मा चाप्यनंते—चाप्यनन्तं

दध्योदनमपूपाश्च खण्डवेष्टिश्च शक्तितः ।
सघृतं पायसञ्चैव हविष्यं व्यञ्जनं तथा ॥३३॥

हिंसाकारं तु यत्किञ्चित्तत्सर्वं परिवर्जयेत् ।
मांसं भुङ्क्ते तु यो मोहात्सूर्यक्षेत्रे कदाचन ॥३४॥

निराशाः पितरस्तस्य शापं दत्वा प्रयान्ति वै ।
मृतभुक्त्वा चिरं कालं तन्नरकमजायत ॥३५॥

अन्ये क्षेत्रे कृतं पापं सूर्यक्षेत्रे विनश्यति ।
सूर्यक्षेत्रे कृतं पापं वज्रलेपं न शुद्धयति ॥३६॥

श्रीमार्तण्डे शुभे क्षेत्रे सप्तम्यां तु रविदिने ।
विजया नाम सा प्रोक्ता पितॄणामिह मुक्तये ॥३७॥

मलिम्लुचसहस्राणि दशहारशतानि च ।
अष्टोत्तरममावस्यामेका विजया सप्तमी ॥३८॥

यत्तु मार्तण्डनाथस्य मासे चैव त्रयोदशे ।
गयापिण्डप्रदानस्य वाराणस्याञ्च यत्फलम् ॥३९॥

---

३३ कः मा व्योदन—दध्योदन

३६ गः मा सूर्यक्षेत्र—सूर्यक्षेत्रे

घः मा वज्रलेपे न—वज्रलेपं न

३७ कः मा मार्तादये—मार्तण्डे

३९ घः मा वारणस्याञ्च—वाराणस्याञ्च

सूर्यक्षेत्रे कुरुक्षेत्रे प्रयागपत्तनात्तु यत् ।
तत्फलं लभते मर्त्यः सत्यमेव न संशयः ॥४०॥

अधार्मिकाणां पिण्डञ्च पतितव्रतिनां तथा ।
श्राद्धं पिण्डप्रदानञ्च तत्रैव तु मलिम्लुचे ॥४१॥

तृप्ताः प्रेता मोदमानाः पितरो यान्ति वै दिवम् ॥४२॥

येषां श्राद्धे विरोधोऽस्ति पतितानां विशेषतः ।
सूर्यक्षेत्रे मले तेषां श्राद्धमक्षय्यतां व्रजेत् ॥४३॥

यस्तु मार्तण्डनाथस्य मासे चैव त्रयोदशे ।
मासमध्ये प्रतिदिनं स्थानेऽस्मिन्भोजयेद्विजान् ॥४४॥

गयाशतगुणं पुण्यं भवत्येव न संशयः ।
मलिम्लुचेऽत्र यः कुर्याच्छ्रीविष्णुः बलिपूर्वकम् ॥४५॥

प्रेतक्रिया भवेत्तस्य पितरो यान्ति वै दिवम् ।
मासमध्ये यत्र दिने यत्कालं भोजयेद्विजान् ॥४६॥

---

४० खः मा प्रयागपत्तनातु — प्रयागपत्तनात्

४१ कः मा अधर्मिकाणां — अधार्मिकाणाम्

खः मा मलिम्लुचु — मलिम्लुचे

४३ कः मा मोदमाताः — मोदमानाः

४५ गः मा मलिलुचे — मलिम्लुचे

द्वादशी सा तु विज्ञेया गयाशतगुणं फलम् ।
गयासारस्वतं तोयं तथा यत्रैव दृश्यते ॥४७॥

मलमासे सूर्यक्षेत्रे द्वादशीति दिने दिने ।
अदग्धानामपिण्डानां पतितव्रतिनां तथा ॥४८॥

श्राद्धपिण्डप्रदाने च नैव कुर्यादिति श्रुतिः ।
तेषां मलिम्लुचे मासि सूर्यक्षेत्रे प्रयत्नतः ॥४९॥

सितासिताभ्यां पक्षाभ्यां या तिथिश्राद्धकर्मणि ।
तस्मिनस्मिन्रविक्षेत्रे मासि चैव त्रयोदशे ॥५०॥

श्राद्धं पिण्डं प्रदानञ्च कुर्यात्मार्तण्डपादयोः ।
तेषां मलिम्लुचे मासि सूर्यक्षेत्रे विशेषतः ॥५१॥

विष्णुश्राद्धं कृत्वा पिण्डं प्रदद्यात्पुण्यवान्नरः ।
कुरुक्षेत्रे प्रयागे च हरद्वारे तथैव च ॥५२॥

मार्तण्डपादमूले च श्राद्धं हरिहरौ स्मरन् ।
भास्करेऽथ सरस्वत्यां गङ्गायमुनसङ्गमे ॥५३॥

---

४७ खः मा गया—गवा
गः गवा—गया

४८ कः मा मलुमासे—मलमासे

४९ कः मा प्रधाने—प्रदाने

मानसी देविकी ग्राह्या पैतृकेऽपि महाभवेत् ॥५४॥

अन्यक्षेत्रे कृतं श्राद्धं पितृणां तृप्तिमात्रकृत् ।
महामार्तण्डक्षेत्रे तु भूयं श्राद्धं न गच्छति ॥५५॥

गङ्गायां भास्करक्षेत्रे पितृमातृगुरुक्षये ।
मधुमत्याञ्च यज्ञेषु वपनं सप्तसु स्मृतम् ॥५६॥

देवस्योत्तरपार्श्वे तु नदी वहति पश्चिमा ।
वपनं तत्र कर्त्तव्यं दीक्षा यज्ञादिकं फलम् ॥५७॥

यावन्ति मखमाणि तस्मिन्तोये पतन्ति वै ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥५८॥

तीर्थं सम्प्राप्य यो धीमान्मुण्डनं नैव कारयेत् ।
वृथास्तस्य क्रियाः सर्वास्तीर्थद्रोही भवेन्नरः ॥५९॥

प्राप्य पुण्या सरिच्छ्रेष्ठां कम्पन्ते पापसञ्चयः ।
केशानाश्रित्य तिष्ठन्ति तस्मात्तान्परिवर्जयेत् ॥६०॥

गङ्गायां भास्करे क्षेत्रे मुण्डनं न करोति यः ।
स कोटिकुलसंयुक्त आकल्पं रौरवं वसेत् ॥६१॥

---

५६ घः मा वपने सप्त सुस्मतं—वपनं सप्तसु स्मृतम्

५९ खः मा मण्डनं— मुण्डनं

६० कः मा सरि श्रेष्ठं—सरिच्छ्रेष्ठां

तत्र यद्विमलं नाम तीर्थं देवनिषेवितम् ।
मत्स्यरूपधरैः सिद्धैः जुष्टं चक्रधरैरपि ॥६२॥

तत्र हेममया मत्स्या ताम्रराजातिसन्निभाः ।
तत्र स्नात्वा बलिं तेभ्यो दत्वा पुण्यं महत्फलम् ॥६३॥

देवी भर्गशिखा तत्र विश्रुता त्रिमलापहा ।
पितृमुक्तिप्रदा साक्षाद्देवदेवी सखी युता ॥६४॥

सूता ऊचुः

इति श्रुत्वा तु माहात्म्यं मार्तण्डस्य मुनीश्वराः ।
प्रोचुर्निबद्धाञ्जलयस्तत्र शुश्रुवुश्च पुनः ॥६५॥

ऋषय ऊचुः

मार्तण्डेति कथं नाम क्षेत्रस्यास्य विशेषतः ।
श्रुत्वा माहात्म्यमेतस्य जातं कौतूहलं हि नः ॥६६॥

*शौनक उवाच

पतिता ये विनिर्दिष्टास्तेषां शुद्धये त्वत्र यत् ।
नारायणबलिप्रोक्ता विधिस्तत्रापि कथ्यताम् ॥६७॥

---

६४ गः मा साक्षाद्धि—साक्षाद्देव

६५ घः मा शुश्रुववः—शुश्रुवुश्च

*शौनकः ऊचुः—शौनक उवाच

६७ कः मा पतितःके—पतिताः ये

भवद्वाक्यामृतं श्रुत्वा तृप्तिर्नैव च जायते ॥६८॥

शृणुध्वं मुनयो दिव्यां कथामत्यद्भुतामिमाम् ।
श्रवणादेव सर्वेषां पातकानां विशोधिनीम् ॥६९॥

मन्वन्तरे चाक्षुषे वै प्राक्तने जाह्नवीजले ।
मुनिपुत्रो विकर्णाख्यश्चिक्रीड शिशुभिः सह ॥७०॥

क्वापि यातेऽस्य पितरौ क्षुत्तृष्णाश्रमकर्षितौ ।
शुनःशेपलाङ्गूलौ प्रापतुस्तु तदाश्रमम् ॥७१॥

मुनिपुत्रेण ते नाथलीलापहृतचेतसा ।
अभ्युत्थानाभिवादैस्तौ नार्चितौ वावहेलया ॥७२॥

ततः क्षुत्तृष्णापरिश्रान्तौ मुनी तौ खिन्नमानसौ ।
क्रोधादपश्यतां ते तु विकर्णं क्रीडणे रतम् ॥७३॥

आवां त्वदाश्रमं प्राप्तौ क्षुधितौ न त्वया पुनः ।
सम्भाविता वातिथ्यं न प्रापना मूढचेतसा ॥७४॥

---

६८ खः मा तृप्तिर्नैव न—तृप्तिर्नैव च

७० खः मा प्राक्तृणे—प्राक्तने

७१ कः मा पितरि—पितरौ

७३ कः मा परिश्रान्तौ—परिश्रान्तौ

७४ घः मा मूचेतसा—मूढचेतसा

यथाद्य प्लवते तोये चेतनारहितो शिशुः ।
चतुर्दश मनूनत्र क्षुन्तृष्णाक्लेशदुर्बलः ॥७५॥

विचेतनो मूढात्मा जले मूढाण्डतां व्रज ।
इति दत्वाथ तद्वामं यथेच्छांगतयोस्त्रयः ॥७६॥

ततस्तच्छापभीतोऽसौ तपसा क्षपयत्तनुम् ।
समतीतेषु मनुषु तथैवं कालपर्यये ॥७७॥

आदिकल्पेन तत्राभून्नष्टं स्थावरजङ्गमम् ।
दिक्कालकलना नासीन्न च सूर्यो न चन्द्रमा ॥७८॥

ततो हिरण्यगर्भेण कश्यपो नाम मानसः ।
प्रजासर्गे नियुक्तोऽभूत्सुतः सर्वजगत्प्रभुः ॥७९॥

अदितिप्रमुखा दक्षकन्या ब्राह्मणशासनात् ।
उवाह विधिवत्प्रष्टुं चतुर्दशविधिं जगत् ॥८०॥

आदित्यकश्यपाज्जातास्ततोऽण्डानि त्रयोदश ।
तत्रापि द्वादशो वाण्डा मात्रा संस्वेदितास्तु ते ॥८१॥

---

७६ गः मा तच्छामं—तद्वामं

७८ घः मा चंद्रमः—चन्द्रमा

८१ गः मा तत्रपि—तत्रापि

त्रयोदशं जले क्षिप्त्वा तेषां नीराजनाय वै ।
कश्यपस्य न विज्ञातं तदभूद्दैवयोगतः ॥८२॥

तदारभ्याण्डज्येष्ठकमण्डमारात्रिका विधौ ।
कृत्वा स्वेदविनाभूतं त्यजन्त्येवाण्डजास्त्रियः ॥८३॥

अण्डेभ्यो द्वादशेभ्यस्तु जाता द्वादशभास्कराः ।
ये मार्गादौ वेदलोककर्मणोरधिकारिणः ॥८४॥

आदित्यश्च रविश्चैव गभस्तिभानुरेव च ।
दिवाकरश्च सविता धर्मस्तपनभास्करौ ॥८५॥

सूर्यस्तुष्टा सुर्पतिश्चेतेषां नामानि द्वादश ।
प्रभादीप्तिप्रकाशा च मरीचिस्तपनी तथा ॥८६॥

माचनी हव्यवाहा च तथा तेजोवतीपरः ।
शतधामा सुधामा च पद्मगर्भा तथैव च ॥८७॥

छाया चेति स्मृता ऐषां देव्या द्वादशशक्तयः ।
यत्र त्रयोदशं क्षिप्तमण्डं तत्तु सतीसरः ॥८८॥

---

८२ कः मा त्रियोदशं — त्रयोदशं

८४ गः मा यो — ये

८६ कः मा सूर्यस्तुष्ठा — सूर्यस्तुष्ट

खः मा द्वादशी — द्वादश

गः प्रभादीप्ति — प्रभादीप्तिः

हिमवच्छिखरी गौरी लीलाललितपङ्कजम् ।
व्यस्तानालोक्य तीर्थानि त्रैलोक्ये यत्र कुत्रचित् ॥८९॥

एकत्र समवायेन तानि स्थापयितुं प्रभुः ।
लोकानां दययैवेच्छत् कश्यपः कर्तुमाश्रमम् ॥९०॥

सतीसरसि तत्रैव दत्तमन्वन्तरे पुरा ।
आराधितस्तदर्थं तु ब्रह्माविष्णुमहेश्वराः ॥९१॥

वरमस्मै ददौ सद्यः कार्यसम्पादनार्थिनः ॥९२॥

नारायणोऽथ चक्रेण द्विधा कृत्वा महीधरम् ।
स्रावयामास सलिलं शुष्कं तदभवत्सरः ॥९३॥

अथैकत्र स्वल्पजले गर्तेऽण्डमद्भुताकृतिः ।
ददर्श कश्यपस्तत्र तेजोव्याप्तिदिगन्तरम् ॥९४॥

हस्ते गृहीत्वा तं यावद्भिन्नेऽण्डे उदभून्महः ।
अप्रकाशं परं ज्योतिर्यदलक्ष्यप्रकाशकम् ॥९५॥

अद्यापि यन्न विदितं सिद्धानां बोधशालिनाम् ।
तस्य योदगमज्ज्वाला कलिकालुष्यशोधिनी ॥९६॥

---

९० गः मा दयायैवेच्छंत्—दययैवेच्छन्
९१ घः मा ब्रह्माविष्णुमहेश्वरः— ब्रह्माविष्णुमहेश्वराः
९३ घः मा तममवत्सरः—तदभवत्सरः
९५ कः मा हस्ती —हस्ते
९६ कः मा यन—यन्न

अभवद्दैवताशक्तिः सैव भर्गशिखाभिधा ।
द्वितीयास्यास्तु ज्वालाया अभून्द्रीमाभिधा कला ॥९७॥

भामती तु तृतीयस्यां चतुर्थी भानवी कला ।
एता एवादिमध्यान्तभेदा द्वादशधा पुनः ॥९८॥

शुभमेकत्र योगो यः सैव योगीश्वरी मता ।
अविभेदाय तस्मै च निष्छुलेति प्रकीर्तिता ॥९९॥

सत्यतेजश्च श्रीर्यत्र सत्यभामेत्यतो मता ।
एवं तस्मात्परं ज्योतिःपुञ्जः शक्तिकलात्मनाम् ॥१००॥

देवीनामाभवच्चक्रं द्वादशारं महाद्युतिः ।
एवं तत्राण्डचक्रेऽस्मिन्भिन्ने द्वादशधा तदा ॥१०१॥

मध्यात्समुद्ययौ भास्वान्रोदसी सम्प्रतापयन् ।
मृताण्डात्तु यतो जाता तेन मार्तण्ड उच्यते ॥१०२॥

चिरकालं यतस्तत्र निर्विकारस्ततो जले ।
वीरेश्वरेति तेनासौ श्रुतिभिर्गीयते विभुः ॥१०३॥

---

९७ खः मा भर्गशिखा —भर्गशिखा

१०३ कः मा यतस्मत्र – यतस्तत्र

खः मा निर्वाकारस्—निर्विकारस्

गः मा वीरेश्वरीति—वीरेश्वरेति

उद्धृता नरकाद्यस्मान्नरकारिस्ततो मत: ।
एष वीरेश्वरो देव: पर: परमकारण: ॥१०४॥

परमादित्य इत्येष विख्यात: परमेश्वर: ।
एतत्तु परमं धाम एतत्तु परमं पदम् ॥१०५॥

एषा सा परमा काष्ठा एष विश्वेश्वरो गुरु: ।
एष भूतान्तरान्तात्मा सर्वज्ञो ज्ञानभास्कर: ॥१०६॥

नैष वर्णो न वा शब्दो न चायं वा कलात्मक: ।
केवलं परमादित्यो वीरो नित्योदितो रवि: ॥१०७॥

नास्तमेति न चोदेति न शान्तो न विकारवान् ॥१०८॥

भिन्ने तस्मिन्नण्डचक्रे यत्स्रुतं सलिलं भुवि ।
सैका चार्केति विख्याता पितृणां मुक्तिदा नदी ॥१०९॥

कश्यपस्तु तदा दृष्ट्वा तदाश्चर्यं मुनीश्वर: ।
चकितैश्शरणं यातो ब्रह्माविष्णुमहेश्वरा: ॥११०॥

ज्वालालिङ्गं यथा पूर्वमुद्ययौ द्योतयज्जगत् ।
तथेदमुत्थितं किं स्यान्मोहयन्नो दृशौ मन: ॥१११॥

---

१०४ क: मा उधृता—उद्धृता

१०५ ग: मा एतन्य—एतत्

ब्रह्मा उवाच

भव सुस्थमना पुत्र वृत्तमेतद्ब्रवीमि ते ।
त्वयादित्यां प्रसूतानि अण्डानि प्राक्त्रयोदश ॥११२॥

एकं तोये परित्यक्तमण्डं यत्तदिदं मुने ।
न त्वया विदितो यस्मात्तत्र शापोऽस्ति कारणम् ॥११३॥

विकर्णो मुनिपुत्रोऽयं शुनःशेपेन शापितः ।
जातस्तद्बीजह्योदित्यां तपो वीर्यसमन्वितः ॥११४॥

तस्माच्छापात्समुत्तीर्य प्राप्तः स्वं ब्रह्मवर्चसम् ॥११५॥

कश्यप उवाच

परमेष्ठिन्प्रसूतोऽयं ममुश्चेद्भवदाज्ञया ।
प्रजास्रष्टुं प्रवृत्तस्य विज्ञप्तिं शृणु तत्त्वतः ॥११६॥

अयं मे प्रथमः सर्गः कालस्यैव प्रवर्तकः ।
तत्राधिकारे कालस्य देहि तत्तस्य यस्य वै ॥११७॥

---

११२ कः मा सुस्थना—सुस्थमना

११४ कः मा विकर्णो—विकर्णो

खः मा शुनःशेप न शापतः—शुनःशेपेन शापितः

११५ कः मा सुमुत्तीर्य—समुत्तीर्य

११६ खः मा भवाज्ञया – भवदाज्ञया

गः मा प्रजासृष्टुं – प्रजास्रष्टुं

ब्रह्मोवाच

त्वया संदर्शितः पूर्वं द्वादशैवाण्डजा मुने ।
आदित्यास्ते त्वधिकृता वेदे लोके च कर्मसु ॥११८॥

तेषामेवानुसारेण कृत्वासौ कालकल्पना ।
संवत्सरो द्वादशभिर्मासैः षडर्तवस्तथा ॥११९॥

भानां सप्तविंशतिनां कृता द्वादश राशयः ।
आदित्यानां तु तद्भोगा मासाश्चैत्रादयः स्मृताः ॥१२०॥

किमत्र कार्यं नो जाने तद्विष्णुं शरणं व्रज ।
विष्णुनाप्येवमुक्ते तु ततस्तौ विष्णुना सह ॥१२१॥

शङ्करं शरणं जग्मुः सोऽब्रवीदत्र कारणम् ।
अत्रादित्या एव यदि जानीयुस्ते प्रवर्तकाः ॥१२२॥

तेषामेवानुमत्या वै कार्यमेतद्धि सिद्ध्यति ।
ततस्ते मिलिताः सर्वे देवा ब्रह्मादयस्तदा ॥१२३॥

ऋषयश्चैवमादित्यानूचुः किं कार्यमत्र हि ।
इत्येवमुक्ता आदित्या ऊचुर्देवाधिपान्मुनीन् ॥१२४॥

---

१२० घः मा स्मृतः—स्मृताः

१२२ घः मा जानेयुस्—जानीयुः

१२४ गः मा एत्येवमुक्ता—इत्येवमुक्ता

कालोपेतसोमसिद्धिक्षपाश्च निहिता हि नः ।
अतो यदपरं किञ्चित्तदस्यैव भवत्विति ॥१२५॥

यस्मिन्मासे नाधिकारः पूर्वस्य न परस्य वा ।
चैत्रादावस्य तत्रास्तु मार्तण्डस्य जगत्पतेः ॥१२६॥

इत्युक्ते तु तदादित्ये ब्रह्मसिद्धान्तदर्शनात् ।
गणितोद्भावनैः सर्वैरेवमेव तदाकरोत् ॥१२७॥

तदा प्रभृति तद्ब्रह्मसिद्धान्तगणितक्रमात् ।
सारं संवत्सरेऽस्यान्ते मानेन शशिजेन तु ॥१२८॥

एकादशान्तरिच्यते दिनानि प्रति वत्सरम् ।
मासद्वये साष्टमासे दिनषोडशकान्विते ॥१२९॥

नाडीचतुष्टयान्ते च पतत्येकोऽधिमासकः ।
चान्द्राश्चैत्रादयो मासा युक्ता मेषादिसंक्रमैः ॥१३०॥

संक्रान्तिरहितो मासो मलमासस्तथाधिकः ।
एवं विचार्य ब्रह्माद्या देवेन्द्रः कश्यपो तदा ॥१३१॥

अत्र - - - - - धिमासेऽस्मिन्मार्तण्डस्तव ।
चिरकालं यतोऽनेन भुक्ता सरसि यातना ॥१३२॥

---

१२७ घ: मा सर्वैमेवमेव—सर्वैरेवमेव

१२८ ख: मा गणिक्रमात्—गणितक्रमात

१२९ घ: मा षोडय—षोडश

दयया नापरं दध्मो वरमस्य महाद्युते: ।
अन्येषामादित्ये भानां स्वे स्वे कालेऽधिकारता ॥१३३॥

एतस्य सर्वमास्येषु सुकालात्संभविष्यति ॥१३४॥

अस्याधिकारेण त्वन्ये पूज्यसूर्यासूरैस्सह ।
सर्वेषामेव देवानामेषाचांत्र चाप्नुयात् ॥१३५॥

इति ब्रह्मादिभिर्देवैरभिषक्तो यदा तदा ।
अब्रुवन्किन्नु ते दद्यु: वरं ब्रूहि यथेप्सितम् ॥१३६॥

मार्तण्ड उवाच

मया पातकिभावेन चिरं भुक्त्वा हि यातना: ।
अतोऽनुभूतदु:खोऽहं याचे किमपि दुर्लभम् ॥१३७॥

महापातकिनो ये स्युरुपपातकिनस्तथा ।
ये केचित्पतिता लोके येषामन्यागतिर्नहि ॥१३८॥

प्रायश्चित्तं न येषां स्यादेतत्संसर्गिणोऽथवा ।
. . - - - - - - - - - - - - - - - - - - - ॥१३९॥

तेषां मात्राधिके मासे क्षेत्रे समविशेषत: ।
दोषाद्विमुक्तिर्भवतु तप्यतां स्व चिरं तथा ॥१४०॥

---

१३६ ग: मा दध्नो—दद्यु:

१३८ क: मा माया—महा

इति श्रुत्वा वचस्तस्य मार्तण्डस्य सुरेश्वरः ।
ऊचुर्ब्रह्मादयो देवाः सर्वैर्देवर्षिभिः सह ॥१४१॥

*ब्रह्मादय ऊचुः

ये केचिन्मानुष्ये लोके लुप्तपिण्डोदकक्रियाः ।
तेषां त्वदग्रदन्तेन पिण्डो नास्तु दिवाकरः ॥१४२॥

- - - - - - - - - - - - - - - - - - - ।
परा तृप्तिः परं सौख्यं स्वर्गप्राप्तिर्न संशयः ॥१४३॥

ये विशुद्धाश्च पितरो यथाविधिकृतक्रियाः ।
तेषां पिण्डप्रदानेन पुत्रा अनृण्यमाप्नुयुः ॥१४४॥

अन्यत्र देशकाले वा मार्तण्डं मलयो विना ।
क्रियते विष्णुश्राद्धादिविलम्बसहनाद्यदि ॥१४५॥

तत्रापि त्वदधीकाराः सन्निधे यो विधानतः ।
या तन्वादिना मुक्तिः पतितानां च सम्भवेत् ॥१४६॥

त्वदत्यन्तमिमां पुण्यां ये च श्रोष्यन्ति मानवाः ।
पितृमोक्षप्रदं तस्य श्राद्धमक्षयतां व्रजेत् ॥१४७॥

मार्तण्डस्य समुत्पत्तिरुक्तैवं मुनिसत्तमः ।
किमन्यत्प्रष्टुमिच्छास्ति श्रद्धया तद्ब्रवीमि च ॥१४८॥

---

*ब्रह्मा ऊचुः – ब्रह्मादयःऊचुः

१४६ गः मा तनत्वानिना—तन्वादिना

१४७ कः मा त्वदत्यन्निमिमां – त्वदत्यन्तमिमां

ऋषय ऊचुः

त्वत्प्रसादादयं जातः श्रद्धाविमलमानसः ।
श्रुत्वा मार्तण्डमाहात्म्यं गतभार इव प्रभो ॥१४९॥

अधुना श्रोतुमिच्छामो मुनेर्विष्णुबलिं क्रमम् ।
- - - - - - - - - - - - - - - - ॥१५०॥

पातकाः के समुदिष्टाः के महापातकास्तथा ।
तथोपपातकाःके स्युः तेषां शुद्धिक्रमः कथम् ॥१५१॥

*शौनका ऊचुः

ब्रह्महा मद्यपस्ते तु तथैव गुरुतल्पगः ।
एते महापातकिनो यश्चैते संवेसत्समम् ॥१५२॥

गुरूणामप्यविश्वासो वेदनिन्दासुहृद्वधः ।
ब्रह्महत्या समं ज्ञेयमधीतस्य च शासनात् ॥१५३॥

अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा ।
निक्षेपदानतस्यैव कोट्यल्पव्रतलोपनम् ॥१५४॥

आत्मनोऽर्थे क्रियारम्भो मद्यपस्त्रीनिषेवनम् ।
तथैवानाश्रमे वासः परान्नपरिभ्रष्टता ॥१५५॥

---

१४९ ख। मां धिमलमानसः— विमलमानसः
घः मा गतमार— गतभार
*शौनक ऊचुः— शौनका ऊचुः
१५४ घः मा कोष्यल्प—कोट्यल्प
१५५ घः मा परिभ्रष्ठता—परिभ्रष्टता

असच्छास्त्राभिगमनं मकारेष्वधिकारिता ।
भार्याया विक्रियश्चैषामेकैकमुपपातकम् ॥१५६॥

सखिभार्याकुमारीषु स्वयोनिष्वन्त्यजासु च ।
स्वगोत्रासु सुतस्तेषु गुरुतल्पसमं स्मृतम् ॥१५७॥

पितृस्वसां मातृस्वसां मातुलानीं स्नुषामपि ।
आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः ॥१५८॥

नो वधो भ्रातृहस्तेन ऋणदानमपक्रिया ।
अनाहिताग्नितापण्यविक्रियः परिदेवनम् ॥१५९॥

भ्रातृकाध्ययनादाने भृतकाध्यापनं तथा ।
परदार्यं विचित्यं वा पुण्यं लवणविक्रियः ॥१६०॥

स्त्रीशूद्रविट्क्षत्रवधो निन्दितार्थोपजीविनम् ।
नास्तिक्यं व्रतलोपश्च सुतानां परित्याजनम् ॥१६१॥

भूमौ विट्परिक्षेपं च परिनिन्दितया जनम् ।
चान्यरूपपशुस्ते यममाज्यानाचया जनम् ॥१६२॥

---

१५७ खः मा सुयोनि — स्वयोनि
गः मा सुगोत्रासु — स्वगोत्रासु
१५८ कः मा पितृसुसांमातृसुसां — पितृस्वसां मातृस्वसां
गः मा सुसुतां — स्वसुतां
१५९ खः मा दानमपक्रिया — दानमपक्रिया

परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितनुद्धिर्निवेशश्च मानसं त्रिविधं स्मृतम् ॥१६३॥

पारुष्यमनृते चैव पैशुन्यमपि सर्वशः ।
असंबद्धप्रलापश्च वाचिकं स्याच्चतुर्विधम् ॥१६४॥

अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥१६५॥

इत्येवं दशधानृणां पातकं कथ्यते बुधैः ।
शृणुध्वं विस्तरेणापि कथ्यमानं मुनीश्वराः ॥१६६॥

गोमातृपितृकन्यास्त्रीगुरुब्राह्मणघातकः ।
विषानशवभृग्वशस्त्राद्दग्धः न मारितः ॥१६७॥

अनाचाररतो यश्च आत्मघातक एव च ।
न चाग्रलुठितावेशात्पतितः शकटे हृतः ॥१६८॥

वापीकूपतडागादि एष कूर्मसहस्रकैः ।
चण्डालादुदकात्सर्पाद्ब्राह्मणा वै द्युताद्विषात् ॥१६९॥

दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणाम् ।
व्यापादयेद्य आत्मानं स्वयमग्न्युदकादिभिः ॥१७०॥

विहितं तस्य नाशौचं नापि कार्योदकक्रियः ।
शृङ्गिदंष्ट्रिनखव्यालविषवह्निमृगोजलैः ॥१७१॥

---

१६९ कः मा तडागादि—तडागादि
१७ चः मा तृगो—मृगो

आदरादपरिहर्तव्या कुर्वन् क्रीडां मृतो यमः ।
प्रमादादपि निःशङ्कास्त्वकस्माद्विधिश्चोदितः ॥१७२॥

शृङ्गिदंष्ट्रिनखव्यालविषविद्युज्जलाग्निभिः ।
चण्डालैरथवा चौरैर्निहतो यत्र कुत्रचित् ॥१७३॥

यस्य दाहादिकार्यं यस्मान्न पतितस्तु सः ।
नागानां विक्रयं कुर्वन्हतस्तैर्विषवह्निना ॥१७४॥

निगृहीतस्तु यो राज्ञा चौरदोषेण कुत्रचित् ।
परदाररतश्चैव द्वेष्या तत्पतिभिर्हतः ॥१७५॥

असमानैश्च सङ्कीर्णैश्चाण्डालाद्यैश्च विग्रहम् ।
कृत्वा तैः हितास्तां तु चण्डालादीन्समवस्थितान् ॥१७६॥

चौर्याग्निविषदाश्चैव पाखाण्डाः क्रूरबुद्धयः ।
क्रोधात्प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम् ॥१७७॥

गिरिवृक्षप्रपातं वा ये कुर्वन्ति नराधमाः ।
कुशिल्पजीविनो येऽपि सूनालङ्कारकारिणः ॥१७८॥

---

१७५ गः मा परदारनातश्चैव—परदाररतश्चैव

१७७ खः मा पाषाण्डाः —पाखाण्डाः

१७८ खः मा नराधमः—नराधमाः

गः मा जिनिनो— जीविनो

सुखे भवास्तु ये केचित्क्लीवप्राया नपुंसकाः ।
ब्रह्मदण्डहता ये च ये स्युर्ब्राह्मणैर्हताः ॥१७९॥

- - - - - - - - - - - - - - - - - ।

महापातकिनो ये च पतितास्ते प्रकीर्तिताः ॥१८०॥

उदकं पिण्डदानं च प्रेतेभ्यो यत्प्रदीयते ।
नोपतिष्ठति तत्सर्वमन्तरिक्षे विनश्यति ॥१८१॥

नारायणबलिः कार्यो लोकगर्हाभयान्नरैः ।
तस्मात्तेभ्योऽपि दातव्यमन्नमेवं सदक्षिणम् ॥१८२॥
नारायणं समुद्दिश्य शिवं वा यत्प्रदीयते ।
तस्य शुद्धावहं चैव तद्भवेन्न तदन्यथा ॥१८३॥

तेषां पौत्राश्च पुत्राश्च दयया समभिप्लुताः ।
यथा श्राद्धं प्रकुर्वन्ति विष्णुना वै प्रतिश्रुतम् ॥१८४॥

तेषामुद्धरणार्थाय बलिं विष्णोः प्रदापयेत् ।
यथा चैव प्रवक्ष्यामि नमस्कृत्य स्वयंभुवे ॥१८५॥

विष्णुश्राद्धं यदा कुर्यात्तदा कुर्वीत वत्सरं ।
द्वादशाहेऽथवा कुर्यात्त्र्यहमेकाहमेव च ॥१८६॥

---

१७९ गः मा हतः—हताः

१८० गः मा प्रकीर्तितः—प्रकीर्तिताः

१८२ गः मा तस्मातभ्यो—तस्मात्तेभ्यो

१८६ यः मा द्वावशोहे —द्वादशाहे

वत्सरं तु यदा कुर्यात्तत्रायं विधिरुच्यते ।
यस्मिन्मासे मृतः प्रेतः तच्छुक्लारम्भमाचरेत् ।।१८७।।

मलिम्लुचस्तु तं तांते स्थाप्यो यत्पापिमुक्तये ।
ब्रह्मादिभिर्वरो दत्तरुद्धरेत्तु नरकाद्विद्विजः ।।१८८।।

एवमेव द्वादशाहे विधिस्तत्रापि श्रूयताम् ।
शुक्ले या गमितत्वाद्विष्णोः शुक्लस्य नाम्नि कृत् ।।१७६।।

शुक्लप्रतिपदारभ्य द्वादश्यान्तं समापयेत् ।
प्रतिपद्द्वादश्यान्तं तु तिथिहानिर्यदा भवेत् ।।१९०।।

श्राद्धद्वयं यदेकस्मिन्विद्वांस्तद्दिवसे यजेत् ।
कदाचित्तिथिवृद्धिस्तु श्राद्धान्यपि पृथक् पृथक् ।।१९१।।

चतुर्दश्यां सोपवासं भुक्त्वा भूमौ स्वपेत्तु यः ।
कृष्णपक्षे नात्र शस्तो विष्णोः कृष्णस्य नाम्नि तत् ।।१९२।।

सूर्येन्दुसङ्क्रमदिने विधिनायं समेष्यति ।
अमावास्यां पूर्वाह्णे स्नात्वाथ श्रपयेच्चरुम् ।।१९३।।

---

१९२ कः मा मौमवसं—सोपवासं

सुपेद्यु—स्वपेत्

१९३ खः मा समिष्यत—समेष्यति

ताम्रे वा मृण्मये भाण्डे समुद्गैरिव तण्डुलैः ।
शुक्लैः प्रक्षालितैस्त्वन्नैर्विसश्रृङ्गाटकान्वितैः ॥१९४॥

तिलैर्द्राक्षैश्च किंशुकैर्यवसर्षपमिश्रितैः ।
शुभे चरौ पुनस्तत्र गुरुद्विजेन्द्रसन्निधौ ॥१९५॥

अवगाह्य नाभिमात्रं तीर्थं दर्भतिलान्वितम् ।
'स्योना पृथिवीति' सप्तर्चं त्विदमाज्यं प्रयत्नतः ॥१९६॥

तर्पयित्वा प्रेतनाम्ना दद्यात्सप्ततिलाञ्जलीन् ।
स्थूलमारुह्योपवासस्त्यक्त्वा कौपीनमाहरेत् ॥१९७॥

मृद्भिश्च करशुद्धं तु कृत्वात्र च विधानतः ।
उदक्स्थितो च कलशो विष्णुं चैव स्तुतं तथा ॥१९८॥

'अश्विनोः प्राण' इत्याद्यैः स्वैस्स्वैर्मन्त्रैश्च वै ।
पूज्यं ते पौरुषं सूक्तं जप्त्वातस्तर्पयेद्विधिः ॥१९९॥

---

१९४ घः मा विकश्रृङ्ग — विसश्रृङ्ग

१९५ खः मा सर्पप — सर्षप

१९६ गः मा पृथ्वी — पृथिवी

१९७ गः मा आरोह्य — आरुह्य

१९८ गः मा कलशौ — कलशो

१९९ खः मा स्वैस्वैर्मन्त्रै — स्वैस्स्वैर्मन्त्रैः

घः मा विधि — विधिः

तावेव देवौ पापघ्नो द्विजेन्द्राभ्यामथार्चयेत् ।
दक्षिणाभिमुखः सर्वैर्विधानं सम्यग्व्रजेत् ॥२००॥

ततस्तिलोदकं दद्यात्प्रेता वासुकविष्णवे ।
सर्वपापनिवृत्यर्थं विष्णुपादास्तु ये सुताः ॥२०१॥

ततो दद्यात्प्रयत्नेन दशपिण्डान्विधानतः ।
प्रेताय प्रथमं पिण्डं यमाय व्यापिनेऽर्पयेत् ॥२०२॥

द्वितीयं वासुदेवाय धर्मराजायापि ततः ।
नारायणाय तृतीयं न्यसेद्वै मृत्युव्यापिने ॥२०३॥

शिवाय तु चतुर्थं चैव सुतव्यापिनेऽर्पयेत् ।
यमाय पञ्चमं कालपाशव्यापकधर्मिणे ॥२०४॥

षष्ठं पिण्डं भवायाथ चान्तकव्यापिने न्यसेत् ।
सप्तमत्याधिरूपाय सर्वप्राणहराय च ॥२०५॥

अष्टमं व्योमरूपाय परमेष्ठिसुरूपिणे ।
नवमं ब्रह्मणे पिण्डं चित्रगुप्तात्मकाय च ॥२०६॥

---

२०० गः/घः मासर्वैविधान—सर्वैर्विधानं

२०१ कः मा ततः स्तिलोदक—ततस्तिलोदक

२०२ गः मा प्रताय—प्रेताय

२०० गः मा नारायण—नारायणाय

२०४ घः मा पाशायपक—पाशव्यापक

इति विष्णुक्रियायास्तु दशपिण्डार्पणे विधिः ।
तिलक्षीरान्वितान्दद्याद्वर्तुलान्करपूरकान् ॥२०७॥

दक्षिणाभिमुखे विष्णुं ध्यात्वा क्षिपेज्जलान्तरे ।
पिण्डं दद्याद्वाञ्जलीन्दद्यात्कुम्भं तु तिलमिश्रितम् ॥२०८॥

प्रेतकुम्भं ततो ध्येयं तिलाज्यमधुमिश्रितम् ।
दीपं दद्यादहोरात्रं तीर्थाग्रे तिलतैलतः ॥२०९॥

तीर्थं प्रणम्य विधिवन्प्रणामञ्च यतस्ततः ।
— — — — — — — — — — ॥२१०॥

निमन्त्रयते विप्रान्वै पञ्च-सप्त-नवाथवा ।
विद्यातपसम्पन्ना यँ कुलोत्पन्ना समाहिताः ॥२११॥

ततो जागरणं कुर्यान्नृत्तगीतसमन्वितम् ।
अपरेऽहनि सम्प्राप्ते प्रातः स्नात्वा तु शक्तितः ॥२१२॥

गवां तु लवणं दत्वा प्रकुर्याच्चरुसाधनम् ।
उन्मनः सुमनो मानी देवदेवमथवार्चयेत् ॥२१३॥

---

२०७ घः मा वर्तलान्—वर्तुलान्

२०९ घः मा तोर्थाग्रो—तीर्थाग्रे

२११ कः मा सम्पन्नान्—सम्पन्ना

२१२ गः मा अहानि—अहनि

वामे शक्तिधरं देवं शंखचक्रगदाधरम् ।
वेदोक्तैः संहितोक्तैश्च मन्त्रैरौंद्रैश्च वैष्णवैः ॥२१४॥

'जितंत' मंत्रेण सूक्तेन पौरुषेण च ।
तस्याग्रे कलशेभ्यश्च पूजयेत्पञ्चकारणान् ॥२१५॥

भूमि जलञ्च तेजश्च वायुराकश एव च ।
इत्थं विष्णवादिरूपाणि पञ्चशोधनकारणम् ॥२१६॥

विष्णुं प्रथमतो देवं ब्रह्माणं च शिवं यमम् ।
प्रेतं च मनसि स्मृत्वा विष्णुमेवात्र पञ्चमम् ॥२१७॥

प्रतद्विष्णुर्ब्रह्मा देवः शिवो भूत्वा शिवस्य च ।
यमस्य यमो दाधार अहं पितृंश्च पञ्चमम् ॥२१८॥

ततः सर्वमयं यन्त्रं पूजार्थं चार्चयेद्विधिम् ।
प्रतिमासं विष्णुर्नाम्ना निर्वपेत्प्रायसं चरुम् ॥२१९॥

तत्रबृहत्पौरुषं *—वकूष्माण्डानि तिलैर्यजेत् ।
आरम्भं तु यदा कुर्यात्तदा शुक्ली विधीयते ॥२२०॥

मलिम्लुचतन्त्रांते च कर्मसम्पत्तिहेतवे ।
दत्वा पूर्णां वैश्वदेवं विष्णुनामाष्टकं यजेत् ॥२२१॥

---

२१४ घः मा मन्त्रैरौद्रैः—मन्त्रैरौद्रैः

*त्रुटितोऽत्र पाठः

'जितंत' इति मन्त्रेण स्मृत्वा विप्रान्प्रपूजयेत् ।
अर्चावाहनपाद्यार्घ्यगन्धार्घपुष्पधूपकं: ॥२२२॥

धूपदीपोपवीतश्च पात्रेषूदकमर्चयेत् ।
विप्राणां दक्षिणे भागे उदग्रा ग्रासनानि च ॥२२३॥

दद्यादुदकपूर्वाणि सव्येनैव प्रदक्षिणम् ।
अमुकस्य विष्णुश्राद्धं सावित्रादिञ्च निर्वपेत् ॥२२४॥

'इदं विष्णव' इत्यादि इदममुकविष्णवे ।
श्रुतमन्नमभिधाय स्वयं हुयादाहुतिद्वयम् ॥२२५॥

प्रणवं मनसा ध्वात्वा तूष्णीं होमो विधीयते ।
पृथिवीपात्रमिदं विष्णोर्विष्णुहव्यं जपेद्विधिः ॥२२६॥

सर्वमुच्छिष्टमित्युक्त्वा स्वापो शान्तं जलं तथा ।
भूमौ क्षिपेत्साधितान्नं मन्त्रं त्वपहता: सुरा: ॥२२७॥

गायत्रीमधुवातश्च भोजनैर्वैष्णवाञ्जपेत् ।
मनो निवेश्य विष्णौ वै स वै कुर्यादतन्द्रित: ॥२२८॥

आवाहनादि यत्प्रोक्तं देवपूर्वं तु तद्भवेत् ।
तृप्ताञ्ज्ञात्वा तु तान्सर्वांस्तृप्तिं दृष्ट्वा यथाविधिः ॥२२९॥

---

२२५ ग: मा—सुवं-स्वयं
२२६ ग: मा पृथ्वी —पृथिवी
२२७ ख: मा शान —शान्तं
२२८ घ: मा सर्वे—स वै

हविष्यव्यञ्जनेनैव तिलादिसहितेन च ।
पञ्चपिण्डप्रदद्यार्हं संयुतो दक्षिणाभिमुखः ॥२३०॥

प्रथमं विष्णवे दद्याद्ब्रह्मणे च शिवाय च ।
यमाय सपरिवाराय चतुर्थं पिण्डमुत्सृजेत् ॥२३१॥

विष्णुनाम गृहीत्वेवं पञ्चमं पूर्ववत्क्षिपेत् ।
विप्रान्प्रणम्य विधिवद्दक्षिणाभिस्समर्चयेत् ॥२३२॥

एकं वृद्धतमं विप्रं हिरण्येन समर्चयेत् ।
गवा वस्त्रेण भूम्या च प्रेतस्य मरणात्स्मरन् ॥२३३॥

ततस्तिलाम्भो विप्रांस्तु हस्ते दर्भसमन्वितम् ।
मित्रभृत्यजनैः सार्धं पश्चाद्भुञ्जीत वाग्यतः ॥२३४॥

बहिर्गत्वा तिलाम्भस्तु हस्ते दर्भसमन्वितम् ।
दक्षिणाभिमुखं स्थित्वा देयं हस्ततिलोदकम् ॥२३५॥

अमुकामुकगोत्रस्य विष्णुश्राद्धे कृते ध्रुवम् ।
धौतपापस्य तस्येदं तृप्तिरस्तु तिलोदकम् ॥२३६॥

अथ द्वादशमासेषु प्रकुर्याद्विष्णुपूजनम् ।
मार्गशीर्षादिमासेषु केशवं प्रथमं प्रभुम् ॥२३७॥

---

२३१ ख: मा शिवावा – शिवाय

२३३ ग: मा समर्चतये— समर्चयेत् ।

नारायणं माधवाख्यं गोविन्दं विष्णुमेव च ।
मधुसूदनमत्राथ त्रिविक्रममथैव च ॥२३८॥

पद्मनाभं तथा चैव दामोदरमथापि वा ॥२३९॥

मार्गशीर्षादिमासेषु केशवाद्या प्रपूजयेत् ।
श्रियो वागीश्वरी कान्ता क्रियाशक्तिविभूतयः ॥२४०॥

इच्छाप्रीतिरतिश्चैव मायाधीमहिमेति ।
क्रमेणैव द्वादशैव कीर्तिता विष्णुशक्तयः ॥२४१॥

ब्रह्मा पितामहः * - - - - - स्रष्टुस्तथैव च ।
हिरण्यगर्भसंज्ञश्च चतुर्मुखस्तथापरः ॥२४२॥

लोकेशः पद्मजन्मा च विधातृकः प्रजापतिः ।
सुरे ज्येष्ठस्तथा चान्यं परमेष्ठिनमर्चयेत् ॥२४३॥

एते द्वादशब्रह्माणो मासेषु द्वादशेष्वपि ।
गायत्री शक्तिमाता च पतिव्रता तु ब्राह्मणी ॥२४४॥

विश्वात्मेत्यादि पत्नीशसृष्टिश्चैव विधातृकः ।
धात्री समाहिता चाथ ब्राह्मी तु द्वादशी स्मृता ॥२४५॥

एवं द्वादशशक्तीनां क्रमात्मासानुपूजयन् ।
शिवो रुद्रो वृषश्चैव त्रिनेत्रो वृषभवाहनः ॥२४६॥

---

*त्रुटितोऽत्र पाठः

२४६ घ: मा त्रिनोत्री - त्रिनेत्रो

त्र्यम्बकश्च महादेव उमापतिस्तथैव च ।
हरोऽप्यथ च श्रीकण्ठी भव ईशान एव च ॥२४७॥

एवं द्वादश नामानि मार्गशीर्षादि पूजयेत् ।
- - - - - - - - - - - - - - - - - - ॥२४८॥

गौरी कात्यायनी दुर्गा तथा चोमा शिवाभिधा ।
अम्बा चैव शर्वाणी योगीश्वरी च पार्वती ॥२४९॥

रुद्रपत्नी भवानी च महावागीश्वरी क्रमात् ।
धर्मराजा पितृपतिर्यमो चैव सुतस्तथा ॥२५०॥

दण्डवायंतकश्चैव श्राद्धदेवस्तु कालकः ।
परीतरात्महिषस्थः कीनाशस्तु कृतांतकः ॥२५१॥

यमा द्वादशसंख्याः पूज्यन्ते प्रतिमासकम् ।
यमी या मे कालपत्नी मृत्यकी ह्यान्तकी तथा ॥२५२॥

भयङ्करी चोर्ध्वकेशी तमी धूमी तथैव च ।
छिद्रिणी मोहिणी चैव लोकसंहारकारिणी ॥२५३॥

---

२४७ गः मा श्रीकटः—श्रीकण्ठी

२५० घः मा वैव—चैव

२५१ घः मा कृतांततकः—कृतांतकः

२५२ घः मा मृत्यके ह्यान्तके—मृत्यकी ह्यान्तकी

२५३ गः मा मोहिणे—मोहिणी

शक्त्यश्च यमस्यंता विष्णुश्राद्धे प्रपूजयेत् ।
द्वादशंतानि नामानि कीर्तितानि विष्णुना ॥२५४॥

तण्डुलं विष्णवे दद्यात्मुद्गमत्कात्मजस्य च ।
निवेदयेच्च पक्वं हि नाम बुद्धौ निवेश्य च ॥२५५॥

मलिम्लुचे त्वेक एव पञ्चकारणरूपधृत् ।
नरकारिः सत्यभामा सहितेऽत्र पूजयेत् ॥२५६॥

अथ त्रिरात्रं कुरुते यस्तस्यैष विधिक्रमः ।
नवम्यामेव पूर्वोक्तं कृत्वाथ चरुसाधनम् ॥२५७॥

पूर्वोक्तविधिना दद्याद्दशपिण्डान्यथायथम् ।
दशम्यां चतुरो मासि धीमान्विष्णवादीन्यजेत् ॥२५८॥

एकादश्यां च चतुरो द्वादश्यां पञ्चतस्तथा ।
मलिम्लुचाधिपतिना सहितान्नरकारिणा ॥२५९॥

तथैकरात्रे यः कुर्यात्सर्वमासेशं पूजयेत् ।
. . . . . . . . . . . . . ; . ॥२६०॥

एवं विष्णुपदे स्थित्वा यः कुर्यादात्मवादिने ।
समुद्धरति तं क्षिप्रं नात्र कार्या विचारणा ॥२६१॥

---

२५५ घः मा नाग—नाम

२५७ खः मा क्रमाः—क्रमः

२५८ घः मा धिमान्—धीमान्, विष्णुदिन्—विष्णवादीन्

२६१ खः मा वातिने—वादिने

शुद्धानामपि यः कुर्यात्पितॄणां य इमां विधिम् ।
स तेषामनृणी भूत्वा स्वर्गे कल्पं सुखी वसेत् ॥२६२॥

अश्वमेधसहस्रस्य वाजिपेयशतस्य च ।
फलं लभते सः प्रेतान्नरकादुद्धरिष्यति ॥२६३॥

पतितेभ्यः क्रियां कुर्याद्यो विष्णुबलिपूर्वकम् ।
विष्णुलोकमवाप्नोति नात्र कार्या विचारणा ॥२६४॥

न कुर्वन्ति तद्धै मोहात्पतितेभ्यः सुताः क्रियाम् ।
इह ते दुःखिता भूत्वा मृताः नरगामिनः ॥२६५॥

न तेषां कुत्रचित्सिद्धिः सम्भवेदत्र कर्मणि ।
त एवाल्पायुषो नष्टाः प्रजाः स्युरथ रोगिणः ॥२६६॥

ये तु कुर्वन्ति तेषां स्यादारोग्यं संततिः स्थिरा ।
लक्ष्मी बुद्धिश्च धर्मश्च सिद्धिश्चैवं पदे पदे ॥२६७॥

तेनाग्रयोद्भूताः सम्यक्वितरस्तेन तर्पिताः ।
देवताः पूजितास्तेन पितृभ्यः शोधयिष्यति ॥२६८॥

यथा निर्मथनादग्निः सर्वकार्येषु दृश्यते ।
तथा च दृश्यते धर्मः पितृश्राद्धे न संशयः ॥२६९॥

---

२६३ गः मा लभति—लभते

२६५ कः मा तद्यो —तद्धै

घः मा मृतः—मृताः

२६६ गः मा एवाल्पयुषो—एवाल्पायुषो

घनमुक्तो यथा सूर्यो राहुमुक्तश्च चन्द्रमा ।
तथा पापनिर्मुक्तः श्राद्धकर्ता न संशयः ॥२७०॥

मेरुतुल्यकृतं पापं विष्णुश्राद्धे विशिष्यते ।
पुत्रो वा भ्रातरो वापि दौहित्रः पौत्रकस्तथा ॥२७१॥

विष्णुश्राद्धस्य कर्तारस्ते यान्ति परमां गतिम् ।
इदं मार्तण्डमाहात्म्यं विष्णुश्राद्धसमन्वितम् ॥ २७२॥

ये पठन्ति च शृण्वन्ति श्रावयिष्यन्ति वा तथा ।
इह लोके यशः प्राप्य अन्ते यान्ति परां गतिम् ॥२७३॥

विद्यार्थी लभते विद्यां धनकामो लभेद्धनम् ।
आयुष्कामस्तथैवायुः श्रीकामो लभते श्रियम् ॥२७४॥

एतत्पवित्रमारोग्यं न वाच्यं त्वकृतात्मनाम् ।
द्विजा द्विजानां श्रद्धदानां श्राव्यमेतन्न संशयः ॥२७५॥

वदतां शृण्वतां पुंसां सर्वपापप्रणाशनम् ।
विष्णुसायुज्यतां पुंसां स्त्रीणां सुलोकदं द्विजः ॥२७६॥

बहुनात्र किमुक्तेन भूयो भूयो मुनीश्वरः ।
अ—द्धया श्रद्धया वा श्रोतव्यमिदमुत्तमम् ॥२७७॥

इति श्रीकाश्मीरखण्डे ब्रह्मपुराणे मार्तण्डमाहात्म्यं समाप्तम्

# अथ नीलनागमाहात्म्यम्

## ॐ श्रीगणेशाय नमः

श्रीवसिष्ठ उवाच

ॐ लम्बोदरस्य माहात्म्यं श्रुत्वा प्रीतोऽस्मि पद्मज ।
इदानीं श्रोतुमिच्छामि नीलनागस्य वै फलम् ॥१॥

श्रीब्रह्मा

शृणु पुत्र प्रवक्ष्यामि कथां पौराणिकीं शुभाम् ।
यच्छ्रुत्वा प्राप्यते जन्तुरश्वमेधस्य वै फलम् ॥२॥

यः कश्चिन्मानवो ह्यत्र कुर्यात्स्नानञ्च मे प्रिय ।
दानं तपश्च होमञ्च ह्यक्षय्यं फलमश्नुते ॥३॥

पातालादुत्थितः पूर्वं प्रह्लादो दानवो भुवि ।
तपश्चचार ह्यत्रैव वर्षाणामयुतं तथा ॥४॥

ततः प्रसन्नो भगवाञ्छङ्खचक्रगदाधरः ।
प्रह्लादं प्रत्युवाचोच्चैर्गिरा मधुरया तथा ॥५॥

श्रीभगवान्

उत्तिष्ठोत्तिष्ठ भद्रं ते वरं वरय सुव्रत ।
त्वद्भक्त्या च प्रसन्नोऽहं ह्यदेयं नास्ति मे त्वयि ॥६॥

प्रह्लाद उवाच

यदि प्रसन्नो भगवान्वासुदेवो जनार्दनः ।
त्वत्पादस्मरणे चित्तं ह्यस्तु मे सर्वशस्तदा ॥७॥

श्रीभगवान्

एवमेतत्तु दैत्येन्द्र यद्वरं प्रार्थितं त्वया ।
श्रावणस्य सिते पक्षे पञ्चदश्यां प्रयत्नतः ॥८॥

यः कश्चिन्मानवो ह्यत्र स्नायाद्भक्त्या च संयुतः ।
मत्पार्श्वे वसतिस्तस्य मुक्तो भवति संसृतेः ॥९॥

इत्युक्त्वान्तर्दधे विष्णुर्वरं दत्वात्र तस्य वै ।
प्रह्लादोऽपि कृतार्थोऽभूत्स्वस्थानं च गतः पुनः ॥१०॥

श्रीब्रह्मोवाच

पुरा त्रेतायुगस्यादौ यथावृत्तं तपोधन: ।
एको विपणिवृत्तिस्थः सुधर्माढ्योऽभवद्वणिक् ॥११॥

धनाढ्यो गुणवान्भोगी नानाशस्त्रविशारदः ।
स त्वेकदा निजात्स्थानात्परराष्ट्रं गतो यतः ॥१२॥

सार्थेन महता युक्तो नानाविपणपण्यवान् ।
गच्छतः पथितस्याथ वने ह्यस्मिन्तपोधनः ॥१३॥

अभवद्दस्युतो रावो अवस्कन्दोऽतिदुःसहः ।
ततः स हृतसर्वस्वो वणिग्दुःखसमन्वितः ॥१४॥

असहायो वने ह्यस्मिञ्चचारोन्मत्तवद्वशी ।
चरता तदरण्यं वै दुःखाक्रान्तेन मे प्रिय ॥१५॥

श्रान्तः क्षुत्तृड्व्यपरीतात्मा वृक्षमूले ह्युपाविशत् ।
सुप्तश्चापि सुविश्रान्तो मध्याह्ने पुनरुत्थितः ॥१६॥

समपश्यदथायान्तं प्रेतं प्रेतशतैर्वृतम् ।
तद्वा ह्यन्तमथान्यैश्च प्रेतैस्तं प्रेतनायकम् ॥१७॥

अथाजगाम प्रेतोऽसौ पर्यटित्वा वनानि च ।
उपगम्य शमीमूले वणिक्पुत्रं ददर्श सः ॥१८॥

स्वागतेनाभिवाद्यैनं समाभाष्य परस्परम् ।
सुखोपविष्टच्छायायां पृष्ट्वा कुशलमाप्तवान् ॥१९॥

ततः प्रेताधिपतिना पृष्टः स तु वणिक्सुतः ।
कुत आगम्यते ब्रूहि क्व साधो वा गमिष्यसि ॥२०॥

कथञ्चेदं महारण्यं मृगपक्षिविवर्जितम् ।
समापन्नोऽसि भद्रं ते सर्वमाख्यातुमर्हसि ॥२१॥

एवं प्रेताधिपतिना वणिक्पृष्टः समासतः ।
सर्वमाख्यातवान्ब्रह्मन्स्वदेशं धर्नविच्युतिम् ॥२२॥

तच्च श्रुत्वा स वृत्तान्तं तस्य दुःखेन दुःखितः ।
वणिक्पुत्रं वचः प्राह प्रेतपालः स्वबन्धुवत् ॥२३॥

एवं गतेऽपि मा शोकं कर्तुमर्हसि सुव्रत ।
भूयोऽप्यर्था भविष्यन्ति यदि भाग्यबलं तव ॥२४॥

भाग्यक्षयेऽर्था क्षीयन्ते भवन्त्यभ्युदये पुनः ।
क्षीणस्यास्य शरीरस्य चिन्तया नोदयं भवेत् ॥२५॥

इत्युच्चार्य समाहूय स्वान्प्रेतान्वाक्यमब्रवीत् ।
अद्यातिथिरत्र पूज्यः सह देशजनो मम ॥२६॥

अस्मिन्समागते प्रेताः प्रीतिर्जाता समातुला ।
एवं हि वदतस्तस्य मत्पात्रं सुनवं दृढम् ॥२७॥

दध्योदनेन सम्पूर्णमाजगाम यथेप्सितम् ।
वारिधा नीचसंप्राप्ता प्रेतानामग्रतः स्थिता ॥२८॥

तमागतं सलिलमन्नं वीक्ष्य महामहामतिः ।
प्राहोत्तिष्ठ वणिक्पुत्र त्वमाह्निकमुपाचर ॥२९॥

ततस्तु वारिधान्यास्तौ सलिलेन विधानतः ।
कृताह्निकावुभौ जातौ वणिक्च प्रेतपस्तथा ॥३०॥

ततो वणिक्सुते चादाद्दध्योदनमथेच्छया ।
दत्वा तेभ्यश्च सर्वेभ्यः प्रेतेभ्योऽथाददात्ततः ॥३१॥

भुक्तवत्सु च सर्वेषु कामतोऽम्भसि सेविते ।
अनन्तरं च बुभुजे प्रेतपालो वराशनम् ॥३२॥

प्रकामतृप्ते प्रेते वै वारिधान्योदनैस्ततः ।
अन्तर्धानमगाद्ब्रह्मन्वणिक्पुत्रस्य पश्यतः ॥३३॥

ततस्तदद्भुतं दृष्ट्वा सुधर्माख्यो वणिक्तदा ।
पप्रच्छ तं प्रेतपालं कौतूहलमनावशी ॥३४॥

अरण्ये निर्जले साधो कुतोऽन्नस्य समुद्भवः ।
कुतश्च वारिधानीयं सम्पूर्णा परमांभसा ॥३५॥

तथा मे तव ये भक्ता स्वतस्ते वर्णतः कृशाः ।
भवानपि च तेजस्वी किञ्चित्पुष्टवपुः शुभः ॥३६॥

शुक्लवस्त्रपरीधानो बहूनां परिपालकः ।
सर्वमेतन्समाचक्ष्व को भवान्का शमीत्वियम् ॥३७॥

इत्थं वणिक्सुतवचः श्रुत्वासौ प्रेतनायकः ।
शशंस सर्वमासाद्यं यथावृत्तं पुरातनम् ॥३८॥

अहमासम्पुरा विप्र काश्मीरे नगरोत्तमे ।
सोमशर्मेति विख्यातो बहुलागर्भसम्भवः ॥३९॥

वणिग्भृत्यो धनाढ्योऽहं विष्णुभक्तो जितेन्द्रियः ।
सोऽहं कदर्यो मूढात्मा धनेऽपि सति दुर्मतिः ॥४०॥

न ददामि द्विजातिभ्यो न चाश्नाम्यन्नमुत्तमम् ।
एवं तत्रासतो मह्यं महत्कालोऽभ्यगादथ ॥४१॥

नभस्य पञ्चदश्यां वै चागतोऽहं प्रसङ्गतः ।
ह्यस्मिन्तीर्थे विष्णुक्षेत्रे नागे नीले तथैव च ॥४२॥

अत्र तीर्थे कृतं दानं वारिपात्रं दृढं नवम् ।
सम्पूर्णवस्त्रं संवीतं छत्रोपानहसंयुतम् ॥४३॥

मृत्पात्रमपि मिष्टस्य सम्पूर्णं दध्योदनस्य ह ।
प्रदत्तं ब्राह्मणेन्द्राय शुचये ज्ञातकर्मकः ॥४४॥

तदेकं जीवतादत्तं मया दानं वणिक्सुत ।
वर्णाणां सप्ततीनां वै नान्यद्दत्तं कदाचन ॥४५॥

प्रमादात्तत्र भुञ्जामि दधिक्षीरघृतान्वितम् ।
ततो रात्रौ नृभिर्घोरैस्ताप्यते मम विग्रहः ॥४६॥

प्रातर्भवति मे घोरा मृतितुल्या विषूचिका ।
न च कश्चिन्ममाभ्याशे तत्र तिष्ठति बान्धवः ॥४७॥

मृतः प्रेतत्वमापन्नो दत्वा प्रेतानिमानपि ।
अमी चादत्तदानास्तु मद्दत्तेनोपजीविनः ॥४८॥

एदत्ते कारणं प्रोक्तं यत्तदन्नं मया सदा ।
दत्तं तदिदमायाति मध्याह्नेऽपि दिने दिने ॥४९॥

यावन्नाहं च भुञ्जामि न तावत्क्षयमेति वै ।
मयि भुक्ते च पीते च सर्वमन्तर्हितं भवेत् ॥५०॥

इत्येवमुक्ते वचने वणिक्पुत्रोऽब्रवीद्वचः ।
यन्मया तात कर्तव्यं तदज्ञानात्त्वमर्हसि ॥५१॥

तस्य तद्वचनं श्रुत्वा वणिक्पुत्रस्य सुव्रत ।
प्रेतपालो वचः प्राह स्वार्थसिद्धिकरं ततः ॥५२॥

कुरु स्नानमत्र तीर्थे नागे नीले तथैव च ।
तत्पुण्यं च प्रयच्छाशु मयि प्रेतत्वनाशनम् ॥५३॥

इत्येवमुक्त्वा च तदा प्रेतराजोऽनुगैः सह ।
प्रेतस्कन्दे समारोप्य त्याजितो मरुमण्डलम् ॥५४॥

स्वकर्मधर्मयोगेन धनमर्थमनुत्तमम् ।
उपार्जयित्वा प्रययौ नागं नीलं तथैव च ॥५५॥

स्नानं दानं तथा यज्ञं कृत्वा तस्मै फलं ददौ ।
तत्क्षणादेवमुक्तोऽसौ ब्रह्मलोकं गतश्च सः ॥५६॥

श्रीब्रह्मोवाच

इत्येतन्नीलनागस्य माहात्म्यं कथितं मया ।
एभिर्मन्त्रैः प्रकुर्वीत पूजां विष्णोरतन्द्रितः ॥५७॥

ॐ हरिं कृष्णं-हृषीकेशं वासुदेवं जनार्दनम् ।
प्रणतोऽस्मि जगन्नाथं स मे पापं व्यपोहतु ॥५८॥

चराचरगुरुं नाथं गोविन्दं शेषशायिनम् ।
प्रणतोऽस्मि परं कृष्णं स मे पापं व्यपोहतु ॥५९॥

नारायणं नरं शान्तं माधवं पुरुषोत्तमम् ।
प्रणतोऽस्मि धराधारं स मे पापं व्यपोहतु ॥६०॥

शङ्खिनं चक्रिणं देवं शार्ङ्गिणं स्रग्धरं वरम् ।
प्रणतोऽस्मि पतिं लक्ष्म्याः स मे पापं व्यपोहतु ॥६१॥

यथा सर्वेषु भूतेषु गूढोऽग्निरिवदारुषु ।
विष्णुरेव तथा पापं ममाशेषं प्रणश्यतु ॥६२॥

श्रीब्रह्मोवाच

यत्किञ्चित्क्रियते कर्म शुभं वाप्यशुभं तथा ।
सर्वं मेरुसमं दानं चेति सत्येन ते शपे ॥६३॥

इत्येष पटलो गुह्यो महापातकनाशनः ।
त्रिविधं नश्यते पापं पुण्यराशिश्च वर्धते ॥६४॥

इतिहासमिमं श्रुत्वा प्राप्नोति परमं पदम् ॥६५॥

इति श्री आदिपुराणे श्रीब्रह्मावसिष्ठसम्वादे नीलनागमाहात्म्यं
नाम पटलः सम्पूर्णमिति भद्रम् । ॐ तत्सच्छिवमोम् ।
सम्वत् ९०९ पौषशुति द्वादश्यां परे त्रयोदश्यां
शनौ ॥ ॐ ॐ ॐ ॥

## परिशिष्टम्—२

# भृङ्गीशसंहिता

### श्लोकानामकारादिक्रमः

| प्रथम: पादः | पृष्ठम् |
|---|---|
| घोरे कलियुगे देवि | ९९ |
| घोरे कलियुगे प्राप्ते | ६३१ |
| घोरेण तमसा यत्र | ४७१ |
| घटे पात्रं तिलैः पूर्णम् | ३९ |
| घोरे प्रतिभयो रौद्री | १९९ |
| घोरेशसञ्ज्ञता देवी | ४९५ |
| घोरैर्युक्तः पातकः नित्य | १८३ |

| प्रथमः पादः | पृष्ठम् | प्रथमः पादः | पृष्ठम् |
|---|---|---|---|
| दृष्ट्वा शिवं महादेवि | ५५३ | देवानामादिकर्तारम् | ३९७ |
| दृष्ट्वा समागतारूढा | १०६ | देवानां दुर्लभं यन्वम् | २२४ |
| दृष्ट्वा समुत्थितां तां तत्र | ८४ | देवानां दुःखदो भूत्वा | ११ |
| दृष्ट्वा साङ्कर्षणीं ज्वालाम् | ६२४ | देवानां वदतो वेत्थम् | २९९ |
| दृष्ट्वा स्मृत्वा महापीठम् | २०४ | देवान्नुतिपरान्दृष्ट्वा | ४३५ |
| दृष्ट्वा स्वायम्भवं वह्निम् | ७९ | देवान्पितॄनुद्दिश्य | ६३० |
| दृष्ट्वा हरिर्भैरवञ्च | ३४ | देवान्प्रोवाच भगवान् | १५३ |
| दृष्ट्वाहारं पुनर्नद्योः | ४७२ | देवा बभूवुर्देवेशि | ८९ |
| दृष्ट्वैतच्चरितं तस्य | ३५२ | देवा भाद्रत्रयोदश्याम् | ५३८ |
| देवकस्य मुनेस्तीर्थम् | ५०७ | देवालये महाग्रामे | ५० |
| देवकस्य मुनेस्तीर्थे | ५०७ | देवाश्च ऋषयश्चैव | ३५ |
| देवतघ्नो कुविधिना | ५२० | देवाश्च सर्वे देवेशी | ५३ |
| देवता मुनयश्चैव | ८९ | देवाश्च स्व स्वं भवनम् | ६४ |
| देव देव महादेव | ९ | देवास्तु प्रथमां कक्ष्याम् | ११३ |
| देव देव महादेव | १० | देवास्ते मृत्युना ग्रस्ता | ४३२ |
| देव देव महादेव | ६२३ | देवांस्तानाह भगवान् | ६२५ |
| देव देव महादेवम् | ३ | देवाः पूजापरा आसन् | ४९३ |
| देव देहि परं नाथ | १३ | देवाः श्रुत्वा वचस्तस्य | ६१२ |
| देवस्याग्रे स्थिता देवी | ४६० | देवाः सिद्धर्षयश्चैव | २११ |
| देवं तमर्चयित्वा च | ९४ | देवी क्रुद्धा जगन्माता | १३१ |
| देवं वाङ्मनसातीतम् | २८१ | देवीनामुद्धर्तं यस्मात् | १३२ |
| देवं श्रीत्रिजटं त्रिलो० | ३२ | देवीनाञ्च बुधैः प्रोक्तम् | ३५८ |
| देवः प्रोवाच तान्देवि | ५९६ | देवीपीठमिदं प्रोक्तम् | १९६ |
| देवः प्रोवाच दृष्ट्वा तत् | ३५५ | देवी प्रसादजाताय | २२० |
| देवर्षयश्च सिद्धाश्च | ६९३ | देवीं तां पार्वतीमग्रे | ४५९ |
| देवा अपि च काङ्क्षन्ति | ६७९ | देवेन सान्त्वितायास्तु | ६१५ |
| देवा अपि हि काङ्क्षन्ते | ५१५ | देवैर्यज्या कृता यत्र | ७८ |

| प्रथम: पादः | पृष्ठम् |
|---|---|
| यात्रां कृत्वा व्रजेद्देवं | २४ |
| यात्रां वद महेशान | ४५ |
| या धारा लोहिता काया | २२० |
| यानकामोऽत्र चेशानि | २०१ |
| यानि कानि च पापानि | ९७ |
| या निस्सृता च धारा | ४३८ |
| यान्तीं दृष्ट्वा नदी | ६५४ |
| या पञ्चधा महेशानि | ४२३ |
| या पार्वत्या स्पर्धयन्ती | २१९ |
| या भर्तारं परित्यज्य | ६६२ |
| या भर्तृसेवामुत्सृज्य | ६६१ |
| याभ्यनेकं तोऽद्भवानाम् | १८१ |
| यावत्कल्पं महेशान | ४५५ |
| यावद्द्वात्रिंशतं मासान् | ३०८ |
| यावन्तस्तावद्घोरैश्च | ३७ |
| यावन्न क्रियते स्नानम् | ३५५ |
| यावन्न क्रियते स्नानम् | ३५५ |
| यावन्न ग्रसते मृत्युः | ४४२ |
| या स्वभर्तारमुत्सृज्य | ६६१ |
| यां मतिं समवाप्नोति | २३ |
| यां गतिं समवाप्नोति | ३७ |
| युद्धञ्च चक्रिरेऽन्योऽन्यम् | ४०८ |
| युद्धं चकार सुमहत् | १४ |
| युयुधुर्वीरवेतालम् | १२८ |
| युवाभ्यां सर्वथा नैव | १६० |

| प्रथम: पादः | पृष्ठम् |
|---|---|
| यूयं सिद्धास्ते मुनयो | ४९७ |
| येन श्रवणमात्रेण | १९ |
| ये गणास्तु शिलारूपा | ६७५ |
| ये दीक्षितां समयां संश्रिता | १५० |
| ये न कुर्वन्ति वै मोहात् | १६२ |
| ये न कुर्वन्ति वै मोहात् | १७० |
| ये न कुर्वन्ति वै मोहात् | ६९७ |
| येन त्वया गोवधश्च | ८५ |
| येन दानेन मनुजः | ४५ |
| येन मार्गेण सा देवी | ५२१ |
| ये पुनर्मानवा लोके | २५५ |
| ये बिन्दवश्च्युता देवि | ४३४ |
| ये श्रयन्ति हि पुण्यम् | ६५ |
| ये स्नास्यन्ति पिबन्ति च | २३ |
| यैः स्नाता त्रिविधा गङ्गा | ९२ |
| यो कृत्वा ताण्डवं देवि | ४३७ |
| योगक्षेमविधात्रे च | १८८ |
| यो गच्छेन्महिषीमार्गेण | ३५३ |
| यो गत्वा पुनरायाति | ४३७ |
| योगदा योगिनी नाम | ३०० |
| योगिनीनां गणैर्यत्र | ४७५ |
| योगिनीश्चर्यापि | ३०१ |
| योजनाज्जायते यस्मात् | २२५ |
| यो ददाति विजिन्द्राय | ४२३ |





Printed at :

**S. N. Magotra Printing Press, Gali Khalonian, Jammu.**